चतुर्वर्गचिन्तामणिः

श्रीहेमाद्रिसूरि विरचितः

श्राद्धकल्पस्य

प्रथमोभागः

संपादकः—
प्रोफेसर विश्वनाथशास्त्री
काशीहिन्दूविश्वविद्यालयः

Rs 45/-

भारतसर्वकारानुमतकेन्द्रीयशिक्षामन्त्रालयसुदुर्लभ-
पुनर्मुद्रणसंस्कृतग्रन्थमालायाः द्वितीयं पुष्पम् ।

चतुर्वर्गचिन्तामणिः

श्रीहेमाद्रिसूरिविरचितः

श्राद्धकल्पस्य

प्रथमो भागः

संपादकः—
प्रोफेसर विश्वनाथशास्त्री
काशी हिन्दू विश्वविद्यालयः

वि० सं० २०२७

१ जनवरी १९७१ ई०

UNDER THE GOVERNMENT OF INDIA
MINISTRY OF EDUCATION
Reprinting of Important out of Print
Samskrit Book Series No. 2

SHRADDHAKALPA OF CHATURVARGA CHINTAMANI

PART I

By

SRI HEMADRI PANDIT

Edited by

PROFESSOR VISHWANATH SHASTRI

BANARAS HINDU UNIVERSITY

VARANASI 5.

॥ श्री विश्वनाथः प्रसीदतु ॥

आसिन्धोरातुषाराचलशिखरभुवः कीर्त्तिगङ्गाग्रभङ्गीः
स्वीकृत्योत्कृष्टनृत्यप्रचयपरिचिता यस्य लोके चरन्ती ।
शश्वद् वैमानिकानामकुरुत रयभृन्मन्दरावर्तनृत्यत्—
क्षीराकूपारवृद्धिं स जयति मतिमानेष हेमाद्रिसूरिः ॥

—❧•☙—

यो मन्थाचलमूलवेगविचलद्दुग्धाब्धिमुग्धोत्कली—
निष्ठ्यूतः स जगाम शक्रसदनं कश्चिन्मणिग्रामणीः ।
इत्यालोच्य विमथ्य शब्दजलधिं हेमाद्रिणा निर्मितो
दाता वर्गचतुष्टयस्य विमलश्चिन्तामणिर्नूतनः ॥

—❧•☙—

आराधनं हव्यभुजान्तु पञ्चमे खण्डे समस्तं प्रतिपाद्य कथ्यते ।
हेमाद्रिणा सम्प्रति कव्यभोजिनां श्राद्धस्य कल्पेन महोज्ज्वलश्रिया ॥

—❧•☙—

प्राक्कथनम्

विश्वोऽसौ यस्य वश्यः स्वयमपि सततं भक्तवश्यो य एव
साक्षाल्लक्ष्मीविहीनः क्षपयति जगतां लक्ष्म्यपूर्तिं क्षणेन ।
त्रैलोक्यान्तैकहेतुर्हितमतिरचयत्यर्चितो योऽचिरेण
विष्वक् तं विश्वनाथः प्रणमति शिरसा विश्वनाथैकनाथः ॥

ग्रन्थकर्तुः परिचयः

पादप्रान्तविनिःसृतद्युसरितो देवस्य लक्ष्मीपते-
र्वक्त्राम्भोरुहसम्भवा त्रिजगतीवन्द्या जयन्ति द्विजाः ।
रागद्वेषमदादिदोषविरहादन्तःस्फुरज्ज्योतिषां,
तेषामेव शिरोमणिर्विजयते विश्वाभिधानो मुनिः ॥१॥

गोत्रे तस्य बभूव निर्मलगुणश्रेणीभृतामग्रणी,
विद्याचारविवेकविक्रमनिधिः श्री वासुदेवः कृती ।
यत्कीर्त्या धवलीकृते त्रिभुवने श्रीकण्ठ-वैकुण्ठयोः
कैलासाचलदुग्धसिन्धुविषये नासीन्निवासी गृहे ॥२॥

नानादानप्रीणितप्राणिलोको-
लोकालोकप्रान्तविश्रान्तकीर्त्तिः ।
तस्मादासीन्नामतः कामदेवः,
पुण्याचारैर्मूर्त्तिमान् धर्म एव ॥३॥

विमलगुणमणीनामाकरः कामदेवा-
दभवदतुलतेजा नाम हेमाद्रिसूरिः ।
सकलकलिकलङ्कातङ्कपङ्कापहारी
सुरसरित इवौघः शार्ङ्गपाणेः पदाब्जात् ॥४॥

पुराऽपि यत्पुण्यमगण्यरूपं
श्रीकामदेवेन कृतं नु विद्मः ।
येनादरिद्रां जगतीं विधातुं
हेमाद्रिरप्यस्य गृहेऽवतीर्णः ॥५॥

चरितं तस्य हेमाद्रेरद्भुतं केन वर्ण्यते ।
उपैति प्रार्थितो यस्य सन्तानः कल्पवृक्षताम् ॥६॥

दृष्ट्वैव भावीनि यशांसि यस्य-
जगत्त्रयीमण्डलपण्डितानि ।
तथाविधं शिल्पमनल्पमिन्दो-
र्धाता विधातुं शिथिलादरोऽभूत् ॥७॥

असौ विसीमा महिमा हिमाद्रिं
हेमाद्रिसूरेरधरीकरोति ।
दूरादगम्यं मृगलोचनानां
येनाजडं मानसमेव धत्ते ॥८॥

कलाकलापं सकलं बिभर्ति
गवां सहस्राणि सदा ददाति ।
जगत्प्रसिद्धद्विजराजभाव-
स्तथापि यस्तारकतां दधाति ॥९॥

विध्वस्ताखिलवैरिणः किल महादेवस्य पृथ्वीपते-
राज्यक्षीरसमुद्रवर्द्धनशशी हेमाद्रिसूरिः परः ।
येन श्रीकरणाधिपत्यपदवीमासाद्य विद्यामपि,
न्यस्ता श्रीश्च सरस्वती च विदुषां गेहेषु देहेषु च ॥१०॥

जिज्ञासामिह कुर्वते कतिपये धर्मस्य तेभ्योऽपरे-
जानन्त्येव समस्तशास्त्ररचनादस्माभिरेवं पुनः ।
निःशेषैरभिधीयते क्षितितले हेमाद्रिसूरेः परो
ज्ञातुं वा चरितुं क्षमो न हि पुरा भूतो न भावी पुरः ॥११॥

ग्रन्थप्रशस्तिः

स सम्प्रति निरालोकलोकशङ्कापनुत्तये ।
विदधाति चतुर्वर्गचिन्तामणिमुदारधीः ॥१२॥

यं पूर्वं चारुचिन्तामणिममितगुणं मन्दराद्रिः समुद्रं
निर्मथ्य प्रायशोऽयं वितरति बहुशः प्रार्थनादर्थमेव ।
सम्प्रत्याऽऽलोच्य सर्वस्मृतिनिगमपुराणेतिहासाम्बुराशीन्
हेमाद्रिः स्पर्धयैव प्रकटयति चतुर्वर्गचिन्तामणिं सः ॥१३॥

रुन्धानमन्धानि तमांसि दूरे विचिन्त्य चिन्तामणिमेतमेव ।
मनोरथानां परिपूरणाय नान्यत्र सन्तः श्रममाचरन्तु ॥१४॥

अनन्यमनसा सोऽयं चिन्तामणिरुपासितः ।
विदधातु सदाऽशेषमनीषितफलानि वः ॥१५॥

ग्रन्थपरिचय :

खण्डानि चास्मिन् व्रत-दान-तीर्थ-
मोक्षाभिधानि क्रमशो भवन्ति ।
यत् पञ्चमं तत् परिशेषखण्ड-
मखण्डितो यत्र विभाति धर्मः ॥१६॥

धर्मो जयत्यभ्युदयैकहेतु-
र्यस्य प्रकारान् षडुदाहरन्ति ।

अवान्तरानेकविशेषयोगा-
दन्येऽपि यस्मिन् बहवो भवन्ति ॥१७॥

अमुष्य भेदानखिलान् प्रवक्तुं वाचस्पतेरप्यसमर्थभावः ।
महानुभावा मुनयोऽपि शास्त्रे तदेकदेशं प्रतिपादयन्ति ॥१८॥

तेनेह हेमाद्रिसुधीः स्वशास्त्रे साधारणं धर्मविशेषमाह ।
फलाभिलाषानभिलाषभेदात् काम्यञ्च नित्यञ्च समामनन्ति ॥१९॥

महामहोपाध्याय श्रीहेमाद्रिविरचितचतुर्वर्गचिन्तामणिर्नाम ग्रन्थोऽयं यत्र व्रत-खण्ड-कालखण्ड-श्राद्धखण्ड-परिशेषखण्डसमाख्याकैः, कस्यचिन्मते व्रतखण्ड-दानखण्ड-तीर्थखण्ड-मोक्षखण्ड-परिशेषखण्ड समाख्याकैः पञ्चभिरवयवैर्विभक्तः ।

स्मृतिनिबन्धकारेषु किल हेमाद्रिः प्रायेण सर्वोपरि वर्वर्त्ति । स किल दाक्षिणात्य-जनपदे वत्सगोत्रीयात् कामदेवनामकाद्द्विजोत्तमादुदभूत् । वासुदेवः पितामहः वामनदेवश्चास्य प्रपितामहः आसीत् । हेमाद्रिगस्तु देवगिरिस्थ यादववंशमहाराजा-धिराज महादेवचक्रवर्त्तिनो नृपतेः प्राड्विवाकापरपर्यायो धर्माधिकरणपण्डित आसीत्।

स राजा पक्षग्रहधरेन्दुमिते शकनृपतिवत्सरे समुदितवान् । हेमाद्रिश्च तत् समकालिक एवासीत् ।

चक्रवर्त्तिनो महादेवस्योत्तराधिकारिणः रामचन्द्रस्यापि राज्ञः प्रधानामात्य आसीदयमित्यपि अभिलेखात् प्रतीयते, तदाऽस्य १२६०-१२७० ई० समयः प्रतीयते ।

अनेन हेमाद्रिणा बहवो ग्रन्थाः विरचिताः इत्यपि प्रसिद्धिः ।

तथाहि :—

शौनकप्रणवकल्पभाष्यम् ।
कात्यायनानुसारिश्राद्धकल्पः ।
बोपदेवकृतमुक्ताफलस्य कैवल्यदीपकभाष्यम् ।
वैद्यकग्रन्थस्याष्टाङ्गहृदयस्य आयुर्वेदरसायनम् । इत्यादि ।

एते मौडिलिपेराविष्कर्तारः, विलक्षणप्रतिभावन्तः जैमिनिन्यायाभिज्ञाः, मन्दिरनिर्माणकलानिष्णाताः, सर्वतन्त्रस्वतन्त्राः पण्डिता आसन्निति महाविदुषा-माशयः ।

प्राचीनधार्मिककृत्यानां विश्वकोशरूपात्मको ग्रन्थः चतुर्वर्गचिन्तामणिः ।

हेमाद्रिणा विरचितस्यास्य सुबृहतश्चतुर्वर्गचिन्तामणिनाम्नः स्मृतिनिबन्धस्य प्रामाण्यं सर्वैरेवार्वाग्भवैः स्मृतिनिबन्धकारैरेविसंवादमङ्गीकृतम् । ग्रन्थगौरवेण व्यवस्थापनीयावश्यकविषयातिबाहुल्येनासंदिग्धप्रामाण्यानां श्रुतिस्मृतिपुराणेतिहासा-दिभ्यः समुद्धृतानां वचनानां प्राचुर्येण चायं 'चतुर्वर्ग-चिन्तामणिः' सर्वथैवा-ऽन्वर्थनामा इति सर्वेषां स्मृतिनिबन्धरसिकानां सूपपन्नं निर्वचनम् । अस्मिन् स्मृति-निबन्धे महाशास्त्रे ब्राह्मणादीनां वर्णानां ब्रह्मचर्यादीनामाश्रमाणामनुलोमप्रतिलोमजातानां सङ्करजातीनाञ्च षड्विधधर्मा विस्तरेणसाधारणधर्माश्चासंशयं निर्णीताः सन्ति। ग्रन्थो-

ऽयमतिकायः सर्वसाधारणैर्बहुवित्तव्ययायाससाध्यतयायत्तीकर्त्तुं बहुलतया च स्वयं लेखितुमयोग्यस्तेनास्य बिरलप्रचारतया निखिलधर्माचारव्यवहाराश्रयाः साधारणैरसंशयमवगन्तुं न शक्यन्तेऽतः करुणया सर्वजनगोचरार्थं-बंगीयएशियाटिकसोसाइटी समाजाध्यक्षमहोदयैः पूर्वं (१८९५ खीस्तीये वत्सरे) मुद्रापितम् । सम्प्रति तदपि दुर्लभं जातम् ।

इदानीं भारतसरकारानुग्रहेण प्राचीनदुर्लभपुस्तकपुनर्मुद्रण-संरक्षण-प्रकाशन-व्यवस्थयाऽस्य ग्रन्थस्य काशी हिन्दूविश्वविद्यालयद्वारा पुनर्मुद्रणं क्रियते । तत्र परिशेषखण्डान्तर्गतस्य श्राद्धखण्डस्य (श्राद्धकल्पस्य) आदौ प्रकाशनं निश्चितमतस्तस्यायं नवमाध्यायान्तः प्रथमो भागः प्रकाश्यते । श्राद्धखण्डात्मके षड्विंशति २६ अध्यायात्मके भागे त्रयो भागा भविष्यन्ति, तेषां प्रकाशनमतिशीघ्रं भविष्यतीत्याशासे ।

अस्मिन् कार्ये एशियाटिक सोसाइटी आदौ धन्यवादार्हा, ततः भारतसरकारः धन्यवादार्हः, तदनु काशीहिन्दूविश्वविद्यालयः । येषां कृपयाऽतिदुर्लभं ग्रन्थरत्नमिदं पुनः प्राकाश्यमेति ।

ग्रन्थसंपादकः

मीमांसापारदृश्वा निगमवरवनीसिंहविक्रान्तवीर्यो
धर्माम्भोधिप्रमथ्नद्विपुलबललसन्मन्दरोदारदर्पः ।
सद्बाल्योल्लासलीलालुलितपदधुनीदन्तिदृप्यत्प्रतापः
शास्त्री श्री विश्वनाथो जगति विजयते विद्वदाश्चर्यचर्यः ॥

संपादकः—
विश्वनाथशास्त्री

विषयानुक्रमणिका

प्रथमोऽध्यायः

विषयः श्राद्धविधिफलप्रशंसाप्रकरणम् पृष्ठसंख्या

इतिप्रथमोऽध्यायः

अथ द्वितीयोऽध्यायः

विषयः पितृनिरूपणप्रकरणम् पृष्ठसंख्या

इति द्वितीयोऽध्यायः

अथ तृतीयोऽध्यायः

विषयः देवतानिर्णयप्रकरणम् पृष्ठसंख्या

इति तृतीयोऽध्यायः

अथ चतुर्थोऽध्यायः

इतिचतुर्थोऽध्यायः

अथ पञ्चमोऽध्यायः

विषयः	श्राद्धकालनिर्णयप्रकरणम्	पृष्ठसंख्या

इति पञ्चमोऽध्यायः

अथ षष्ठोऽध्यायः

इति षष्ठोऽध्यायः

अथ सप्तमोऽध्यायः

इतिसप्तमोऽध्यायः

अथाष्टमोऽध्यायः

इत्यष्टमोऽध्यायः

अथ नवमोऽध्यायः

विषयः	श्राद्धोपकरणानि		पृष्ठसंख्या

इतिनवमोऽध्यायः

इति प्रथमो भागः ।

———

॥ ॐ नमः श्रीगणेशाय ॥

चतुर्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे

प्रथमोऽध्यायः

अथ श्राद्धविधिफलप्रशंसाप्रकरणम्

क्षीरोदार्णवसारसङ्ग्रहकलालीलासमालिङ्गितो
भ्राम्यन्मन्दरकूटकोटिघटनानिर्मृष्टरत्नाङ्गदः ।
उन्मीलन्नवनीलनीरजदलश्रेणिप्रभामण्डल-
श्लाघालङ्घनजाङ्घ्रिकच्छविरसौ पायादपायाद्धरिः ॥१॥

गणेशं वन्देऽहं मदजलगलन्निर्झरसरित्-
परामोदास्वादप्रसृतमनसां क्रीडनवताम् ।
द्विरेफद्वन्द्वानां कलसरसहुङ्कारसुरस-
स्वरप्रायैर्गेयैः श्रवणपुटपेयैः प्रमुदितम् ॥२॥

देवीं शारदकौमुदीमदहरस्फारप्रभामण्डली-
लेशक्लेशितदुस्तरान्तरतमस्तोमोद्धवापद्धराम् ।
सीमन्तान्तनिवेशितोज्ज्वलकलासर्वाङ्गनिर्य्यत् सुधा-
धाराधोरणिपूरिताम्बरतलां वन्दामहे शारदाम् ॥३॥

यामासाद्यपदैश्चतुर्भिरभितो लब्धोदयामासते
कर्त्तुं संव्यवहारमाहुरिह ते सर्वेऽप्यमी नान्यथा ।
या चैषोपनिषन्मयीं तनुमनुप्राप्ता व्युदस्य भ्रमं
स्वैरानन्दपदं परं वितनुते तां नौमि देवीं गिरम् ॥४॥

तां वाचं समुपास्महे परिमिता यासौ चतुर्भिः पदैः
वेदैर्यत् परिपाकमेतदखिलं ब्रह्माण्डमाहुर्बुधाः ।
यस्याः प्राप्य परं प्रसादमयते सर्व्वोऽपि सर्व्वज्ञतां
हीनस्तेन तु पङ्कजासनशयो ब्रह्मापि जिह्मायते ॥५॥

यदग्रे क्षोदीयस्तरबदरमात्रेऽपिविधिना
विना वा केनापि क्वचिदपि च पिण्डे विनिहिते ।
गलत्पापालेपास्त्रिदशपदमायान्ति पितरो
नमस्तस्मै कुर्म्मो मखमयगयास्थाय हरये[१] ॥६॥

---

१. निरवहितगुरुयागाय महते इति पाठोऽपि ।

प्रदत्तपिण्डान् स्वपुरः सपिण्डैः प्रभूतपापान्नरकौकसोऽपि ।
समुद्धरन्तं कृपयादिदेवं गदाधरं नौमि गयाशिरस्थम् ॥७॥

वसून् वसूपाहरणे समुद्यतान्
रुद्रान् विमुद्रान् हतयोगसम्पदः ।
नमामि सत्कर्मपथप्रवर्त्तका-
नादित्यनाम्नस्त्रिदशेशपूजितान् ॥८॥

यन्निस्त्रिंशविशीर्यमाणसुभटत्रुट्यत्करोटीचटत्-
कारस्फारविरावभैरवरणक्षोणीक्षणक्रीडिनः ।
नृत्यन्ति स्म गलद्गलास्त्रमिलितस्कन्धाः [१]कबन्धा मुहुः
योऽभूद्विक्रमनिर्जितोर्ज्जितरिपुः श्रीशङ्घणो भूपतिः ॥९॥

यस्योद्यत्करवालकालभुजगी निष्पीतभूयोऽखिल-
प्रत्यर्थिक्षितिपालपुष्कलयशः क्षीरातितृप्ता सती ।
तन्द्रालुः परिहृत्य घोरसमरक्रीडारसे निर्भरं
बध्नाति स्म महावकाशविलसत्कोषप्रवेशे मतिम् ॥१०॥

एतस्मादभवत् प्रौढप्रतापानलदुर्जयः ।
तनूजो विजितारातिर्जैत्रपाल इतीरितः ॥११॥

तस्मादपि महादेवः पालिताशेषभूतलः ।
विजिताशेषदिक्चक्रो विक्रमैकरसोऽभवत् ॥१२॥

यत्प्रतापानलज्वालातूलासु परिपातुकम् ।
अमित्रमण्डलं भेजे शलभावलिकल्पताम् ॥१३॥

यस्येशस्य धनुर्विमुक्तविशिखव्रातव्रणास्य स्रव-
द्विभ्राडस्त्रविनिर्मिताखिलसरित्पूरेषु भूरेणवः ।
मिश्रीभूय सकङ्कपङ्कविषमां सङ्ग्रामभूमिं व्यधुः
यस्यामोघपराक्रमस्य महिमा वर्ण्यः कथं भूपतेः ॥१४॥

यः श्रीमत्करपुष्करच्युतमहादानाम्बुधाराभरात्
संसिञ्चन् वरविप्रवर्यनिवहान् यान् धर्मकल्पद्रुमान् ।
चक्रे पल्लवितान् महीतलमिलच्छायाघने तद्वने
लोकः शोकमुदस्य निर्वृतिमयीं लेभे शुभां सुस्थितिम् ॥१५॥

यद्वज्राग्रविनिर्गतोग्रकिरणप्राग्भावराहुग्रह-
ग्रस्ते वैरिकुलप्रतापतपने यः पुण्यकालोऽभवत् ।
तस्मिन्नायतवाहिनीषु धवलप्रोत्तालवज्रावली-
कल्लोलाकुलितासु वीरनिकरं स्वैरं न्यमज्जच्चिरम् ॥१६॥

---

[१] गलद्गलास्त्रकलितस्कन्धा इति ।

भूपेन तेनाथ कृतोऽधिनाथः स्फारश्रिया श्रीकरणे मनस्वी ।
हेमाद्रिनामास्य च वर्ण्यमानं वंशं समाकर्णयत प्रकाशम् ॥१७॥

स्वाध्यायाध्ययनप्रवीणधरणीगीर्व्वाणचूडामणिः
वंशे वत्समुनेर्मनोहरगुणग्रामाभिरामाकृतिः ।
जज्ञे वामनसञ्ज्ञको बलिकथागाथासमुन्मीलित-
प्रत्यग्राप्रतिमप्रभावरुचिरां यः प्राप लक्ष्मीं पराम् ॥१८॥

स प्रासूत सुतं नवोज्ज्वलकलासम्भारगोष्ठीसदं
भूतस्फीतगलोद्गलन्नवरसप्रह्लादिवेदोदयम् ।
पुण्यावर्त्तनसर्गसज्जनमनःसन्तोषवर्षाम्बुदं
शश्वद्वेदरहस्यवस्तुरसिकं श्रीवासुदेवाह्वयम् ॥१९॥

आसीत्तस्मादभिनवसुधासोदरालापलीलः
शीलाचारप्रवरधिषणातोषिताशेषलोकः ।
सत्यां वाचं त्यजति न पुरा क्वापि यः सङ्कटेऽपि
प्रज्ञाराशिः सुकृतरसिको नामतः कामदेवः ॥२०॥

येनाचार्य्यवरार्य्यसङ्गतिमता निर्व्वाह्यमौञ्जीव्रतं
कृत्वा दारपरिग्रहं विदधिरे कर्म्माणि गृह्याणि च ।
वेद्यावेद्यमहेन्द्रजालदलनं क्षेमङ्करं शाङ्करं
ज्योतिः किञ्चिदुपासितुं स जगृहे वर्य्यस्तुरीयाश्रमम् ॥२१॥

तस्माद्विस्मयनीयपुण्यचरितो हेमाद्रिनामाजनि
प्रत्यग्राप्रतिमप्रभावविकसद्विश्वोत्तरश्रीनिधिः ।
योऽसौ सर्व्वकलाविशारदशिरोरत्नाङ्कुरो भास्वरः
सर्व्वश्रीकरणेश्वरो नृपमहादेवस्य मान्योऽभवत् ॥२२॥

यस्याज्ञां स्वविशालमौलिवलभीसिंहासने सादरं
क्ष्मापालाः परिपाल्य निर्ज्जितनिजव्यापज्ज्वराः शेरते ।
किञ्चोल्लासितदीप्यमानमहसो वर्द्धिष्णुजिष्णुश्रियः
श्लाघां दिक्षु विदिक्षु चातिमहतीमासादयन्ति क्षणात् ॥२३॥

यः कीर्त्तिप्रसरावधीरितविधुप्रत्यग्ररोचिश्च यः
चक्रे विक्रमचातुरीमदजुषः शत्रूनपास्तश्रियः ।
यश्च प्रह्वशिरः किरीटघटनानिर्मृष्टसेवावनं
धन्यन्त्वन्यदुरापरीतिरसिकामृद्धिं निनायाचिरात् ॥२४॥

सोऽयं सेवाप्रसङ्गे विनयनयलसन्मण्डलाधीशमौलि-
प्रत्युप्तोद्दीप्तरत्नद्युमणिकरभरभ्राजमानाङ्घ्रिपद्मः ।
श्री हेमाद्रिः कराग्रक्षरदमलजलप्रत्तवित्तप्रवाहैः
लोके कस्येह जिह्वां निजगुणगणनालोलमूलां न चक्रे ॥२५॥

आसिन्धोरातुषाराचलशिखरभुवः कीर्त्तिगङ्गाप्रभङ्गीः
स्वीकृत्योत्कृष्टनृत्यप्रचयपरिचिता यस्य लोके चरन्ती ।
शश्वद् वैमानिकानामकुरुत रयभृन्मन्दरावर्तनृत्यत्-
क्षीराकूपारवृद्धिं स जयति मतिमानेषहेमाद्रिसूरिः ॥२६॥

ज्ञातुं नीतिरहस्यमस्य गुरुतां यश्चेहते शिष्यतां
नूनं सोऽपि बृहस्पतिः स च कविर्यस्तेन संस्पर्द्धते ।
सोऽयं चित्रचरित्रमान्यमहिमा मन्त्रीन्द्रचूडामणिः
हेमाद्रिर्न निनाय विस्मयरसं कं धीरधुर्य्यं नरम् ॥२७॥

येनाचारविचारचारुचरितश्लाघ्येन तीव्रव्रत-
व्रातप्रीणितनन्दनन्दनघनप्रेमप्रवृद्धश्रिया ।
दत्तैर्विप्रगणाङ्गनानि गणनातीतैर्धनैश्चक्रिरे
भूभृत् कोषनिवेशभङ्गिमचमत्कारोत्किराणि क्षणात् ॥२८॥

क्षौमं दिङ्नायिकानां सितरुचिरुचिरा हारयष्टिः क्षमायाः
सद्यः सम्फुल्लमल्लीकुसुमचयमयी द्योवधूकेशभूषा ।
ब्रह्माण्डोदण्डवेश्मोदरनिहितसुधालेपलक्ष्मीर्यदीया
कीर्त्तिर्हेमाद्रिमन्त्री स जयति जगतीभूषणं धर्मसेतुः ॥२९॥

येनाभोज्यनुवासरं रसलसल्लेह्यादिभेदास्पदैः
अन्नैर्भिन्नगुणक्रियाक्रमगतस्वादूपदंशान्वितैः ।
विप्राणां खलु साङ्गवेदविदुषां तिग्मं सहस्रत्रयं
हर्षोत्कर्षमनायि चातिबहुभिः स्वर्णैर्विकीर्णैर्मुहुः ॥३०॥

हरिहरमहाभक्तिव्यक्तप्रविभूतविभूतिमान्
उपचितनिजप्रज्ञो यज्ञक्रियाक्रमसुन्दरः ।
गुणमणिगणश्रेणिश्रीमत्प्रकाशविकस्वरः
करणतिलकः श्रीहेमाद्रिः कथं स हि वर्ण्यते ॥३१॥

प्रणीतञ्च चतुर्वर्गचिन्तामणिसमाह्वयम् ।
शास्त्रं तेन समस्तार्त्तनिःशेषार्त्तिनिवर्त्तकम् ॥३२॥

यो मन्थाचलमूलवेगविचलद्दुग्धाब्धिमुग्धोत्कली
निष्ठ्यूतः स जगाम शक्रसदनं कश्चिन्मणिग्रामणीः ।
इत्यालोच्य विमथ्य शब्दजलधिं हेमाद्रिणा निर्मितो
दाता वर्गचतुष्टयस्य विमलश्चिन्तामणिर्नूतनः ॥३३॥

इहानुपूर्वेण विनिर्मितानि पञ्च प्रपञ्चेन च खण्डकानि ।
व्रतेषु दानेषु च तीर्थसार्थे मोक्षे च शेषेऽथ तथार्थजाते ॥३४॥

आराधनं हव्यभुजान्तुपञ्चमे खण्डे समस्तं प्रतिपाद्य कथ्यते ।
हेमाद्रिणा सम्प्रति कव्यभोजिनां श्राद्धस्यकल्पेन महोज्ज्वलश्रिया ॥३५॥

बहूनि शास्त्राणि विमृश्य रच्यते श्राद्धस्य कल्पोऽयमतिप्रयत्नतः।
इहोपनेयः सहसा न केनचित् दोषो लघीयानपि बुद्धिशालिना ॥३६॥

तत्रचाद्ये प्रकरणे स हेमाद्रिः शुभाशयः।
फलप्रशंसासंयुक्तं वक्ति श्राद्धविधिं सुधीः ॥३७॥

उक्तमादौलिङ्गप्रतिमाद्यधिष्ठाने शिवविष्णुगणेशादिदेवतानामाराधनम्। अनन्तरं गवाधिष्ठाने देवतारूपाणां नन्दादिकामधेनूनां हरिहरादीनाञ्चाराधनम्।

अथेदानीं ब्राह्मणादिरूपाधिष्ठाने वसुरुद्रादित्यपितृमत्सोमाङ्गिरसयमकव्यवाहनाग्निसोमपाज्यपाग्निष्वात्तादीनां महामहिम्नां पितृरूपाणां देवतानामाराधनमुच्यते, आराधनञ्च मनसः प्रीणनं, तस्य चोपायः श्राद्धलक्षणं कर्म्म। अतस्तदुच्यते।

तत्र तावद्विधिः स्वविधेयेऽर्थे पुरुषं प्रवर्त्तयन् स्वसाध्यपुरुषप्रवृत्त्यतिशयकारिणीं विधेयप्ररोचनामपेक्षमाणो विधेयरुच्युत्पादकानि प्रशंसावचनान्यपेक्षते फलवचनानि च। यथैवेते पुरुषा विधेये प्रवर्त्तन्ते तथैव तद्विषये ग्रन्थे श्रोतारः। अतस्तेषामपि तत्र विधिफलप्रशंसावाक्यानि प्रवर्त्तकानीति श्राद्धविषयाणि। तान्येव प्रथममभिलिख्यन्ते। तानि च परस्परान्वयादेकवाक्यतां गतानीत्येकमेवेदं प्रकरणम्।

आह सुमन्तुः।

श्राद्धात् परतरं नान्यच्छ्रेयस्करमुदाहृतम्।
तस्मात् सर्वप्रयत्नेन श्राद्धं कुर्य्याद्विचक्षणः॥

ब्रह्मपुराणे।

तस्माच्छ्राद्धं नरो भक्त्या शाकैरपि यथाविधि।
कुर्वीत श्रद्धया तस्य कुले कश्चिन्न सीदति॥

विष्णुपुराणे।

पितृगीतास्तथैवात्र श्लोकास्तांश्च शृणुष्व मे[१]।
श्रुत्वा तथैव भवता भाव्यं तत्राद्दतात्मना[२]॥
अपि धन्यः कुले जायादस्माकं[३] मतिमान् नरः।
अकुर्वन् वित्तशाठ्यं यः पिण्डान् नो निर्वपिष्यति[४]॥

रत्नवस्त्रमहीयान सर्व्वभोगादिकं[५] वसु।
विभवे सति विप्रेभ्यो योऽस्मानुद्दिश्य दास्यति॥
अन्नेन वा यथाशक्त्या कालेऽस्मिन् भक्तिनम्रधीः।
भोजयिष्यति विप्राग्र्यान् तन्मात्रविभवो नरः॥

---

१ पितृगीतास्तथेमाश्चश्लोकास्ताः शृणुपार्थिव इति।
२ तत्र धृतात्मना इति।
३ भूयादस्माकमिति।
४ पिण्डान् निर्वापयिष्यति इति।
५ रत्नवस्त्रमहायान सर्वभोगादिकमिति।

नागरखण्डे

लोकान्तरेषु ते तोयं लभन्ते नान्नमेव च ।
दत्तं न वंशजैर्येषां ते व्यथां यान्ति दारुणाम् ॥
क्षुत्पिपासासमुद्भूतांस्तस्मात् सन्तर्पयेत्पितॄन् ।
नित्यं शक्त्या यथा राजंस्तोयैर्भोज्यैः पृथग्विधैः ॥
तथान्नैर्वस्त्रनैवेद्यैः पुष्पगन्धानुलेपनैः ।
पितृमेधादिभिः पुण्यैः श्राद्धैरुच्चावचैरपि ॥
तर्पितास्ते प्रयच्छन्ति कामानिष्टान् हृदिस्थितान् ।
त्रिवर्गञ्च महाराज पितरः श्राद्धतर्पिताः ॥

कूर्मपुराणे ।

योऽनेनविधिना श्राद्धं कुर्याद्वै शान्तमानसः ।
व्यपेतकल्मषो नित्यं याति नावर्त्तते पुनः ॥

यमस्मृतौ

इममत्र विधिश्रेष्ठं कामार्थं कल्पितं द्विजैः ।
ये विप्रा ह्यनुवर्त्तन्ते तेषां लोकाः सनातनाः ॥
आयुः पुत्रान् यशः स्वर्गं कीर्त्तिं पुष्टिं बलं श्रियम् ।
पशून् सौख्यं धनं धान्यं प्राप्नुयात् पितृपूजनात् ॥

ब्रह्मपुराणे

एवं सम्यग्गृहस्थेन देवताः पितरस्तथा ।
सम्पूज्या हव्यकव्याभ्यामन्नेनातिथिबान्धवाः ॥
आचारमाचरेत्तत्र पितृमेधाश्रितं नरः ।
आयुषा धनपुत्रैश्च वर्द्धते नैव संशयः ॥

देवलस्मृतौ

अरोगः प्रकृतिस्थश्च चिरायुः पुत्रपौत्रवान् ।
अर्थवानर्थभोगी च श्राद्धकामो भवेदिह ॥
परत्र च परां पुष्टिं लोकांश्च विपुलान् शुभान् ।
श्राद्धकृत् समवाप्नोति यशश्च विपुलं नरः ॥

ब्रह्मवैवर्त्तवायुपुराणयोः

देवकार्य्यादपि सदा पितृकार्य्यं विशिष्यते ।
देवताभ्यः पितॄणां हि पूर्व्वमाप्यायनं शुभम् ॥

सर्व्वेषु दैवेषु कर्मसु कर्म्माङ्गश्राद्धस्य पूर्वमनुष्ठानात् देवेभ्यः पूर्वं पितॄणामाप्यायनमिति विष्णुधर्मोत्तरे वराहवचनम् ।

अद्यप्रभृति लोकेषु प्रेतानुद्दिश्य वै पितॄन् ।
ये तु श्राद्धं करिष्यन्ति तेषां पुष्टिर्भविष्यति ॥
श्राद्धकाले तथान्नेन पिण्डनिर्व्वपणं तथा ।
पितॄणां ये करिष्यन्ति तेषां पुष्टिर्भविष्यति ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
तेषां त्रयः पूजिताश्च भविष्यन्ति तथाग्नयः ॥
त्रयो लोकास्त्रयो वेदास्तथैव च युगत्रयम् ।
पूजिताश्च त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥
पूजितस्तैर्भविष्यामि चतुरात्मा तथाप्यहम् ।
पैतृपैतामहः पिण्डो वासुदेवः प्रकीर्तितः ॥
पैतामहश्च निर्द्दिष्टस्तथा सङ्कर्षणः प्रभुः ।
पितृपिण्डस्तु विज्ञेयः प्रद्युम्नश्चापराजितः ।
आत्मानिरुद्धोविज्ञेयः पिण्डनिर्व्वपणे बुधैः ॥
एवं सम्पूजितस्तेन चतुरात्मा ह्यहं स्थितः ।
भविष्यामि प्रदास्यामि तस्य कामान् तथेप्सितान् ॥
चत्वारः पूजिता वेदाश्चत्वारश्च तथाश्रमाः ।
पुरुषार्थाश्च चत्वारश्चतस्रश्च तथा दिशः ॥
चत्वारश्च तथा वर्णाश्चत्वारश्च तथा युगाः ।
पितृपितामहस्यायं पैतृपैतामहः प्रपितामह इत्यर्थः ॥

यमस्मृतौ

ये यजन्ति पितॄन् देवान् ब्राह्मणांश्च हुताशनान् ।
सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते ॥

ब्रह्मपुराणे

एवं विधानतः श्राद्धं कृत्वा स्वविभवोचितम् ।
आब्रह्मस्तम्बपर्यन्तं जगत् प्रीणाति मानवः ॥

विष्णुपुराणे

ब्रह्मेन्द्र-रुद्र-नासत्य-सूर्य्याग्नि-वसु-मारुतान् ।
विश्वान्देवान् ऋषिगणान्[१] वयांसि मनुजान् पशून् ॥
सरीसृपान् पितृगणान् यच्चान्यद्भूतसंज्ञकम्[२] ।
श्राद्धं श्रद्धान्वितः कुर्व्वन् तर्पयत्यखिलं हि तत्[३] ॥

---

[१] पितृगणानिति ।
[२] यच्चान्यत्भूतसंज्ञितमिति ।
[३] प्रीणयत्यखिलंजगदिति ।

येन केनचित् पुरुषेण स्वीयपितृपितामहोद्देशेन श्राद्धे क्रियमाणे ब्रह्मेन्द्रादीना मनुद्दिष्टानामप्यनेकेषामेकस्मिन्नेव प्रयोगे युगपत्प्रीतिरन्यकुलोत्पन्नानामपि सरीसृपादीनाञ्च तृप्तिः स्यादिति वचनार्थः। श्राद्धकर्तृकुलोत्पन्नानान्तु नानायोनिगतानामनुद्दिष्टानामप्यनेकेषामेकस्मिन्नेव प्रयोगे तत्तच्छ्राद्धक्रियावयवैस्तृप्तिः स्यादिति व्यक्तमुक्तम् मार्कण्डेय-स्कान्द-ब्रह्मपुराणेषु।

अन्नप्रकिरणं यत्तु मनुष्यैः क्रियते भुवि।
तेन तृप्तिमुपायान्ति ये पिशाचत्वमागताः॥
यत्तोयं[१] स्नानवस्त्रेभ्यो भूमौ पतति पुत्रक।
तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते॥
यास्तु गन्धाम्बुकणिकाः पतन्ति धरणीतले।
ताभिराप्यायनं तेषां ये च तिर्य्यक्कुलेगताः॥
ये चादन्ताः कुले बालाः क्रियायोग्या ह्यसंस्कृताः।
विपन्नास्ते तु विकिरसम्मार्जनजलाशिनः॥
भुक्त्वा चाचमनं यच्च जलं यच्चाङ्घ्रिशौचजम्।
ब्राह्मणानां तथैवान्ये तेन तृप्तिं प्रयान्ति वै॥
पिशाचत्वमनुप्राप्ताः कृमिकीटत्वमेव च।
एवं यो यजमानस्य यश्च तेषां द्विजन्मनाम्।
कश्चिज्जलान्नविक्षेपो हविरुच्छिष्टमेव वा।
तेनान्नेन कुले तत्र तत्तद्योन्यन्तरं गताः॥
प्रयान्त्याप्यायनं वत्स सम्यक् श्राद्धक्रियावताम्॥
अन्यायोपार्जितैरर्थैर्यच्छ्राद्धं क्रियते नरैः।
तृप्यन्ति तेन चाण्डाल पुक्कसाद्यासु योनिषु॥
एवमाप्यायनं वत्स बहूनामपि बान्धवैः।
श्राद्धं कुर्वद्भिरन्नाम्बुशाकैरपि हि जायते॥

नागरखण्डे।

श्राद्धे तु क्रियमाणे वै न किञ्चिद् व्यर्थतां व्रजेत्।
उच्छिष्टमपि राजेन्द्र तस्माच्छ्राद्धं समाचरेत्॥
विप्रपादोदकं यच्च भूमौ पतति पार्थिव।
तेन ये गोत्रजाः केचिदपुत्रा मरणं गताः।
तावत् पुष्करपात्रैस्तु पिबन्ति पितरो जलम्॥
श्राद्धे प्रक्रियमाणे तु यत् किञ्चित् पतति क्षितौ।
पुष्पगन्धादिकं चान्नमपि तोयं नरेश्वर॥
तेन तृप्तिं परां यान्ति ये कृमित्वमुपागताः।
कीटत्वं वाऽपि तिर्यक्त्वं व्यालत्वं वा नराधिप॥

---

[१] यद्वाम्बु इति।

यदुच्छिष्टं क्षितौ याति पात्रप्रक्षालनोद्भवम् ।
तेन तृप्तिं परां यान्ति ये प्रेतत्वमुपागताः ॥
ये चापमृत्युना केचिन्मृत्युं प्राप्ताः सवंशजाः ।
विकिरेण प्रदत्तेन ते तृप्तिं यान्ति चाखिलाः ॥

तदेवं श्राद्धावयवैः केषामपि वंश्यानां तृप्तिरुक्ता । ब्राह्मणभोजनादिना प्रधान-कर्मणा तु मुख्यानामुद्दिश्यमानानां पितृपितामहादीनां तृप्तिर्भवतीत्युक्तम् ।

स्कान्दे ।

पितॄनुद्दिश्य यत्कव्यं ब्राह्मणेभ्यश्च दीयते ।
सम्यक्श्रद्धापरैर्मर्त्यैस्तद्भवेत् तृप्तिदं महत् ॥
पितॄणां सर्व्वदेवेश इत्येषा वैदिकीश्रुतिः ॥
पितुः पितामहस्यापि तत्पितुश्च ततः परम् ।
समुद्देशेन दत्तेन ब्राह्मणेभ्यः प्रभक्तितः ।
सर्व्वेषां स्यात् परा तृप्तिर्यावदाभूतसंप्लवम् ॥

ननु पुण्योत्कर्षवतां स्वर्गलोकं गतानां मनुष्यपितृपितामहादीनां अमृताहाराणां[१] सतां कथं ब्राह्मणभोजनविनष्टेन मानुषेणचान्नेन तृप्तिः सम्भवति । पापीयसां वा तिर्य्यग्योनिगतानां तृणाद्याहाराणां सतां प्रेतादिरूपत्वं गतानां वा रुधिराद्याहाराणां सतामित्युक्तं पाद्म-मात्स्ययोः ।

यदि मर्त्यैर्द्विजैर्भुक्तं हूयते यदि वानले ।
शुभाशुभात्मकैः प्रेतैस्तद्दत्तं भुज्यते कथम् ॥

अस्याक्षेपस्य समाधानं तत्रैवोक्तम् ।

तत्राह देवलः ।

देवो यदि पिता जातः शुभकर्म्मानुयोगतः ।
तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति ॥
गान्धर्वे भोग्यरूपेण पशुत्वे च तृणं भवेत् ।
श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति ॥
पानं भवति यक्षत्वे राक्षसत्वे तथामिषम् ।
दानवत्वे तथा मांसं प्रेतत्वे रुधिरोदकम् ॥
मनुष्यत्वेऽन्नपानादि नानाभोगरसो भवेत् ।।इति।।

ननु यथा क्षीरस्य दधिरूपेण परिणामः, दध्नश्च तक्रादिरूपेण प्रत्यक्षतो दृश्यते, नैवं भोज्यमानस्य हूयमानस्य वा अमृतादिरूपेण तृणादिरूपेण वा परिणामो दृश्यते । न च परिणतस्यापि स्वातन्त्र्येण क्रियाशक्तिशून्यस्य देशान्तरगतप्राणिप्राप्तिः सम्भवति । नापि नानाकर्म्मवशङ्गतानां प्रमीतप्राणिनां श्राद्धदेशोपसर्पणमुपपद्यते । नापि चास्य

---

[१] अमृतान्धसामिति ।

सुपर्णगन्धर्व्व-यक्ष-राक्षस-प्रेत-पिशाच-नर-किन्नर-पशु-पक्षि-कृमि-कीटादि कोटिजाति-सहस्रतिरस्कृतस्वरूपैः श्राद्धकर्तृपूर्वजैः सह स्वयं विविच्य सम्बन्धः सम्भवतीत्याद्याक्षेपाः पुराणेषु सूचिताः ।

पाद्म-मात्स्ययोः ।

कथं कव्यानि दत्तानि हव्यानि च जनैरिह ।
गच्छन्ति पितृलोकं वा प्रापकः कोऽत्र गद्यते ॥

विष्णुपुराणे ।

तृप्तये जायते पुंसो भुक्तमन्येन चेत्ततः ।
दद्यात् श्राद्धं श्रद्धयान्नं न वहेयुः प्रवासिनः ॥

स्कान्दे ।

मृतानां यदि जन्तूनां श्राद्धमाप्यायनं ततः ।
निर्वाणस्य प्रदीपस्य तैलं सम्वर्द्धयेच्छिखाम् ॥

नागरखण्डे ।

किमर्थं क्रियते श्राद्धममावास्यादिषु द्विजैः ।
मृताश्च पुरुषा विप्र स्वकर्मजनितां गतिम् ॥
गच्छन्ति ते कथं तस्य सुतस्याश्रममाप्नुयुः ॥

परिहारा अपि पुराणेष्वेव सूचिताः ।

तत्र मात्स्य-पाद्मयोः ।

नामगोत्रं पितॄणान्तु प्रापकं हव्यकव्ययोः ।
श्राद्धस्य मन्त्रास्तद्वच्च उपलभ्यानि भक्तितः ॥
पित्रादिनामादीनि उपलभ्यानि ज्ञातव्यानीत्यर्थः ।

नन्वचेतनत्वान्नामादीनां कथं हव्यकव्यप्रापकत्वमित्याशङ्कयोक्तम् ।

अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिता इति ॥ अग्निष्वात्तादयः पितृविशेषाणामाद्यधिष्ठातारः प्रापका इत्युक्तं भवति ।

ननु यदि नामगोत्रं प्रापकं तर्हि नामगोत्राज्ञाने श्राद्धं क्रियमाणमनर्थकं स्यात् । तथा च "यदि नाम न विन्द्यात् स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिण्डं दद्यात्" इत्यापस्तम्बसूत्रविरोधइत्याशङ्कय च ऊहपदस्यापि प्रापकत्वं दर्शितं तत्रैव ।

नाममन्त्रास्तदादेशा भवान्तरगतानपि ।
प्राणिनः प्रीणयन्त्येते तदाहारत्वमागतान् ॥

तदादेशा नामगोत्रमन्त्रादीनामादेशा ऊहादिप्रकारेण विपरिवर्त्तिताः शब्दा इत्यर्थः ।

अर्थान्तरञ्च। देवदत्तादिनामसु शून्यप्रकाशकेषु च मन्त्रेषु कथञ्चिदपि सम्बन्धमलभमानानामग्निष्वात्तादि प्रकाशकानां मन्त्राणाम् अतत्प्रकाशका नाममन्त्राश्चादेशास्तत्कार्य्यकारिण इत्यर्थः।

ब्राह्मणैरभ्यनुज्ञातः स्वपितॄणाञ्च नामधृक्।
तानेवार्च्चयते सम्यक् विधिमन्त्रबहिष्कृतान्॥

इतिवाराहपुराणस्मरणात्

भवान्तरगतानपीत्यनेकदेशकालयोन्यवस्थान्तरगतानपीत्यर्थः। तदाहारत्वमागतानित्यनेन प्रदत्तस्य हविषस्तत्तद्योनिसमुचितसुधाद्याहाररूपेण परिणामत्वं[१] मन्त्रादेरेवालौकिकस्य हेतोरुक्तम्। मन्त्रादिग्रहणं श्राद्धीयस्य सर्व्वस्यापि विधेरुपलक्षणार्थम्।

अतएव वायुपुराणे

काले न्यायागतं पात्रे विधिना प्रतिपादितम्।
अन्नं नयन्ति तत्रते जन्तुर्यत्रावतिष्ठते॥

यथा गोषु प्रणष्टासु वत्सो विन्दति मातरम्।
तथान्नं नयते विप्रो जन्तुर्यत्रावतिष्ठते॥

नामगोत्रञ्च मन्त्रश्च दत्तमन्नं नयन्ति ते।
अपि योनिशतं प्राप्तान् तृप्तांस्तानुपतिष्ठति॥

तदेवं श्राद्धदेशं प्रत्यनागतान् लोकान्तरस्थानेव पितॄन् प्रति मन्त्रादयो हविः प्रापयन्तीत्युक्तम्।

एवमेव वायुपुराणे निरवस्थान् प्रेतस्थानस्थितांश्च पितॄनभिधायोक्तम्।

तेषां लोकान्तरस्थानां विविधैर्नामगोत्रकैः।
भूम्यामसव्यं दर्भेषु दत्ताः पिण्डाः सुतैस्तु वै[२]॥

यान्ति तांस्तर्पयन्त्येव प्रेतस्थानस्थितान् पितॄन्।
अप्राप्ता यातनास्थानं श्रेष्ठा ये भुवि पञ्चधा॥

नानारूपासु जाता ये तिर्यग्योन्यादिजातिषु।
यदाहारा भवन्त्येते तासु तास्विह योनिषु।
तस्मिंस्तस्मिंस्तदाहारं श्राद्धान्नमुपतिष्ठति॥

विष्णुधर्मोत्तरे दिव्यान् पितृगणानभिधायोक्तम्।

एते श्राद्धस्य भोक्तारो विश्वेदेवैः सदा सह।
एते श्राद्धं सदा भुक्त्वा पितॄन् सन्तर्पयन्त्युत॥

---

१. प्रीणयितृत्वमिति।

२. त्रयस्तु वै इति।

यत्र क्वचन धर्मज्ञा वर्तमाना हि योगतः ॥

एते सुपुष्ट्या विनियोजयन्ति श्राद्धस्य दातारमदीनसत्त्वाः ।
तृप्त्या तथैते विनियोजयन्ति दातुः पितॄन् सर्वगणान् महीपते[१] ॥

याज्ञवल्क्यस्मृतौ

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ।
प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः ॥

यथा ह्यन्तर्वत्नी सुहृदा दीयमानं दोहदादिद्रव्यमुपभुञ्जाना स्वयं तृप्यति, तेनैव च दोहदद्रव्येण स्वकीयोदरवर्तिनं गर्भं तर्पयति, दोहदप्रदानेनोपकारकर्तारं प्रत्युपकारैः परितोषयति, तथाग्निष्वात्तादयो वस्वादयश्च देवताविशेषत्वादचिन्त्यमहिमानः श्राद्धं भुक्त्वा स्वयं तृप्यन्ति स्वाधिष्ठितांश्च मनुष्यपितॄन्स्तर्पयन्ति, श्राद्धकर्तारञ्च आयुष्यादिभिः फलैर्योजयन्तीन्त्याशयः । अत्र येषां पितॄणां देशकालव्यवहितातीन्द्रियार्थज्ञाने श्राद्धदेशं प्रत्यागमने च शक्तिर्नास्ति तेषां देशान्तरस्थानामेव मन्त्रादिप्रापितेन हविषा तृप्तिर्भवतीत्युक्तम् । अतीन्द्रियज्ञानयुक्तानामागमनशक्तियुक्तानां श्राद्धदेशञ्च प्रत्यागतानां वायवीयेन शरीरेण ब्राह्मणशरीराविष्टानां तृप्तिर्भवतीत्युक्तम्—

कूर्म्मपुराणे

तृप्यन्ते पितरः श्रुत्वा श्राद्धकालमुपस्थितम् ।
अन्योन्यं मनसा ध्यात्वा सम्पतन्ति मनोजवाः ॥
तैर्ब्राह्मणैः सहाश्नन्ति पितरोह्यन्तरिक्षगाः ।
वायुभूतास्तु तिष्ठन्ति भुक्त्वा यान्ति परां गतिम् ॥

मत्स्यपुराणे

निमन्त्रितान् हि पितर उपतिष्ठन्ति तान् द्विजान् ।
वायुवच्चानुगच्छन्ति[२] तथासीनानुपासते ॥

तथा एकब्राह्मणे बौधायनः

उरस्थाः पितरस्तस्य वामपार्श्वे पितामहाः ।
प्रपितामहा दक्षिणतः पृष्ठतः पिण्डभक्षकाः ॥

अतएव ब्रह्मपुराणादिषु उक्तम्

आश्वयुज्याश्च कृष्णायां त्रयोदश्यां मघासु च ।
प्रावृडन्ते यमः प्रेतान् पितॄंश्चाथ यमालयात् ॥
विसर्जयति मानुष्ये कृत्वा शून्यं स्वकं पुरम् ।
क्षुधार्त्ताः कीर्त्तयन्तश्च दुष्कृतञ्च स्वयंकृतम् ॥
काङ्क्षन्तः पुत्रपौत्रेभ्यो पायसं मधुसंयुतम् ।
तस्मात् तांस्तत्र विधिना तर्पयेत् पायसेन तु ॥

---

१. महीयते । २. वायुभूतानुगच्छन्तीति ।

यतश्चागमनशक्तियुक्ताः पितरः श्राद्धदेशं प्रत्यागच्छन्ति, अतएव पुष्करयात्रायां वियोगवाप्यां रामेण श्राद्धे क्रियमाणे ब्राह्मणशरीरे दशरथादीनपश्यत् ।

तथा च पद्मपुराणे

परिपक्वन्तु जानक्या सिद्धं रामे निवेदितम् ।
स्नात्वा वियोगवाप्यां स सुस्नानत्वमपालयत्[१] ॥
मघासु चलिते सूर्य्ये काले कुतपके तथा ।
आयाता ऋषयः सर्वे ये रामेण निमन्त्रिताः ॥
तानागतान् मुनीन् दृष्ट्वा वैदेही जनकात्मजा ।
अपासर्पत् ततो दूरे विप्राणां मध्यतः स्थिता[२] ॥
गुल्मैराच्छाद्य चात्मानं निगूढा सा तदा स्थिता ।
अपक्रान्तां तदा सीतां ज्ञात्वा राघवनन्दनः ॥
विमृश्य सुचिरं कालमियं किमिति सत्वरम् ।
अन्यत्र च गता साध्वी मन्ये चाहं त्रपान्विता ॥
किन्तावद् भोजये विप्रान् सीतामन्वेषयामि किम् ।
कारणं नैव जानामि श्राद्धकाले ह्युपस्थिते ॥
रामेण भोजिता विप्रा इत्युक्त्वा च यथाविधि ।
गतेषु द्विजमुख्येषु प्रियां रामोऽब्रवीदिदम् ॥
किमर्थं सुभ्रु नष्टासि मुनीन् दृष्ट्वा समागतान् ।
तत्सर्वं मम तन्वङ्गि कारणं वद माचिरम् ॥
एवमुक्ता तदा भर्त्रा त्रपयाधोमुखी स्थिता ।
मुञ्चन्ती चाश्रुसङ्घातं राघवं वाक्यमब्रवीत् ॥
शृणु त्वं नाथ यत् पृष्टमाश्चर्यमिह यादृशम्[३] ।
पिता तव मया दृष्टो ब्राह्मणाङ्गेषु राघव ॥
सर्व्वाभरणसंयुक्तौ द्वौ चान्यौ च तथाविधौ ।
दृष्ट्वा त्रपान्विता चाहमपक्रान्ता तवान्तिकात् ॥
वल्कलाजिनसंवीता कथं राज्ञः पुरःसरा ।
भवामि रिपुवीरघ्न सत्यमेतदुदाहृतम् ॥
स्वहस्तेन कथं राज्ञे वा नेयं भोजनं त्विदम् ।
दासानामपि यत् दासा नोपभुञ्जन्ति कर्हिचित् ॥
तादृशन्तु कथं तस्मै क्षमा दातुं वदस्व मे ।
याहं राज्ञा पुरा दृष्टा सर्वालङ्कारभूषिता ॥
सा स्वेदमलदिग्धाङ्गी कथं पश्यामि भूमिपम् ॥इति॥

---

१. सुस्नानमन्वपालयदिति ।
२. विप्रमध्ये सुसंस्थिता इति ।
३. यदृष्टमाश्चर्यमिहेति ।

नागरखण्डे श्राद्धदेशं प्रति पितॄणामागमनमुक्तम् ।

अमावास्यादिने प्राप्ते गृहद्वारं समाश्रिताः ॥
वायुभूताः प्रवाञ्छन्ति श्राद्धं पितृगणा नृणाम् ।
यावदस्तमयं भानोः क्षुत्पिपासासमाकुलाः ॥
ततश्चास्तं गते भानौ निराशा दुःखसंयुताः ।
निश्वस्य सुचिरं यान्ति गर्हयन्तः स्ववंशजम् ॥

आनर्त्त उवाच

मृतास्तु पुरुषा विप्र स्वकर्म्मजनितां गतिम् ।
गच्छन्ति ते कथं तस्य सुतस्याश्रममाप्नुयुः ॥

भर्तृयज्ञ उवाच ।

सत्यमेतन्महाभाग यत्त्वया व्याहृतं वचः ।
स्वकर्म्मार्हां गतिं यान्ति मृताः सर्वत्र मानवाः ॥
परं यथा समायान्ति वंशजस्याश्रमं[१] त्विह ।
तथा तेऽहं प्रवक्ष्यामि सन्देहो न यथा भवेत् ॥
मृता यान्ति यथा राजन् ये च केचिन्महामते[२] ।
ते जायन्ते न मर्त्त्येऽत्र यावद्वंशस्य संस्थितिः ॥
परं शुभात्मका ये च ते तिष्ठन्ति सुरालये ।
पाप्मानश्च नरा ये च तेऽपि स्वर्गनिकेतने ॥
अन्यदेहं समाश्रित्य भुञ्जते कर्मणः फलम् ।
शुभं यद्वंशजैः श्राद्धं स्वयं विहितमात्मनः ॥
पितृलोकस्थितानाञ्च स्वर्गस्थानामपि क्षुधा ।
पिपासा च तथा राजन् तेषां सञ्जायतेऽधिका ॥
यावन्नरत्रयं राजन् पितरो मातरस्तथा[३] ।
उद्धृता ये गयाश्राद्धे ब्रह्मलोकेषु ते शुभम् ॥
भुञ्जते क्षुत्पिपासा वा न तेषां जायते क्वचित् ।
न चापि पतनं तस्मात् स्थानात् भवति भूमिप ॥
वंशोच्छेदात् पुनः सर्व्वे निपतन्ति महीतले ।
आगत्यास्मात् ततो मर्त्या निपत्य जगतीतले ॥
पापाः पापं समायान्ति योनिश्रेष्ठं शुभान्विताः ॥

तदेवमुपपन्ना पितॄणां श्राद्धदत्तेन हविषा तृप्तिः, दिव्यपितॄणाञ्च फलदातृत्वमिति ।

---

१. वंशजस्याश्रयमिति ।

२. यत्र केचिन्महीपते इति ।

३. पितृतोमातृतस्तथेति ।

तत्र केचिदाहुः। हविः प्रत्युद्देश्यत्वं देवतात्वम्, न तु हविर्भोक्तृत्वं फलदातृत्वं वा। ग्रावद्भ्यः स्वाहेत्यादिष्वचेतनस्यापि देवतात्वदर्शनात्। इन्द्रादीनामपि विग्रहादिमत्त्वेन देवत्वानभ्युपगमात्। यत् किञ्चिद्रूपाणाम् पित्रादीनामुद्देश्यत्वसम्भवात् देवतात्वोपपत्तेः। फलहेतुत्वन्तु कर्म्मण एव। तत् साधनभूतायां देवतायां स्तुत्यर्थमर्थवादरूपे वाक्ये उपचर्य्यते। तृप्तिवाक्यमपि चेतनत्वादिगुणं गमयत् प्राशस्त्यपरमेवेति।

तन्न। श्रुतिस्मृतीतिहासपुराणादिषु सर्व्वत्र पितृतृप्तिप्राधान्येनैव श्राद्धारम्भदर्शनात् फलदातृत्वस्यापि विधिमन्त्रयोरादिमध्यावसानेष्वनेकशोऽभिधानादभियुक्ततराणां शिष्टानां तादृग्धीदार्ढ्याल्लोकस्यायथा विचिकित्सा प्रतीतेस्तृप्तिफलदातृत्वयोरलीकत्वकल्पनानुपपत्तेः।

यथा ह्येतानि स्मृतिपुराणेषु पितृतृप्त्याद्यनेकफलप्रतिपादकानि श्राद्धविषयाणि वाक्यानि दर्शितानि, तथा तदकरणे प्रत्यवायप्रतिपादकान्यपि लिख्यन्ते।

नागरखण्डे।

तर्पयन्ति न ये पापाः स्वान् पितॄन् नित्यशो नृप।
पशवस्ते नरा ज्ञेया द्विपदाः शृङ्गवर्जिताः॥

अल्पप्रयासं महाफलं श्राद्धमकृत्वा प्रत्यवायरूपमनर्थमङ्गीकुर्वाणास्तमोगुणावृतज्ञाना हिताहितमप्रतिपद्यमानाः पशुसाम्यात् पशवः।

तथा।

जलेनापि च न श्राद्धं शाकेनापि करोति यः।
अमायां पितरस्तस्य शापं दत्त्वा प्रयान्ति च॥

हारीतस्मृतौ।

न तत्र वीरा जायन्ते नारोगा न शतायुषः।
न च श्रेयोधिगच्छन्ति यत्र श्राद्धं विवर्जितम्॥
अपि मूलैः फलैर्वाऽपि तथाह्युदकतर्पणैः।
अविद्यमाने कुर्व्वन्ति नैव श्राद्धं विवर्जयेत्॥

कूर्म्मपुराणे।

अमावास्याष्टकादि नित्यकालाननुक्रम्योक्तम्।
तस्य पाकश्राद्धकालाः नित्याः प्रोक्ता मनीषिभिः[२]।
नैमित्तिकन्तु कर्तव्यं ग्रहणे चन्द्रसूर्य्ययोः॥
बान्धवानान्तु कर्त्तव्यं नारकी स्यादतोऽन्यथा॥

---

[१] पितृतो मातृतस्तथेति।

[२] दिने दिने इति।

ब्रह्मवैवर्त्तवायुपुराणयोः अष्टकासु श्राद्धं विधायोक्तम् ।

पितरः पर्व्वकालेषु[१] तिथिकालेषु देवताः ।
सर्व्वे पुरुषमायन्ति निपानस्येव धेनवः ॥
मास्य ते प्रतिगच्छेयुरष्टकाभिरपूजिताः ।
मोघास्तस्य भवन्त्याशाः परत्रेह च सर्व्वशः ॥
पूजकानां सदोत्कर्षो नास्तिकानामधोगतिः ।
देवांस्तु दायिनो यान्ति तिर्य्यग्गच्छन्त्यदायिनः ॥

वायुपुराणे पाठभेदः ।

मोघस्तस्यभवेल्लोको लब्धश्चास्य विनश्यति ।। इति ॥

विष्णुस्मृतिविष्णुधर्म्मोत्तरयोः अमावास्यादिकानमनुक्रम्योक्तम् ।

एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥

ब्रह्मपुराणे ।

न सन्ति पितरश्चेति कृत्वा मनसि यो नरः ।
श्राद्धं न कुरुते मोहात्[२] तस्य रक्तं पिबन्ति ते ॥

इत्येवं श्राद्धप्रशंसाद्वारेण श्राद्धमाहात्म्यमुक्तम् ।

अथेदानीं श्राद्धदेवतारूपपितृप्रशंसाद्वारेण[३] श्राद्धमहिमोच्यते

न हि योगगतिः सूक्ष्मा न पितृणां परा गतिः ।
तपसापि न दृश्यासौ[४] किं पुनर्मांसचक्षुषा ॥
चत्वारः पितरो मूर्त्ता मूर्त्तिहीनास्त्रयस्तथा ।
तेषां श्राद्धानि सत्कृत्य देवाः कुर्व्वन्ति यत्नतः ॥
भक्ताः प्राञ्जलयः सर्व्वे देवास्तद्गतमानसाः ।
विश्वे च वसवश्चैव पृष्ठिनः[५] शृङ्गिणस्तथा ॥
कृष्णाः श्वेतास्त्वजाश्चैव विधिवत् पूजयन्त्युत ।
प्रजाता वातरसना दिवाकृत्यास्तथैव च ॥
मेघाश्च मरुतश्चैव ब्रह्माद्याश्च दिवौकसः ।
अत्रिभृग्वङ्गिराद्याश्च ऋषयः सर्व्वे एव च ॥
यक्षा नागाः सुपर्णाश्च किन्नरा राक्षसैः सह ।
पितृंस्तेऽपूजयन् सर्व्वे नित्यमेव फलार्थिनः ॥

---

१. सर्वकालेष्विति ।

२. तेषामिति । काले इति ।

३. श्राद्धदेवता निरूपयन् पितृप्रशंसाद्वारेणेति ।

४. दृश्या सा इति ।

५. पृष्टिजा इति ।

एवमेते महात्मानः श्राद्धैः सत्कृत्य पूजिताः ।
सर्व्वान् कामान् प्रयच्छन्ति शतशोऽथ सहस्रशः ।
हित्वा त्रैलोक्यसंसारं जरामृत्युभयं तथा ॥
मोक्षं योगमथैश्वर्यं सूक्ष्मदेहमदेहताम् ।
कृत्स्नं वैराग्यमानन्त्यं प्रयच्छन्ति पितामहाः ॥
वरिष्ठः सर्व्वधर्माणां मोक्षधर्मः सनातनः ।
पितॄणां हि प्रसादेन प्राप्यते सुमहात्मना ॥
मुक्तावैदूर्य्यवासांसि वाजिनागायुधानि च ।
कोटिशश्चैव रत्नानि प्रयच्छन्ति पितामहाः ॥
हंसबर्हिणयुक्तानि मुक्ता वैदूर्यवन्ति च ।
किङ्किणीजालनद्धानि सदा पुष्पफलानि च ॥
विमानानां सहस्राणि जुष्टान्यप्सरसाङ्गणैः ।
सर्व्वकामसमृद्धानि प्रयच्छन्ति पितामहाः ॥
प्रजां पुष्टिं स्मृतिं मेधां राज्यमारोग्यमेव च ।
प्रीता नित्यं प्रयच्छन्ति मानुषाणां पितामहाः ॥
पितॄन् प्रीणाति यो भक्त्या पितरः प्रीणयन्ति तम् ।

वायुपुराणे ।

आद्यो गणस्तु योगानां स नित्यं योगवर्द्धनः ।
द्वितीयो देवतानाञ्च तृतीयो देववैरिणाम् ॥
शेषास्तु बर्हिणां ज्ञेया इति सर्व्वे प्रकीर्त्तिताः ।
देवास्त्वेतान् यजन्ते वै सर्व्वेष्वेतेष्ववस्थितान् ॥
आश्रमास्तु यजन्ते तांश्चत्वारस्तु यथाक्रमम् ।
वर्णाश्चैव यजन्ते तान् चत्वारश्च यथाविधि ॥
यथा सङ्करजाताश्च म्लेच्छाश्चैव यजन्ति वै ।
तथा वै पितरः पूज्याः स्रष्टारो देशकालयोः ॥
पितृभक्त्या ततो नित्यं योगं प्राप्नोत्यनुत्तमम् ।
योगेन मोक्षं लभते हित्त्वा कर्म्म शुभाऽशुभम् ॥
यज्ञहेतोर्यदुद्धृत्य मोहयित्वा जगत्तदा ।
गुहायां निहितो योगः कश्यपेन महात्मना ॥
तञ्च योगं समासेन पितृभक्तस्तु कृत्स्नशः ।
अयत्नात् प्राप्नुयाज्जन्तुः[१] सर्वमेव न संशयः ॥
यानि रत्नानि मेदिन्यां वाहनानि स्त्रियस्तथा ।
क्षिप्रं प्राप्नोति तत्सर्वं पितृभक्तिपरो नरः[२] ॥

१. प्राप्यते जन्तुरिति ।

२. श्राद्धे दाता न संशय इति ।

राजा तु लभते राज्यमधनश्चोत्तमं धनम् ।
क्षीणायुर्लभते चायुः पितृभक्तः सदा नरः ॥
यान् कामान्[१] मनसा वाञ्छेत् दद्युस्तान् पितरोऽस्य[२] वै ।

मात्स्यपाद्मादिषु ।

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
राज्यञ्चापि प्रयच्छन्ति प्रीताः पितृगणा नृप ॥
रतिशक्तिः स्त्रियः कान्ता भोज्यं भोजनशक्तता[३] ।
दानशक्तिः सविभवा रूपमारोग्यसम्पदः ॥
श्राद्धपुष्पमिदं[४] प्रोक्तं फलं ब्रह्मसमागमः ॥
श्रूयते हि पुरा मोक्षं प्राप्ताः कौशिकसूनवः ।
पञ्चभिर्जन्मसम्बन्धैः प्राप्ताः ब्रह्मपदं परम्[५] ॥
कौशिको नाम धर्म्मात्मा कुरुक्षेत्रे महान् ऋषिः ।
नामतः कर्म्मतस्तस्य सुतान् सप्त निबोधत ॥
खसृमः[६] क्रोधनो हिंस्रः पिशुनः कविरेव च ।
वाग्दुष्टः पितृवर्त्ती च गर्गशिष्यास्तदाभवन् ॥
पितर्य्युपरते तेषामभूद्दुर्भिक्षमुल्बणम् ।
अनावृष्टिश्च महती सर्व्वलोकभयङ्करी ॥
गर्गादेशाद्वने दोग्ध्रीं रक्षन्तस्ते तदा द्विजाः ।
हनामः कपिलामेकां धेनुं क्षुत्पीडिता भृशम् ॥
इति चिन्तयतां तेषां लघु प्राह तदानुजः ।
अथावश्यमियं बध्या श्राद्धरूपेण योज्यताम् ॥
श्राद्धे नियोज्यमानेयं पापात् त्रास्यति नो ध्रुवम् ।
एवं कुर्व्वित्यनुज्ञातः पितृवर्त्ती तदाग्रजैः ।
चक्रे समाहितः श्राद्धमालभ्य कपिलां स ताम् ॥
द्वौ दैवे भ्रातरौ कृत्वा पित्रे त्रींश्चापरान् क्रमात् ।
तथैकमतिथिं कृत्वा श्राद्धदः स्वयमेव तु ॥
चकार मन्त्रवच्छ्राद्धं स्मरन् पितृपरायणः ।
तया गवा विशङ्कास्ते गुरवे वै न्यवेदयन् ॥
व्याघ्रेण निहता धेनुर्वत्सोऽयं प्रतिगृह्यताम् ।
एवं सा भक्षिता धेनुः सप्तभिस्तैस्तपोधनैः ॥
वैदिकं बलमाश्रित्य क्रूरे कर्म्मणि निर्भयैः ।
ततः कालापकृष्टास्ते व्याधा दाशपुरेऽभवन् ॥

---

१. यत् किञ्चिदिति ।
२. पितरोऽथ इति ।
३. भोजनशक्तितेति ।
४. श्राद्धे पुण्यमिदमिति ।
५. ब्रह्म परं पदमिति ।
६. ससृम इति ।

अत्र दाशपुरं दशार्णदेशे विद्यत इति ज्ञायते। जाता व्याधा दशार्णेषु सप्त धर्म्म-विचक्षणाः – इति हरिवंशदर्शनात्।

जातिस्मरत्वं प्राप्तास्ते पितृभावानुभाविताः।
यत्कृतं क्रूरकर्म्माऽपि श्राद्धरूपेण तैस्तदा॥
तेन ते भवने जाता व्याधानां क्रूरकर्म्मणाम्।
पितृणाञ्चैव माहात्म्यात् जाता जातिस्मराश्च ते॥
नामधेयानि चाप्येषामिमान्यासन् महात्मनाम्।
निर्वैरो निर्वृतिः क्षान्तो निर्मन्युः कृतिरेव च॥
वैधसो मातृवर्त्ती च व्याधाः परमधार्मिकाः।
मृता वैराग्ययोगेन आस्थायानशनं पुनः॥
जातिस्मराः सप्तमृगा जाताः कालञ्जरे गिरौ।
उन्मुखो नित्यवित्रस्तः स्तब्धकर्णो विलोचनः॥
पण्डितो घस्मरो नादी नामतस्ते प्रकीर्त्तिताः॥
जहुः प्राणान् मरुं साध्य लब्धाहारा जितेन्द्रियाः[१]।
तेषां मरुं साधयतां पदस्थानानि तत्र वै॥
तथैवाद्यापि दृश्यन्ते गिरौ कालञ्जरे शुभे।
मरुप्रपतनेनाथ जाता वैराग्ययोगिनः॥
मानसे चक्रवाकास्ते सञ्जाताः सप्त योगिनः।
नामतः कर्मतः सर्वान् शृणु त्वं ऋषिसत्तम॥
सुमनः कुमुदः शुद्धः छिद्रदर्शी सुनेत्रकः।
स्वतन्त्रः शकुनश्चैव सप्तैते योगपारगाः॥
दृष्ट्वा विभ्राजनामानमुद्याने स्त्रीभिरन्वितम्।
क्रीडन्तं विविधैर्भोगैर्महाबलपराक्रमम्॥
योगभ्रष्टास्ततस्तेषां बभूवुश्चाल्पचेतसः।
राज्यकामोऽभवच्चैकस्तेषां मध्ये जलौकसाम्॥
पितृवर्त्ती च यो विप्रः श्राद्धकृत् पितृवत्सलः।
अपरौ मन्त्रिणौ दृष्ट्वा प्रभूतबलवाहनौ॥
मन्त्रित्वे चक्रतुश्चित्तं कण्डरीकसुबालकौ।
ब्रह्मदत्तोऽभिषिक्तस्तु काम्पिल्ये नगरोत्तमे॥
पञ्चालराजो विख्यातः सर्व्वशास्त्रविशारदः।
योगवित् सर्वजन्तूनां रुतवेत्ताभवत्तदा॥
तस्य राज्ञोऽभवत् भार्य्या देवलस्यात्मजा तदा।
सन्नतिर्नामविख्याता कपिला याऽभवत् पुरा॥

---

१. तपस्विन इति।

पितृकार्य्यैनियुक्तत्वादभवत् ब्रह्मवादिनी ।
तया चकार सहितः स राज्यं राज्यनन्दनः ॥
ये च योगादविभ्रष्टाश्चत्वारस्ते महाद्विजाः ।
तस्मिन्नेव पुरे जातास्ते तु चक्राह्वयास्तदा ॥

वृद्धद्विजस्य दायादाः विप्रा जातिस्मराः पुरा ।
स्मृतिमान् तत्त्वदर्शी च विद्याचन्द्रस्तपोत्सुकः ॥
नामतः कर्मतश्चैव सुदरिद्रस्य ते सुताः ।
तपसे बुद्धिरभवत्तदा तेषां द्विजन्मनाम् ॥

यास्यामः परमां सिद्धिमित्यूचुस्ते द्विजोत्तमाः ।
ततस्तद्वचनं श्रुत्वा सुदरिद्रो महातपाः ॥
उवाच दीनया वाचा किमेतदिति पुत्रकाः ।
अधर्म्म एष इति वः पिता तानभ्युवाच ह ॥

वृद्धं पितरमुत्सृज्य दरिद्रं वनवासिनम् ।
को नु धर्म्मो नु भवतामन्याय्या गतिरेव च ॥
ऊचुस्ते कल्पिता वृत्तिस्तव तावच्छृणुष्व नः ।
वृत्तमेतत्पुरा राज्ञः स ते दास्यति पुष्कलम् ॥

धनं ग्रामसहस्राणि प्रभाते पठतस्तव ।
कुरुक्षेत्रे तु ये विप्रा व्याधा दाशपुरे तु ये ॥
कालञ्जरे मृगा भूताश्चक्रवाकास्तु मानसे ।
इत्युक्त्वा पितरं जग्मुस्ते वनं तपसे पुनः ॥

वृद्धोऽपि राजभवनं जगामात्मसमृद्धये ।
ततः प्रभाते नगरान्नृपः सेनासमावृतः ॥
निर्गच्छन् मन्त्रिसहितः सभार्य्यो वृद्धमागतम् ।
गदन्तं विप्रमायान्तं तं वृद्धं स ददर्श ह ॥

वृद्ध उवाच ।

ये विप्रमुख्याः कुरुजाङ्गलेषु जातास्तथा दाशपुरे मृगाश्च ।
कालञ्जरे सप्त च चक्रवाकाः ये मानसे ते वयमप्रसिद्धाः ॥

पुराणान्तरेषु तु कौशिकदायादानां सरद्वीपे कापि जलाशये चक्रवाकत्वमभिधाय पुनर्मानसे सरसि राजहंसत्वमुक्तम् । तथा च नन्दिखण्डादिषु तल्लिङ्गश्लोकाः ।

ये ते गुरुवधाच्छापाद्गोवधेनातिपीडिताः ।
पितृभक्ता हितज्ञाना जाताः सर्वे शिवोदयाः ॥
सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥
एतदेव विदित्त्वैवं किमर्थञ्चावसीदथ ।

सम्प्रधार्य्य च तत्त्वेन राज्यं कृत्वातिचञ्चलम् ।
त्यक्त्वा मानुष्यकं जन्म कुरु त्वं वचनं हि नः ॥ इति ॥

हरिवंशादिषु तु "सप्तव्याधा" इत्यारभ्य "हंसाः सरसि मानस" इत्युक्त्वा "तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः। प्रस्थिता दीर्घमध्वानं यूयं तेभ्योऽवसीदथे" ति वाक्यशेष उक्तः ।

पाद्ममात्स्ययोः ।

इत्याकर्ण्य नृपो वाक्यं स पपात शुचान्वितः[१] ।
जातिस्मरत्वमगमत्तौ च मन्त्रिवरावुभौ[२] ॥
हा वयं योगविभ्रष्टाः कामतः कर्मबन्धनात् ।
एवं विलप्य बहुशस्त्रयस्ते योगपारगाः ॥
विस्मृताः श्राद्धमाहात्म्यमभिनन्द्य पुनः पुनः ।
स तु तस्मै धनं दत्वा प्रभूतग्रामसंयुतम् ॥
विश्वक्सेनाभिधानन्तु राजा राज्येऽभ्यषेचयत् ।
मानसे मिलिताः सर्वे ततस्ते योगिनां वराः ॥
ब्रह्मदत्तादयस्तस्मिन् पितृभक्ता विमत्सराः ।
ततस्ते योगमास्थाय सर्व्वे एव वनौकसः ॥
ब्रह्मरन्ध्रेण परमं पदमापुस्तपोबलात् ।
सन्नतिश्चातियोगेन पदमास्थाय चाव्ययम् ।

हरिवंशे ।

एवमेतत् पुरावृत्तं मम प्रत्यक्षमच्युत ।
तद्धारयस्व गाङ्गेय श्रेयसा योक्ष्यसे ततः ॥
ये चान्ये धारयिष्यन्ति तेषां चरितमुत्तमम् ।
तिर्य्यग्योनिषु ते जातु[३] न भविष्यन्ति कर्हिचित् ॥
श्रुत्वा चेदमुपाख्यानं महार्थं महतां गतिम् ।
योगधर्म्मो हृदि सदा परिवर्त्तेत भारत ॥
स तेनैवानुबन्धेन कदाचिल्लभते शुभम् ।
ततो योगगतिं याति सिद्धानामपि[४] दुर्लभाम् ॥

अस्य पुराकल्परूपार्थवादात्मकस्य सप्तव्याधोपाख्यानस्येदं तात्पर्यं, यद्गुरुस्वामिकामननुज्ञातामपि स्वबुभुक्षानिबन्धनं भक्षणोद्देशेनापि गुरुं वञ्चयित्वापि गामपि हत्वापि सपिण्डानामपि श्राद्धभोजनं विधाय छद्मनापि श्राद्धं कृतवतामन्यस्मिन् जन्मनि तिर्य्यग्जातीनामपि यदा पूर्वजन्मस्मृतिस्तादृग्विधज्ञानवैराग्यपूर्व्वको योगलाभो राज्यलाभः, सर्वसत्त्वरुतज्ञता मोक्षलाभ इत्येवं विधानि बभूवुः । तदा किं वक्तव्यम् ।

१. नृपस्ताभ्यां स पपाताशु यानत इति ।
२. मन्त्रिवरात्मजाविति ।
३. जाता इति ।
४. सिद्धानां भुवि इति ।

न्यायार्जितधनसम्पादितशालियवाज्यादिनिष्पादितैरतिशयरचनामयैरन्नैर्वेद - वेदार्थविदः पात्रीभूतान् निमन्त्रणादिविधिना सम्यक् सम्पादितान् द्विजानुपवेश्य यथा-विधि श्राद्धं कृतवतामायुरारोग्यादीनि निःश्रेयसपर्य्यन्तानि फलानि भवन्तीति। तथाहि विष्णुधर्मोत्तरे।

स्वर्गञ्च मोक्षञ्च यशः सुखानि।
राज्यं च पुत्रानथ भूमिपाल॥
स्त्रियश्च मुख्या विविधाश्च कामाः।
देवेश्वरः श्राद्धकृतो विधत्ते॥ इति॥

तथा अन्यान्यपि श्राद्धविशेषजन्यानि फलानि भवन्ति।

तद्यथा। आभ्युदयिकेऽभ्युदयः। कर्म्माङ्गे कर्म्मसागुण्यम्। तीर्थयात्राङ्गे यात्रा। स्वतन्त्रेषु[१] प्रत्यवायानुत्पत्तिरुपात्तदुरितक्षयश्च। गयादितीर्थश्राद्धेषु पितृणां विशिष्ट-लोकावाप्तिः। पितृतृप्तिस्तु सर्वेष्वपि श्राद्धेषु प्रयोजनमिति। श्राद्धविधिपाठस्यापि फलं हारीतेनोक्तम्।

इमं श्राद्धविधिं पुण्यं कुर्य्याच्चापि पठेच्च यः।
स सर्व्वकामसंयुक्तो ह्यमृतत्वञ्च विन्दति॥

बृहस्पतिना तु श्राद्धविधिज्ञानोपदेशानुमतानामपि फलमुक्तम्।

य एवं वेत्ति मतिमान् तस्य श्राद्धफलं भवेत्।
उपदेष्टानुमन्ता च लोके तुल्यफलौ स्मृतौ॥ इति॥

इति श्रीमहाराजाधिराजश्रीमहादेवस्य सकलश्रीकरणाधिपति पण्डित श्रीहेमाद्रि-विरचिते चतुर्व्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे श्राद्धविधिफलप्रशंसाप्रकरणं नाम प्रथमोऽध्यायः।

---

१. सात्त्विकेष्विति।

अथ द्वितीयोऽध्यायः ।

पितृनिरूपणप्रकरणम् ।

करोति हेमाद्रिरिमं हिमाद्रिश्रृङ्गावलिश्रीमदहारिकीर्त्तिः ।
निरूपणं भूरिगुणं पितृणां धीमत्सभानन्दकरं प्रबन्धम् ॥

उक्तमुक्ते प्रकरणे श्राद्धैराराधितानां पितृणां फलदातृत्वम् । अथैतेषामुत्पत्त्यादिभिर्निरूपणं कर्त्तुं प्रकरणान्तरमारभ्यते । तत्र तावत् प्रकरणप्रतिपाद्योऽर्थः प्रश्नभङ्ग्या प्रस्तूयते ।

ब्रह्मवैवर्त—ब्रह्माण्डपुराणयोः ।

क एते पितरो नाम वर्त्तन्ते क्व च ते प्रभो ।
पुत्राश्च के स्मृतास्तेषां कथञ्च पितरः स्मृताः ॥
कथं वा ते समुत्पन्नाः कस्य पुत्राः किमात्मकाः ।
स्वर्गे वै पितरोऽन्ये तु देवानामपि देवताः ॥
स्वर्गे च के तु वर्त्तन्ते पितरो नरके तु के ।
किमर्थं ते न दृश्यन्ते तत्र किं कारणं स्मृतम् ॥
के च कैः पितरः पूज्याः कान् यजामो वयं पुनः ।
देवाह्यपि पितॄन् स्वर्गे यजन्तीति हि नः श्रुतम् ॥
एतद्वेदितुमिच्छामो विस्तरेण बहुश्रुत ।
स्पष्टाभिधानमर्थन्तु तद्भवान् वक्तुमर्हति ॥

तदेतत् सर्वमुच्यते ।

तत्र तावदुत्पत्तिः । सा च द्विधा पुराणेषु दृश्यते । क्वचित् साक्षाद्ब्रह्मशरीरा, क्वचिद्व्यवधानेन ।

तत्र तावत् साक्षादभिधीयते ।

विष्णुपुराणे ।

सत्यमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ।
उत्ससर्ज पितॄन् सृष्ट्वा ततस्तामपि स प्रभुः ॥

वाराहपुराणे ।

पूर्व्वं प्रजापतिर्ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ।
एकाग्रमानसः सर्व्वांस्तन्मात्रान् मनसो बहिः ॥
कृत्वा परमकं ब्रह्म ध्यायन् स्वर्गमगाच्च वै ।
तस्यात्मनि तदा योगं गतस्य परमेष्ठिनः ॥

तन्मात्रा निर्ययुर्देहाद् धूमवर्णकृतत्विषः ।
पिबाम इति भाषन्तः खादाम इति चासकृत् ॥
ऊर्द्ध्वं जिगमिषन्तो वै वियत्संस्थास्तपस्विनः ।
तान् दृष्ट्वा सहसोवाच ब्रह्मा विश्वपितामहः ॥
भवन्तः पितरः सन्तु सर्वेषां गृहमेधिनाम् ॥

वायुपुराणे ।

ऋतमग्निस्तु यः प्रोक्तः स तु संवत्सरो मतः ।
जज्ञिरे ऋतवस्तस्मादृतुभ्यश्चार्त्तवास्तथा ।
आर्त्तवा ह्यनुमासाख्याः पितरो ह्यनुसूनवः ।
ऋतुः पितामहा मासा आर्त्तवाश्चास्य सूनवः ।
प्रपितामहास्तु वै देवाः पञ्चाब्दाः ब्रह्मणः सुताः ॥

आदित्यपुराणे ।

अम्भांसि जज्ञिरे पूर्व्वं तमोभूते जगत्त्रये ।
ब्रह्मणो विश्रुताः पुत्रास्ततः स्वायम्भुवेऽन्तरे ॥
पितेव पूज्यमानास्तु जज्ञिरे पितरोऽस्य वै ।
प्रजापतिः स्मृतो यस्तु स तु संवत्सरो मतः ॥
संवत्सरः स्मृतो ह्यग्निरृतमित्युच्यते बुधैः ।
ऋतात्तु ऋतवो देवा जज्ञिरे ऋतवस्तु ते ॥
मासास्तत्रार्त्तवा ज्ञेया ऋतोरेतेऽभवन् सुताः ।
ततोऽभवंस्तु पितरो ऋतवश्च पितामहाः ॥
स्वमेकात्तु प्रसूयन्ति प्रजा यस्मादशेषतः ।
तस्मात् स्मृतः प्रजानां वै स्वमेकः प्रपितामहः ॥

अत्र संवत्सरकालाभिमानिन्यो देवताः पितृशब्देनोच्यन्ते न कालमात्रम्, फलदातृत्वस्य चेतनधर्मस्य तत्रासम्भवात् । संवत्सरादिशब्दास्तु संवत्सराद्यभिमानिनीषु देवतासु लाक्षणिका एतदप्यादित्यपुराणे एवोक्तम् ।

संवत्सरः स्वमेकस्तु नामान्येतानि स्थानिनाम् ।
स्थाने तु स्थानिनो ह्येते स्थानात्मानः प्रकीर्त्तिताः ॥
स्थानाख्यान्तु दधानास्तु तदात्मानः सुराः स्मृताः ।
मन्वन्तरेत्विहान्ये ते स्थिताः कालाभिमानिनः ॥
कार्य्यकारणमुक्तास्ते ऐश्वर्याधिष्ण्यसंस्थिताः ॥

स्थानशब्देन चात्र काल एव । अतएव कालाभिमनिन इत्यभिधायोक्तम् ।
'स्थानाभिमानिनो ह्येते तिष्ठन्तीह प्रसङ्गतः' ॥इति॥

इत्येते पितरो देवाः पितरश्चार्त्तवाश्च ये ।
ऋतुत्वञ्च पितृत्वञ्च आर्त्तवत्वञ्च कीर्त्तितम् ॥

तत्र ते पञ्च भवन्ति ।

आदित्यपुराणे ।

ऋतवः पितरो ज्ञेया ऋतात् पञ्चाभवन् सुताः[१]
मनुष्याणां पशूनाञ्च पक्षिणाञ्च सरीसृपाम् ।
स्थावराणाञ्च पञ्चानां पुष्पकालर्त्तवः[२] स्मृताः ॥

इत्यभिधानात् । कालिकापुराणे तु ऋतुसंज्ञाः पितरः षडुक्ताः । षड् मध्वादयः ते ऋतवः पितरो देवा इति वैदिकी श्रुतिः । मधुमाधवौ वसन्तौ । शुचिशुक्रौ शुष्मिणौ । नभो नभस्यौ वार्षिकावृतुः । इषोर्जौ शरदृतुः । सहः सहस्यौ हेमन्त ऋतुः । तपस्तपस्यौ शैशिरौ । ऋतवो ब्रह्मण आत्मजाः । तैः षड्भिः संवत्सरः स प्रजापतिः संवत्सरोऽग्निर्ऋतमुच्यते । ऋताच्च ऋतवो जज्ञिरे । तेभ्यः स्थानुजङ्गमाः । ऋतुः कालस्तस्मात् सर्व्वमुत्पद्यते तस्मात् पितरश्चेति ।

इति ब्रह्मशरीरात् साक्षात् पितृणामुत्पत्तिरुक्ता ।

तस्माद् ब्रह्मा समुत्पन्नः सोऽपि सप्तासृजन्मुनीन् ।
मां यजध्वमनेनोक्तास्तदा ते परमेष्ठिना ॥
आत्मनात्मानमेवाग्रे ते यजन्त इति श्रुतिः ।
तेषाञ्च यजतां ब्रह्मा महावैकारिकात्मवान् ॥
अशपद्व्यभिचारो मे महानेष कृतो यतः ।
प्रभ्रष्टज्ञानिनः सर्वे भविष्यथ न संशयः ॥
एवं शप्तास्ततस्तेन ब्रह्मणात्मसमुद्भवाः ।
सद्यो वंशकरान् पुत्रानुत्पाद्य त्रिदिवं ययुः ॥
ते च वैमानिकाः सर्वे ब्रह्मणः सप्तमानवाः ॥
तत् पिण्डदानमन्त्रोक्तं प्रपश्यन्तो व्यवस्थिताः ।
ये च ते पितरो ब्रह्मन्निबोध मम शंसतः ॥ इति ॥

अत्र त इति मरीच्यादयस्तत्पुत्राश्च ।

ते वर्त्तन्ते पुराकल्पे देवानां सोमवर्द्धनाः ।
ये मरीच्यादयः सप्त स्वर्गे ते पितरः स्मृताः ॥

अत्र मरीच्यादिपुत्रेषु पितृशब्दप्रवृत्तौ कारणं ब्रह्मवैवर्त्तब्रह्माण्डपुराणयोरुक्तम् । तथाहि—

देवानसृजत ब्रह्मा मां यक्ष्यन्तीति वै प्रभुः ।
तमुत्सृज्य तदात्मानमयजन्त फलार्थिनः ॥
ते शप्ता ब्रह्मणा मूढा नष्टसंज्ञा भविष्यथ ।
मास्म किञ्चिदजानन्त ततो लोकेऽथ मुह्यत ॥
ते भूयः प्रणताः सर्वे प्रावोचन्त पितामहम् ।
अनुग्रहात् स लोकानां पुनस्तानब्रवीद्वचः ॥

---

१. ऋतात् पञ्चार्त्तवस्तुता इति ।
२. विसर्गलोपाद् परं सन्धिरार्षः ।

प्रायश्चित्तञ्च कर्त्तव्यं व्यभिचारो हि वः कृतः ।
पुत्रान् स्वान् परिपृच्छध्वं ततो ज्ञानमवाप्स्यथ ॥
प्रायश्चित्तार्थिनस्ते वै पृष्टवन्तः स्वकान् सुतान् ।
तेभ्यस्ते नियतात्मानः पुत्राः शंसु[१]रनेकशः ॥
प्रायश्चित्तानि धर्म्मज्ञा वाङ्मनःकर्म्मजानि तु ।
ते पुत्रानब्रवन् प्रीता लब्धसंज्ञा दिवौकसः ॥
यूयं वै पितरोऽस्माकं यैर्वयं प्रतिबोधिताः ।
धर्म्मं ज्ञानञ्च कामञ्च को वरो वः प्रदीयताम् ॥
पुनस्तानब्रवीद् ब्रह्मा यूयं वै सत्यवादिनः ।
तस्माद्यदुक्तं युष्माभिस्तत्तथा न तदन्यथा ॥
उक्ता वः पितरोऽस्माकमिति वै तनयाः स्म वः ।
पितरस्ते भविष्यन्ति तेभ्योऽयं दीयतां वरः ॥
यूयं शरीरकर्त्तारस्तेषां देवा भविष्यथ ।
ते तु ज्ञानप्रदातारः पितरो वै न संशयः ॥
तेनैव वचसा पूर्वं ब्रह्मणः परमेष्ठिनः ।
अन्योन्यं पितरो ह्येते देवाश्च पितरश्च वै ॥

वायुपुराणे ।

इत्येते पितरो ह्येते देवाश्च पितरश्च वै ।
ऋतार्त्तवाः स्वमेकात्तु अन्योन्यं पितरः स्मृताः ॥

अत्र वाराहादिपुराणेषु मरीच्यादीनां ऋषीणां पुत्राः पितर इति दृश्यन्ते ।

ब्रह्मवैवर्त्तादिषु पुनः देवानां पुत्राः पितर इति । तत्र ब्रह्मवैवर्त्तादिषु दिव्यन्तीति देवा इति व्युत्पत्त्या देवशब्देन मरीच्यादय एवोक्ता इति भवितुमर्हतीति वाराहपुराणेन सह सादृश्यादेकत्वस्य प्रत्यभिज्ञानात् । तथा ब्रह्मवैवर्त्त एव लोकसृष्टिपूर्व्वकमेतेषां पितृशब्दप्रवृत्तौ कारणान्तरमुक्तम् ।

घोरान्तरिक्षं पृथिवी नक्षत्राणि दिशस्तथा ।
सूर्य्याचन्द्रमसौ चैव तथाहोरात्रमेव च ॥
न बभूव तथा तत्र तमोभूतमिदं जगत् ।
ब्रह्मैको दुश्चरं तत्र चचार परमं तपः ॥
सर्व्वेषां तपसां श्रेष्ठं यमाहुर्य्योगमुत्तमम् ।
योगमन्विच्छता सृष्टा ब्रह्मणा योगचक्षुषा ॥
लोकाः सन्तानका नाम यत्र तिष्ठन्ति भास्कराः ।[२]
वैराजा इति विख्याता देवानां दिवि देवताः ॥
तेषां सप्त समाख्याता गणास्त्रैलोक्यपूजिताः ।
उपरिष्टात् त्रयस्तेषां वर्त्तन्ते च त्रिमूर्त्तयः ॥

---

१. शंसुरित्ययं प्रयोग आर्षः । २. ते सुरा इति ।

ततो देवास्ततो भूमिरेवं लोकपरम्परा।
वर्त्तन्ते ये तु लोकेऽस्मिन् तेभ्यः पर्जन्यसम्भवाः॥
वृष्टिर्भवति वै वृष्ट्या लोकानां सम्भवः स्मृतः।
ऊचुस्ते वै पितॄंस्तस्माल्लोकानां लोकसत्तमाः॥

अथ ब्रह्मशरीरात् पितॄणां व्यवधानेनैवोत्पत्तिः।

कालिकापुराणे।

अव्यक्तजन्मनः पुत्रा ये मरीच्यादयः स्मृताः।
तेषां पितृगणा मुख्या जातास्तेभ्यश्च देवताः॥
देवेभ्यश्च जगत्सर्व्वं त्रैलोक्यं सचराचरम्।
विद्धि तत्त्वं परं वत्स ऋषीणां पितरः स्मृताः॥

तत्र या ब्रह्मशरीरात् पितॄणां साक्षादुत्पत्तिः पुराणेषु दृश्यते, सा मरीच्यादीनां पितृत्वमपेक्ष्य, या तु ब्रह्मशरीराव्यवधानेन सा मरीच्यादिपुत्राणां पितृत्वमपेक्ष्येति विवेक्तव्यम्। अतो न विरोधः।

एवञ्च सति मरीच्यादीनां ये पुत्रास्ते पितरः, मरीच्यादयः पितामहाः, ब्रह्मा प्रपितामह इति गम्यते। यश्च ब्रह्मा स प्रजापतिशब्दवाच्यः संवत्सरः प्रपितामहः। मरीच्यादयश्च ऋतवः पितामहाः। मासाश्चार्त्तवाः पितर इति न कश्चित् विरोधः पुराणानाम्।

मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः।
तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः॥

इति मनुवाक्ये यन्मरीच्यादीनामपि ब्रह्मशरीराव्यवधानेन जन्मोक्तं तदपि कल्पभेदेन सृष्टिभेदादुपपन्नम्।

अथैतेषां पितॄणां नामरूपादिभेदाः।

तत्र विष्णुधर्मोत्तरे।

पितॄणां हि गणाः सप्त नामतस्तु निबोध मे।
सुभास्वरा बर्हिषद अग्निष्वात्तास्तथैव च॥
क्रव्यादाश्चोपहूताश्च आज्यपाश्च सुकालिनः।
मूर्त्तिहीनास्त्रयश्चैषां चत्वारश्च समूर्त्तयः॥
सुभास्वरा बर्हिषद अग्निष्वात्तास्तथैव च।
त्रयो मूर्तिविहीनास्ते राजन् पितृगणाः स्मृताः॥
क्रव्यादाश्चोपहूताश्च आज्यपाश्च सुकालिनः।
मूर्त्तिमन्तः पितृगणाश्चत्वारः परिकीर्त्तिताः॥

ब्रह्मवैवर्त्त ब्रह्माण्डपुराणयोः।

तेषां सप्त समाख्याता गणास्त्रैलोक्यपूजिताः।
अमूर्त्तयस्त्रयस्तेषां चत्वारश्च समूर्त्तयः॥

उपरिष्टाच्च ये तेषां वर्त्तन्ते ते अमूर्त्तयः ।
तेषामधस्ताद्वर्त्तन्ते चत्वारः सूक्ष्ममूर्त्तयः ॥

अतएव छन्दोगानामपि पितृकन्या सूक्ष्मान् पितॄनपश्यत् ।

तदप्युक्तं ब्रह्माण्डपुराणादिषु ।

सा तेन व्यभिचारेण मनसा कामरूपिणी ।
पितरं प्रार्थयित्वान्यं योगभ्रष्टा पपात ह ॥
त्रीण्यपश्यद् विमानानि पतन्ती सा दिवश्च्युता ।
त्रसरेणुप्रमाणानि तेष्वपश्यच्च तान् पितॄन् ।
सुसूक्ष्मानपरिव्यक्तानग्नीनग्निष्विवाहितान् ॥

निगमे

ये हतास्तत्र संग्रामे पितरस्ते त्रिधाभवन् ।
यद्धुतं पितृयज्ञेषु तेषां गच्छति तद्धविः ॥

तत्रेति वृत्रसंग्रामे ये हता देवास्ते पितरोऽभवन् । त्रिधेति शरद्धेमन्तशिशिरा इति । एतएव सोमवन्तो बर्हिषदोऽग्निष्वात्ताश्च ।

तथा च शतपथश्रुतिः ।

महाहविषा ह वै देवा वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्तामथ यानेवैषां तस्मिन्संग्रामेऽघ्नंस्तान् पितृयज्ञेन समैरयन्त पितरो वै तऽआसंस्तस्मात्पितृयज्ञो नाम । तद्वसन्तो ग्रीष्मो वर्षाः । ऐते ते ये व्यजयन्त शरद्धेमन्तः शिशिरस्तऽउ ते यान्पुनः समैरयन्त ॥ तद्ये सोमेनेजानाः । ते पितरः सोमवन्तोऽथ ये दत्तेन पक्वेन लोकं जयन्ति ते पितरो बर्हिषदोऽथ ये ततो नान्यतरच्चन यानग्निरेव दहन्त्स्वदयति ते पितरोऽग्निष्वात्ता एतऽउ ते ये पितरः ॥

ब्रह्मपुराणे ।

अमूर्त्ता मूर्त्तिमन्तश्च पितरो द्विविधाः स्मृताः ।
नान्दीमुखास्त्वमूर्त्तास्तु मूर्तिमन्तोऽथ पार्व्वणाः ॥
एकोद्दिष्टाशिनः प्रेताः पितृणां निर्णयस्त्रिधा ।

वाराहपुराणे पितृसृष्टिमुक्त्वोक्तम् ।

तान् दृष्ट्वा प्राह स ब्रह्मा तिर्य्यक्संस्थानधोमुखान् ।
भवन्तः पितरः सन्तु सर्वेषां गृहमेधिनाम् ॥
ऊर्द्ध्ववक्रास्तु ये तत्र ते नान्दीमुखसंज्ञिताः ।

नन्दिपुराणे ।

निर्म्मिताः पितरो नाम पञ्च वै देवयोनयः ।
ब्रह्मणा तपसा वत्स अर्थज्ञाः शुद्धमूर्त्तयः ॥
अग्निष्वात्ता बर्हिषदः काव्याश्चापि सुकालिनः ।
यामाश्च योनयो ह्येते पञ्चोक्ताः पितृयाजिनाम् ॥

नागरखण्डे ।

अग्निष्वात्ता बर्हिषद आज्यपाः सोमपाः स्मृताः ।
रश्मिपा उपहूताश्च तथैवायन्तु नः परे ॥
तथा स्वादुषदश्चान्ये स्मृता नान्दीमुखा नृप ।
एते पितृगणाः ख्यातास्ते च देवसमुद्भवाः ॥
आदित्या वसवो रुद्रा नासत्यावश्विनावपि ।
सन्तर्पयन्ति ते चैतान् मुक्त्वा नान्दीमुखान् पितृन् ॥

हारीतस्मृतौ ।

सोमो यमोऽङ्गिराश्चैव सोमपाः पितरस्तथा ।
बर्हिषदोऽग्निष्वात्ताश्च हुतादः षड्विधो गणः ॥
चन्द्रमा ऋतवश्चैव मृतं योऽग्निर्दहत्यपि ।
सोमोपहूताः प्राक्सोमा अनीजानाश्च ब्राह्मणाः ॥

एवमुक्ता नामतो रूपतश्च देवपितॄणां भेदाः ।

सन्ति मनुष्यपितॄणामपि भेदाः, त इदानीमुच्यन्ते ।

वायुपुराणे ।

अतः पितृन् प्रवक्ष्यामि मासश्राद्धभुजस्तु ये ।
देवानां पितरो देवाः पितरो लौकिकास्तथा ॥
देवाः सौम्याश्च यज्वानो ह्ययज्वानो ह्ययोनिजाः ।
देवास्ते पितरः सर्व्वे देवांस्तान् भावयन्त्युत ॥
मनुष्याः पितरश्चैव तेभ्योऽन्ये लौकिकाः स्मृताः ।
पिता पितामहश्चैव तथैव प्रपितामहः ॥
यज्वानो ये तु सोमेन सोमवन्तस्तु ये स्मृताः ।
ये यज्वानः स्मृतास्तेषां ते वै बर्हिषदः स्मृताः ॥
कर्म्मस्वेतेषु युक्ता ये भवन्त्यादेहसंप्लवात् ।
अग्निष्वात्ताः स्मृतास्तेषां होमिनोऽथाज्ययाजिनः ॥
तेषां ते धर्म्मसाधर्म्यात् स्मृता सा योज्यकैः द्विजैः ।
ये चाप्याश्रमधर्म्माणः प्रस्थानेषु व्यवस्थिताः ॥
अन्ते च नावसीदन्ति श्राद्धयुक्तेन कर्म्मणा ॥
ब्रह्मचर्य्येण तपसा यज्ञेन प्रजया च वै ।
श्रद्धया प्रज्ञया चैव प्रदानेन च सप्तधा ॥
कर्म्मष्वेतेषु ये युक्ता भवन्त्यादेहपातनात् ।
देवैस्तैः पितृभिः सार्द्धं सूक्ष्मैर्वै सोमपाय्यपैः ॥
स्वर्गता दिवि मोदन्ते पितृन् ये समुपासते ।
प्रजावतां प्रशंसैषा स्मृता शुद्धक्रियावताम् ॥

तेषां निर्व्वाणकपदं तत्कुलीनैश्च बान्धवैः ।
मासश्राद्धभुजस्तृप्तिं लभन्ते सोमलौकिकाः ॥
एते मनुष्यपितरो मासश्राद्धभुजस्तु ते ।

उक्ताः सत्कर्म्मभिर्द्देवपितृसाम्यं प्राप्ता मनुष्यपितरः ।

अथ दुष्कर्म्मभिरधोगतिं प्राप्ता मनुष्यपितरोऽभिधीयन्ते ।

तेभ्योऽपरे तु येऽप्यन्ये सङ्कीर्णाः कर्म्मयोनिषु ।
भ्रष्टाश्चाश्रमधर्म्मेभ्यः स्वधास्वाहाविवर्जिताः ॥
भिन्नदेहा दुरात्मानः प्रेतभूता यमक्षये ।
स्वकर्माण्येव शोचन्ति यातनास्थानमागताः ॥
दीर्घायुषोऽतिशुष्काश्च श्मश्रुलाश्च विवाससः ।
क्षुत्पिपासापरीताश्च विद्रवन्ति ततस्ततः ॥
सरित्सरस्तडागानि वापीश्चैवाभिलिप्सवः ।
परान्नानि च लिप्सन्ते काममानास्ततस्ततः ॥
स्थानेषु पच्यमानाश्च[१] यातनानिरयेषु वै ।
शाल्मलौ वैतरण्याञ्च कुम्भीपाकेषु तेषु च ॥
करम्भवालुकायाञ्च असिपत्रवनेषु च ।
शिलासम्पेषणे चैव पात्यमानाः स्वकर्मभिः ॥
तत्र स्थानानि तेषां वै दुःखितानामनेकशः ।

उक्ता नरकस्था मनुष्यपितरः ।

अथ भूमिस्थाः ।

अप्राप्ता यातनास्थानं श्रेष्ठा ये भुवि पञ्चधा ।
पश्चात्तु ये स्थावरान्ते भूतानां केषु कर्मसु ॥
नानारूपासु जाता ये तिर्य्यग्योन्यादिजातिषु ।
वाह्लीकाश्चोष्मपाश्चैव दिवाकीर्त्त्याश्च ते स्मृताः ॥
कृष्णपक्षस्त्वहस्तेषां शुक्लः स्वप्नाय शर्वरी ।

नागरखण्डेऽपि ।

अथ ये पितरो मर्त्त्या निवसन्ति त्रिविष्टपे ।
द्विविधास्ते प्रदृश्यन्ते सुखिनोऽसुखिनः परे ॥
येभ्यः श्राद्धानि यच्छन्ति मर्त्त्यलोके स्ववंशजाः ।
ते सर्व्वे तत्र संहृष्टा देववन्मुदिताः स्थिताः ॥
येषां प्रयच्छते नैव किञ्चित् कश्चित् स्ववंशजः ।
क्षुत्पिपासाकुलास्ते च दृश्यन्ते ते च दुःखिताः ॥

१. याचमानाश्चेति ।

मनुस्मृतौ ।

य एते तु गणा मुख्याः पितृणां परिकीर्त्तिताः ।
तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम् ॥

वाराहपुराणे ।

एष ते पैतृकः सर्ग उद्देशेन महामुने ।
कथितो नान्त एवास्य वर्षकोट्या हि दृश्यते ॥

याज्ञवल्क्यस्मृतौ ।

वसुरुद्रादितिसुताः पितरः श्राद्धदेवता इति ॥

अथ गुह्याः पितर उच्यन्ते नन्दिपुराणे—
अग्निष्वात्तादीन् पितृभेदानभिधाय महेश्वरेणोक्तम् ।

अथामराश्च पितरो गुह्याः शृणु नरोत्तम ।
विष्णुः पितास्य जगतो दिव्यो यज्ञः स एव च ॥
ब्रह्मा पितामहो ज्ञेयो ह्यहश्च प्रपितामहः ॥इति ।

एते ब्रह्मविष्णुमहेश्वरा अपि पितरः विश्वसृष्टिहेतुत्त्वात् । पितृपितामहाद्यधिष्ठानभूताग्निष्वात्ताद्यधिष्ठातृत्वेन श्राद्धे पितरो देवतारूपास्तद्रूपेणानुसन्धीयमानाः श्राद्धस्य कामपूर्व्वमैहिकामुष्मिकफलोत्पादिकां शक्तिं जनयन्तीति सर्वेषु श्राद्धकल्पेषु गोपितत्वेन श्राद्धोपदेशोपनिषन्निरूप्या, अग्निष्वात्तादिवत् पितृत्वेनाप्रसिद्धाश्चेति गुह्याः अपूर्वांशक्तिं जनयन्तीत्येतदेव दर्शितम् ।

उद्दिश्य विष्णुर्यैरिष्टः पितरस्तैस्तु तर्पिताः ।
ब्रह्मा समिष्टः प्रीणाति पुंसः सर्व्वान् पितामहान् ॥
प्रपितामहानुद्दिश्य त्विष्टोऽहं यैर्महात्मभिः ।
न यान्ति नरके घोरे तेषां वै प्रपितामहाः ॥
लोकानि दिव्यानि मनोरमाणि, प्रयान्ति सर्व्वे प्रसभं गणेश ।
पिता च तेषान्तु पितामहश्च, तथा च तेषां प्रपितामहश्च ॥
ये वैष्णवज्ञानविदोऽर्च्चयन्ति, विष्णुं समभ्यर्च्य तु सर्व्वभावैः ।
भजन्ति तेषां पितरस्तु तुष्टिं निकृष्टजातीश्च परित्यजन्ति ॥

वाराहपुराणे पितॄन् प्रति वराहवचनम् ।

यमोऽधिदेवो भवतां सौम्यः स्वाध्यात्म ईरितः ।
अधियज्ञस्ततस्त्वग्निर्भवतां कल्पनात्वियम् ॥
अग्निर्वायुश्च सूर्य्यश्च स्थानञ्च भवतामिति ।
ब्रह्मा विष्णुश्च रुद्रश्च भवतामधिपूरुषाः ॥
आदित्या वसवो रुद्रा भवतां मूर्त्तयस्त्विमे ।
योगिनो योगदेहाश्च योगाधाराश्च सुव्रताः ॥
कामतो विचरिष्यध्वं फलदाः सर्व्वजन्तुषु ।

महाभारते वराहरूपेण विष्णुना जलनिमग्नां धरणीमुद्धृत्य दंष्ट्राविलग्नान् मृत्पिण्डान् पितृत्वेन कल्पयित्वा तानभ्यर्च्च्योक्तम्।

पिता पितामहश्चैव तथैव प्रपितामहः।
अहमेवात्र विज्ञेयस्त्रिषु पिण्डेषु संस्थितः॥
नास्ति मत्तोऽधिकः कश्चित् को वाऽभ्यर्च्च्यो मया स्वयम्।
को वा मम पिता लोके अहमेव पितामहः।
पितुः पितामहश्चैव अहमेवात्र कारणम्॥

विष्णुधर्मोत्तरे।

पितृपैतामहः पिण्डो वासुदेवः प्रकीर्त्तितः।
पैतामहश्च निर्द्दिष्टस्तथा सङ्कर्षणः प्रभुः॥
पितृपिण्डश्च विज्ञेयः प्रद्युम्नश्चापराजितः।
आत्मानिरुद्धो विज्ञेयः पिण्डनिर्व्वपणे बुधैः॥
श्राद्धं कर्त्तुं कथं शक्यं विना वैष्णवतेजसा।

भविष्यपुराणे।

अनिरुद्धः स्वयं देवः प्रद्युम्नस्तु पिता स्मृतः।
सङ्कर्षणस्तज्जनको वासुदेवस्तु तत्पिता॥

स्वयं श्राद्धकर्त्ता अनिरुद्धो देवः। श्राद्धकर्त्तुः पिता प्रद्युम्नः। तज्जनकः श्राद्धकर्त्तृपितृजनकः सङ्कर्षणः। तत्पिता श्राद्धकर्तृपितृजनकपिता वासुदेवः स्मृत इत्यर्थः। स्मृतिषु पिण्डानां वरुणादिरूपत्वमुक्तम्।

प्रथमो वरुणो देवः प्राजापत्यस्तथापरः।
तृतीयोऽग्निः स्मृतः पिण्ड एष पिण्डविधिः स्मृतः॥ इति॥

अथास्मिन् प्रकरणे पूर्व्वमुद्दिष्टानां सुभास्वरबर्हिषदाग्निष्वात्तादीनां लोकजनकोपासनभेदाः।

विष्णुधर्मोत्तरे।

सुभास्वरा ब्रह्मसुताः सोममाप्याययन्ति ते।
ब्रह्मलोकचरा राजन्नित्यं मूर्तिविवर्जिताः॥
तथा बर्हिषदो राजन् स्मृताः पुत्रा मरीचिनः।
आप्याययन्ति ते देव लोके तिष्ठन्ति पूजिताः[१]॥
विभ्राजलोके तिष्ठन्ति अग्निष्वात्ता नराधिप।
पुलस्त्यस्य ऋषेः पुत्रा भावयन्ति जनानिमे॥
क्रव्यादाश्चोपहूताश्च आज्यपाश्च सुकालिनः।
कवेरङ्गिरसश्चैव कर्द्दमस्य प्रजापतेः।
वशिष्ठस्य तथा पुत्राः क्रमेणैते प्रकीर्त्तिताः॥

---

१. सोमपदे स्थिता इति।

ज्योतिर्भासाः स्मृताः लोका ये च लोका मरीचिनः ।
तेजस्विनो मानसाश्च क्रमेणैषां प्रकीर्त्तिताः ॥

मात्स्यपाद्मादिषु ।

अमूर्त्तयः पितृगणा वैराजस्य प्रजापतेः ।
यजन्ति यान् देवगणा वैराजा इति विश्रुताः ॥
लोकाः सोमपथा नाम यत्र मारीचनन्दनाः ।
वर्त्तन्ते देवपितरो यान् देवा भावयन्त्यलम् ॥
अग्निष्वात्ता इति ख्याता यज्वानो यत्र संस्थिताः ।
यत्र वैभ्राजनामानो दिवि सन्ति सुवर्चसः ॥
लोका बर्हिषदो यत्र पितरः सन्ति सुव्रताः ।
यत्र बर्हिणयुक्तानि विमानानि सहस्रशः ॥
सङ्कल्पा बर्हिषो यत्र तिष्ठन्ति फलदायिनः ।
यत्राभ्युदयशालासु मोदन्ते श्राद्धदायिनः ॥
यांश्च देवासुरगणाः[१] गन्धर्वाप्सरसाङ्गणाः ।
यक्षरक्षोगणाश्चैव यजन्ति दिवि देवताः ॥
पुलस्त्यपुत्राः शतशस्तपोयोगबलान्विताः[२] ।
अमूर्त्तिमन्तः पितरो वशिष्ठस्य सुकालिनः ॥
नाम्ना तु मानसाः सर्व्वे सर्व्वे ते[३] धर्म्ममूर्त्तयः ।
ज्योतिर्भासेषु लोकेषु ये वसन्ति दिवं परम् ॥
विराजमानाः क्रीडन्ति यत्र ते श्राद्धदायिनः ।
सर्व्वकामसमृद्धेषु विमानेष्वपि पादपाः ॥
किं पुनः श्राद्धदा विप्रा भक्तिमन्तः क्रियान्विताः ।
मरीचिगर्भा नाम्ना तु लोका मार्त्तण्डमण्डले ।
पितरो यत्र तिष्ठन्ति हविष्मन्तोऽङ्गिरस्सुताः ॥
तीर्थश्राद्धप्रदा यान्ति यत्र क्षत्रियसत्तमाः ।
राज्ञान्तु पितरस्ते वै स्वर्गमोक्षफलप्रदाः ॥
सुस्वधा नाम पितरो यत्र तिष्ठन्ति ते सुताः ।
आज्यपा नाम लोकेषु कर्द्दमस्य[४] प्रजापतेः ।
पुलहाङ्गजदायादा वैश्यास्तान् भावयन्ति च ॥
यत्र श्राद्धकृतः सर्व्वे पश्यन्ति युगपद्गतान् ।
पितृ-मातृ-स्वसृ-भ्रातृ-सखि-सम्बन्धि-बान्धवान् ॥
अपि जन्मायुतैर्दानहेतुभूतान् सहस्रशः ।
लोकास्तु मानसा नाम ब्रह्माण्डोपरिसंस्थिताः ॥

---

१. यान् दानवाः सुरगणा इति ।
२. तपोयोगसमन्विता इति ।
३. सर्व्वे च इति ।
४. कल्माषस्येति ।

सोमपा नाम पितरो यत्र तिष्ठन्ति शाश्वताः।
धर्म्ममूर्त्तिधराः सर्व्वे पितरो ब्रह्मणः सुताः॥
उत्पन्नाः स्वधया ये तु ब्रह्मत्त्वं प्राप्य योगिनः।
कृत्वा सृष्ट्यादिकं सर्व्वं मानसे संप्रतिष्ठिताः॥

ब्रह्माण्डपुराणे।

लोकाः सनातना नाम[१] यत्र तिष्ठन्ति भास्वराः[२]।
अमूर्त्तयः पितृगणास्ते वै पुत्राः प्रजापतेः॥
विराजस्य प्रजाः श्रेष्ठा वैराजा इति विश्रुताः।
लोकाः सोमपथा नाम यत्र पूर्व्वं मरीचिनः॥
पितरस्तत्र वर्त्तन्ते देवास्तान् भावयन्त्युत।
बर्हिषदस्तु विख्याताः पितरः सोमपायिनः॥
विभ्राजमाना लोकास्ते दिवि भान्ति सुदर्शिताः।
अग्निष्वात्ताः स्मृतास्तत्र पितरो ये परिश्रुताः॥
तान् दानवगणा यक्षा रक्षोगन्धर्व्वकिन्नराः।
नागाः सर्पाः सुपर्णाश्च भावयन्त्यमितौजसः॥
एते पुत्राः स्मृता ब्रह्मन् पुलस्त्यस्य प्रजापतेः।
भूय एते गणाः प्रोक्ता धर्म्ममूर्त्तिधराः स्मृताः॥
उत्पन्ना ये स्वधायान्तु काव्या ह्यग्नेः कवेः सुताः।
पितरो देवलोकेषु ज्योतिर्भासेषु भास्कराः॥
सर्व्वकामसमृद्धेषु द्विजास्तान् भावयन्त्युत।
मरीचिगर्भास्ते लोकान् समाश्रित्य दिवि स्थिताः॥
एते ह्यङ्गिरसः पुत्राः साध्यैः संवर्द्धिताः पुरा।
उपहूताः स्मृतास्ते वै पितरो भास्करा दिवि॥
तान् क्षत्रियगणा हृष्टा भावयन्ति फलार्थिनः॥
आज्यपा नाम पितरः कर्द्दमस्य प्रजापतेः।
समुत्पन्नस्य पुलहादुत्पन्नाः कर्द्दमस्य ते॥
तेजस्विनोऽपि वर्त्तन्ते कामगेषु विहङ्गमाः।
एतान् वैश्यगणाः श्राद्धे भावयन्ति फलार्थिनः॥
सुकाला नाम पितरो वशिष्ठस्य प्रजापतेः।
हिरण्यगर्भस्य सुताः शूद्रास्तान् भावयन्त्युत॥
मानसा नाम ते लोका वर्त्तन्ते यत्र ते दिवि॥

मनुस्मृतौ।

विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः।
अग्निष्वात्ताश्च देवानां मारीच्या लोकविश्रुताः॥

---

१. सन्तानकामाय। २. भास्करा इति।

दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।
सुपर्णकिन्नराणाञ्च स्मृता बर्हिषदोऽत्रिजाः ॥
सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः ।
वैश्यानामाज्यपा नाम शूद्राणान्तु सुकालिनः ॥
सोमपास्तु कवेः पुत्रा हविष्मन्तोऽङ्गिरः सुताः ।
पुलस्त्यस्याज्यपाः पुत्रा वशिष्ठस्य सुकालिनः ॥
अनग्निदग्धाग्निदग्धान्[1] काव्यान् बर्हिषदस्तथा ।
अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत् ॥

अस्य वाक्यस्य मनुभाष्यकृता व्याख्योच्यते ।

विराट्सुताः विराजः सुताः सोमसदो नाम, ते च साध्यानां देवविशेषाणां पितरस्तेषां पूज्याः । अनेनैतत् सूच्यते ईदृशमिदं पित्र्यं कर्म्मावश्यं कर्तव्यम्, यत्कृतकृत्यैरपि साध्यनामकैर्देवैः क्रियत इति ।

अग्निष्वात्तास्तु देवानां अग्नौ पक्वं चरुपुरोडाशादि स्वदन्ते इत्यग्निष्वात्ताः, देवानामिन्द्राग्न्यादीनां पितरस्तेषां पूज्याः । अनेनावश्यकर्तव्यता सूच्यते । एवमुत्तरत्रापि वेदितव्यम् ।

दैत्यदानवयक्षाणां बर्हिषदो नाम पितरः, अत्रेर्जाता अत्रिजाः । सुपर्णाः पक्षिणः, किन्नराः अश्वमुखाः, एतेषां तिरश्चामपि पितरोऽर्चनीयाः, किमुत कर्म्माधिकारिणां मनुष्याणामिति श्राद्धस्यावश्यकर्तव्यतैव सूचिता ।

सोमपा नामेत्यादि । सोमं पिबन्तीति सोमपाः, ज्योतिष्टोमादिदेवताः इन्द्रवाय्वाद्याः । हविर्भुजः पुरोडाशादिभुजो दर्शपूर्णमासादि देवताः । आज्यपा आघाराज्यभागादिदेवताः । सुकालिनः कालयन्ति अपवर्जयन्ति समापयन्ति कर्म्मेति सुकालिनः कर्म्मापवर्गहोमादिदेवताः, अयाश्चाग्नेस्यनभिशस्तिपाश्चेत्यादि विहिताः ।

सोमपास्तु कवेरित्यादि । हविर्भुज एव हविष्मन्तः ।

अनग्निदग्धेत्यादि । अनग्निदग्धः सोमः नह्यग्निनास्यपाकोऽस्ति, तेन या देवता इज्यन्ते ता अपि तत्सम्बन्धेनानग्निदग्धा इत्युच्यन्ते । एवमग्निदग्धा इत्यग्निना पच्यमानपुरोडाशादिहविःसम्बन्धिन्यः ।

अत्रैवमभिसम्बन्धः क्रियते । येऽग्निदग्धा उच्यन्ते तानग्निष्वात्तानिति विनिर्दिशेत् । ये अनग्निदग्धाः तान् सौम्यान् सोमपानेव विनिर्दिशेत् । एवं काव्यान् बर्हिषद इति । कवेः पुत्राः काव्याः । तेन सोमपास्तु कवेः पुत्रा इत्युक्ताः । बर्हिषदोऽत्रिजा उक्ताः । नायमेवकारो यथादेशं द्रष्टव्यः । यथादेशत्वेह्ययमर्थः स्यात् । विप्राणामेवैते पितरो न क्षत्रियादीनाम् । तच्च प्रागुक्तेन विरुध्यते । न चैते वर्णभेदेन पितृत्वेनोक्ताः, येन तत आच्छिद्य ब्राह्मणसम्बन्धि-

[1]. अग्निदग्धानग्निदग्धानिति ।

तैषामुच्येत। तस्मादपकृष्यैवकारः सम्बन्धनीयः, अग्निष्वात्तानेव सौम्यानेवेति। विप्रग्रहणमनुवादत्वात् क्षत्रियादिप्रदर्शनार्थम्।

एवंनामानश्च पितरो वेदे श्रूयन्ते। अग्निष्वात्ताः पितरो[१] ये अग्निदग्धा येऽनग्निदग्धा इति[२]। तान् मन्त्रान् नानाप्रकारेण सुहृद्भूत्वा विवृतवानिति ज्ञेयम्। अथवा विप्राणां निर्द्दिशेदिति न शब्दभेदेनार्थभेदाशङ्का कर्तव्या, विप्रग्रहणमपि क्षत्रियाद्युपलक्षणार्थम्। प्रधाने अनग्निदग्धा अग्निदग्धा बर्हिषदः सौम्याश्च पितरः सोमपाग्निष्वात्तेभ्यः पितरोऽन्य एव। ते चैते अनग्निदग्धादयः सौम्यान्ताश्चतुर्विधाः, कविपुत्राः सोमपा मरीचिपुत्रा अग्निष्वात्ताश्चेति द्विविधाः, एते षड्विधा अपि पितरः। न च वक्तव्यं, सौम्या बर्हिषदोऽग्निष्वात्ताश्च साध्यादीनामपि पितर इति कृत्वा विप्राणामेव विरुध्यत इति। वर्णेषु मध्ये विप्राणामेवेति विवक्षितत्वेनाविरोधात्। न च वर्णोत्तमाभ्यनुज्ञातः शूद्रः सर्व्वान् पितॄन् यजेदिति वाराहपुराणोक्तेन सह विरोधः। अत्र हि विप्राभ्यनुज्ञया शूद्रस्य सर्वे विहिताः, न तु स्वतः। विप्राणामेवेति तु स्वतो विवक्षितमित्यविरोधः। न च कविपुत्राणां सोमपानां विप्रसम्बन्धस्य पूर्वमेवोक्तत्वात् पौनरुक्त्यम्। एतावन्तो द्विजानामेवेति समुदायसम्बन्धस्य विवक्षितत्वाददोषः। वाराहपुराणे ब्राह्मणान् प्रतीत्थं व्यवस्थावाक्यमुक्तम्।

ऊर्ध्ववक्रास्तु ये तत्र ते नान्दीमुखसंज्ञिताः।
वृद्धिश्राद्धेषु सततं पूज्याः श्रुतिविधानतः॥
अग्निः पुरस्कृतो यैस्तु तान् द्विजास्त्वग्निहोत्रिणः।
नित्यैर्नैमित्तिकैः काम्यैः पार्वणैस्तर्पयन्तु तान्॥
आज्यं पिबन्ति ये चात्र तानर्च्चन्ति विशः सदा।

अग्निहोत्रिण इति। एवं क्षत्रियवैश्यैरपि सम्बध्यते। एवञ्च साग्निकानां त्रैवर्णिकानां पितृभागमभिधायानग्निकानामप्याह।

अनाहिताग्नयो ये च ब्रह्मक्षत्रविशो जनाः।
सुकालिनस्तेऽर्च्चयन्तु लोकाग्निषु रताः सदा॥
इत्येवं पूजिता यूयमिष्टान् कामान् प्रयच्छथ।

तथा वाराहपुराण एव।

अनेकधा हि पितरः[३] वर्त्तन्ते द्विजसत्तम[४]।
भूर्लोकवासिनां याज्या भुवर्लोकनिवासिनः।
वस्वाद्यास्तु ततस्तेषां याज्याः स्वर्गनिवासिनः॥
ब्रह्मपुत्रा मरीच्याद्यास्तेषां याज्या महर्गताः।
कल्पवासिन इत्युक्तास्तेषामपि जनस्थिताः॥

---

१. यजुः मा० वा० १९ अ० ५९। ऋक् १०.१५-११।
२. ऋ० १०.१५.१४। येऽअग्निष्वात्ता येऽअनग्निष्वात्ता इति यजुर्वेदे पाठभेदः।
३. एते त एकतनव इति।
४. द्विजसत्तमा इति।

सनकाद्यास्ततस्तेषां वैराजास्तपसि स्थिताः ।
तेषां सत्यगणा उक्ताः इत्येषां पितृसन्ततिः ।
सप्तधा सप्तलोकेषु आदिमन्वन्तरक्रिया ॥
अन्येषां वसवः साध्या रुद्रादित्याश्विनावपि ।
मरुतः[१] सर्ववर्णानां साधारण्येन संस्थिताः ॥
ऋषयश्च तदुत्पन्ना इति सप्तविधा गणाः ।
तेषां कन्या तु सञ्जाता सोमपा पितृसन्ततिः ॥
अग्निष्वात्तेति मारीची वैराजी बर्हिसंज्ञिता ।
सुकाला नाम पितरो वशिष्ठस्य प्रजापतेः ॥
तेऽपि याज्यास्त्रिभिर्वर्णैर्न शूद्रेण पृथक्श्रुतेः[२] ।
वर्णोत्तमाभ्यनुज्ञातः[३] शूद्रः सर्व्वान् पितॄन् यजेत् ॥

अस्यार्थः । सुकालिनस्तु शूद्राणामित्येवंविधेषु मन्वादिवचनेषु पृथक्श्रुतिदर्शनात् शूद्राणामेव सुकालिनः, सुकालिन एव शूद्राणामित्येवंविधो विशेषो न ग्रहीतव्यः । किन्तु ब्राह्मणादीनामपि सुकालिनः पितरो भवन्ति । अन्येऽपि शूद्राणां ब्राह्मणानुज्ञयेति ज्ञातव्यम् ।

न तु सन्ति पृथक् तस्य पितरः शूद्रजातयः ।
मुक्त्वा स्वजनकान् ब्रह्मन् न तु दिव्येषु दृश्यते ॥
विशेषः शास्त्रदृष्ट्या तु पुराणानां निदर्शनात् ।

अस्यार्थः । न तु दिव्येषु पितृषु शूद्रत्वादिरूपो विशेषो दृश्यते । अतः शास्त्रेण दृश्यमानानां दिव्यपितॄणां विद्यते चेत् शूद्रत्वादिरूपो विशेषस्तर्हि शास्त्रेण दृश्येतेत्यर्थः । एवं ऋषिस्तुतैः शास्त्रैर्ज्ञात्वा याज्याः सम्भवाः ।

स्वयं दृष्ट्वा स्मृतिं लब्ध्वा पुराणं ब्रह्मणो यतः ।
परं निर्व्वाणमापन्नास्तेऽपि ज्ञानिन एव च ॥
वस्वादीनां काश्यपाद्या वर्णानां ब्राह्मणादयः[४] ।
अविशेषेण विज्ञेया गन्धर्वाद्या अपि ध्रुवम् ॥
अग्निष्वात्ता ब्राह्मणानां पितरः परिकीर्त्तिताः ।
राज्ञां बर्हिषदो नाम विशां काव्याः प्रकीर्त्तिताः ॥
सुकालिनस्तु शूद्राणां व्यामा म्लेच्छान्त्यजातिषु ।

अथैतेषां माहात्म्यं ब्रह्मवैवर्त्तब्रह्माण्डयोः ।

वैराजा इति विख्याता देवानां दिवि देवताः ।
योगेन तपसा युक्ताः पितरश्च सदा प्रभो ॥

---

१. अग्रत इति ।
२. पृथक्कृतमिति ।
३. वर्णत्रयाभ्यनुज्ञात इति ।
४. वसवादय इति ।

आदिदेवा इति ख्याता महासत्त्वा महौजसः ।
सर्व्वकामैः सदा पूज्या देवदानवमानवैः ॥
मनोजवाः स्वधाभक्षाः सर्व्वकामपरिच्छदाः ।
लोभमोहभयोपेता निश्चिन्ताः कामवर्जिताः ॥
एते योगपरिभ्रष्टाः प्राप्य लोकान् सुदर्शनान् ।
दिव्याः पुण्या विपाप्मानो महान्तस्ते भवन्त्युत ॥
ततो युगसहस्रान्ते जायन्ते ब्रह्मवादिनः ।
प्रतिलभ्य पुनर्योगं मोक्षमिच्छन्त्यमूर्त्तयः ॥
व्यक्ताव्यक्तं परित्यज्य महायोगबलेन च ।
नश्यन्त्युल्केव गगने क्षणाद्विद्युत्प्रभेऽव च ॥
उत्सृज्य देहजालानि महायोगबलेन च ।
निराख्योपाख्यतां यान्ति सरितः सागरं यथा ॥
क्रियया गुरुपूजाभिर्योगं कुर्व्वन्ति यत्नतः ।
ताभिराप्याययन्त्येते पितरो योगवर्द्धनाः ॥
श्राद्धे पीत्वा पुनः सोमं पितरो योगमस्थिताः ।
आप्याययन्ति सोमेन त्रैलोक्यं येन जीवति ॥
श्राद्धैराप्यायिताश्चैव पितरः सोममव्ययम् ।
आप्याययन्ति पुष्ट्याद्यैर्वर्द्धयिष्यन्ति नित्यशः ॥
श्राद्धैराप्यायितः सोमो लोकमाप्याययिष्यति ।
कृत्स्नं सपर्व्वतवनं जङ्गमाजङ्गमैर्वृतम् ॥
एवमाज्ञाकृतं सर्व्वं ब्रह्मणा परमेष्ठिना ।
ते तु ज्ञानप्रदातारः पितरो वै न संशयः ॥
पितॄणां हि बलं योगो योगात् सोमः प्रवर्त्तते ॥

मनुस्मृतौ ।

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ।
न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः ॥

अथ पितॄणां मार्गः वाराहपुराणे ।

इत्युक्त्वा तांस्तदा ब्रह्मा तेषां पन्थानमादिशत् ।
दक्षिणायनसंज्ञन्तु पितृयानं पितामहः ॥

इति श्रीमहाराजाधिराजश्रीमहादेवस्य सकलश्रीकरणाधिपतिपण्डितश्रीहेमाद्रिविरचिते चतुर्व्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे पितृनिरूपणप्रकरणं नाम द्वितीयोऽध्यायः ॥

———

॥ अथ तृतीयोऽध्यायः ॥

देवतानिर्णयप्रकरणम्

यस्यैता गुणरत्नहारलतिकाः कण्ठोपकण्ठे परां
शोभां कन्दलयन्ति दिव्यकविता साम्राज्यभाजां भुवि ।
सोऽयं श्रीकरणेश्वरो वितनुते हेमाद्रिराद्यः सतां
श्राद्धे दैवतनिर्णयं विदलयन्नानाविधं संशयम् ॥

अथैतेषां श्राद्धे देवतात्वं निर्णीयते ।

तत्र तावदिदं सन्दिह्यते ।

किमेतान्यग्निष्वात्तादिप्रतिपादकानि वाक्यान्यर्थवादाः, उत विधयः । विधित्वेऽपि किं गृहीत्वा गोत्रनामनी श्राद्धं कुर्यादित्येवं विधिवाक्यैः सामान्यतो गोत्रेषु विहितेष्वग्निष्वात्तासोमपादिसंज्ञकगोत्रविशेषनियमविधयः । उत श्राद्धदेवतारूपेषु यजमानस्य पितृपितामहादिष्वग्निष्वात्ताद्यभेदद्दृष्टिविधयः । उताग्निष्वात्तादीनां श्राद्धे देवतात्वस्य विधय इति ।

तत्र तावद्विधित्वासम्भवान्मेधातिथिरेषां वाक्यानामर्थवादत्वं मन्यते ।

तथाहि न तावदेते सोमपादयो गोत्रविधयः । यतो नामनिर्द्देशोऽयं न गोत्रनिर्द्देशः सोमपा नामेति श्रवणात् । गोत्रनामत्वेऽपि नामशब्द उपपद्यत एवेति चेत् एवं तर्हि गोत्रनिर्द्देशे वैयधिकरण्यं स्यात् । पितृणां सोमपागोत्रमिति, न तु सामानाधिकरण्यं पितरः सोमपा इति । अथाभेदोपचारेण गोत्रेण सन्तानभेदव्यपदेशो दृष्टः यथा वक्त्रमिन्दुरिति ।

अत्रोच्यते ।

इदमिह निरूप्यम् । किमेतद्गोत्रं नामेति । विद्यावित्तशौर्योदार्यादिगुणयोगाद्विख्याततमेन येन कुलं व्यपदिश्यते स कुलसंज्ञाकारी आदिमः पुरुषो गोत्रमिति । एवं हि सर्व्वेषामेव ब्राह्मणादीनामवान्तरगोत्रभेदाः सन्ति । स्मरन्ति च तादृशम् तत्सन्तानजाः पुरुषा वयममुष्य कुले जाता इति । अतस्तेनैव व्यपदेशो युक्तः । न हि सोमपा वयमिति केचित् गोत्रत्वेन सोमपान् स्मरन्ति यथा भृगुगर्गगालवान् । ब्राह्मणानाञ्च तैरेव गोत्रैर्व्यपदेशो युक्तः । तानि हि मुख्यानि गोत्राणि, रूढ़िरूपेण हि तत्र गोत्रशब्दः प्रवर्त्तते । न हि तेषां गोत्रत्वे एतल्लक्षणम् आदिमः पुरुषः संज्ञाकारी गोत्रमिति अनादित्वादेव गोत्राणां ब्राह्मणजातिवत् । न हि पराशरान्मुनेरूर्द्ध्वं पराशरव्यपदेशः । एवं हि सत्यादिमत्ता वेदस्य प्रसज्यते । अतो नित्यत्वादेतस्य गोत्रव्यपदेशस्य श्राद्धतर्पणादौ तदेव गोत्रं श्रावयितव्यम् । न हि नित्ये सम्भवत्यनित्यस्योपादानं वैदिके कर्म्मणि युक्तम् । अतो ब्राह्मणैर्यथागोत्रं गर्गगोत्रायामुकशर्म्मण इत्येवमुद्देशं कृत्वा श्राद्धादि कर्त्तव्यम् ।

क्षत्रियादीनान्तु नैतादृशो गोत्रव्यवहारो विद्यते। न हि यथा ब्राह्मणा गोत्रं नियतं स्मरन्ति एवं क्षत्रियादयः। तस्मात्तेषां लौकिकमेव गोत्रमादिपुरुषः संज्ञाकारी ख्याततम इति। अतस्तेन गोत्रेण ते श्राद्धादौ व्यपदिश्यन्ते, न तु हविर्भुज इत्यादि गोत्रैः। आदिमत्तापि नामधेये नास्ति।

ननु यद्येवं पुरुषविशेषस्य गोत्रत्वमभ्युपगम्यते तर्हि क्षत्रियादिषु तावदशास्त्रीयं गोत्रव्यवहारमुत्सृज्य शास्त्रस्थैरेव हविर्भुजादिभिर्गोत्रव्यवहारः प्रवर्त्तताम्। न हि। हविर्भुजादीनां गोत्रत्वे प्रमाणाभावात्। स्वायम्भुवेक्ष्वाकुनहुषनाभागभरतर्षभ भगीरथादिवत्तेषां गोत्रत्वेनाप्रसिद्धेः। शिष्टापरिग्रहाच्च। तस्मान्न गोत्रविधयः। नापि श्राद्धदेवतारूपेषु यजमानस्य पितृपितामहादिष्वग्निष्वात्ताद्यभेददृष्टिविधयः। तदनुगुणानां श्रुतिलिङ्गवाक्यादीनामदर्शनात्। न ह्यादित्यो ब्रह्मेत्युपासीतेतिवत् पित्रादिषु सोमपादिदृष्टिः कर्तव्येति दृश्यते। यदपि च मनुदेवलशातातपस्मृतिषु।

वसवः पितरो ज्ञेया रुद्राश्चैव पितामहाः।
प्रपितामहास्तथादित्याः श्रुतिरेषा पुरातनी[१]॥

यदपि च मनुस्मृतौ।

वसून् वदन्ति वै पितॄन् रुद्रांश्चैव पितामहान्।
प्रपितामहांस्तथादित्यान् श्रुतिरेषा सनातनी॥

यदपि नन्दिपुराणादिषु।

विष्णुः पितास्य जगतो दिव्यो यज्ञेश एव च।
ब्रह्मा पितामहो ज्ञेयो ह्यहश्च प्रपितामह इति॥

यदप्यादित्यपुराणे।

मासाश्च पितरो ज्ञेया ऋतवश्च पितामहाः।
संवत्सरः प्रजानां वै सुमेकः प्रपितामहः॥

इति वस्वादिविष्ण्वादिमासादीनां पित्रादिभिः सहाभेदाभिधानं, तदपि न वस्वादिदृष्टिः कर्तव्येत्येवंपरम्। आदित्यो यूप इतिवत् प्राशस्त्यपरतयाप्युपपत्तेः।

न च सम्भवत्यर्थवादत्वे विधिकल्पना युक्ता। तदेवं प्रमाणाभावात् नाभेददृष्टिविधयः। नाप्यग्निष्वात्तादीनां श्राद्धदेवतात्वस्यापि विधयः।

यतः।

न पुत्रः पितरं यस्तु जीवन्तमनुवर्त्तते।
संस्थितं तर्पयेद्भक्त्या श्राद्धेन विविधेन च॥

इत्यादयः श्राद्धविधयो मृतमनुष्यतृप्त्यर्था एवेति मनुष्याणामेव देवतात्वमापादयन्ति, देवतैव हि त्यज्यमानेन हविषा तर्पणीया भवति। वह्वश्च ते तृप्तिसमर्थनप्रकरणे प्रदर्शिताः श्लोकाः, ये मृतमनुष्याणां श्राद्धेषु तर्पणीयत्वं प्रतिपादयन्ति।

---

१. सनातनीति।

अथैवं मन्यसे—त्यज्यमानहविःप्रत्युद्देश्यत्वं न तर्पणीयत्वं, तच्चतुर्थ्यादि प्रमाणकमिति । तदपि तर्हि मनुष्येषु विद्यत एव । पित्रे, पितामहाय, मात्रे, मातामहाय पिण्डान्निर्वपेदित्यादेर्वाक्यस्याधिकारप्रकरणे बहुशो दर्शनात् । तथाहि ब्रह्मपुराणादिषु ।

कुर्यान्मातामहायैव पुत्रिकातनयस्तथा ।
द्वामुष्यायणसंज्ञास्तु मातामहपितामहान् ॥
पूजयेयुर्यथान्यायं श्राद्धैर्नैमित्तिकैरपि ।

अत्र चतुर्थ्यभावेऽपि मृतमनुष्याणां श्राद्धैः पूज्यत्वं देवतात्वं विना न सम्भवतीति ।

इच्छन्ति पितरः पुत्रान्नरकापातभीरवः ।
पितृभ्यो जातिहीनोऽपि तस्मात् कुर्यात् पितृक्रियाम् ॥ इति ।

तथा तस्मै तस्मै य एषां प्रेताः स्युरिति गणगारिः । प्रेतेभ्य एव निपृणीयादिति तौल्वलिरिति । शतपथश्रुतौ च चतुर्थ्यन्तपितृपितामहादिलिङ्गकमन्त्राम्नानं दृश्यते । असावेतत्तऽ इत्येव यजमानस्य पित्रेऽसावेतत्तऽइति पितामहायासावेतत्तऽ इति प्रपितामहायेति[१] । तथा एतत्तेऽन्नं ये च त्वामन्वित्येवमादिषु पिण्डादीनामवनेजनाभ्यञ्जनादिप्रतिपादकेषु मन्त्रेषु मृतमनुष्यप्रकाशनस्य दर्शनात् । न हि प्रयोगासमवेतं मन्त्रं प्रकाश्यमिति युज्यते । न च मृतमनुष्याणां देवतात्वमन्तरेण प्रयोगसमवायः सम्भवति । साक्षाच्च मृतमनुष्योद्देशविधिः श्राद्धेषु दृश्यते ।

तथा च विष्णुधर्मोत्तरे वाराहवचनम् ।

अद्यप्रभृति लोकेषु प्रेतानुद्दिश्य वै पितॄन् ।
ये तु श्राद्धं करिष्यन्ति तेषां पुष्टिर्भविष्यति ॥

नागरखण्डे पितॄन् प्रति ब्रह्मवचनम् ।

पितुः पितामहस्यैव तत्पितुश्च ततः परम् ।
समुद्देशेन यद्दत्तं[२] ब्राह्मणेभ्यः प्रभक्तितः ।
सर्वेषां स्यात् परा तृप्तिर्यावदाभूतसंप्लवम् ॥

तथा सर्वेषु स्मृतिपुराणेषु श्राद्धीयहविः पितुः प्रत्युद्देश्यसगोत्रसम्बन्धनामानि यथावत्परिकीर्त्तयेदित्यादिना गोत्रादिसंकीर्त्तनविधिना मृतमनुष्याणां देवतात्वावगमात् ।

द्विपितुः पिण्डदानं स्यात् पिण्डे पिण्डे च नामनी इति । तथा द्वामुष्याणका दद्युर्द्वाभ्यां पिण्डोदके पृथगिति बौधायननारदादिस्मृतिषु दर्शनाच्च ।

यदि द्विपितास्यादेकैकस्मिन् पिण्डे द्वौद्वावुपलक्षयेदित्यापस्तम्बसूत्रे विधानाच्च । भार्य्यादिषु गोत्रविशेषोपदेशात् । तृप्त्युत्पादनप्रकरणे श्राद्धदेशं प्रति मृतमनुष्यागमनस्योक्तत्वात् ।

---

[१] शतपथ ब्राह्मणे २अ० ४।२।१९ ।

[२] यो दत्ते इति ।

अपि नः स्वकुले भूयाद्यो नो दद्यात्त्रयोदशीम् ।
पायसं मधुसंयुक्तं वर्षासु च मघासु च ॥

इत्यादि मृतमनुष्याणां स्वकुलोत्पन्नश्राद्धकर्तृपुरुषप्रार्थनादर्शनात् । श्राद्ध-देवतारूपाणां प्रशंसाप्रकरणोक्तफलदातृत्वं मृतमनुष्येष्वसम्भावितञ्चेन्मन्यसे, तन्न । देवभूयं गतेषु मनुष्येषु सम्भवात् ।

तदेवं मृतमनुष्याणां पित्रादीनां श्राद्धेषु देवतात्वमवगम्यमानमग्निष्वात्तादीनां देवतात्वं बोध्यत इति नाग्निष्वात्तादि प्रतिपादकानि वाक्यानि देवतात्वस्य विधयः । न च पित्रादिभिः सहाग्निष्वात्तादीनां विकल्पः सम्भवति । यतः पितृपितामहादिभ्यः श्राद्धं कुर्यात्, तथा पित्रे पितामहाय पिण्डान्निर्वपेत्, तथा अत ऊर्द्ध्वं पुत्रास्त्रिभ्यो दद्युरित्येवमादिषु श्राद्धोत्पत्तिविधिवाक्येषु पुत्रादिभिः कर्तव्यमिति श्रूयते । पुत्रादि शब्दाश्च सम्बन्धिशब्दाः, अतः पित्रादीनामुत्पत्तिशिष्टत्वादग्निष्वात्तादीनां तत्र विधानासम्भवात् । न ह्युत्पत्तिशिष्टगुणाविरुद्धे कर्म्मणि तद्विरुद्धं गुणान्तरं विधातुं शक्यम् । शुद्धानुवादे तदप्रत्यभिज्ञानात् । विशिष्टानुवादे गुणान्तरानुरक्तता-विरोधात् । न च देवतान्तरविशिष्टं श्राद्धविध्यन्तरमेवेदमिति वाच्यम् । विहित-विधानासम्भवात् कर्म्मान्तरत्वप्रसङ्गात् ।

किञ्च अग्निष्वात्तादयः पितर उपचर्या इत्येतावदेव श्रूयते । उपचार-शब्दार्थश्च न कश्चिद्दानयागादिवद्विभक्तः प्रतीयते । प्रायेण ह्ययं करोतिवत् सन्निहितक्रियापरतया प्रयुज्यते । सन्निहितञ्च श्राद्धम् । श्राद्धकर्तृसम्प्रदानकं विहित-मशक्यं पुनर्विधातुम् । अविधेयत्वे च न सन्निधिरस्ति । असन्निहितस्य च नोपचारनिर्व्वाचकः । योऽपि लोके गुरुवदुपचर्य्य इत्यत्र प्रयोगेऽपि शुश्रूषालक्षणो-ऽर्थः पादधावनादिः प्रतीयते, सोऽपि गुरुसम्बन्धित्वेन प्रसिद्ध उपमार्थेन वतिना सन्नि-ध्यर्थ एव । असन्निहितस्यापि पादधावनादेरुपचारस्य प्रतीतावतीन्द्रियेषु पितृषु तत् सम्पादनमशक्यमेव । अतो विधियोग्यभावार्थविशेषवाचकशब्दाभावात् विधानानुपपत्तेः ।

न च स्वतः साध्यभावार्थानन्तर्भूतगुणमात्रविधिः सम्भवति । इति नाग्नि-ष्वात्तादीनां पित्रादिभिः सह विकल्पेन समुच्चयेन वा देवतात्वम् । इतश्च न समुच्चयः । त्रिभ्य एव दद्यादिति संख्यानियमबाधापत्तेः । पित्रादीनामग्निष्वा-त्तादीनाञ्चैकस्मिन् प्रयोगेऽन्वयासम्भवात् । न चैवं वक्तव्यम् । ये विज्ञातपित्रादि-नामकास्तत्कर्तृकश्राद्धे पित्रादीनां देवतात्वं, ये चाविज्ञातनामकास्तत्कर्तृके सोमपादीनां देवतात्वमिति व्यवस्थया देवतात्वविधय इति । यतो नामान्यविद्वां-श्चेत् पितामहेऽतिपिण्डान्निर्वपेदिति । तथा यदि नाम न विन्द्यात् स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिण्डं दद्यादिति कल्पसूत्रेषु नामाज्ञानविषये श्राद्धप्रकारस्य विहितत्वात् । तद्विरुद्धस्य कल्पस्य व्यवस्थाविधेरसम्भवात् । अतएव पतितपितृपिता-महादिकर्तृकनित्यामावास्यादिश्राद्धविषयेऽपि न वस्वादिदेवताविधयः । इति न व्यवस्थापि सम्भवति ।

यदि च सोमपादयो यथावचनं श्राद्धदेवतात्वेनाभिप्रेताः स्युः ततोऽभिजन-वचनमनुपयोगि स्यात्। एकत्वे तु सर्व्वमुपपद्यते। यः कश्चित् पितृद्वेषात् पित्रे कर्म्मण्यनादरपरः स्यात् तं प्रति प्रवृत्त्यर्थमिदमुच्यते, मैवं मंस्थाः। मृतमनुष्यरूपाः पितरः श्राद्धैः सन्तर्पिताः कमिव गुणं करिष्यन्ति। असन्तर्पिता वा कं दोषमिति यत एते ब्रह्मपुत्राः मरीच्याद्यृषिपुत्राश्चाग्निष्वात्तादयो महामहिमानो मृतमनुष्यरूप पित्राद्यधिष्ठातारो मनुष्यनामभिः क्रियमाणैः श्राद्धैः सन्तर्पिताः सन्तः सन्तर्पकस्या पेक्षितानेकफललाभरूपं गुणं करिष्यन्ति। असन्तर्पिताश्चापेक्षितहानिरूपं दोषञ्च करिष्यन्ति। इति सन्ति च प्रतिपत्तारो य एतादृशेभ्योऽर्थवादवाक्येभ्यः कर्म्मकर्त्तव्यतां प्रतिपद्यन्ते, नान्यथा।

अथ एतेऽर्थवादा एवेति। इतश्चार्थवादा अशिष्टशिष्टत्वात्। न हि सोमसदः साध्यानां पितरः, अग्निष्वात्ताश्च देवानां, बर्हिषदो दैत्यदानवयक्षाणां गन्धर्व्वोरगरक्षसां सुपर्णकिन्नराणामित्यादिना सोमसदादयः श्राद्धे देवतात्वेन विधीयन्ते। न हि साध्या-दीनां देवानां उरगसुपर्णादीनां तिरश्चां वा धर्म्मरूपे कर्म्मण्यधिकारोऽस्ति। देवानां ह्यधिकारे कर्तृत्वापत्तौ देवतात्वहानिप्रसङ्गः, देवतात्वकर्तृत्वयोर्भेदात्। तिरश्चाञ्च शक्तिज्ञानयोरभावात्। सोमसदः साध्यानां पितर इत्यादिना वा शिष्टेनैकवाक्य-त्वात्—

"सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः"

इत्येवमादयोऽप्यर्थवादा एवेति।

अत्रोच्यते। यद्यपि मनुवाक्यैर्विस्पष्टमग्निष्वात्तादीनां श्राद्धे देवतात्वस्य विधिर्न दृश्यते तथापीतिहासपुराणेषु चतुर्थ्यन्तैः शब्दैः श्राद्धेन सहैषां सम्प्रयोगस्य दर्शनादवगम्यत एव देवतात्वम्, तथाहि पाद्ममात्स्ययोरग्निष्वात्तादीनभिधा-योक्तम्—

तेभ्यः सर्व्वे तु मनवः प्रजाः सर्गे तु निर्म्मिताः।
ज्ञात्वा श्राद्धानि कुर्व्वन्ति धर्म्ममेवेति सर्व्वदा॥

न चैवं वक्तव्यम्। वर्त्तमानोपदेशात् मनुभिरनुष्ठितस्य श्राद्धस्यानुवादोऽयं न ब्राह्मणादिकर्तृकस्य श्राद्धस्य विधिरिति। यतोऽनुवादमात्रमनर्थकम्। प्रशंसार्थ-मिति चेत्, न। प्रशंसापि हि विधेयस्यैव युज्यते। अतो ब्राह्मणादिकर्तृकाग्निष्वात्तादि-देवताकश्राद्धविध्यर्थमेवेदमिति मन्तव्यम्। विधिरपि साक्षात् दृश्यते।

तथा च हरिवंशे।

तेषामथाभ्युपगममनुसूते युगे युगे।
प्रवर्त्तयति श्राद्धानि नष्टे धर्म्मे प्रजापतिः॥
पितृणामादिसर्गन्तु सर्व्वेषां द्विजसत्तम।
तस्मादेवं स्वधर्म्मेण श्राद्धं देयं वदन्ति वै॥

एवमग्निष्वात्तादीनुद्दिश्य ब्राह्मणादिभिरपि श्राद्धं देयम्। स्वधर्म्मेणेति स्वेन

स्वेन धर्म्मेण यथा ब्राह्मणादिभिः पक्वेनान्नेन शूद्रेणामान्नेनैवमादिना प्रकारभेदेनेत्यर्थः।

ब्रह्मवैवर्त्तब्रह्माण्डपुराणयोरपि।

एतेषामभ्युपगमान्मनुर्मन्वन्तरेश्वरः।
मन्वन्तरादौ श्राद्धानि प्रावर्त्तयत सर्व्वशः॥
पितृणामानुपूर्व्वेण सर्व्वेषां वरवर्णिनाम्।
तस्मादिह स्वधर्म्मेण श्राद्धं देयन्तु सर्व्वदा॥

अत्र हरिवंशादिष्वग्निष्वात्तादीनां षष्ठ्यापि श्राद्धसम्बन्धोऽभिधीयमानो देवतात्त्वरूपे विशेष एव पर्य्यवस्यतीति देवतात्त्वेनाभिमतेषु मृतमनुष्येष्वपि बहुशः षष्ठीप्रयोगदर्शनात् इतोऽप्येषां श्राद्धदेवतात्वम्। यतो विष्णुधर्मोत्तरादिष्वेतेषामेव साक्षात् श्राद्धभोक्तृत्वम्, मनुष्याणान्तु एतद्द्वारकं तृप्तियोगमात्रमुक्तम्।

एते श्राद्धस्य भोक्तारो विश्वेदेवैः सदा सह।
एते श्राद्धं सदा भुक्त्वा पितृन् सन्तर्पयन्त्युत॥

तृप्त्या तथैते विनियोजयन्ति दातुः पितृन् सर्व्वगणान् महीपते।

न चैवं वाच्यम्। स्तुतिमात्रमेवेदं तृप्तियोगित्वमात्रं वा, न तु हविः प्रत्युद्देश्यत्वलक्षणं देवतात्वमिति। यतो विश्वेदेवैः सहेति हविः प्रत्युद्देश्यैर्विश्वेदेवैः सह समानभोक्तृत्वस्याभिधानात्। तथा ब्रह्मपुराणे मूर्त्तामूर्त्तानां पितृणां श्राद्धभोक्तृत्वमुक्तम्।

अमूर्त्ता मूर्तिमन्तश्च पितरो द्विविधाः स्मृताः।
नान्दीमुखाः पार्व्वणाश्च एकोद्दिष्टाशिनस्तथा॥
उद्दिष्ट एष मूर्त्तानां पितृणां निर्णयस्त्रिधा॥

अत्र मूर्त्ता अमूर्त्ताः पितरोऽग्निष्वात्तादय एव पितृनिरूपणप्रकरणे दर्शिताः। अत्र च नान्दीमुखा इति वृद्धिश्राद्धाशिनः। पार्व्वणा इति पार्व्वणविधिनिष्पाद्य श्राद्धाशिन इति ज्ञायते। एकोद्दिष्टाशिन इत्येतत् प्रायपाठात्[1]। तथा ब्रह्मवैवर्त्तादिषु बहुपुराणेषु श्राद्धतर्पणीयत्वमेषामुक्तम्।

श्राद्धैराप्यायिताश्चैते पितरः सोममव्ययम्।
आप्याय्यमानं शुक्लाभिर्वर्द्धयिष्यन्ति नित्यशः॥

तथा।

ऊर्द्ध्ववक्त्रास्तु ये तत्र ते नान्दीमुखसंज्ञिकाः।
वृद्धिश्राद्धेषु सततं पूज्याः श्रुतिविधानतः॥

इत्यादौ पितृनिरूपणप्रकरणे दर्शिते वाराहपुराणे श्राद्धविभागेन वर्णविभागेन च स्पष्टमेव दिव्यपितृणां देवतात्वं गम्यते। दृश्यते चाचारे वृद्धिश्राद्धे नान्दीमुखानां देवतात्वम्। न चैवं दृश्यमानेऽपि विधावसति बाधकेऽर्थवादकल्पना न्याय्या।

१. पार्थक्यपाठादिति।

अर्थवत्त्वं हि विधावानर्थक्यमर्थवादे। यतः स्तुतश्चास्तुतश्च तावानेव सोऽर्थः न न्यूनातिरिक्त इति न्यायविदो मन्यन्ते।

यानि पुनश्चोदकक्रियाप्रतिपादनपरैः फलकरणेतिकर्तव्यताभिधायकैः सहपदैः समभिव्याहृतान्यतदर्थानि पदानि तान्यध्ययनविधिविहितक्रियार्थत्वानुरोधेन "एषा हि बहुक्षीरा" इत्यादिवाक्येषु लोकव्युत्पत्तिमुपलभ्य च स्तावकत्वेन यथाकथञ्चिच्छास्त्रे क्रियापरतया वर्णितानि।

यदि नामान्यनतिप्रयोजनवन्ति प्रयोजनशून्यानि वा तथापि तत्र न कश्चिदुपालम्भनयोग्योस्ति नित्यत्वाद्वेदस्येति। अध्ययनविध्यपेक्षितं क्रियाभिधानपरत्वन्तु सस्तुतिकमृतमनुष्याणां देवतात्वमुत्पत्तिशिष्टत्वान्न देवतान्तरविधिः सम्भवतीति। न शुद्धोत्पत्तेरपि दर्शनात्।

तथाहि पाद्ममात्स्यादिषु।

पितृयज्ञन्तु निर्वर्त्य तर्पणाख्यन्तु योऽग्निमान्।
पिण्डान्वाहार्य्यकं कुर्य्याच्छ्राद्धमिन्दुक्षये सदा॥

मनुस्मृतावपि पार्व्वणस्य शुद्धैवोत्पत्तिः।

पितृयज्ञन्तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान्।
कृत्वान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकम्॥ इति

अनेकेषु च श्राद्धकल्पेषु नित्यश्राद्धामावास्याश्राद्धादीनां पितृभ्यो दद्यादित्येवंविध एवोत्पत्तिविधिर्दृश्यते। अग्निष्वात्तादयोऽपि च पितृशब्दवाच्या इत्यग्निष्वात्तादीनामप्युत्पत्तिशिष्टत्वात् देवतात्वेनोत्पत्तिशिष्टगुणावरोधदोषः। यानि पुनरेकोद्दिष्टानि प्रेतश्राद्धानि सपिण्डीकरणसांवत्सरिके च पार्व्वणविकृतिभूते तत्रोत्पत्तिशिष्टमृतमनुष्यदेवताविरोधान्माभूदग्निष्वात्तादीनां देवतात्त्वम्। तस्मादस्तूत्पत्तिशिष्टदेवतानवरुद्धेषु क्वचिदमावास्योपरागादिषु पुण्यकालादिविहितेषु नित्यनैमित्तिककाम्येषु श्राद्धेष्वग्निष्वात्तादीनां वैकल्पिकं देवतात्वम्। अस्ति च वसुरुद्रादित्यानां श्राद्धे देवतात्वस्य विधिः।

याज्ञवल्क्यस्मृतौ।

वसुरुद्रादितिसुताः पितरः श्राद्धदेवता इति।

पैठीनसिरित्याह।

य एवं विद्वान् पितॄन् यजते वसवो रुद्रा आदित्याश्चास्य प्रीता भवन्ति। क एते पितरो नाम येभ्यो दत्तमिहाक्षयं भवति। वसवः पितरः, रुद्राः पितामहाः, आदित्याः प्रपितामहास्तेभ्यो दत्तमिहाक्षयं भवति।

देवलस्मृतौ —

सर्व्वत्र पितरः पूज्या देवतानाञ्च देवताः।
शुचयो निर्म्मलाः शुद्धा दक्षिणां दिशमाश्रिताः॥

वसवः पितरो ज्ञेया इत्यादि । अतो देवताविकल्पः ।
महार्णवप्रकाशकारादयस्तु देवताव्यवस्थां मन्यन्ते ।

तथाहि । त्रिः प्रकाराः पितरः । एके जनकादयः । अपरे मरीच्यादिसुताः सोमपादयः । अपरे वस्वादयः । तत्र जनकादि औत्सर्गिकं श्राद्धम् । तथा च शातपथीश्रुतिः । असावेतत्त इत्येव यजमानस्य पित्र इति । तथा मनुस्मृतिः । प्रथिताः प्रेतकृत्येति । तथा म्रियमाणे तु पितरि पूर्व्वेषामेव निर्व्वपेदिति । नाजीवन्तमतिक्रम्य किञ्चिद्दद्यादिति श्रुतेः । इत्येवमादिवाक्यैः मृतपित्राद्युद्देशेन पितृकार्य्यं विधीयते । तस्योद्देशस्य क्वचिदपवादः स्मर्यते ।

ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते ।
व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ ॥
आत्मनस्त्यागिनाञ्चैव निवर्त्ततोदकक्रिया ॥ इत्यादि ।

एवञ्च पतितपितृकः श्राद्धकर्त्ता पितामहादिभ्यः श्राद्धं करोति, पतितपितृपितामहश्च प्रपितामहादिभ्यस्त्रिभ्यः ।

उक्तं हि । प्रपितामहपूर्व्वेभ्यो जीवत्पितृपितामहः ।
भोजयेत् पार्व्वणे श्राद्धे प्रत्यक्षौ तौ च पूर्व्ववत् ॥
पूर्व्वेषु त्रिषु दातव्यं जीवेच्च त्रितयं यदि ।

महापितृयज्ञे चोक्तम् । त्रीन् परतरान् पितॄनाचष्टे, षष्ठं प्रथमे पिण्डे, पञ्चमं द्वितीये, चतुर्थं तृतीये, सप्तमे निवृत्तिः प्रतीयत इति ।

तत्र पित्रादीनां त्रिचतुराणां पिण्डायोग्यत्वे सप्तमादिभ्यश्च पिण्डनिषेधे पार्व्वणश्राद्ध-पिण्डपितृयज्ञयोश्च नित्यत्वे तयोः कथमनुष्ठानमित्यपेक्षायामुक्तं सोमपा नामविप्राणामित्यादि । वसवः पितरो ज्ञेया इत्यादि च । तस्मात् पतितपित्रादिविषये सोमपादीनां वस्वादीनाञ्चामावास्यादिश्राद्धे पितृयज्ञे च देवतात्वम् ।

तथा चापस्तम्बगोभिलौ ।

यदि नाम न विन्द्यात् स्वधापितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिण्डं दद्यात् । स्वधा पितृभ्योऽन्तरिक्षषद्भ्य इति द्वितीयं, स्वधापितृभ्यो दिविषद्भ्य इति तृतीयमिति ।

अनेन खल्वेकत्वविशिष्टस्य कस्यचिद्देवतात्वं बोधितम् । बहुत्वविशिष्टेन पितृत्वेन च शास्त्रान्तरे सोमपादयो वस्वादयश्च दर्शिताः । अतस्तेषामेव पृथिवीषडादिशब्देनाभिधानमित्येषैव लघ्वी कल्पना । लिङ्गदर्शनाच्च सोमपादीनां देवतात्वम् । तथा च ब्रह्मपुराणे ।

पितॄन् पितामहान् यक्ष्येद्भोजनेन यथाक्रमम् ।
प्रपितामहान् सर्व्वांश्च तत् पितॄंश्चानुपूर्वशः ॥
उशन्तस्त्वेति च जपन् पितॄनावाहयेत्ततः ॥
सोमवन्तो बर्हिषदश्चाग्निष्वात्ताश्च येऽपरे ।
पितरः पुण्ययशसः सर्व्वेऽप्यायन्तु नस्त्विति ॥

वैदिकश्च मन्त्रः।

आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैरिति।[1]

तथा—अग्निष्वात्ताः पितर एह गच्छत सदः सदः सदत सुप्रणीतय इति।[2]

तथा—बर्हिषदः पितरऽऊत्यर्वागिमा वो हव्या चकृमा जुषध्वमिति।[3]

तथा—अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यास इति।[4]

तथा—ये नः पूर्व्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वशिष्ठा इति।[5]

तथा—उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेष्विति।[6]

तथा—अग्निष्वात्तानृतुमतो हवामहे नाराशंसे सोमपीथं य आशुरिति।[7]

हारीतस्मृतौ च लिङ्गदर्शनं। ब्राह्मणानुदपात्रे यथार्थमर्चयित्वेति। व्याख्यातञ्च जयस्वामिना। यस्य वर्णस्य यैः पितृभिरर्चितैः श्राद्धार्थस्य श्राद्धप्रयोजनस्य निवृत्तिस्तान् पितॄननतिक्रम्यार्चयित्वेत्यर्थ इति। ते च सोमपा नाम विप्राणामिति मन्वादिभिर्दर्शिताः।

तथा हारीत एव। सोमज्येष्ठान् पितॄंस्तेन प्रीणाति सोमपांश्च पितॄंस्तेन प्रीणातीति। अग्नौकरणे च दृश्यते। सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नमो यमायाङ्गिरसे पितृमते स्वधा नम इति। महाहविः संज्ञकषट्कपालादि निर्वर्त्त्य पितृयज्ञे च दृश्यते। तथा च शातपथे।

महाहविषा ह वै देवा वृत्रं जघ्नुरित्युपक्रम्य तस्माद्वा एष एतेन यजते[8] इत्यन्तेन सार्थवादकेन वाक्येन पितृयज्ञं विधायोक्तम्। स पितृभ्यः सोमवद्भ्यः षट्कपालं पुरोडाशं निर्वपति सोमाय वा पितृमत इत्यादि।[9] तथा अथ पितृभ्यो बर्हिषद्भ्यः अन्वाहार्य्यपचने धानाः कुर्व्वन्तीति।[10] अथ पितृभ्योऽग्निष्वात्तेभ्यो निवान्यायै दुग्धे सकृदुपमथित एकशलाकया मन्थो भवतीत्यादि।[11]

एतच्चाग्निष्वात्तादिपदानामर्थवादमात्ररूपत्वे कथञ्चिन्नोपपद्यते। तर्पणे च दृश्यते। सोमं पितृमन्तं यममङ्गिरस्वन्तं अग्निं कव्यवाहनं तर्पयेदित्यादि। वस्वादीनाञ्च देवतात्वे लिङ्गं ब्रह्मपुराणे जीवच्छ्राद्धप्रकरणे।

आवाहनादिना पूर्व्वं विश्वान् देवान् प्रपूज्य च।
अहं वसुभ्यस्त्वां विप्र रुद्रेभ्यस्त्वामहं ततः॥
सूर्य्येभ्यस्त्वामहं विप्र भोजयामीति तान् वदेत्॥ इति।

---

[1] यजुः मा. वा. १९-५८
[2] यजुः मा. वा. १९-५९
[3] यजुः मा. वा. १९-५५
[4] यजुः मा. वा. १९-५०
[5] यजुः मा. वा. १९-५१
[6] यजुः मा. वा. १९-५७
[7] यजुः मा. वा. १९-६१
[8] शतपथब्राह्मणे २ अ. ५, ४, १।
[9] शतपथब्राह्मणे २ अ. ६,१,४।
[10] शतपथब्राह्मणे २ अ. ६, १, ५
[11] शतपथब्राह्मणे २ अ. ६, १. ६

तदेवं क्वचित् केषाञ्चिद्दिव्यपितृणां देवतात्वदर्शनादव्यवस्थेति हरिहरादयो मन्यन्ते। अभेददृष्टिविधयो वैते। अयन्तु पक्षः सिद्धान्ततयाभ्युपगन्तुं न्याय्यः। अयमेव ह्याचारे दृश्यते। अयमेव हि सर्व्वेषां विश्वरूपादीनां सम्मतः। अयमेव ह्यनवद्यः। न्यायो हि स्तावकत्वाद्विधिपरत्वमित्येतत् पूर्व्वमेवोक्तम्। आदित्यो यूप इति वेदवाक्ये यूपेऽपि यदि नाम तथा स्यात्तदा किं नाम कर्म्मणो हीयेत, वरं सगुणत्वमेव भवेत्।

विधिपक्षान्तराणाञ्चावद्यानि वक्ष्यन्ते। एतच्च इष्टिविधानं न षट्कपालादि निर्वर्त्यं पितृयज्ञादौ। तत्र हि बर्हिषदादीनामेव देवतात्वस्य विधानात्। यत्र तु श्राद्धाख्ये कर्म्मण्युभयेषां तत्र ह्यग्निष्वात्तादीनां देवतात्वे त्रिसंख्याबाधः, पितृपितामहादिबाधो विकल्पो वा स्यात्। विकल्पेऽपि नित्यवत् श्रुतस्य पक्षे बाध एव। एतेऽन्ये च विकल्पदोषाः स्युः। श्राद्धप्रकरणश्रुतानामपि चेत् षट्कपालादिसाध्ये यज्ञे विनियोगस्तदा प्रकरणादुत्कर्ष इत्येष दोषः।

पतितपितृकादिकर्तृकश्राद्धे देवतात्वविधावापस्तम्बाद्युक्त पृथिवीषडादिदेवताबाधः स्यात्। अर्थवादत्वे च श्रुतदेवतात्वबाधप्रसङ्ग इति। तदेवं श्रुतदेवतात्वानुगुणानवद्यपक्षलाभे मनुष्यपितृभ्यो भेदेन श्रुतानामभेदोपदेशो भेदः श्रुत्यविरोधी देवतात्वविरोधी च कल्प्यते। श्राद्धप्रयोगे देवतात्वेन मृतमनुष्योद्देशे क्रियमाणे मनुष्येषु सोमपादिवस्वादिविष्णवादि-प्रद्युम्नादि-मासादि-वरुणाद्यभेदारोपः कर्तव्य इति। अभेदारोपदार्ढ्याय च द्विजैः सोमरूपेभ्य इत्यादयः, क्षत्रियैस्तु हविष्मद्रूपेभ्य इति, वैश्यैस्त्वाज्यपरूपेभ्य इति, शूद्रैस्तु सुकालरूपेभ्य इति शब्दाः प्रयोज्याः। अथवा अस्मत् पितृपितामह-प्रपितामहेभ्यो वसु-रुद्र-आदित्यरूपेभ्य इति वा, प्रद्युम्न-सङ्कर्षण-वासुदेवरूपेभ्य इति वा, मासर्त्तु-संवत्सररूपेभ्य इति वा, सर्वैरेव शब्दाः प्रयोज्याः। पितृदाने तु अस्मत्पितृ-पितामह प्रपितामहेभ्यो वरुण-प्रजापत्यग्निरूपेभ्य इत्यपि-प्रयोज्यम्। एतच्च स्वावसरे तत्र तत्र वक्ष्यते।

एवं हि सत्येकस्मिन्नेव प्रयोगे उभयेषामुद्देशेन देवतात्वं सिद्ध्यति। न च कस्यचिद्बाधो भवति। भेदाभेदोपदेशौ च समर्थितौ भवतः। अत्र च मुख्यतया मृतमनुष्याणामेवोद्देशः। सोमपादीनां वस्वादीनाञ्चाभेददृष्टिविधयोद्देश्यस्वरूपे प्रवेशः। न पुनर्विपरीतम्।

अतएव वायुपुराणे मनुष्यपितृणामेवोद्देशेन क्रियमाणे श्राद्धे दिव्यपितृणां तृप्तिर्भवतीत्युक्तम्। न तु तेषां प्राधान्येनोद्देशो दर्शितः। उक्तं हि तत्र मनुष्यपितृभेदानभिधाय।

> तेषां निर्वापदत्तेऽमी तत्कुलीनैश्च बान्धवैः।
> मासश्राद्धभुजस्तृप्तिं लभन्ते सोमलौकिकाः॥

नागरखण्डे दिव्यपितॄन् प्रति ब्रह्मवचनम्।

> पितुः पितामहस्यैव तत्पितुश्च ततः परम्।
> समुद्देशेन दत्तेन ब्राह्मणेभ्यः प्रभक्तितः॥

सर्वेषां स्यात् परा तृप्तिर्यावदाचन्द्रतारकम् ।
तथा मातामहानाञ्च पक्षे नास्त्यत्र संशयः ॥
त्रिभिः सन्तर्पितैस्तेऽपि तर्पितास्ते ममाज्ञया ।

इति मनुष्यपितृतृप्तिमभिधाय दिव्यपितृतृप्त्यर्थमुक्तम् ।

युष्माकं तृप्तये यश्च सुखोपायो भविष्यति ।
स श्रूयतां महाभागा गदतो मम साम्प्रतम् ॥
पितॄनन्नेन येनैव समुद्दिश्य द्विजोत्तमान् ।
तर्पयिष्यन्ति तेनैव पिण्डान् दास्यन्ति च क्षितौ ।
तेनैव कर्म्मणा तृप्तिः शाश्वती वो भविष्यति ॥

देवलस्मृतावपि मृतमनुष्योद्देश एवोक्तः ।

प्रेतानुद्दिश्य यत्कर्म्म क्रियते मानुषैरिह ।
तुष्यन्ति पितरस्तेन न प्रेताः पितरः स्मृता इति ॥

न प्रेताः पितर इति निन्दार्थवादेन प्रेतानां हविःप्रत्युद्देश्यत्वलक्षणं देवतात्वं निषिध्यत इति न मन्तव्यम् । प्रेतानुद्दिश्येत्युपक्रमबाधापत्तेः । किन्तु नानायोनिगतानां मनुष्याणां कथं तृप्तिसन्तोषपूर्व्वकममानुषशक्तिं सम्पाद्य फलविशेषदातृत्वमित्याशङ्कां वारयितुं वस्वादीनां प्रेताधिष्ठातृत्वलक्षणं पितृत्वमुच्यत इति । अनेनैवाभिप्रायेण याज्ञवल्क्येनोक्तम् ।

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ।
प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः ॥

अत्र मृतमनुष्योद्देशेन निर्वर्त्येनैव श्राद्धेन वस्वादयः तर्पिताः, अधिष्ठातृत्वेनैव मृतमनुष्यस्य तृप्तिं कुर्वन्तीति बोद्धव्यम् । एतच्च तृप्तिसमर्थनप्रकरणे विस्तरेणाभिहितम् । यदपि च नन्दिपुराणे दिव्यान् पितृगणानभिधायोक्तम् ।

शुभाशुभगतिं प्राप्ता नानायोनिषु ये नराः ।
तैस्तैस्तु पुरुषैरिष्टाः पितरस्तर्पयन्ति तान् ॥
पुत्रैः पौत्रैश्च येषां हि स्विष्टास्तु पितरः सुराः ।
पितृपितामहांस्तेषां तर्पयन्ति सुरास्तु तान् ॥ इति ॥

तदपि याज्ञवल्क्यवचनेनैव व्याख्यातम् ।

ये च नन्दिपुराणे ।

उद्दिश्य विष्णुर्यैरिष्टः पितरस्तैस्तु तर्पिताः ।
ब्रह्मा समिष्टः प्रीणाति पुंसः सर्वान् पितामहान् ॥
श्राद्धकाले समुद्दिश्य त्विष्टोहं यैर्महात्मभिः ।
न यान्ति नरके घोरे तेषां वै प्रपितामहाः ॥ इति ॥

तदपि न विष्णवादीनां प्राधान्येनोद्देशं प्रतिपादयति, किन्त्वभेददृष्टिप्रकारेणोद्देश्यस्वरूपान्तर्भावमेव । एवमन्येष्वप्येवंविधेषु वचनेषु व्याख्यानं विधेयम् । तदेवं

मृतमनुष्याणां श्राद्धे देवतात्वम्। तदभेददृष्टिविधया तु दिव्यपितॄणां देवतास्वरूपेऽन्त-र्भाव इति सिद्धम्। एवञ्च लिङ्गदर्शनान्यप्युपपन्नानीति। तदेवं तावल्लोकान्तरगताः पित्रादयः श्राद्धे देवतात्वेनोद्देश्या इति वर्णितम्।

अथ के कुत्र कियत्संख्या उद्देश्या इत्यपेक्षायामुच्यते। तत्र तावन्मुख्ये पार्वणे पितृ-पितामह-प्रपितामहास्त्रयः, मातामह-प्रमातामह-वृद्धप्रमातामहाश्च त्रय इति। एवं षट् मनुष्यब्राह्मणभोजने पिण्डदाने च सपत्नीका उद्देश्याः।

तथा च वायुपुराणे।

"प्राक्दक्षिणाभिमुखो दद्यात् पिण्डान् पिण्डादनन्तरम्" पिण्डानिति बहुवचनात् बहुत्वेऽवगते प्रथमातिक्रमे कारणाभावादिति न्यायात् वसन्ताय कपिञ्जलानालभत इतिवत् त्रीनेवेत्यवगम्यते। अतएवाऽस्मिन्नेव पुराणेऽभिहितम्।

मधुसर्पिस्तिलयुतांस्त्रीन् पिण्डान्निर्वपेद्बुध इति।

जातूकर्ण्योऽप्याह - कृत्वावनेजनं दद्यात् त्रीन् पिण्डांस्तु यथाविधीति। त एते त्रयः पिण्डाः पित्रे, पितामहाय, प्रपितामहाय इत्येवं त्रिभ्यो देया इति।

तथा च शातपथीश्रुतिः। असावेतत्तऽइत्येव यजमानस्य पित्रेऽसावेतत्त इति पितामहायासावेतत्तऽइति प्रपितामहायेति।

मत्स्यपुराणेऽपि पित्रादीनां त्रयाणां पिण्डभागित्वमुक्तम्।

लेपभागाश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्॥ इति

अत्र चतुर्थो वृद्धप्रपितामहः स आद्यो येषां ते तदाद्यास्तद्गुणसंविज्ञानो बहुव्रीहिः, तस्यातद्गुणसंविज्ञानाद्बलीयस्त्वात्। तद्गुणे हि श्रुतग्रहणं, अग्रहणमतद्गुणे। तस्माच्चतुर्थ-पञ्चम-षष्ठास्त्रयः पुरुषा लेपभागिनः। पित्राद्याः पितृ-पितामह-प्रपिता-महास्त्रयः, एते पिण्डभागिनः। मार्कण्डेयपुराणे चैतद्युक्तमुक्तम्।

पिता पितामहश्चैव तथैव प्रपितामहः।
पिण्डसम्बन्धिनो ह्येते विज्ञेयाः पुरुषास्त्रयः॥
लेपसम्बन्धिनश्चान्ये पितामहपितामहात्।
प्रभृत्युक्तास्त्रयस्तेषां यजमानश्च सप्तम इति॥

तदेवं तावत् पिण्डदाने पित्रादयस्त्रय उद्देश्याः। ब्राह्मणभोजनेऽप्येत एवोद्देश्याः। तथा च वायुपुराणादिषु।

प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु।
श्राद्धेषु चैव सर्व्वेषु तत्पूर्व्वानर्चयेत् पितॄन्॥ इति॥

ब्रह्मपुराणे च लिङ्गदर्शनम्।

पितॄन् पितामहान् वक्ष्ये भोजनेन यथाक्रमम्।
प्रपितामहांश्च सर्वांश्च तत्पितॄंश्चानुपूर्वशः॥ इति॥

तथा शौनकादिसूत्रेषु लिङ्गदर्शनम् ।

पितरिदन्तेऽर्घ्यं पितामहेदन्तेऽर्घ्यं प्रपितामहेदन्तेऽर्घ्यमिति ब्राह्मणहस्तेष्वर्घ्यं निनयेदिति ।

यमस्मृतौ अर्घ्यपात्रस्थापने विधीयमाने तेषां पित्रादिसम्बन्धोऽवगम्यते ।

पैतृकं प्रथमं पात्रं तस्मिन् पैतामहं न्यसेत् ।
प्रापितामहं ततो न्यस्य नोद्धरेन्न च चालयेत् ॥

अत्र चार्घ्यपात्राणां भोज्यब्राह्मणभोजनान्वयात् भोजनान्वये सति तत्रस्थदेवतासम्बन्ध उपपद्यते नान्यथेति ब्राह्मणभोजनेऽपि त्रयाणां देवतात्वम् ।

नन्वस्तु त्रयाणामेव देवतात्वम् यतः कल्पसूत्रेष्वमावास्याश्राद्धे त्रयाणामेव देवतात्वमुक्तम् । मैवम् । यतः-मातामहानामप्येवं तन्त्रं वा वैश्वदेविकमिति विष्णुना याज्ञवल्क्येन च पिण्डदानप्रयोगमभिधायोक्तम् । मातामहानामप्येवं दद्यादाचमनं तत इति ।

अत्राह शङ्खश्रीधरः । स्यादेतदेवम् यदीदं याज्ञवल्क्यवचनमुपदेशकं स्यात् यावतातिदेशकं वाक्यमिति विद्वांसो मन्यन्ते । कथमिति चेत् ? एवं कर्तव्यमित्युपदेशात् । तद्वत्कर्तव्यमित्येतदेवास्माद्वाक्यादवगम्यते, न पुनरेतत् कर्तव्यमिति । न ह्येतदेकं वाक्यं विधातुमतिदेष्टुञ्च शक्नोति, वाक्यभेददोषापत्तेरिति । अतोऽस्य वाक्यस्यायमर्थोऽवगम्यते ।

यः कश्चिद्वचनान्तरेण मातामहश्राद्धस्य कर्त्तावगतः पुत्रिकापुत्रादिः स मातामहश्राद्धं कुर्वन् पितृश्राद्धवत् कुर्यान्नान्यथेति । तदेतदयुक्तम् । विशिष्टविधौ वाक्यभेदाभावात् । श्रुत्या सर्व्वकर्तृसम्बन्धोऽवगम्यते प्रकरणेनापि स एव ।

ननु मातामहानामप्येवमित्येतावदेवात्र श्रूयते, न तु श्राद्धं कुर्य्यादित्येतदपि । अतोऽस्य वाक्यस्यातिदेशमात्रपरत्वे श्रुतार्थविषयो विधिः । विशिष्टविधिपरत्वे च श्रुतार्थविषय इति । मैवम् । श्राद्धं कुर्य्यादित्येतावतो वाक्यावयवस्यावश्यमनुषङ्गेण वा अध्याहारेण वाऽत्र कल्पनीयत्वात् । न हि तमन्तरेण कस्यापि विधिः सम्भवति ।

ननु यावद्यावद्विधेयान्तरमुपादीयते तावत्तावद्विधिशक्तिस्तत्र तत्र सञ्चरति । यथा रक्तः पटो भवतीत्यत्र वाक्ये पटो भवतीत्येतमर्थं परित्यज्य रक्तो भवतीत्येतमर्थमाश्रयते ।

मैवम् । अप्राप्तार्थविषयो हि विधिर्भवतीति विधेः स्वभावः, न तु विधेयान्तरविषय इति । अन्यथा विशिष्टविधिभावोऽपि विलीयते । यस्तु विधेयान्तरविषया विधिशक्तिरित्येवंविधो न्यायः स तु प्राप्ते एकस्मिन् पदार्थे द्वितीयविषयपदार्थ एव भवति । अप्राप्ते तूत्तरपदार्थविषयोऽपीति विवेचनीयः ।

"ननु—कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः ।
उभयोरर्थसम्बन्धः कुर्यात् स उभयोरपि ॥"

इति यमसंहितावचने मातामहश्राद्धं पुत्रिकापुत्रस्यैव नियमेन विहितम्। अतो दौहित्रमात्रस्य न तत्र नियमेनाधिकारोऽस्तीत्यवगम्यते। यतः पुत्रिकासुत इत्येतस्माच्छब्दादपुत्रिकासुतस्य निवृत्तिरेव गम्यते। शब्दवृत्तेरन्यनिवृत्तिपरत्वादिति। तस्मादेतद्वचनाविरोधाय मातामहानामप्येवमित्येतद्वचनमतिदेशमात्रपरं व्याख्येयमिति।

मैवम्। द्विविधो हि पुत्रिकापुत्रः। एको मातामहेनैव सम्बद्धः, अन्यो मातामहेन पित्रा च। तत्र यो मातामहेनैव सम्बद्धः पुत्रिकापुत्रः स मातामहश्राद्धमेव नियमात् कुर्यात्, पितृश्राद्धन्तु कुर्याद्वा नवेति। तस्य पितृश्राद्धनियमनिवारणार्थं 'नियमात्पुत्रिकासुतः' इत्येतद्वचनम्। न तु दौहित्रान्तरस्य मातामहश्राद्धनियमनिवारणार्थमिति। एतच्चाधिकारिप्रकरणे विस्तरेणाभिधास्यते।

कर्कोपाध्यायेनाप्युक्तम्। श्राद्धं कर्तव्यमित्येवंविधे विधौ विशेषानवगमादुभयेषां श्राद्धं कर्तव्यमित्यवगम्यते। सूत्रकारवचनाच्च त्रींस्त्रीन् पिण्डानवनेज्य दद्यादिति, वीप्सा हीयं मातामहपिण्डापेक्षया सह प्रयोग एवोपपद्यते। मन्त्रलिङ्गाच्च पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्य इति। इतश्च पार्वणे मातामहश्राद्धमावश्यकम्।

"मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्"

इति वैश्वदैविकस्य तन्त्रतोपदेशात्। यदि मातामहश्राद्धं पितृश्राद्धप्रयोगकाले न प्रयुज्येत तदा किमपेक्षा वैश्वदेवतन्त्रता स्यात्। मरीचिरप्याह।

तथा मातामहश्राद्धं वैश्वदेवसमन्वितम्।
कुर्वीत भक्तिसम्पन्नस्तन्त्रं वा वैश्वदेविकमिति।

तदेवं षड्दैवत्यं मुख्यं पार्वणमिति सिद्धम्। यच्च पार्वणेन विना क्रियमाणमष्टकासंक्रान्तिग्रहणादिसाधारणकालविहितं नित्यनैमित्तिकं काम्यं वा अहन्यहनि यच्छ्राद्धं तन्नित्यमित्येवं लक्षणकं प्रतिदिनमनुष्ठीयमानञ्च नित्यं तदपि षड्दैवत्यमेव। पार्व्वणेतिकर्तव्यतातिदेशात्, धौम्यवचनाच्च।

पितरो यत्र पूज्यन्ते तत्र मातामहा अपि।
अविशेषेण कर्तव्यं विशेषान्नरकं ध्रुवमिति॥

अत्राह शङ्खश्रीधरः। यत्र त्रयोदशीश्राद्धवृद्धिश्राद्धादौ वर्गद्वयस्य नियमेनैव श्राद्धं विहितं तद्विषयं धौमवाक्यं द्वामुष्यायणदत्तपुत्रिकापुत्रादिविषयञ्चेति। तदयुक्तम्। सर्व्वविषयत्वे न्यायवचनाभ्यां विरोधाभावात्। पराभिमतत्रयोदश्यादिविषयत्वेचानुवादकत्वापत्तेः। यतस्त्रयोदश्यादौ वर्गद्वयस्य श्राद्धं तत्प्रकरणे विशेष वचनैरेव विहितम्। अविशेषविधायकत्वान्नानुवादकमिति चेत्, मैवम्। पितरो यत्र पूज्यन्त इत्यादि पूर्व्वार्थस्यानुवादत्वानिवृत्तेः। किञ्च अविशेषविधावप्यनुष्ठेयाधिक्याभावाद्यावत्प्राप्तमेवोपदिश्यत इति सर्व्वस्याप्यनुवादकत्वम्। आदरस्यापि श्राद्धानतिरिक्तत्वात् श्रद्धान्वितः श्राद्धं कुर्व्वीतेत्यादिनैव प्राप्तत्वात्।

नन्वनेनैव तर्हि सर्व्वत्र वर्गद्वयस्य श्राद्धे प्राप्ते त्रयोदश्यादौ वर्गद्वयश्राद्धोपदेश-

कानामनुवादकत्वं स्यात्। न स्यात्। प्रमादादन्यथाकरणे तेषां प्रत्यवायातिशय-प्रतिपादनपरत्वात् विधित्वस्य वक्ष्यमाणत्वाच्च। बृहस्पतिस्मृतावपि—

सर्व्वस्मात् प्रकृतादन्यात् पिण्डान्मधुतिलान्वितान्।
पितृ-मातामहादीनां दद्याद् गृह्यविधानतः॥

पितृ-मातामहादीनामित्यस्यायमर्थः। पित्रादीनां त्रयाणां मातामहादीनां त्रयाणामित्येवममावास्याश्राद्धे पिण्डान् दद्यादिति।

कात्यायनोऽप्याह।

कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम्।
प्रत्याब्दिकं वा शेषेषु पिण्डाः स्युः षडिति स्थितिः॥ इति।

कर्षूसमन्वितं सपिण्डीकरणम्। अनेनार्थात् कर्षूसमन्वितादिषु मातामहश्राद्धं न विद्यत इति चोक्तं भवति।

देवलादिस्मृतिषु।

एकेनापि हि विप्रेण षट्पिण्डं श्राद्धमाचरेत्।
षडर्घ्यान् दापयेत्तत्र षड्भ्यो दद्यात्तथाशनम्॥
पिता भुङ्क्ते द्विजकरे मुखे भुङ्क्ते पितामहः।
प्रपितामहस्तु तालुस्थः कण्ठे मातामहः स्मृतः॥
प्रमातामहस्तु हृदये वृद्धौ नाभौ तु संस्थितः।
एवमप्याचरेच्छ्राद्धं षड्दैवत्यं महामुने।[१]
विभक्तं कारयेद्यस्तु पितृहा स प्रजायते॥

मत्स्यपुराणे पिण्डान्वाहार्य्यप्रयोगे।

प्राचीनावीतिना कार्यमतः सर्व्वं विजानता।
षड्वत्तस्माद्धविः शेषात् पिण्डान् कृत्वा तथोदकम्।
दद्यादुदकपात्रेषु सलिलं सव्यपाणिना॥

पुलस्त्योऽप्याह।

मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः।
तेषां तु पितृवच्छ्राद्धं कुर्य्युर्दुहितृसूनवः॥

पितृवदिति त्रैपुरुषिकं आवश्यकत्वेन तुल्यादरतया च।

व्यासोऽप्याह

पितृन् मातामहांश्चैव द्विजः श्राद्धेन तर्पयेत्।
अनृणः स्यात् पितृणान्तु ब्रह्मलोकं च गच्छति॥

---

[१] महामुदे इति।

ब्रह्माण्डपुराणेऽपि

तस्मात्तु पैतृकं श्राद्धं पितृप्रभृतिषु त्रिषु ।
कुर्यान्मातामहानाञ्च तथैवानृण्यकारणात् ॥

आनृण्यकारणादित्यभिधानात् तस्याकरणे पितॄणां ऋणमनपाकृतमेव तिष्ठतीत्यवगमादावश्यकत्वं गम्यते । अत एव तस्याकरणे दोषोऽपि ब्रह्माण्डपुराणे—

पार्व्वणं कुरुते यस्तु केवलं पितृहेतुतः ।
मातामहान्न कुरुते पितृहा स प्रजायते ॥ इति ।

ननु यदि दौहित्रमात्रस्य मातामहश्राद्धमावश्यकं तर्हि स्कन्दपुराणे धनहारिण एव दौहित्रस्य मातामहश्राद्धमावश्यकमिति कथं प्रतिपादितम् । तथाहि ।

श्राद्धं मातामहानान्तु अवश्यं धनहारिणा ।
दौहित्रेणार्थनिष्कृत्यै कर्तव्यं विधिवत् सदा ॥ इति ।

अतो धनहारिणो दौहित्रादन्यस्य मातामहश्राद्धमनावश्यकमिति गम्यते । मैवम् । अलमेतन्मनुष्याणामित्यादिवाक्यशेषपर्य्यालोचनया दौहित्रधनहारिशब्दस्य दौहित्रमात्रोपलक्षणपरत्वस्याधिकारिप्रकरणे वक्ष्यमाणत्वात् ।

किञ्च दौहित्रमात्रस्यामावास्यादिकालिकमातामहश्राद्धाधिकारे सत्यपि धनहारिणो दौहित्रस्य मातामहश्राद्धादावप्यधिकारलाभार्थमेतद्वचनमिति न दौहित्रान्तराधिकारनिवृत्तौ पर्य्यवस्यति ।

यदपि मनुवचनम्—

दौहित्रो ह्यखिलं ऋक्थमपुत्रस्य पितुर्हरेत् ।
स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च ॥ इति ।

अपुत्रमातामहश्राद्धस्यैवावश्यकत्वं दर्शयति तदपि पूर्व्वेण समानार्थतया व्याख्येयमिति ।

तदेवमेतत् सिद्धम्—अमावास्यादि साधारणकालविहिते श्राद्धे पित्रादीनां त्रयाणां मातामहादीनामपि त्रयाणामित्येवं षण्णां देवतात्वमिति । तदेतदेषां देवतात्वं प्रत्येकमेव, न पुनः समुदितानाम् ।

तथा च श्रुतिः प्रत्येकमेवोद्देशं दर्शयति ।

असावेतत्त इत्येव यजमानस्य पित्रेऽसावेतत्त इति पितामहायाऽसावेतत्त इति प्रपितामहायेति ।

मनुः ।

यत् किञ्चिन्मधुसंमिश्रं गोक्षीरघृतपायसम् ।
दत्तमक्षयमित्याहुः पितरस्त्वेव देवताः ॥ इति ।

अत्र देवता इत्यस्मिन् बहुवचनान्ते शब्दे देवता च देवताचेत्येवंविधविग्रह-

वाक्योपदेशात् देवतानां बहुत्वावगतेः प्रत्येकपरिसमाप्तमेव देवतात्वमवगम्यत इति हरिहरः।

वैजवापश्च—

उशन्तस्त्वेत्यनया यजमानस्य पितरं पितामहं प्रपितामहं नामभिरावाह्यायन्तु न इति जपित्वा पात्राण्युद्दिशति। पितरेतत्तेऽर्घ्यं पितामहैतत्तेऽर्घ्यं प्रपितामहैतत्तेऽर्घ्यमित्यावाहनार्घ्यादौ प्रत्येकमेव पित्रादीन् निर्दिशतीति प्रत्येकमेव देवतात्वं मन्यते। आश्वलायनश्च। स्वधा पित्रे स्वधा पितामहाय स्वधा प्रपितामहायेति प्रत्येकमेव निर्दिशति।

विष्णुश्च। नमो विश्वेभ्यो देवेभ्य इत्यन्नमादौ प्राङ्मुखेषु निवेदयेदित्यन्ननिवेदने पित्रादि प्रत्येकमेव चतुर्थ्यन्तैः शब्दैर्निर्दिशति।

कात्यायनश्च। स्वधां वाचयिष्ये इति पृच्छति, वाच्यतामित्युक्ते पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यश्च स्वधा वाच्यतामिति प्रत्येकमेव निर्देशं दर्शयति। तथा असाववनेनिक्ष्वेति यजमानस्य पितृप्रभृतींस्त्रीनित्यवनेजनप्रयोगे प्रत्येकमेव निर्देशं दर्शयति।

ब्रह्मपुराणेऽपि।

> पितृभ्यश्च तथा दद्यादन्नमामन्त्रणेन तु।
> एकैकस्यापि विप्रस्य गृहीत्वाङ्गुष्ठमादरात्॥

अमुकगोत्रैतत्तुभ्यमन्नं स्वधा नम इति। अत्रामुकगोत्रैतत्तुभ्यमन्नमित्ययं व्यक्तं पृथङ्निर्देशो दृश्यते। तदेवमादिभिः श्रुति-स्मृति-पुराणवचनैः पित्रादीनां प्रत्येकमेव देवतात्वमवगम्यते।

ननु श्राद्धममावास्यायां पितृभ्यो दद्यादिति गौतमोक्तेः पितृभ्यो दद्यात् पूर्वेद्युः ब्राह्मणान् सन्निधाप्येति वशिष्ठोक्तेश्च समुदितानां देवतात्वमवगम्यते। तत्र हि पितृभ्य इत्यनेनैकशेषेणेतरेतरयोगोऽवगम्यते। मैवम्।

न हि चतुर्थी देवतात्वं ब्रूते, किन्तु तया कल्पनीयं तद्भवेत्। न च कल्पयितुं शक्यते। पूर्वोपदर्शितश्रुतिस्मृतिविरोधात्। इतरेतरयोगश्चाभिधानक्रियापेक्षया लोके वेदे च दृष्टः। यथा गर्गा भोज्यन्तां क्षौमेवसानावग्निमादधीयातामिति।

ननु तदुभयविधवचनदर्शनात् प्रत्येकं मिलितानां वा देवतात्वमिति किं न कल्प्यते। अत्र कश्चिदाह।

तुल्यबलप्रमाणद्वयोपनिपाते हि विकल्पः स्यात्। न चैतदत्रास्ति। मन्त्रवर्णाद्धि प्रत्येकं देवतात्वमवगम्यते। समुदितानान्तु चतुर्थ्या, चतुर्थी च मन्त्रवर्णात् दुर्बला। प्रयोगसमवायी हि मन्त्रवर्णः प्रयुज्यमानावस्थपदार्थप्रकाशकत्वाद्देवतास्वरूपाभिधायकश्च इति चतुर्थीतोऽभ्यर्हितः। चतुर्थी तु साक्षाद्देवतास्वरूपानभिधायिकेति। अतो न प्रत्येकपक्षसमुदायपक्षयोर्विकल्पः प्रमाणवान्। तन्न।

श्रुतिर्हि चतुर्थी, लिङ्गं मन्त्रवर्णः। श्रुतिश्च बलीयसी।

नन्वेवम्, तर्हि मिलितानां देवतात्वमापतितम्। मैवम्। पूर्वोक्तेन न्यायेन प्रत्येकदेवतात्वपक्षस्य निर्व्वाहात् बहुतरवचनावस्पृष्टत्वाच्च प्रत्येकपक्षस्य बलवत्त्वम्। यदि च समुदितानामपि देवतात्त्वं स्यात्तदा ब्राह्मणबहुत्वेऽपि कदाचिदेकैकस्मिन् ब्राह्मणे समुदितानामुद्देश्यत्वं स्यात्, न तु नियमाद्भेदेनेति।

अथैकब्राह्मणपक्ष एव समुदितानां देवतात्वम्। मैवम्। ब्राह्मणबहुत्वैकत्वनिमित्तेन देवतात्वाश्रवणात्। अथान्य एवायं समुदितदेवताकः प्रयोगः, अन्य एव प्रत्येकदेवताकः प्रयोग इत्युच्यते तदा समुदितासमुदितदेवताभेदेनागृह्यमाणविशेषतया चैकस्यापि प्रवृत्ततन्त्रत्वानवगमात् प्रसङ्गानुपपत्तौ पृथगनुष्ठाने प्राप्ते चत्वारो ब्राह्मणाः स्युरिति कृत्वा—

'द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा। भोजयेत् सुसमृद्धोऽपि' इत्यादिका त्रिब्राह्मणैकब्राह्मणपक्षयोः कल्पानुकल्परूपत्वप्रतिपादिका मन्वादिस्मृतिर्बाध्येत।

किञ्चैकब्राह्मणपक्षेऽपि परिवेषितस्यान्नस्य विभागं कल्पयित्वा पृथगेकैकमुद्दिश्य त्यागं दर्शयन् बृहस्पतिरेकैकस्यैव पित्रादेर्देवतात्वं दर्शयति।

यद्येकं भोजयेद्विप्रं स्वल्पत्वात् प्रकृतस्य तु।
स्तोकं स्तोकं समुद्धृत्य तेभ्योऽन्नन्तु प्रकल्पयेत्॥ इति।

अत्र केनचित् प्रचेतोनाम्ना वचनं कल्पितम्।

उद्देश्यैक्ये द्विजैक्ये वा एकार्घ्यैकपवित्रकम्।
पिण्डनिर्व्वपणञ्चैकमिति गालवभाषितम्॥ इति।

अत्र वाक्ये उद्देश्यानेकत्वेऽपि द्विजैक्ये विभागमपरिकल्प्यैव पिण्डदानविधानात् समुदितानां देवतात्वं गम्यते। तत्र विभागकल्पनावचनैः पृथक्पिण्डदानवचनैश्च विरोधे ध्येयमेव तावदेतद्वचनम्। एकोद्दिष्टविषयत्वेन वा व्याख्येयम्। उद्देश्यैकत्वे सति ब्राह्मणभूयस्त्वं वैकत्वं वास्तु, तथाप्येकमेव श्राद्धं कर्तव्यमित्यर्थः। उद्देश्यभेदे हि द्विजैक्येऽपि पूर्व्ववचनैरेव भेदेनानुष्ठानस्य सिद्धत्वात्। एकब्राह्मणनिमन्त्रणवति प्रयोगान्तरे समुदितदेवतात्वपक्षाश्रयणे तत्र 'उशन्तस्त्वा' इत्यावाहनऋचोऽन्वयो न स्यात्।

ननु 'उशन्तुशन्त आवाह पितॄन्' इति बहुवचनान्तेन पितृशब्देन द्वन्द्वसमानार्थैकशेषवशादितरेतरयुक्तानामेव पित्रादीनां देवतात्वमभिधीयत इति लिङ्गात् तत्रैव विनियोगे कथमनन्वयाशङ्का क्रियते।

उच्यते। 'उशन्तस्त्वा' इत्यनया यजमानस्य पितरं पितामहं प्रपितामहं नामभिरावाह्येति प्रत्येकदेवतावत्येवप्रयोगे वैजवापवचनैर्विनियोगादैन्द्रीवल्लिङ्गानुरोधात्।

तस्मादेकब्राह्मणपक्षेऽपि प्रत्येकमेव पित्रादीनां देवतात्वमिति प्रत्येकमेवोद्दिश्य सर्व्वत्यागा विधेयाः, न तु कदाचिदितरेतरयोगाभिधायिना द्वन्द्वसमासेनसमुदितानुद्दिश्येति स्थितम्।

अथेदं विचार्यते। किमेषां सपत्नीकानां देवतात्वम्, उत केवलानामिति। तत्र तावत् केवलानामिति हरिहरो मन्यते। तथा च ब्रह्मपुराणे प्रयोगवाक्यं सपत्नीका इति विशेषणशून्यमेव रचितं दृश्यते।

एकैकस्याथ विप्रस्य गृहीत्वाङ्गुष्ठमादरात्।
अमुकामुकगोत्रैतत्तुभ्यमन्नं स्वधा नमः॥ इति॥

अत्राद्ये अमुकशब्दे सम्बन्धनामनी विवक्षिते। द्वितीये गोत्रं स्पष्टमेव। तदेवं प्रयोगवाक्यं निष्पद्यते।

अस्मत्पितर्यज्ञदत्तशर्मन् वाशिष्ठगोत्रैतत्तुभ्यमन्नं स्वधा नमो नम इति कल्पसूत्रेष्वपि वाक्यरचना विशेषणशून्यैव दृश्यते।

तद्यथा साङ्ख्यायन गृह्ये—अन्नश्चासावेतत्त इत्युद्दिश्य भोजयेदिति।

विष्णुग्रन्थेऽपि—पित्रे पितामहाय नामगोत्रेभ्यो गोत्राभ्यामुदङ्मुखेष्वित्यादि।

न चात्र पत्नीविशेषणवतः पित्रादेर्देवतात्वे प्रमाणमस्ति। न चैवं वाच्यम्।

"अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरं तथा॥
अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह॥

इति शातातपस्मृतौ मातुः पत्या सह श्राद्धं कर्तव्यमिति वचनात् पत्नीविशेषणवतः पित्रादेर्देवतात्वं कल्पनीयमिति।

यतः कल्पनायां पूर्वोपदर्शित पुराणादिस्थितप्रत्यक्षप्रयोगवाक्यविरोधः स्यात्। किञ्च 'पतिना सहेति' वचनात् सहयुक्तेऽप्रधान इति शब्दानुशासनाच्च पत्युः सहयोगेनाप्रधानत्वात् प्राधान्योपस्थापकविशेष्यत्वानुपपत्तौ सभर्तृकायै मात्रे इति प्रयोगवाक्यं स्यात्।

किञ्च यथा 'पात्नीवतं ग्रहं गृह्णाति' इत्यत्र पत्नीवतो निरपेक्षस्य देवतात्वे सिद्धे 'सजूर्देवेन त्वष्ट्रा सोमं पिब' इति सहत्वे श्रुतिसामर्थ्येन न त्वष्ट्रा सहितस्य देवतात्वमेवमिहापि 'पित्रे पितामहाय श्राद्धं कुर्यात्' इति निरपेक्षश्रुतेर्न पत्नीसहितस्य देवतात्वमिति।

न च वाच्यम्, तद्धितविरोधात्तत्र तथा। अत्र तु कल्पनीयं देवतात्वम्। सहश्रुतिसामर्थ्यात् सपत्नीकस्यैव कल्प्यमिति।

यतस्तत्रापि गृह्णातीति ग्रहणमात्र एवोद्देश्यत्वश्रवणाद्देवतात्वं कल्प्यमेव। यथैन्द्रवायवं गृह्णातीत्यादिष्विन्द्रवाय्वादीनाम्। इतश्च न पत्नीविशेषणवतः पित्रादेर्देवतात्वम्। यतः—

'न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते।
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता'॥

इत्यादीनि वाक्यानि योषितां विशेषणत्वेनाप्युद्देश्यत्वं नास्तीत्येतदेव प्रतिपादयन्ति। न चैतद् वक्तव्यम्। पृथग्दाननिषेधादपृथग्दानमनुमतमिति। पतिविशेषण-

त्वेनाप्युद्देश्यत्वमभ्यनुज्ञायत इति योषित्ग्रहणस्याविशेषणत्वात्। यतोऽस्मिन् पक्षे-पत्नीसाहित्यात् पुरुषाणामपि पृथग्दानाभावात्। तस्मान्न योषिद्भ्यो दद्यादित्ये-तावदेवात्र विधीयते।

'स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता' इत्ययं हेतुवन्निगदोऽप्यमुमेवार्थं द्योतयति। अत्र हि भर्त्तृपिण्डइति पिण्डो व्यपदिश्यते, न पत्नीपिण्ड इति। यदि पत्न्या अपि तस्मिन् पिण्डे भर्त्तृविशेषणत्वेनोद्देश्यत्वं स्यात्तदा द्वयोरेवासौ पिण्ड इति द्वाभ्यां व्यपदिश्येत। तस्मात् पुरुषानेवोद्दिश्यप्रदीयमानपिण्डांशेभ्यो योषितामपि तृप्तिर्भवतीति नोद्देश्या योषित इत्युक्तं भवति। अतएव मत्स्यपुराणे अग्निमत्कर्त्तृका-मावास्याश्राद्धप्रयोगे पत्नीनां पृथक्पिण्डा विहिताः। न पुनः पितृविशेषणत्वेनो-द्देश्यत्वं विहितमिति। तद्यथाः—

षड्वत्तस्माद्धविःशेषात् पिण्डान् कृत्वा तथोदकम्।
दद्यादुदकपात्रैस्तु सलिलं सव्यपाणिना॥

इत्यादिनोल्लेखनावनेजन-ग्रहण-निनयन-प्रत्यवनेजन-नमस्कार-गन्ध-पुष्पाद्यर्च-नाद्यन्तं पित्रादिषट्पुरुषपिण्डदानप्रयोगमभिधायोक्तम्।

ततः कृत्वान्तरे दद्यात्तत्पत्नीभ्यः कुशान् बुधः।
तत्तत्पिण्डादिकं कुर्य्यादावाहनविसर्जनम्॥

इति चतुर्विंशतिमतेऽप्युक्तम्।

क्षयाहं वर्जयित्वैकं स्त्रीणां नास्ति पृथक्क्रिया।
केचिदिच्छन्ति नारीणां पृथक्श्राद्धं महर्षयः॥

इति साङ्ख्यायनगृह्येऽपि पत्नीनां पृथगेव पिण्डदानं विहितम्। न पुनः पति विशेषणत्वेनेति। तस्मात् पित्रादीनां केवलानां देवतात्वात् सपत्नीकेति विशेषणशून्य एव पित्राद्युद्देशः कर्तव्य इति प्राप्तेऽभिधीयते।

सपत्नीकानामेव देवतात्वमिति 'अन्यत्र पतिना सहेति' वचनात्। न च सभर्त्तृकायै मात्र इति प्रयोगप्रसङ्गः। प्रतीयमानस्यापि पत्न्याः प्राधान्यस्यात्रावि-वक्षितत्वात्। पतिसहत्वस्य प्राधान्यस्य च विवक्षितत्वे गौरवं स्यात्। प्राप्ते च कर्म्मणि गुणद्वयविधौ वाक्यभेदः स्यात्। अप्राधान्यकारणानां भूयसामुपलम्भात्तेषा-ञ्चैककारणापेक्षया बलीयत्वात्। विप्रतिषिद्धधर्म्मसमवाये भूयसां स्यात् सधर्म्म-त्वमिति न्यायात्।

अथ तानि कारणानि प्रदर्श्यन्ते।

तत्र तावत् —अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरं तथा। अत्र मातुः पृथक्श्राद्धं' इत्येतावता पदकदम्बकेन मातृश्राद्धस्य पृथक्त्वमात्रमभिधाय अन्यत्र तद्व्यतिरेकाभि-धानं कृतम्। 'अन्यत्र पतिना सहेति' तत्र पूर्व्वमभिहिताप्राधान्यव्यतिरेकात्मकस्य प्राधान्यस्याप्यभिधाने विवक्षिताभिधानमेव। विवक्षिताभिहितव्यतिरेकातिरिक्त-त्वात्। स्त्रीधर्मेषु स्त्रीणां पतिपारतन्त्र्यादप्राधान्यमुक्तम्।

लोकतोऽपि तदेव गम्यते। तस्माद्वस्तुबलविरोधात् शब्दबलोपनीतं प्राधान्य-मविवक्षितमितिकल्प्यते।

ननु शब्दैकप्रमाणके श्राद्धकर्त्तृव्यापाररूपे देवतात्वेनाभिधाने प्राधान्यं शब्द-बलोपनीतम्। लोकादिभिश्च पत्नीव्यापारे पतिपारतन्त्र्यमवगतम्। न च तयो-र्विरोधोऽस्तीति। कथं तद्बलात् प्राधान्यस्याविवक्षेति।

उच्यते—'प्रथिवा प्रेतकृत्येत्यादिवचनपर्यालोचनया भोजनद्वारेण प्रमीतमनुष्यो-पकारिकेयं श्राद्धक्रियेत्यवगमात् पत्या सह पत्न्या अपि भोजने क्रियमाणे स्वकार्य्ये तत्पर-तन्त्रतास्तीति। तथैवाभिधाने प्राप्ते श्राद्धकर्त्तृव्यापारेण सह विरुद्धं लोकाद्यवगतम-प्राधान्यमिति। तदनुरोधात् प्राधान्यमविवक्षितं गम्यते। पित्रे पितामहाय प्रपिता-महाय श्राद्धं कुर्यादित्येवंविधे श्राद्धोत्पत्तिविधौ पित्रादीनां देवतात्वेऽवगते पूर्व्वावगतेन तेनैव प्रधानस्यानवरोधे पश्चादागच्छतस्तत्पत्नीनां देवतात्वस्यागन्तूनां निवेशोऽन्त इति न्यायादप्रधानस्यानाश्रयणमेवोचितमिति नोत्पत्तिशिष्टगुणविरोधोऽपि। न हि मुखान्तरेण निविशमानफलचमसवदुत्पत्तिशिष्टेन बाधितुं शक्यते। विशेषणत्वेन निविशमानं सुतरां न शक्यते। सर्व्वस्यापि विशेषणं प्रति साकाङ्क्षत्वात्। अतएव सामान्यतो विहितं विशेषणेन सम्बध्यते। यथासोमस्त्रिपर्व्वत्वादिना विशेषणेन। न चैवं सति त्वष्टुरपि विशेषणत्वमुखेन प्रसङ्गः। विध्यभावात्। अत्र तु पतिना सह मातुः श्राद्धं कर्तव्यमिति श्राद्धे देवतात्वं विधीयत इति, वैषम्यात्। इतश्च पित्रादिश्राद्धे तत्पत्नीनां देवतात्वमप्रधानत्वञ्च। यतः शातातपेन पतिश्राद्धे पत्न्या अंशभागित्वमुक्तम्।

> एकमूर्त्तित्वमायाति सपिण्डीकरणे कृते।
> पत्नी पतिपितृणान्तु तस्मादंशेषु भागिनी॥ इति।

अंशशब्दो हि महाद्रव्यस्यैकदेशं वदन् पित्रादिभोज्यस्यांशित्वरूपत्वं महाद्रव्यत्वं गमयन् तद्भोक्तृणां पित्रादीनां प्रधानदेवतात्वं गमयति। एकमूर्त्तित्वञ्चात्र प्रेत-भावापगमेन पितृभावप्राप्त्या सादृश्यसन्निकर्षादिरूपमेव श्राद्धभोक्तृत्वयोग्यतापादकं सारूप्यम्। न पुनर्मुख्यमैकरूप्यं, तस्यासम्भवात्। न हि क्षेत्रज्ञद्वयस्यैक्यं शरीरैक्यं वा कचिच्छास्त्रे दृश्यते। नापि शिष्टसम्मतम्। न चाप्यबाधितम्। एकस्मिन् देहे क्षेत्रज्ञभेदात् बुद्धीच्छा-प्रयत्न-प्रवृत्तिवैमत्योत्पत्तेरिह नानात्मवादिनः। बृहस्पति-स्मृतावपि पित्रादिश्राद्धे मात्रादीनां सहभावेन देवतात्वं दृश्यते।

> स्वेन भर्त्रा समं श्राद्धं माता भुङ्क्ते सुधासमम्।
> पितामही च स्वेनैव स्वेनैव प्रपितामही॥ इति।

शङ्खस्मृतावपि।

> अन्वष्टकां तथा मातृश्राद्धञ्चैव मृताहनि।
> एकोद्दिष्टं तथा मुक्त्वा स्त्रीषु नान्यत् पृथग् भवेत्॥

षट्त्रिंशन्मतेऽपि

एकत्वं सा गता भर्त्तुः पिण्डे गोत्रे च सूतके।
न पृथक् पिण्डदानन्तु तस्मात् पत्नीषु विद्यते॥ इति।

नन्वत्र यतो भर्त्रा सहैकत्वं सा गता पत्नी तस्मात् पत्न्याः पृथक् पिण्डदान-निषेधावगमादनुद्देश्यत्वमेवावगम्यते। मैवम्। पृथक् न विद्यत इत्यभिधानाद-पृथग्विद्यत एवेत्यनुज्ञा गम्यते। न च तदा पत्युरपि पृथग्दानाभावात् पत्नीग्रहण-मविवक्षितं स्यादिति वाच्यम्। यतोऽत्र पत्या सह पत्न्याः श्राद्धे क्रियमाणे पतिम-पेक्ष्य प्राधान्याप्राधान्यनियमेन प्राधान्येनैव वा तुल्यप्रधानतया वा निर्द्देशो न कर्त्तव्यः, किन्तु पतिविशेषणत्वेनैव, इत्येवंविधाप्राधान्यविवक्षार्थत्वात् पत्नीग्रहणस्य भवति चैवंविधप्रधानाप्रधानविषयो निर्द्देशः। पर्षद्भोजनार्थपाकात् पृथक्चैत्र-भोजनार्थः पाक इति न ह्यत्र चैत्रभोजनार्थः पाको नास्ति, न वा चैत्रग्रहणमविवक्षितं जातम्, किन्त्वपृथग्भावेऽप्यप्रधानत्वगमकम्, तथात्र पत्न्या अपीति। एवमेव-चैतद्वचनं व्याख्येयम्। अन्यथा न विद्यत इत्येतावन्मात्रेऽर्थे पृथक् न विद्यत इत्येतावद्वाक्यं स्यात्। तथा च पृथगित्यनर्थकं भवेत्। अनेनैव च 'न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते', इत्यत्रोक्तो योषिद्ग्रहणस्याविशेषत्वप्रसङ्गोऽपि निराकृतः।

यत्तूक्तं, 'स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता' इत्यत्र भर्तृपिण्ड इति पिण्डो व्यपदिश्यते। न पत्नीपिण्ड इति कृत्वा न योषितां तत्रोद्देश इति। तदपि न वाच्यम्। पत्युः प्राधान्याभिधानात्। पत्युः पत्न्याश्च देवतात्वाविशेषेप्येकेन प्रधानेनैव निर्द्देशस्योचितत्वात्। अतः सिद्धममावास्यादिकालिकेषु पित्रादिश्राद्धेषु तत्पत्नीनामप्यप्राधान्येनोद्देश्यत्वमिति। तथाचास्मत्पितर्यज्ञदत्त शर्मन् वाशिष्ठ-गोत्र सपत्नीकैतत्तुभ्यमन्नमित्यादिप्रकारप्रयोगवाक्यमाचारानुग्रहवशात् प्रत्येतव्यम्।

येऽत्र मन्यते। स्थितञ्चेत्पतिश्राद्धे पत्नीनामुद्देश्यत्वं तर्हि—

सम्बन्धनामगोत्राणि यथावत् परिकीर्त्तयेत्।
नामगोत्रं पितॄणान्तु प्रापकं हव्यकव्ययोः॥

इत्यादि विधि-सिद्ध्यर्थं पत्नीनामपि गोत्रनामनी कीर्त्तनीये इति, तेषान्तु मतेन अस्मत्पितर्यज्ञदत्तशर्मन् वाशिष्ठगोत्र सावित्रीनामिकया वाशिष्ठगोत्रया पत्न्या सहैत-त्तुभ्यमन्नमित्यादिप्रकारकं प्रयोगवाक्यमनुसन्धेयम्।

अस्मिंस्तु पक्षे यदा बहुपत्नीकः पिता भवति तदा अमुकामुकनामिकाभिर्वा-शिष्ठगोत्राभिः पत्नीभिः सहैतत्तुभ्यमन्नमित्यादिप्रकारकं प्रयोगवाक्यं प्रयोज्यम्। स्वजननीव्यतिरिक्तानामपि एकत्वं सा गता भर्तुरित्यादिवाक्यवशादविशेषेण पति-श्राद्धेंऽशभागित्वात्।

"ननु स्वेन भर्त्रा समं श्राद्धं माता भुङ्क्त इति" मातृशब्देन व्यपदेशात् जननी-व्यतिरिक्तानां पितृपत्नीनां न सहोद्देश इत्यवगम्यते। नैतदेवम्। सर्व्वासामपि मातृत्वात्। कथमित्थम्—

"सर्व्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः" ॥ इति मनुवचनात्।

नन्वन्यासां सोदरजातपुत्राभावे सपत्नीपुत्रेण पुत्रवत्त्वमिति वचनार्थावगमान्न सपत्नीपुत्रमात्रविषयत्वं वचनस्येति कथमविशेषेणोक्तप्रयोगवाक्यरचनोपपद्यते।

उच्यते। सपत्नीपुत्रेणापि पुत्रवतीत्वं भवतीत्येतावन्मात्रस्यात्रवचने विवक्षितत्वात्। "एका चेत् पुत्रिणी नान्या" एवंविधायां विवक्षायामेव शब्दार्थाध्याहारप्रसङ्गः।

ननु सर्व्वस्यापि शब्दस्यान्यनिवृत्तिपरत्वान्नाध्याहारदोषः, मैवम्। स्वार्थसमर्पणपरत्वमेव शब्दानामौत्सर्गिकं नान्यनिवृत्तिपरत्वम्, तत्परत्वे हि सर्वेषां परिसंख्यार्थत्वापत्तेः।

यदि चैकाचेदित्यन्यनिवृत्तिपरं स्यात्तदा द्वयोः पुत्रवत्योस्तत्पुत्राभ्यां तृतीयायाः पुत्रवत्यो न स्युः। अथैकाचेदित्येतन्नद्वितीयानिवृत्त्यर्थं, किन्तु स्वेन पुत्रेण-पुत्रिण्याः सपत्न्याः सपत्न्यन्तरपुत्रेण न पुत्रवतीत्वं स्वेनैव तु तद्भवेत्, अपुत्राया एव तु सपत्नीपुत्रेण पुत्रवतीत्वमिति। पुत्रवतीव्यावृत्त्यर्थमेवैकेति पदमिति। मैवम्। एकपदस्य पुत्रवतीव्यावर्त्तनसामर्थ्याभावात्। स्वार्थविपरीतोह्यर्थः शब्देन व्यावर्त्यते नान्यः। अनेक एव चैकशब्दार्थविपरीतो न तु पुत्रवतीत्येषः।

नन्वस्त्येकशब्दः पुत्रिणीव्यावर्त्तनासमर्थः पुत्रिणीशब्द एव तु भविष्यति। ननु चित्रमिदम्, पुत्रिणीशब्द एव पुत्रिणीव्यावर्त्तक इति। स्वार्थादन्यो हि शब्देनार्थो व्यावर्त्यते न पुनः स्वार्थ एव। न हि भवति पुत्रिणीं न निमन्त्रयेत्यत्र सपुत्रायाः व्यावृत्तिः। अथ किं पुत्रिणीं न निमन्त्रयेत्यत्रापि न भवति व्यावर्त्तकः। मैवम्। न ह्यत्र पुत्रिणीशब्दो व्यावर्त्तकः, किन्तु नकारः। न चासौ प्रकृतेऽस्ति। अथ स्वेन पुत्रेण पुत्रिण्याः पुत्रवतीत्वाभावशङ्काविषयत्वायोगात् सिद्धेन च तत्पुत्रिणीत्वेनान्यासां पुत्रवतीत्वसाधनात् स्वेन पुत्रेण पुत्रवत्याः पुत्रवतीत्वप्रतिपादनमनाकाङ्क्षितमनर्थकमात्माश्रयदूषितञ्चेति। न हि भवत्येवंविध उपदेशः या येन पुत्रेण पुत्रिणी भवति सा तेन पुत्रेण पुत्रवतीति। एवं हि सत्येकस्यैव विधेयत्वानुवाद्यत्वे उपलक्षणत्वोपलक्ष्यत्वे ज्ञातत्वाज्ञातत्वे च युगपदेकं प्रत्येव स्याताम्। अतः पुत्रिणीशब्दः समभिव्याहृतपदान्तरसहकृतः पुत्रिणीं व्यावर्त्तयतीति न कश्चिद् विरोधः।

उच्यते—

या येन पुत्रेण पुत्रवती सा तेन पुत्रेण पुत्रवतीत्युपदेशासम्भवेऽपि एकस्याः पुत्रेण सपत्नी पुत्रवत्यपुत्रा वा पुत्रवती भवतीत्यन्यस्याः पुत्रवत्वोपदेशसम्भवात् समभिव्याहृतपदान्तरसहकृतोऽपि न पुत्रवतीनिवर्त्तने समर्थः पुत्रिणीशब्द इति। तदेवमेकस्याः पुत्रेण पुत्रवती पुत्ररहिता वा पुत्रवतीत्येवम्परत्वाद्वचनस्य सपत्नीपुत्र-

मात्रविषयं वचनमिति सर्व्वा अपि पितृपत्न्यः साधारणकालिके पितृश्राद्धे सहभावेनोद्देश्याः ।

नन्वेवं सति स्वे पुत्रे विद्यमानेऽपि सपत्नीपुत्रेणौर्द्ध्वदेहिकं कर्तव्यं स्यात्, पुत्रत्वेन तस्याप्यधिकारात् ।

मैवम् । तस्यौर्द्ध्वदेहिकं यावतामधिकारस्तावद्भिः पृथक् पृथक् क्रियते, किन्तु सर्व्वानुमत्या सकृदेकेनैवेति वक्ष्यते, अन्यथा सोदरैरपि सर्वैस्तस्य पृथगनुष्ठानमापद्येत । सपत्नीपुत्रस्य ज्येष्ठत्वेऽपि स्वोदरजातस्यैवान्तरङ्गत्वात् मातुरौर्द्ध्वदेहिकेष्वधिकारः ।

ननु यदि स्वेन पुत्रेण पुत्रवत्यपि सपत्नीपुत्रेण पुत्रवती स्यात्तदा—

"भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत् ।
सर्व्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥"

इति वचनादमावास्यादौ पितृश्राद्धे क्रियमाणे पुत्रवतः पितृव्यस्यापि पितृत्वात् द्विपितुः पिण्डदानं स्यादिति स्मृतेस्तस्याप्युद्देशः प्राप्नोति, इति चेत्, हन्त तर्ह्यपुत्रपितृव्यस्योद्देशः पितृश्राद्धे प्रसज्यमानः केन वार्य्येत । अथ पितृव्ये पितृत्वस्य गौणत्वादनुद्देश इति मतम् तर्हि कदाचिदपि भ्रातृसुतः सुतरहितस्य पितृव्यस्य श्राद्धं न कुर्यात् । अथ पुत्रकार्य्यकरत्वेनोक्त इति कृत्वा तत् कुर्यात्, हन्तेदानीममावास्यादिकालेऽपि पितृश्राद्धे किमिति पितृव्योद्देशं न कुर्यात् । योऽपि च द्व्यामुष्यायणेन द्वितीयः पितोद्दिश्यते सोऽपि गौण एवेति नोद्देशमर्हतीति ।

अत्रोच्यते—

न वयमत्र मातृत्वेन जननीव्यतिरिक्तानां पितृपत्नीनां सहभावेनोद्देश्यत्वं ब्रूमः, किन्तु पितृपत्नीत्वेनैव,

"स्वेन भर्त्रा समं श्राद्धं माता भुंक्ते सुधासमम्"

इत्यत्र मातृशब्दस्य पितृपत्नीमात्रोपलक्षणपरत्वात्, बहुषु वचनेषु पत्नीशब्दपुरस्कारेणैकश्राद्धे भोक्तृत्वविधिदर्शनात् । बहुपत्नीके च पितामहे सर्व्वासां तत् पत्नीनां सहोद्देशे न कश्चित् सन्देहोऽस्ति । तादृशे प्रपितामहेऽपि न सन्देह इत्यविचारितसिद्धः सर्वोद्देश इति ।

मातामहादिश्राद्धेषु तु सहभावेन तत्पत्नीनामुद्देशो मातामहानामप्येवमित्यादि पितृश्राद्धसाम्योपदेशादवगन्तव्यः ।

"न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते ।
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ॥"

इत्यादिभिर्व्वचनैश्चावगन्तव्यः ।

तदेवमेतन्निर्व्यूढम्, यत् बहुपत्नीकपित्रादिदेवत्यामावास्यादिसाधारणकालिक श्राद्धप्रयोगे अस्मत्पितर्यज्ञदत्तशर्मन् वाशिष्ठगोत्रामुकामुकनामिकाभिर्वाशिष्टगोत्राभिः पत्नीभिः सहैतत्तुभ्यमन्नमित्यादिभिः स्त्रीपुंसोद्देशोपलक्षितैर्वाक्यैरनुष्ठानं कर्तव्यमिति ।

अत्र सिद्धान्तोऽभिधीयते—

तत्र तावन्मुख्ये पार्व्वणे जननीव्यतिरिक्तानां पितृपत्नीनां न सहोद्देशः कर्तव्यः। नापि पितृजननीव्यतिरिक्तानां पितामहपत्नीनाम्, नापि पितामहजननीव्यतिरिक्तानां प्रपितामहपत्नीनाम्। तासां हि स्वोदरजातसुतसद्भावेऽन्योदरसुतानां व्यवधानात् श्राद्धेषु नियमेनाधिकारो नास्तीति वक्ष्यते। अनियमेन तु कृपया स्नेहेन वा भवति। न चासौ नित्येन विधिना सम्बन्धमर्हति, नित्यानित्यसंयोगविरोधात्।

ननु तासां पित्रादिपत्नीत्वेन सहभावोयं नित्यविधिपृष्ठभावेनागतो नाधिकारमपेक्षते, नित्यविधिपृष्ठभावेनागतत्वादेव वा नित्यमधिकारान्तरमनुमाय प्रवर्तते।

मैवम्। पत्नीत्वेनापि सहभावो भवन् स्वतन्त्रसिद्धमेवाधिकारमपेक्ष्य भवितुमर्हति।

क्लृप्तो हि कल्प्यं बाधते, निश्चितश्चाप्यनिश्चितम्, संवादी च असंवादिनम्। जननीश्राद्धाधिकारो हि क्लृप्तो निश्चितः संवादी च। अन्यस्तु विपरीतः। इतश्च जनन्यादिव्यतिरिक्तानां न सहभावेनोद्देशः नित्यानित्यसंयोगविरोधान्तरात्। न हि जनन्यादिव्यतिरिक्ता पित्रादिपत्न्यो भवन्त्येवेति नियमोऽस्ति। सोऽयं तासां पाक्षिकसहभावो न नित्यकर्म्मसम्बन्धार्हः। जननी तु नियमेन भवत्येवेति सहभावमर्हति। अतएवापुत्राणामपि तासां न नित्ये कर्म्मणि सहभावः, यतः सद्भाव एव तासामनित्यो भवति। योऽपि मातृत्वादेव तासां सहभावोऽभिमतः सोऽपि न समीचीनः। गौणं हि तासां मातृत्वं पितृव्यस्येव पितृत्वम्। गौणमुख्ययोर्हि मुख्ये सम्प्रत्यय इति न्यायात्। मातृशब्दवता वाक्येनोपदिश्यमानोऽर्थो जनन्या एव भवतीति। अन्यथा पितृव्यस्यापि गौणपितृरूपत्वात् द्व्यामुष्यायणकर्तृकइवामावास्याश्राद्धे क्षेत्रिणः समुद्देशः प्राप्नोति।

ननु यदि मुख्ये सम्प्रत्ययः क्षेत्रिणोऽपि तर्हि नोद्देशः प्राप्नोति।

मैवम्। "द्वौ द्वौ पिण्डौ निर्वपेद्द्युरेकैकस्मिन् पिण्डे द्वौद्वावनुकीर्तयेयु" रित्यादिवचनवशात् तदुद्देशेन तु पितृभ्यः पितामहेभ्यो दद्यादित्येतद्वशादिति। अतएव द्वौ पिण्डावित्यादिवाक्यानामर्थवत्वमन्यथा पितृत्वेनैव तत्प्राप्तेरानर्थक्यं भवेत्।

किञ्च क्षेत्र्यादिपिण्डदानार्थमेव क्षेत्रजादिपुत्रोत्पत्तिविधानादमुख्येऽपि संप्रत्ययो न तु मातृविषये। इतश्च मातुरुद्देश्यत्वेन जननीव्यतिरिक्तानां नोद्देशः, तासां मातृत्वाभावात्।

"सर्वास्तास्तेनपुत्रेण प्राह पुत्रवतीर्मनु" रित्यनेन सपत्नीपुत्रस्य पुत्रकार्यकरत्वं विहितं, न मातृसपत्न्या मातृत्वं मातृकार्यकरत्वं वा।

ननु किमिदं मातृकार्य्यं नाम। उच्यते। नित्याधिकारविहितस्य पुत्रकर्तृकस्य-मातृश्राद्धस्य देवतात्वेन निष्पादनम्। अथ किं पुत्रकार्य्यं नाम। उच्यते। लोकान्तरगताया मातुः श्राद्धादिना तृप्त्यादिनिष्पादनम्। ननु कोऽत्र विशेषः। यदेव हि पुत्रकार्य्यं श्राद्धं तदेव देवतात्वेन मात्रा निष्पाद्यत इत्येकमेव द्वयोः कार्यम्।

सत्यमेवम्।

किन्त्वेकस्यैव श्राद्धस्य प्रयोजनभेदरूपः कार्य्यभेदोऽभिमतः। अतो यत्र नित्यानुष्ठानसिद्धिमनुसन्धाय पुत्रः श्राद्धे प्रवर्त्तते तत्र पुत्रः स्वकार्य्यमेव करोतीति न मातृसपत्न्याः पार्व्वणे सहभावेनोद्देश इति। अनेनैवाष्टकासंक्रान्त्युपरागादिकालविहितानि नैयमिकानि यानि श्राद्धानि व्याख्यातानि पार्व्वणधर्म्मातिदेशवन्ति हि तानि भवन्ति। यानि पुनः शुद्धीच्छया[१] फलेच्छया वा पितृतृप्तीच्छया वा क्रियन्ते तान्यपि पार्व्वणधर्म्मातिदेशवन्ति। पितृश्राद्धान्येवंविधान्येव।

तदेवममावास्यादिकालिकपितृश्राद्धे जनन्याः सहभावेनोद्देशेन जननी सपत्नीनामिति स्थितम्।

यत्र तु पृथङ्मातृश्राद्धं विधीयते वृद्धिश्राद्धादौ, तत्रापि मुख्ये सम्प्रत्यय इति न्यायाज्जनन्या एवोद्देश्यत्वं नान्यासामिति।

यदा तु नानापितृतृप्तिकामनया विशिष्टे महालयादिकालविशेषे गयादितीर्थविशेषे वा श्राद्धं कुर्यात् तदा पुत्रवतीनामपुत्राणां वा मातृसपत्नीनामपिश्राद्धं कुर्यात्। पुत्रवतीनामपि तासां श्राद्धेषु कृपया स्नेहेन वा सपत्नीपुत्रस्यापि पाक्षिकाधिकारवत्त्वात्।

एतेनैव पितृजननीव्यतिरिक्ताः पितामहपत्न्यः पितामहजननीव्यतिरिक्ताः प्रपितामहपत्न्योऽपि व्याख्याताः। जननीसपत्नीनां गौणत्वनिरूपणेन तज्जनकानामपि गौणमेव मातामहत्वमिति न पार्व्वणश्राद्धे तेषां देवतात्वमित्यपि निरूपितं भवति। यदा तु विशिष्टदेशकालादौ नानापितृतृप्तिकामनया श्राद्धं कर्त्तुमिच्छेत्तदा पाक्षिकेणाधिकारेण तेषामपि कुर्य्यादिति स्थितम्।

तदेवं श्राद्धकर्त्तृपितामहादीनां मातामहादीनाञ्च सपत्नीकानां षण्णाममावास्यादिकालविहिते मुख्यपार्व्वणे देवतात्वे व्यवस्थिते पार्व्वणधर्म्मातिदेशयुक्तेषु साधारणकालिकेषु नित्यनैमित्तिककाम्यगोष्ठीशुद्धिश्राद्धेष्वपि तेषामेव देवतात्वमिति स्थितम्।

यात्रायान्तु यदाधिकार्य्येव स्वयं यात्रां कर्त्तुमारभेत् तदा तावत् स्वपितृभ्य एव श्राद्धं कुर्य्यादित्येतत् सिद्धमेव। यदा तु स्वयमशक्तस्तदारम्भे सामदानादिना समुत्साह्य कर्त्रन्तरं प्रेरयति तदा सन्देहः। किमयं कर्त्ता स्वेभ्यः पितृभ्यः श्राद्धं कुर्य्यात्, उताधिकारिपितृभ्य इति। तत्र "यो यः कश्चित्तीर्थयात्रामनुगच्छेत्" इत्यादिना कर्त्रवस्थस्य श्राद्धोपदेशात् श्राद्धदेवताविधायकानां पित्रादिशब्दानां सम्बन्ध्यपेक्षायां सन्निहितः कर्त्तैव सम्बन्धी भवितुमर्हति।

ननु येन केनचित् क्रियमाणायामपि यात्रायामधिकारवत्कर्त्तृत्वमप्यधिकारिण एव अधिकारकर्त्तृत्वयोः सामान्याधिकरण्यात्। न हि परैकसमवेतफलोत्पादके कर्म्मणि कश्चिदात्मनः कर्त्तृत्वं बोद्धुमर्हति। न चानर्हं शब्दो बोधयति। तस्माच्छब्द-

[१] शुद्धयेच्छया।

प्रमाणकेषु कर्म्मस्वधिकारिण एव कर्तृत्वं शब्देन ज्ञापितम्। अतस्तस्यैव भवति। कथमन्यथा अन्येन कृतमधिकारिणैव कृतमित्युच्यते।

सत्यमेवम्। शक्तिरेव त्विह कल्प्यवचनेनापादिता। अतः कर्त्रन्तरेण कृते कर्म्मण्यधिकारिणः[१] फलभागित्वेन कर्तृत्ववादो गौण एव। लौकिकं हि कर्तृत्वं प्रत्यक्षादिप्रमेयम्। लोकश्च यस्मिन् प्रयतमाने यत्कर्म्म निष्पद्यते तमेव तत्र कर्त्तारं व्यवहरति। अस्तु वा कर्त्रन्तरेण क्रियमाणे कर्म्मण्यधिकारिणः प्रयोजककर्तृत्वेन कर्तृत्ववादो मुख्य एव। किन्तु यदधिकारबोधसमये साक्षात् कर्तृत्वमवगतं तद्वैयधिकरण्यं प्राप्तमेव। अतः कर्त्तैव स्वपितृभ्यः श्राद्धं कुर्य्यादिति।

अत्रोच्यते -

मुख्यवदनुकल्पावस्थायामपि यथावगतान्येवानुष्ठातव्यानि। प्रकृते चाधिकारिकर्तृसम्बन्धिपितृभ्यः श्राद्धमवगतम्। तदन्योऽपि कर्त्ता कुर्वंस्तेभ्य एव करोति। कर्त्रवस्थायां स्थितमपि श्राद्धं यात्राङ्गमेव न कर्त्रङ्गम्, अनन्यनिष्ठभावार्थत्वे सत्यधिकारविधिना गृहीतत्वात्। अतो यात्राधिकारिपितृभ्यः श्राद्धमिति। पुष्ट्यर्थस्य तु काम्यवद्देवताः।

"एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते"

इत्येवं लक्षणलक्षिते तु नैमित्तिके पार्व्वणधर्म्मातिदेशाभावान्न षण्णां देवतात्वं, किन्त्वेकस्यैव। अस्मिंश्च साधारणकालिकेऽपि न सपत्नीकस्य देवतात्वमेकोद्दिष्टसमाख्याबाधप्रसङ्गात्।

"पत्नी पतिपितृणान्तु तस्मादंशेषुभागिनी"

इत्यादिवाक्यबलाज्जघन्यप्रमाणस्य बाधोऽस्त्विति चेत्।

नैवम्। समाख्यानधिष्ठिते विषये वाक्यावकाशादविरोधात् प्रमाणसमावेशलाभे बाधस्यान्याय्यत्वात्। सांवत्सरिकन्तु केषाञ्चित् पितृपितामहाद्याचारपरम्परया स्मृतिविशेषानुग्रहवशाच्चैकदैवत्यं, केषाञ्चित्त्रिदैवत्यम्। तत्र च मात्रादीनां मातामहादीनाञ्चानुद्देशः। तदेतत् सांवत्सरिकप्रकरणे विस्तरेण निर्णेष्यते।

षोडशश्राद्धानि त्वेकदैवत्यानीति प्रेतश्राद्धप्रकरणे वक्ष्यते। तेषां तु श्राद्धानामाभ्युदयिकश्राद्धानुष्ठाने प्रसक्ते स्वकालात् सपिण्डीकरणापकर्षे तदन्ततयापकृष्यानुष्ठाने कृते तान्येव च पुनः कुर्य्यादिति वचनादावर्त्तमानानि प्रतिमास्यानि त्रिदैवत्यानि कार्य्याणि। सपिण्डीकरणात् प्रेतभावापगमे सति तेषामनुष्ठीयमानत्वात्। सपिण्डीकरणञ्च पार्व्वणैकोद्दिष्ट कर्म्मद्वयात्मकमिति चतुर्दैवत्यम्।

नारायणबलिस्तु ब्रह्म-विष्णु-शिवाः सपरिवारो यमः प्रेतश्चेति पञ्चदैवत्यः। तथाचोक्तं भविष्योत्तरादिषु।

पञ्चपिण्डान् प्रदद्याद्वै दैवं रूपमनुस्मरन्।
प्रथमं विष्णवे दद्याद् ब्रह्मणेऽथ शिवाय च॥

१. अधिकारिवशादिति।

यमाय सपरिवाराय चतुर्थं पिण्डमुत्सृजेत् ।
मृतं सङ्कीर्त्य मनसा गोत्रपूर्वं ततः परम् ।
विष्णोर्नाम गृहीत्वैवं पञ्चमं पूर्ववत् क्षिपेत् ॥

इति विष्णोर्नाम गृहीत्वेत्यनेनाभेददृष्टिरुक्ता । एवञ्च सत्येवंविधप्रयोगवाक्यमनुमीयते । वाशिष्ठगोत्र अस्मत् पितर्यज्ञदत्त एतत्ते इत्यादि ।

तदेवं मुख्यपार्वणनित्यनैमित्तिककाम्यगोष्ठीशुद्धियात्रापुष्टिश्राद्धेषु एकोद्दिष्टसंज्ञके नैमित्तिके सांवत्सरिकेषु पुनरावर्त्तमानेषु च प्रतिमास्येषु सपिण्डीकरणे नारायणबलौ च देवतानिर्णयः कृतः ।

अथेदानीमाभ्युदयिके देवतानिर्णयः क्रियते ।

तत्र वृद्ध्याभ्युदयिके मार्कण्डेयपुराणे—

पितरश्चात्र सम्पूज्याः ख्याता नान्दीमुखास्तु ये ।

याज्ञवल्क्यस्मृतौ

एवं प्रदक्षिणं कृत्वा वृद्धौ नान्दीमुखान् पितॄन् ।
यजेत दधिकर्कन्धुमिश्राः पिण्डाः यवैः क्रियाः ॥

विष्णुपुराणे—

नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृहीति ।

ब्रह्मपुराणे—

जन्मन्यथोपनयने विवाहे पुत्रकस्य च ।
पितॄन् नान्दीमुखान् नाम तर्पयेद् विधिपूर्वकम् ॥

मत्स्यपुराणे—

उत्सवानन्दसन्ताने[१] यज्ञोद्वाहादिमङ्गले ।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् ॥
ततो मातामहाः पूज्या विश्वेदेवास्तथैव च ।

अत्र बहुवचनान्तेन मातृशब्देन मातृ-पितामही-प्रपितामह्यस्तिस्र उच्यन्ते । अतएव शातातपस्मृतौ

तिस्रस्तु मातरः पूर्वं पूजनीयाः प्रयत्नत इति ।

पितृशब्देन च पितृ- पितामह-प्रपितामहाः, मातामहशब्देन च मातामह-प्रमातामह-वृद्धप्रमातामहाः ।

अतएव पुलस्त्यः—

मातुः पितरमारभ्य त्रयो मातामहाः स्मृता इति ।

कात्यायनोऽप्याह ।

आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥ इति ।

१. उत्सवानन्दसम्भारे इति ।

षड्भ्य इति पुंवर्गद्वयविवक्षया मातृश्राद्धस्य—

"संपूज्या मातरः पूर्वं"

इति स्मृत्यन्तरे विहितत्वात्। अत्र नान्दीमुखः पितृगणः पूर्वं दर्शितः।

"ऊर्द्ध्ववक्त्रास्तु ये तत्र ते नान्दीमुखसंज्ञिताः" इति।

एते दिव्यपितरः मात्रादयश्च मनुष्यपितरः प्राधान्येनोद्देश्याः नान्दीमुखाश्च तदभेददृष्टिविधया उद्देश्यस्वरुपेऽन्तर्भावनीया इति पूर्वमेव पूर्वोत्तरपक्षप्रपञ्चनेन निर्णीतम्।

अत्र नान्दीमुखानां पितॄणामिदमासनं नान्दीमुखान् पितॄनावाहयिष्य इत्येवमादिभिर्वाक्यैः प्रयोगो विधेयः। एवमेव च कात्यायनीयं प्रयोगवचनम्।

"नान्दीमुखान् पितॄनावाहयिष्य इति पृच्छति नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने नान्दीमुखाः पितरः पितामहाः प्रपितामहाश्च" इति। कर्माङ्गाभ्युदयिकेप्येत एव पितरो देवताः।

"निषेककाले सोमे च सीमन्तोन्नयने तथा।
ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं वृद्धिवत् कृतम्॥"

इति वचनेन वृद्धिश्राद्धधर्मातिदेशात्। तदेवमत्र मातृ-पितामही-प्रपितामहीनां पितृ-पितामह-प्रपितामहानां मातामह-प्रमातामह वृद्धप्रमातामहानाञ्च वृद्धिश्राद्धदेवतात्वे स्थिते वृद्धौ नान्दीमुखान् पितॄन् यजेत इत्यादिषु त एव नान्दीमुखशब्दाभिधेयत्वेन विवक्षिताः।

ये तु ब्रह्मपुराणाभिहिताः।

ये स्युः पितामहादूर्ध्वं ते स्युर्नान्दीमुखास्त्विति।
प्रसन्नमुखसंज्ञाः स्युर्मङ्गलीया मतास्तु ते॥
पिता पितामहश्चैव तथैव प्रपितामहः।
त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्त्तिताः।
तेभ्यः पूर्वे त्रयो ये तु ते तु नान्दीमुखा इति॥

ते प्रौष्ठपदे पौर्णमासीनिमित्त एव श्राद्धे देवताः, न पुत्रजन्मादिकालिके नान्दीमुखान्तरे इति प्रकीर्णकालप्रकरणे वक्ष्यामः।

इह तावदेतावत् सिद्धम्।

यन्नामकरण–चौलोपनयन–विवाहादिषु यः कर्त्ता स नान्दीमुखविशेषणवद्भ्यो मनुष्यपितृभ्यः श्राद्धं कुर्यादिति। सन्ति च प्रकृतेषु कर्मसु कर्त्तृविकल्पाः।

तथाहि-तावन्नामकरणे दशम्यामुत्थाप्येति प्रकृत्य शङ्खलिखितौ :—

"तदहरेव नामकरणं कुलदेवतानक्षत्रादि सम्बद्धं पिता कुर्यात्। अन्यो वा कुलवृद्धः इति।

अनेन नामकरणात् प्रभृति ये संस्कारास्तेषु पित्रभावे आवश्यकसंस्कारापेक्षित कर्तृविधिसिद्ध्यर्थं यथाप्रत्यासत्ति कुलीनानां कर्तृत्वमुक्तम्।
उपनयने त्वाह याज्ञवल्क्यः।

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्॥इति॥

अत्र गुरुग्रहणात् पितैव तावदुपनयनं कुर्यादित्यपरार्कादयः। पितुरभावे तस्मिन् उपनयनकर्तृत्वायोग्ये वा कर्त्रन्तरमापस्तम्बादयो दर्शयन्ति।

"तमसो वा एष तमः प्रविशति यमविद्वानुपनयेत यश्च विद्वानिति हि ब्राह्मणम् तस्मादभिजनविद्यासमुपेतं समाहितं संस्कारमीप्सेत्"।

याज्ञवल्क्यः।

असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्वसंस्कृतैरिति। वक्ष्यमाणः स्वात्मानमुपनयेदित्यादिभिः पितृव्यतिरिक्तस्याप्युपनयनकर्तृत्वं गम्यते।
कन्याविवाहे चाह कात्यायनः।

स्वयमेवौरसीन्दद्यात् पित्रभावे तु बान्धवाः।
मातामहस्ततोऽन्यो हि माता वा धर्मजां सुताम्॥इति॥

याज्ञवल्क्योऽपि।

पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥

प्रकृतिस्थो नामाविप्लुतबुद्धिः। अप्रकृतिस्थेन हि स्वातन्त्र्यार्हेणापि कृतं कार्यमकृतमेव भवति।

तदाह नारदः।

स्वतन्त्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिङ्गतः।
तदप्रकृतमेव स्यादस्वतन्त्रत्वहेतुतः॥इति॥

स्वतन्त्रोऽपीति पितृत्वादिना स्वतन्त्रत्वादिना स्वतन्त्रत्वार्होपीत्यर्थः। अप्रकृतिङ्गतो वातादिना विप्लुतबुद्धिस्तत्कृतं कन्यादेर्वाग्दानाद्यकृतमेव वेदितव्यम्।

तथा।

पिता दद्यात् स्वयं कन्यां भ्राता चानुमतः पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते।
तस्यान्त्वप्रकृतिस्थायान्दद्युः कन्यां स्वजातयः॥इति॥

तदेवं कर्तृविकल्पे यदा पितृव्य उपनयनादिकर्त्ता स्यात्तदा वृद्धिश्राद्धं केभ्यः पितृभ्यः कुर्यात्। किं स्वेभ्य उतोपनेयादिसम्बन्धिभ्य इति।

ननु पितैव तावत् स्वेभ्यः कुर्यान्नास्वेभ्य इति क्रमः कस्मात्।

उच्यते। श्राद्धदेवताविधायकानां मातृ-पितृ-मातामहादिशब्दानां सम्बन्धिशब्दत्वात् सम्बन्ध्यपेक्षायां वृद्धिश्राद्धकर्तृत्वेनोपात्त एव सम्बन्धी गम्यत इति। कुतस्तर्हि सन्देहः। यदा हि पितृव्यतिरिक्त उपनयनाधिकारितां प्राप्तस्तदा प्रधानेऽधिकृत एवाङ्गेऽधिकृत इति न्यायात् स एव वृद्धिश्राद्धाधिकारिताङ्गत इति पित्रादिपदार्थस्य सम्बन्धित्वेन विशेषको भवति। अतः सोऽपि स्वेभ्य एव दद्यादिति निश्चयात्।

ननु अत्र पितैव मुख्योऽधिकारी तदसम्भवे त्वन्यः, देवताविधिस्तु मुख्येनैव निराकाङ्क्षीकृतो नासम्भवोपस्थापितममुख्यं स्वीकरोति। मैवम्। अधिकारी हि विशेषको न पिता। नानिष्ट्वा तु पितृश्राद्धे कर्म वैदिकमाचरेदित्येवमुत्पन्ने वृद्धिश्राद्धमात्रेऽयं देवताविधिः सम्बद्धः। न च वृद्धिश्राद्धमात्रं पित्रेकसम्बद्धम्। पुत्रसंस्कारव्यतिरिक्तेष्वपि कर्मसु तद्विधानात्।

तस्माद्योयदोपनयनादावधिकारं प्रतिपद्यते स तदा स्वपितृभ्यो वृद्धिश्राद्धं कुर्यादिति प्रतिपद्यामहे। अतो यदा पितृव्यतिरिक्तः कश्चित् भ्रात्रादिरुपनयनादिकं कुर्यात्तदा स्वपितृभ्य एव श्राद्धं दद्यादिति।

ननूपनयनादावुपनेयादिरेवाधिकारी। उपनेता तु कर्त्तैव ऋत्विगादिवत्। ननु यदि कर्मफलभागेवाधिकारी तर्हि जातेष्टौ पुत्रस्यैवाधिकारः प्राप्त इति। न पुत्रगतस्य पूतत्वादेः पित्रैव काम्यमानत्वात् पितुरेवाधिकारः, प्रकृते तु पितृव्यतिरिक्तानामुपनेयादिसमवेतफलकामनाऽयोगात्। मैवम्। उपनयनं नामोपनेयादन्यस्यव्यापारः, तत्र हि कर्मकारकीभूतस्योपनेयस्य कर्तृत्वानुपपत्तेः। कर्मकर्त्तुस्तु विवक्षितमेव कर्तृत्वम्। न चात्र तद्विवक्षाद्योतकं किमप्यस्ति पदजातम्। तमहमात्मानं पातयामीत्यादिषु पुनरस्मदात्मादिशब्दसमभिव्याहारात् कर्तृकर्मणोरभेदाध्यवसानमुपपद्यते। अतो नोपनेयादीनां स्वसंस्काराधिकारः।

ननु नात्र प्रापणार्थो नयतिः, किन्तूपसर्गसन्निधानात् मौञ्जीबन्धनादिरूपकर्मान्तरवचनः। मैवम्।

उपसर्गयोगे ह्ययमाचार्यसमीपप्रापणार्थ एव भवति न पुनरप्रसिद्धार्थान्तरवाचकः। अस्य चार्थस्याध्ययनापेक्षितगुरुशिष्यसन्निधिविशेषापादकत्वेन दृष्टार्थत्वात्। अतश्चोपनेयव्यतिरिक्तकर्तृकेऽस्मिन्नुपनयनरूपे व्यापारे विधिना नोपनेयः प्रवर्त्तयितुं शक्यः। स्वव्यापारे हि पुरुषाः कर्त्तृत्वेन नियुज्यन्त इति न्यायात्। यदि च कर्मफलभागित्वादुपनेयोऽधिकारी तदा गर्भेऽपि स्वसंस्कारकत्वेन स्वोपकारकपुंसवनाद्यधिकारी स्यात्। प्रमीतश्चौर्द्ध्वदेहिकादौ। अशक्तेनैवमिति चेत्। तुल्यमुपनयनेऽपि। ननूपनेय आचार्यादिप्रवर्तने न शक्तः। यथा पुरोहितप्रवर्त्तने न ऋत्विक् प्रवर्त्तते, न वा क्षत्रियवैश्यौ यागे।

ननु विधिना स्वयमप्रवर्त्तितः किमर्थमन्यं प्रवर्त्तयेत्। क्षत्रियादयस्तु विधिना यागे प्रवर्त्तन्त एव पुरोहितादिकं याजने प्रवर्त्तयन्ति। अध्ययने च प्रवर्त्तितोऽध्यापने। न चात्रोपगच्छेदित्युपगमनं विहितम्। येन तत्र विधिना प्रवर्त्तितः सन्नाचार्यमुपनयने प्रवर्त्तयेत्। उपनयनविधिनार्थादुपगमनं माणवकस्य विहितं परि-

णयनविधिना परिगमनञ्च कन्याया इति चेत्, मैवम्। अर्थप्राप्ते विधेरव्यापारात्। यच्चान्यस्याधिकारिणो विधीयमानं कर्म्म स्वसिद्धयर्थमन्यस्याधिकारिकर्त्रन्तरगतं कर्माक्षिपति न तत्तस्यावश्यकम्। यथा यागविधिनाक्षिप्यमाणा याजकप्रवृत्तिः, यथा वा क्रयविधिनाक्षिप्यमाणो विक्रयः कस्यचित्। न च तस्याकरणे प्रत्यवायः। अतः किमर्थमुपनयनाक्षिप्तो गमनकर्त्तोपनेतारं प्रवर्त्तयेत्। किन्तूपनेतैव स्वविहित-क्रियासिद्धयर्थमुपनेयं प्रवर्त्तयेदिति।

उच्यते। अस्ति ह्युपनयनाद्यभावे कर्मीभूतस्योपनेयादेरनर्थसम्बन्धः। स च तत्प्रतिघातमपेक्षमाणस्तदुपाये मुख्योऽधिकारी। तदुपायश्चोपनयनादिरेव। यथा जले कर्दमे वा निमज्जन् कश्चित् स्वतः स्वोद्धरणे शक्तिरहितोऽपि स्वानर्थप्रतिघात-मपेक्षमाणस्तदुपायेऽधिकारी भवन् मामुद्धरेति पुलिनवर्त्तिबलवत्पुरुषान्तरप्रेरणयाधि-कारं निर्वर्त्यानर्थं प्रतिहन्ति तथायमुपनेयादिरुपनयनादौ। यस्तु गर्भः प्रमीतो वा पित्रादिः पुंसवनादावौर्द्ध्वदेहिकादौ वा स्वानर्थप्रतिघातोपाये परप्रेरणयाप्यधिकार-निर्वर्तनासमर्थः स तु नाधिकारी। किञ्च यः स्वोपकारके यस्मिन् कर्मणि पर-प्रेरकत्वेनोक्तः स एव तत्राधिकारी। उक्तश्चायमष्टादिवर्षोब्राह्मणादिः स्वोपनयने विशिष्टाचार्यप्रेरकत्वेन। तथा च स्मृतिमहार्णवे आह बुधः।

गर्भाष्टमे वर्षे वसन्ते ब्राह्मण आत्मानमुपनाययेत्। एकादशे क्षत्रियो ग्रीष्मे। द्वादशे वैश्यो वर्षास्विति।

स्मृत्यन्तरे तु - उपनेयव्यतिरिक्तानामप्यधिकारिणां स्वयमशक्तानामन्यप्रवर्त्ता-कत्वमुपलभ्यते। यथाह यमः।

गर्भाष्टमेऽब्दे ब्राह्मणमुपनाययेत्। एकादशे तु राजन्यानुपनाययेत्। वैश्यांस्तु द्वादशेवर्षे उपनाययेदिति।

मनुशंखव्यासाः। गर्भाष्टमे वै कुर्वीत ब्राह्मणस्योपनायनम्।

एतच्च हेतुमणिजन्तमुपनायनशब्दं व्याचक्षाणैरपरार्कादिभिरुपपादितम्। तस्मादुपनयनादिषूपनेयादीनामस्त्यधिकार इति। अतएव सत्यकामो नाम जाबालो मातरमामन्त्र्यात्मानमुपनाययितुं गौतममाजगामेति छान्दोग्योपनिषदि श्रूयते। कन्यानाञ्च स्वयमपि स्वविवाहकर्तृत्वं कारयितृत्वञ्च दृश्यते। अतस्तासामपि स्वानर्थप्रतिघातके स्वविवाहेऽस्त्यधिकारः। तदानीमन्येषान्तदधिकारनिर्वर्तकत्वेनैव-कर्तृत्वकारयितृत्वे। पितृमातृभ्रात्रादीनान्त्वनन्यप्रेरितानां विधित एवाधिकारनि-र्वर्त्तकत्वं, अनिर्वर्त्तकत्वे दोषश्रवणात्। तदन्येषां विध्यभावात् कन्याप्रेरणस-हकृतपाणीति[1]। तत्र तानि वचनानि—

"गम्यन्त्वभावे दातृणां कन्या कुर्यात् स्वयम्बरम्"।

इत्यादीनि याज्ञवल्क्याद्युक्तानि। अतो मातृमातुलादिभिः क्रियमाणेऽपि विवाहे कन्याया एव पित्रादिवर्गेभ्यो वृद्धिश्राद्धं कुर्यादिति।

---

[1] कन्याप्रेरण सहकृतकृपाणितीति।

ननु मातृमातुलादीनामपि विवाहकर्तृत्वोपदेशादकरणे च दोषाभिधानात्तेषामप्यधिकारे तदीयपितृभ्योऽपि श्राद्धं देयमेव। नैतदेवम्। नहि प्रत्यधिकारमङ्गावृत्तिः। प्रधानेनैक्यात् सत्र इव तत्र हि प्रत्येकमधिकारभेदेऽपि[1] प्रधानमेकमेव समुच्चितानां कर्त्तृत्वविधेः। न चात्र वैपरीत्यं विकल्पो वास्त्विति शङ्कनीयम्, फलभागित्वेन कन्यानामेव मुख्याधिकारित्वात्। न चैवं सति विवाहाख्यप्रधानैक्यात् कन्यादातृ-प्रतिग्रहीत्रोरप्येकमेव नान्दीमुखं श्राद्धं स्यान्न पुनः पृथक्श्राद्धद्वयम्। द्वे एवैते प्रधाने य एष प्रतिग्रहो दानञ्च। कन्यापुत्रविवाहे चेति पृथग्विधानाच्च। अन्यथा विवाह इत्येवोच्यते। तस्मात् कश्चिदाचार्यः परपुत्रमुपनयन्नुपनेयपितृभ्य एव नान्दीश्राद्धं कुर्यात्। मातृमातुलादिश्च कन्याविवाहं कुर्वन् कन्यापितृभ्य एवेति। अतएव संस्कार्यस्यैव पितृभ्यः श्राद्धकरणे प्राप्ते यदा पितुः संस्कारकत्वं तदा संस्कारकस्य पितृभ्य एव श्राद्धमित्याह कात्यायनः।

स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु।
पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत् क्रमात्॥इति॥

यदि पुनः सर्व एव कर्त्ता स्वपितृभ्यो दद्यात् तदैतन्न वक्तव्यं स्वपितृभ्यः पितेति।

ननु संस्कारकर्मसु पितृभ्यः पिण्डान् दद्यादित्येतावन्मात्रं विधीयते, अन्यदनूद्यते इत्यतः पिता चेत् स्वपितृभ्यः इत्येष सम्बन्धो न विधीयते। मैवं। गुणविधौ हि प्रधानानुवादस्तादर्थ्यादुपयुज्यते न प्रधानविधौ गुणानुवादः। गुणानाञ्चानुवादः प्रधानविधिना अर्थादुपस्थापितानां वक्तव्यः। स चायं विध्येकवाक्यतानुपपत्तेरयुक्तः। पर्यवसिते हि प्रधानविधायकव्यापारे गुणानां प्राप्तिः। तत्पर्यवसानञ्च स्वसहचरितपदार्थानुवादपूर्वकम्। अतः प्रधानोत्पत्तिवाक्यैर्गुणानुवादे परस्पराश्रयं, अनेकवाक्यता, विरम्य व्यापारः, एकस्मिन्नेव वाक्ये एकस्यैव विधित्वानुवादत्वे चेति एते दोषाः प्रसज्येरन्। विध्यनुवादयुक्ते च वाक्ये पूर्वमानुवादिकं पश्चाद्विधिः। यतस्तत्रोद्दिश्य विधिर्भवति।

ननु विध्यनुवादमन्तरेणैव तावत् पदानि स्वार्थाभिधानेनैकार्थपराणि सन्त्येकवाक्यतामनुभवन्ति पश्चात् प्राप्ताप्राप्तविवेकेन शब्दप्राप्यार्थप्राप्यविवेकेन वा विध्यनुवादरूपताम्।

मैवम्। विधित्वानुवादत्वप्रतीतिमन्तरेण वाक्यार्थस्यैवानवगमात्। प्राप्ताप्राप्तविवेकादिना यत्पश्चात् विधेयविवेचनं क्रियते, तदपि पूर्वप्रतीतविपरीतविध्यनुवादभावनिवृत्त्यर्थं सन्देहनिवृत्त्यर्थं वा। अनिवर्त्तमाने हि तस्मिन्नन्यादृशं विध्यनुवादभावमाश्रित्यैव वाक्यार्थं प्रतिपादयन्ति। तस्यामवस्थायान्तु विरोधमावहन्त्येव। अतएव कर्मोत्पत्तिवाक्ये श्रूयमाणो गुणः सोमादिर्नानुवादोऽस्त्वत्रगुणविधिः। आ उद्वाहनादित्ययन्तु गुणो विधीयताम्। उद्वाहात् परेषु सुतसंस्कारेषु पितुरधिकारा-

[1]. तद्वदेवाधिकारभेदेऽपि, इति।

भावात् तस्य तेषु वृद्धिश्राद्धाप्राप्तेस्तन्निवृत्त्यर्थो विधिरनर्थकः प्राप्तार्थत्वाच्चाविधित्वं जह्यात्। अतः पिता चेत् स्वपितृभ्य एष सम्बन्धो विधीयते नान्य इति। अतएव तस्याभावे तु तत्क्रमादित्येतदुपपद्यते। पितुरभावेऽन्योपि यः कश्चित् संस्कारं कुर्यात् स तत्क्रमात् तं पितरमारभ्य यः संस्कार्य्यस्य पितॄणां क्रमः तेन क्रमेण दद्यान्न तु स्वकीयेभ्यः पितृभ्य इति।

ननु नायमस्यार्थः किन्तु तत्क्रमादनन्तराधिकारिक्रमादिति। मैवम्। एवं हि सति तु शब्दापातित पूर्वविहित वैपरीत्यावगतिपर्य्यालोचनया पूर्वं पितुः कर्तृत्वं विहितमिति मन्तव्यम्। तथा चानर्थक्यं, पितृकर्तृकेषु सुतसंस्कारेषु अन्यस्य श्राद्धकर्तृत्वाप्राप्तेः। प्रधानेऽधिकृतोऽङ्गेऽधिक्रियत इति न्यायात् पितुः प्राप्तेश्च। तदन्तराधिकारिक्रमादित्येवंविधेचार्थे गृह्यमाणे असन्निहितपरामर्शः प्रसज्येत। किञ्च अस्मिन् पक्षे वचनान्तरावगतः क्रमोऽनुसन्धीयमानोऽनुवाद एव स्यात्।

नन्विदं वचनं पितृव्यतिरिक्तैर्मातुमातुलादिभिर्विवाहसंस्कारं कुर्वाणैः स्वपितृभ्य एव श्राद्धं कर्तव्यमित्यमुमेवार्थं विधत्ते कथं स्वपितृभ्य इत्यस्यानुषङ्गात्। भवेदेवं यदि तत्क्रमादित्यत्र कर्तृक्रम उच्यते पितृतस्त्वेष इति व्याख्यातत्वात्। किञ्च यदि सर्वेऽपि कर्त्तारः स्वपितृभ्यो दद्युस्तदा स्वपितृभ्यः पितेति न वक्तव्यं स्यात्। तस्मादाचार्यमातृमातुलादयः संस्कार्य्यस्योपनेयादेरेव पितृभ्यः श्राद्धं दद्युर्न स्वपितृभ्य इति।

अथात्र पारमार्थिकः पक्षोऽभिधीयते। यदा पिता पुत्रादेर्विवाहोपनयनादि कुर्यात् तदा स्वेभ्य एव पितृभ्यो नान्दीश्राद्धं कुर्यात् स्वेभ्य एव दद्यादिति वचनात्। यदा चान्ये वचनलब्धाधिकाराः पितामहभ्रातृसकुल्यजनन्यादयस्तदापि स्वपितृभ्यः, तस्याभावे तु तत्क्रमादित्यत्र स्वेभ्य एवेत्यनुषङ्गात् प्रधानेऽधिकृत एवाङ्गेऽधिक्रियते। मातृपितृमातामहानां श्राद्धं कुर्यादित्येवंविधश्च विधिर्मात्रादिशब्दानां सम्बन्धिशब्दत्वादधिकारिणमेव सम्बन्धिनमुपादाय पर्यवस्यतीति। ये पुनः केचनाहत्यवचनेनानुक्ताधिकारास्ते तदीयेभ्यः श्राद्धं कुर्युरिति।

इत्याभ्युदयिकश्राद्धदेवताः।

अथ देवानुद्दिश्य क्रियते यत्तद्दैविकमुच्यते इत्येवं लक्षणलक्षिते तु दैविके श्राद्धे प्रीणिनीयतयाभिमता या काचन देवता इत्येवमुक्ताः सर्वेष्वपि श्राद्धभेदेषु देवताः।

अथेदानीन्तेष्वेव श्राद्धेष्वधिकारिविशेषप्रयुक्तदेवतानिर्णयः।

तत्र तावद्द्व्यामुष्यायणमधिकृत्योच्यते।

नारदस्मृतौ।

> द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृथक्।
> रिक्थादर्द्धात्समादद्युर्बीजिक्षेत्रिकयोस्तथा॥

अत्र पृथगित्यभिधानादेकैकस्मिन् पितृवर्गे त्रयस्त्रयः पिण्डाः इत्येवं षट्पिण्डाः प्रदेया इत्युक्तं भवति। अतएव देवलस्मृतौ—

द्वामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृथक्।
षण्णान्देयास्तु षट्पिण्डा एवं कुर्वन्न मुह्यति ॥ इति।

बौधायनादयस्तु षड्दैवत्यास्त्रय एव पिण्डा इत्याहुः।

द्विपितुः पिण्डदानं स्यात् पिण्डे पिण्डे च नामनी।
त्रयश्च पिण्डाः षण्णां स्युरेवं कुर्वन्न मुह्यति ॥ इति।

आपस्तम्बोऽपि।

यदि द्विपिता स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेदिति। तदेवं षण्णां षटपिण्डास्त्रयोवेति विकल्पः। यथागृह्यं व्यवस्थाचेत्यवगन्तव्यम्।

अत्र देवलबौधायनादिस्मृतिषु पिण्डशब्दः श्राद्धोपलक्षणपरः। अतएव प्रवराध्याये द्वे श्राद्धे कुर्यादेकं श्राद्धं वा पितॄनुद्दिश्यैकपिण्डे द्वावनुकीर्त्तयेत्, प्रतिग्रहीतारञ्चोत्पादयितारञ्च आ तृतीयात् पुरुषादिति।

अत्र पितृवर्गद्वयस्य द्वे श्राद्धे कुर्यात् षट् पिण्डांश्च प्रदद्यात्। अथवा वर्गद्वयस्यैकमेव श्राद्धं कुर्यादेकैकस्मिन् ब्राह्मणे द्वौ द्वौ पितरौ पितामहौ प्रपितामहौ च सम्बन्ध नामगोत्रैरनुकीर्त्तयेदित्यनुसन्धेयम्।

हारीतसूत्रे-तेषामुत्पादयितुः प्रथमः प्रवरो भवति द्वौ द्वौ निर्वापे दद्युरेकस्मिन्वेव वा द्वावनुकीर्त्तयेयुर्द्वितीयेपुत्रस्तृतीये पौत्र इति।

अस्यार्थः। प्रवरस्त्वार्षेयादिः, स बीजिसम्बन्धी क्षेत्रजेन प्रथममाश्रयणीयः। ततः क्षेत्रसम्बन्धी। निरूप्यतेऽस्मिन्निति निर्वापः पितृयज्ञः। तत्र क्षेत्रजादयो द्वामुष्यायणा द्वौ-द्वौ पिण्डौ दद्युः। द्वौ द्वाविति वीप्सावशादिदमव गम्यते। द्वयोः पित्रोर्द्वौ पिण्डौ। द्वयोः पितामहयोर्द्वौ। द्वयोः प्रपितामहयोर्द्वाविति। एवं सत्यमावास्याश्राद्धे पितृवर्गद्वयाय दीयमानाः षट्पिण्डा भवन्ति। एकस्मिन्वेव वा द्वावनुकीर्त्तयेयुरित्यत्र द्वौ द्वाविति वीप्सा वेदितव्या। एवञ्च वर्गद्वयाय दीयमानास्त्रय एव पिण्डा भवन्ति। द्वामुष्यायणस्य पुत्रो द्वितीये पितामहे द्वौ पिण्डौ दद्यादेकस्मिन् पिण्डे वा द्वौ पितामहौ सम्बन्धनामगोत्रौ कीर्त्तयेत्। उपलक्षणञ्चैतत्। तदेवं द्वामुष्यायणपुत्रस्य पिण्डभेदपक्षे अमावास्यायामेकः पित्रे द्वौ द्वावितरयोरिति पञ्चपिण्डाः प्रदेया भवन्ति। अभेदपक्षे तु त्रय एव। द्वामुष्यायणस्य पौत्रस्तु तृतीये प्रपितामहे एव पिण्डभेदे द्वौपिण्डौ अभेदे तु प्रपितामहद्वयस्य नाम कीर्त्तयेदिति तस्य चत्वारः पिण्डाः प्रदेया भवन्ति त्रय एव वेति।

केनचित् पुनरेकस्मिन्नेव वा द्वावनुकीर्त्तयेयुरित्यस्य व्याख्यानान्तरं कृतम्। द्वावपि[1] क्षेत्रजौ भवतः। एकः कुण्डः अपरो गोलक इति। तत्र यः कुण्डः सः प्रथमे पिण्डसम्बन्धिन्येव पिण्डे द्वौ बीजिक्षेत्रिणौ पितरावनुकीर्त्तयेत्। इतरयोस्तु पिण्डयोः क्षेत्रसम्बन्धिनमेवैकैकं पुरुषं कीर्त्तयेदिति। गोलकस्तु प्रथमे द्वौ पितरौ कीर्त्तयित्वा अन्ययोः पिण्डयोर्बीजिनः पितृपितामहावेवैकैकशः कीर्त्तयेदिति।

---

[1] द्वौ चेति।

कुण्डगोलकयोस्तु पुत्रौ द्वितीये पितामहपिण्डएव, द्वौ बीजिक्षेत्रिणौ पितामहौ कीर्त्तयतः। प्रथमतृतीययोस्तु पिण्डयोरेकैकमेव पितरं प्रपितामहञ्चेति। तत्र कुण्ड-पुत्रः कुण्डं स्वपितरं क्षेत्रिबीजिनौ द्वावपि स्वपितामहौ क्षेत्रिजनकं स्वप्रपितामहञ्चेति चतुरः कीर्त्तयेत्। गोलकपुत्रो गोलकं स्वपितरं बीजिक्षेत्रिणौ पितामहौ बीजिजनकं स्वप्रपितामहञ्चेति चतुरः कीर्त्तयेत्। कुण्डगोलकयोः पौत्रौ तृतीय एवैकत्र पिण्डे प्रपितामहौ कीर्त्तयेतामिति।

तदेतद्व्याख्यानं न स्मृत्यन्तरसंवादीत्येकस्मिन्नेव वा द्वावनुकीर्त्तयेयुरिति वीप्सां पुरस्कृत्य पूर्वोक्तैव व्याख्या ग्रहीतुं न्याय्येति अनेन हारीतवचनेनैवा विष्कृतम्। यत् षट्पिण्ड त्रिपिण्डपक्षविकल्पो वा शब्दाद्व्यक्त ईरितः। द्वामु-ष्यायणमधिकारिणं प्रकृत्य-षण्णां देयास्तुषट्पिण्डा इत्येवंविधेषु मातामहपिण्डा-पेक्षया षट् संख्येयमिति या शङ्का सा च निराकृता इति द्वामुष्यायणसम्बन्धि श्राद्ध-देवतानिर्णयः कृतः।

इदानीन्तु अनेकद्वामुष्यायणसम्बन्धिषु[१] क्रियते।

तत्र यदि द्वामुष्यायणस्यान्यतरः पिता द्वामुष्यायणो भवेत् तदा पितृभ्यां पिण्ड-द्वयं प्रदाय पितामहेभ्यः पिण्डत्रयं दत्वा प्रपितामहेभ्यस्त्रयमित्यष्टौ पिण्डान् दद्यात्। यदा तु तस्यान्यतरः पिता पितामहश्चान्यतर एव द्वामुष्यायणः स्यात् तदा पितृभ्यां पिण्डद्वयं निरूप्य पितामहेभ्यस्त्रीन् पिण्डान् दत्वा प्रपितामहेभ्यश्चतुरो दद्यादित्येवं नव।

यदा तु द्वामुष्यायणस्य द्वावपि पितरौ द्वामुष्यायणौ स्यातां तदा पितृभ्यः द्वौ पिण्डौ दत्वा पितामहेभ्यश्चतुरः प्रपितामहेभ्योऽपि चतुरो दद्यादित्येवं दश।

यदा तु द्वामुष्यायणस्य द्वावपि पितरौ द्वामुष्यायणौ पितामहस्त्वेक एव द्वामुष्या-यणस्तदा पितृभ्यां द्वौ पिण्डौ प्रदाय पितामहेभ्यश्चतुरो दत्वा प्रपितामहेभ्यः पञ्च दद्यात् इत्येमेकादश।

यदा तु द्वामुष्यायणस्य द्वावपि पितरौ द्वामुष्यायणौ द्वावेव पितामहौ द्वामुष्या-यणौ भवतः, तदा पितृभ्यां पिण्डद्वयं प्रदाय पितामहेभ्यश्चतुरोदत्वा षट् प्रपितामहेभ्यः षड्भ्यो दद्यादिति द्वादश।

अस्यैव यदा त्रयः पितामहा द्वामुष्यायणाः स्युः तदा पितृभ्यां पितामहेभ्यश्च पूर्वोक्तसंख्याकान् दत्वा प्रपितामहेभ्यः सप्त सप्तभ्यो दद्यादित्येवं त्रयोदश। यदि-चास्यैव सर्वे पितामहा द्वामुष्यायणास्तदा पितृपितामहेभ्यः पूर्ववद्दत्वा प्रपितामहेभ्यो-ऽष्टावष्टभ्योदद्यादित्येवं चतुर्दश। एकत्र पिण्डे अनेकनामसङ्कीर्त्तनपक्षे तु सर्वेषां त्रय एव पिण्डा इति सिद्धमेव।

यस्य पुनरस्य द्वामुष्यायणस्य पितामह एव द्वामुष्यायणः स चतुरः पिण्डान् दद्यात्। यस्य पितैव स पञ्च। यस्य पिता द्वामुष्यायणोऽन्यतरः पितामहश्च स षट्।

[१] अनेक द्वामुष्ययणसम्बन्धेनेति।

यस्य पिता द्वामुष्यायणो द्वावपि च पितामहौ स सप्तेति। एषु पक्षेषु मध्ये तु आद्यौ द्वौ द्वितीये पुत्रस्तृतीये पौत्र इत्यत्र गतावपि सङ्गत्यनुरोधात् पुनर्लिखितौ।

नन्वत्र द्वौ-द्वौ पिण्डौ निर्वापे दद्युः। षण्णां देयाश्च षट्पिण्डा इत्येवमादिभिर्वचनैः षडेव पिण्डा विहितास्तेनाधिकसंख्या व्यावृत्तिरेव गम्यते। मैवम्।

यदि षट्संख्याविधिपराणिवचनानि कथमन्यसंख्यानिवृत्तिपराण्यपि भवेयुः। व्रीह्यादिविधायकान्यर्थात् प्रियङ्ग्वादिपराणि यथा, तथैतान्यपि स्युरिति चेत्। न। भवेदयं प्रकारो नियमार्थेषु वाक्येषु, पक्षेऽप्राप्तौ नियमार्थं वाक्यम्।

यत्र तु सर्वात्मना अप्राप्तं विधीयते तत्र प्रापकत्वमेव नान्यनिवर्तकत्वम्। प्रकृते च षट्सप्तादिभ्यः पिण्डदानस्याप्राप्तत्वान्न सप्तमादिव्यावर्त्तनपराणीति।

नन्वमावास्यायां पितृभ्यो दद्यादिति सामान्यतो विधेर्यथास्वमिच्छया षट्सप्तादिभ्यो दानं प्राप्तमेवेति षण्णामित्यादिभिर्वाक्यैर्नियम्यते।

उच्यते। पित्रादिभ्यस्त्रिभ्यो दद्यादित्यनन्तरमेव नियमितत्वात् पित्रादिशब्दैश्च मुख्ये सम्प्रत्यय इति न्यायाद्गौणपित्राद्यग्रहणादप्राप्तमेव षण्णां श्राद्धदेवतात्वं विधीयत इति नान्यनिवर्त्तकमिति।

ननु मास्तु षट्संख्याविधिवाक्यानां सप्तादिसंख्यानिवृत्तिपरत्वं, भवदभ्युपगतायास्तु पितामहादिदेवतागतायास्तदुद्देशेन प्रदीयमानपिण्डगतायाश्च कुतः प्राप्तिः। षण्णां देयास्तु षट्पिण्डा इत्यस्मादेव विधेः समानन्यायत्वात्। नात्र त्रिसंख्यानियमः। गौणपित्रादीनामपि ग्रहणादित्येतावन्मात्रस्य विवक्षितत्वात्। तस्मात् मुख्यार्थग्रहणन्यायस्य त्रिसंख्यानियमवाक्यस्यवापवादं कर्त्तुमयं विधिरिति सप्तादीनामपि प्राप्तिः, गौणानां पित्रादीनामुपलक्षणार्थ एवायं षट्संख्याविधिरिति युक्तं पश्यामः।

ननु विधौ न परः शब्दार्थ इति न्यायात् कथमुपलक्षणपरत्वम्। इत्थं अस्य नियमविधित्वाभावात् सप्तनिवर्त्तकत्वानुपपत्तौ त्रिसंख्यानियममात्रपरत्वे अवधारिते षट्संख्यायाः स्वत एव प्राप्तौ विध्यनुपयोगे संख्यावचनस्योपलक्षणार्थत्वं गम्यते।

नन्वेवं सतीच्छावशाद् गृह्यमाणया ययाकयाचिच्चतुरादिसंख्यया कृतार्थः श्राद्धकर्त्ता नियमेन षडादिसंख्यामुपाददीत। तथा वृद्धप्रपितामहादीनपि वा देवतात्वेनोपाददीतेति। मैवम्।

न्यायावष्टब्धवचनलभ्यो मुख्यपित्रादिगतस्त्रिसंख्याग्रहणनियमो ह्यनेन वचनेन बाध्यते। न पुनर्वचनमात्रलभ्यपित्रादिसामान्यगतत्रिसंख्यानियम इति पूर्वोक्तदोषद्वयानवकाशः। विध्यन्तरानुरोधाच्च षट्पिण्डा इत्यस्योपलक्षणपरत्वमेव न्याय्यम्। तथाहि पारस्करस्मृतौ—

> द्विगोत्रैः परतो जातास्तेषाञ्चेत् पुत्रिकासुतः।
> स त्रिगोत्रस्त्रिवर्गस्य मृताहान्यत्रकारयेत्॥

ये द्वामुष्यायणत्त्वाद्द्विगोत्रा भवन्ति तैरुत्पादितः उत्पादकैः पितृभिः पितामहेन च सम्बद्धत्वादुभयसम्बन्धी स चेत् पुत्रिकापुत्रस्त्रिगोत्रः,द्वे द्वामुष्यायणजनकसम्बन्धिनी-

गोत्रे मातामहसम्बन्धिचैकमित्येवं स त्रिवर्गसम्बन्धितया वर्गत्रयस्य मृताहादन्यत्र अमावास्यादौ साधारणे काले श्राद्धं कारयेत् कुर्य्यादिति । अतः कार्ष्णाजिनिः सपिण्डीकरणं विषयीकृत्याह ।

यावन्तः पितृवर्गाः स्युस्तावद्भिर्दत्तकादयः[१] ।
प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह ॥
द्वाभ्यां सहाथ तत्पुत्राः पौत्रास्त्वेकेन तत्समम् ।
चतुर्थपुरुषे छन्दस्तस्मादेषा त्रिपौरुषी ॥
साधारणेषु कालेषु विशेषो नास्ति वर्गिणाम् ।
मृताहे त्वेकमुद्दिश्य कुर्य्युः श्राद्धं यथाविधि ॥इति॥

अस्यार्थः । दत्तकादिद्व्यामुष्यायणानां यावन्तः पित्रोः सम्बन्धिनः पितामहवर्गाः–स्युस्तत्सम्बन्धेन च स्वं प्रति पितृव्यादिरूपतां गताः, ये च मुख्यगौणपितृसम्बन्धेन-भ्रात्रादिरूपताङ्गताः ते सर्व्वे दत्तकादीनां पितृवर्गाः । तेषु मध्ये ये प्रेताः स्युस्तेषां तत्समानजातीयवर्गजैः पितृभिः सह ते दत्तकादयो योजनं सपिण्डीकरणं कुर्युः । द्व्यामुष्यायणपुत्रास्तु तेषु तेषु वर्गेषु मध्ये स्वकीयेन पित्रा तत्पूर्वाभ्याञ्च द्वाभ्यां तस्य तस्य प्रेतस्य सपिण्डीकरणं कुर्युः । द्व्यामुष्यायणपौत्रस्तु स्वेन पित्रा द्व्यामुष्यायणेन च पितामहेन तत्पित्रा चैकेन तत्समं तत्तद्वर्गोत्पन्नं तेन तेन योजयेत् । द्व्यामुष्यायणप्रपौत्रस्तु गौणपितृवर्गमध्यस्थितं प्रेतं योजयेत् वा न वा । एषा हि गौणपितृसन्ततिस्त्रिपौरुष्येव । यथा दत्तकादिभिः सर्वपितृवर्गसम्बन्धिनः सपिण्डीकरणं कार्य्यं तथैवामावास्यादौ साधारणे काले सर्व्ववर्गसम्बन्धेन नैयमिकं श्राद्धं कर्त्तव्यमित्येतद्वक्तुमुक्तं 'साधारणेषु कालेषु विशेषो नास्ति वर्गिणामिति' । मृताहे त्वेकमुद्दिश्येति । यो यस्मिन्नहनि मृतस्तस्मिन्नहनि तु यच्छ्राद्धं तत्तस्यैव नान्यस्येति । तदेवमेतत् सिद्धं, यावन्तः पितामहाः प्रपितामहाः स्युस्तावतां द्व्यामुष्यायणैरमावास्यादिश्राद्धेषूद्देशं कृत्वा पृथक्पिण्डाः प्रदेयाः । एकैकस्मिन् वा पिण्डे तावतां नामानि कीर्त्तनीयानि ।

अथ पुत्रिकापुत्राधिकारिकश्राद्धदेवताः ।

तत्र तावत्पुत्रिकापुत्रश्चतुःप्रकारो भवति । एकस्तावत् पुत्रिकैव पुत्र इत्येवं विधया संविदा कृतः । अस्यास्तु पुत्रो यः परः स संविदमन्तरेणैव योगसामर्थ्यात् पुत्रिकापुत्रसंज्ञां लभते । एतावांस्तु विशेषो यदयं न पुत्रस्थानीयः, किन्तु पौत्रस्थानीयः दौहित्र एव वा । अतएव शङ्खलिखितयोर्वचने दौहित्रत्वेनायं निर्दिष्टः ।

पुत्रिका हि पुत्रवदिति प्राचेतसस्तस्या अपत्यं पुत्रिकासुतो मातामहपितामहानां पिण्डदः, पौत्रदौहित्रयोर्न विशेषोऽस्त्यनुग्रह इति । तृतीयस्तु पुत्रिकापुत्रः– "यदपत्यंभवेदस्यान्तन्मम स्यात् स्वधाकरम्" इत्येवं विधया संविदा दत्तायां दुहितर्य्युत्पन्नः । स मातामहस्य जनयितुश्च, इत्येवमुभाभ्यां पुत्रत्वेनैव सम्बन्धी भवति । चिन्तितापि-पुत्रिका भवतीत्यस्मिन् पक्षे संविदमन्तरेणापि स्वचित्तपरिकल्पनामात्रेणैव । एवं पुत्रिका-पुत्रभेदा भवन्ति । पुत्रभेदप्रकरणे चैते व्यक्ता भविष्यन्तीति । एवं स्थिते स्मृतिः—

[१] तावद्भैदत्तकादय इति ।

मातामह्यन्तु मात्रादि पैतृकं पितृपूर्वकम् ।
मातृतः पितृतो यस्मादधिकारोऽस्ति धर्मतः ॥इति ।

न चैतद्वचनं दौहित्रमात्रविषयमिति मन्तव्यम् । मनुस्मृतावेवैतद्वचनार्थस्य पुत्रिकापुत्रसम्बन्धावगमात् ।

मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः ।
द्वितीयन्तु पितुस्तस्याः तृतीयन्तु पितुः पितुः ॥इति॥

एतच्च वचनद्वयं न सामान्यतः पुत्रिकापुत्रविषयम् । किन्तु पुत्रत्वेन परिकल्पिता या पुत्रिका तत्पुत्रैकविषयम् ।

ननु निर्व्वपेत्पुत्रिकासुत इति सामान्योपन्यासात् कुतः पुत्रिकापुत्रविशेषैकविषयः ।

उच्यते । या हि पुत्रिका पुत्रत्वेन न कल्पिता तत्पुत्रस्तु कल्पितः, स तु गौणसुतत्वेन साक्षान्मातामहसम्बन्धीति कृत्वा मातामहश्राद्धं कुर्वन्मातामहाद्येव कुर्य्यात् । पुत्रस्य हि पितृश्राद्धे पितृप्रभृत्येवाधिकारात् । या तु पुत्रत्वेन कल्पिता पुत्रिका तस्यास्तु सुतो मातामहपुत्रस्य सुत इति मातामहस्य पौत्रस्थानीय इति पौत्रक्रियमाणश्राद्धतुल्यं स्वमातामहश्राद्धं करिष्यन् पितृस्थानीयमातृप्रभृत्येव कुर्य्यादिति ।

ननु नास्ति वचनस्यातिभार इति न्यायाद्वचनात् पुत्रिकापुत्रमात्रक्रियमाणमातामहश्राद्धे मात्रादित्वमस्तु ।

मैवम् । सन्निहिताभिहितेनौचित्येन वचनस्य विशेषेऽवस्थापनात् ।

ननु किमिदमौचित्यमदृष्टार्थेषु पदार्थेषु ।

"कृते सपिण्डीकरणे तत्पूर्वं श्राद्धमाचरेत्" इत्यादि वचनान्तरावगतकर्म्मस्वरूपानुसरणमेवेत्यवेहि एकवाक्योपात्तहेतुसामर्थ्यञ्च । यतोऽत्र मातृपूर्व्वकत्वं पितृपूर्वकत्वञ्चोपदिश्य तत्पूर्वकत्वसाधकस्तथाविधाधिकारसद्भावो हेतुरुक्तः । "मातृतः पितृतो यस्मादधिकारोऽस्ति धर्मत इति ।"

स चायं हेतुर्हेतुत्वादेव पूर्वसिद्धतामपेक्षमाणः पौत्रस्थानीयमेव श्राद्धाधिकारिणं विषयीकरोति । अनेनैवंविधस्य पूर्वसिद्धत्वाभावात् हेतुवन्निगदोऽस्त्वितिचेन्न ।

हेतुत्वासम्भवे हि हेतुवन्निगदो न पुनस्तस्य सम्भवे । इतश्च गौणपुत्रीभूतस्य पुत्रिकापुत्रस्य नायं मातृपूर्वकत्वविधिः किन्तु दौहित्ररूपस्यैव मातामह्यमिति निर्देशात् । अन्यथा पैतृकमिति निर्देशोऽभविष्यत् ।

ननु पौत्रस्थानीयत्वात्पैतामह्यमिति निर्देशः प्राप्नुयात् । पुत्रस्य हि पुत्रः पौत्रो भवति यमपेक्ष्य च यः पौत्रस्तदपेक्षया स पितामहो भवति यतः । मैवम् ।

पुत्रत्वमेव हि संविदोत्पादितं पुत्रिकायां तत्पुत्रस्य मातामहं प्रति पौत्रत्वं कल्पनामात्रभवं न लौकिकं न वैदिकमिति नोत्तरव्यवहारोत्पादनसमर्थम् ।

नन्वेवं सति क्षेत्रजादीनां पुत्रैः पितृश्राद्धादीनि कुर्व्वाणैः क्षेत्र्यादयः पितामहत्वेन न सङ्कीर्त्तेरन् । उच्यते ।

वयमत्र गौणत्वेन स्वरसतो लौकिकव्यवहारगम्यत्वेन च सूक्ष्मतरं पितृ-पितामहादिरूपसम्बन्धान्तरं शास्त्रोपदिष्टप्रकारसमुत्पादितं नात्यन्तं निवारयामः किन्तु तद्वाचकशब्दप्रयोगेण व्यवहारम्। यस्मादयं व्यवहारः स्वारसिकतया सकलजनसाक्षितया च समुद्भूततरं बलवत्तरं मातृमातामहादिसम्बन्धं गोचरयता जनकसन्ततिवाचकताभ्रमविषयतामलभमानेन मातृमातामहादिशब्दप्रयोगरूपेण व्यवहारान्तरेण बाध्यते। अतोऽयं पुत्रिकापुत्रो मातामहश्राद्धं कुर्वन् मातृमातामहादि-शब्दप्रयोगेण पितृपितामहादिशब्दप्रयोगं बाधते। यथा भ्रातृसुतः गौणपितृताङ्ग-तस्य सुतस्य पितृव्यस्य गौणसुतः श्राद्धमन्यमपि वा कमपि लौकिकव्यवहारं कुर्वन् स्वारसिकसर्वजनसाक्षिक-पितृव्यत्वरूपसम्बन्धवाचक—शब्दप्रयोगेण पितृत्वरूपसम्ब-न्धवाचक-शब्दप्रयोगरूपं व्यवहारम्।

नन्वेवं सत्यन्येनापि पुत्रिकापुत्रेण न्यायसाम्यात् मातामहादिशब्दैरेव श्राद्ध-प्रयोगोऽनुष्ठेयः। मैवम्। तथाहि सति पुत्रिकापुत्रोपदेशोऽनर्थकः स्यात्। आवश्यक श्राद्धाधिकारप्राप्त्यर्थं स इति चेन्न। विनापि हि पुत्रीकरणं दौहित्रस्यापुत्रमातामह-श्राद्धाधिकारस्यावश्यकत्वात्। न चैष दायहरस्यैव दौहित्रस्येति शङ्कनीयम्। अग्रे निरा-करिष्यमाणत्वात्। अतः पुत्रीकृतस्य पुत्रिकापुत्रस्य पित्रादिशब्दप्रयोगयोग्येव मातामह-श्राद्धं मातामहाद्येव च। पुत्रीकरणरहितस्य तु पुत्रिकापुत्रस्य मात्रादि मातृमाता-महादिशब्दप्रयोगयोग्येव चेति। इतश्चैतन्मातामहादिशब्दप्रयोगयुक्तम्। यतो मातामह्यन्तु मात्रादि मातुः प्रथमतः पिण्डमित्यादिषु तच्छ्राद्धप्रकारविधायकवाक्येषु मातृमातामहशब्दप्रयोग एव श्रूयते[1]। विधिशब्दस्य च मन्त्रकार्य्यकरत्वं न्याय्यम्।

ननु नात्र मातृमातामहादिशब्दाः श्राद्धप्रयोगकालेऽप्येत एव प्रयोज्या इत्यनेना-भिप्रायेण प्रयुक्ताः किन्तु मात्रादित्वमात्रविधानार्थवाक्यावयवभावेनेति। सत्यम्।

किन्तु यत्र विधिशब्दः प्रयोगकाले मन्त्रवदनुष्ठेयस्मारकत्वेन प्रयुज्यते तत्र-सर्वत्र विधेयस्मारकशक्तियुक्तत्वेनैवाकाङ्क्षावशादेव च स्वीक्रियते न तु तदभि-प्रायप्रयुक्तत्वादित्यदोषः। न च क्षेत्रजादिषु सम्बन्धान्तरमस्ति। न चास्ति कश्चित् पितृपितामहादिशब्दव्यतिरिक्तो विधिशब्दः। अतस्तेषां पितृपितामहादिशब्द-व्यतिरिक्तो विधिशब्दः। अतस्तेषां पितृपितामहादिशब्दैरेव सङ्कीर्त्तनं न्याय्यमिति।

यत्तु पुत्रिकापुत्रस्य मातामहश्राद्धे मातृपूर्व्वकत्वमुक्तं तस्य वृद्धावपवादमाह-व्याघ्रपात्।

कुर्यान्मातामहश्राद्धं [2]सर्वदा मातृपूर्वकम्।
विधिज्ञो विधिमास्थाय वृद्धौ मातामहादिति ॥

न चात्रैवं शङ्कनीयं मातृश्राद्धे मातामहश्राद्धे च दौहित्रमात्रस्यैकस्मिन् काले कदाचिदन्वष्टकादौ तीर्थादिविशेषे वा देशकालादीनां साधारणत्वेन युगपत्कर्तव्ये प्राप्ते तत्र द्वयोः क्रमप्रतिपादनार्थं वचनं, न पुनः पुत्रिकापुत्रकर्त्तृके मातामहश्राद्धे

---

[1] दृश्यते इति [2] कुर्व्वन्मातामहश्राद्धमिति।

मातुर्देवतात्वस्य विधायकञ्चापवादकञ्चेति। यतः पुत्रिकापुत्रक्रमेऽस्य वचनस्योपलम्भात् वृद्धिश्राद्धप्रकरणे वक्ष्यमाणस्य मातृश्राद्धपूर्व्वकत्वस्य बाधापत्तेश्च। न च क्रमविकल्पो न्याय्यः। सर्व्वस्मृतिपुराणेषु वचनशतेन प्रत्यहं मातृश्राद्धपूर्व्वकत्वस्य विधानात्। इति पुत्रिकापुत्रकर्तृकश्राद्धदेवताः। तदेवमुक्तं द्व्यामुष्यायणाधिकारिकेषु नैयमिकेषु श्राद्धेषु गौणस्यापि पितृवर्गस्य देवतात्वम्।

अथेदं वक्तव्यं किमेतत्कर्तृकेष्वेतेषु श्राद्धेषु गौणपितृवर्गीयः पत्नीवर्गोऽपि मुख्यपितृवर्गीयपत्नीवर्गवत् स्वपतिसहभावेन देवतात्वं लभते वा न वेति। तत्र तावद्गौणपितृवर्गेण देवतात्वे लब्धे सति वचनान्तरेण तस्य पत्नीसहितस्य देवतात्वमुक्तमिति न तद्रहितस्य देवतात्वं शाब्दम्।

नन्वेवं तर्हि गौणस्य पितुरविद्यमानायां पत्न्यां विद्यमानायामपि वा जीवन्त्याममावास्यादिश्राद्धेषु तस्यानुद्देशः प्राप्नोति।

तथा च सति "षण्णान्देयास्तु षट्पिण्डाः" इत्यादिका नित्यवच्छ्रुतिर्बाध्यते। अथ किं नित्यवच्छ्रुतिबाधभयादप्रमीतेऽपि पितरीति पितुरुद्देशः कार्य्यः। यदि पुनः सा पित्रादिमरणापेक्षा नित्यवच्छ्रुतिस्तर्हि मातृमरणापेक्षाप्यस्तु, जीवत्पितृकाधिकारिकश्राद्धन्यायो वास्त्विति। न चात्र मुख्ये सम्प्रत्यय इत्ययं न्यायः प्रवेशं लभते। गौणपितृपत्नीत्वं गताया मुख्याया मातुरभावात् गौणपितृनिवेशस्य न्याय्यत्वात्। अतोऽत्र गौणस्य पित्रादेर्द्देवतात्वे गौणीनां मातृणां सहभावेन देवतात्वमस्तु।

अत्रोच्यते। यथा मुख्यपितृश्राद्धे गौणीनां न सहभावेन देवतात्वं तथात्रापि[१] यासां हि स्वतन्त्राधिकारेण पृथक् श्राद्धं प्राप्नोति तासामेव सहभावो विहितः। पृथक् श्राद्धविध्यपवादरूपत्वादस्य सहभावविधेः। न चास्ति गौणमातृश्राद्धे पृथङ् नित्योधिकारः। मातृश्राद्धविधेर्मुख्यमातृपरिग्रहेण कृतार्थत्वात्।

नन्वेवं तर्हि गौणपितृपत्नीनां श्राद्धानि कः कुर्य्यात्। लोकदृष्ट्या पुत्रस्थानपातात् स एवेति ब्रूमः। सोऽपि लोकविरोधपरिहाराय परिच्छदादानकलङ्कक्षालनाय वा कृपया स्नेहेन वा करोतीति न तत्र तस्य नित्योऽधिकारः। यस्तु स्त्रीपुंसाभ्यामेव गौणत्वेन गृहीतः पुत्रः स यथा बहुभिः पुरुषैः गृहीतो बहूनां पुरुषाणां करोति एवं स्त्री पुंसाभ्यामपीति। अत्र तु मातामहानामनेकत्वेऽपि मातामहश्राद्धविधेर्मुख्यमातामहश्राद्धेनैव कृतार्थत्वात् न बहूनि मातामहश्राद्धानि। न चाप्येकस्मिन्नेव श्राद्धे सर्व्वेषां नामानि कीर्त्तनीयानि तथा विध्यभावात्।

अथवा यः पत्या सम्पादितो गौणः पुत्रः सम्मत एव पत्न्या अपि पुत्रो भवति। विवाहसमये हि तस्याः पत्न्या धर्मकामार्थेष्वनतिचरणीयत्वप्रतिज्ञानात्। अतएव तदुपार्जित धनधर्मयोस्तस्याः स्वतः स्वत्वम्। उक्तं हि इदमापस्तम्बादिभिः "जायापत्योर्न विभागो विद्यते सहाधिकाराद्धनधर्मयोः"। न हि प्रोषिते प्रेते वा पत्यौ

[१] यथामुख्ये पितृश्राद्धे नित्यानित्यसंयोगे विरोधादिना गौणमातृणां न सहोद्देश्यत्वं तथा गौणपितृश्राद्धेऽपि इति।

आवश्यकेषु धनसाध्येषु धर्मकार्य्येषु पतिधनेन क्रियमाणेषु पत्न्याः स्तेयमुपदिशन्तीति। अतोऽस्ति गौणसुतस्य गौणमातृश्राद्धे पृथगधिकार इति कृत्वा अन्यत्र-पतिना सहेत्यपवादोऽप्यस्तीति सिद्धं पार्वणे तस्याः सहभावेन देवतात्वमिति। नचैवं जननीसपत्नीष्वपि वाच्यम्। तत्र मुख्यमातृसद्भावेन कृतार्थत्वादिति पूर्व-मुक्तत्वात्।

एवञ्च सति गौणमातामहानामपि गौणपितृवच्छ्राद्धं कर्तव्यमिति। एवमुक्ता द्वामुष्यायणाधिकारेषु श्राद्धेषु देवताः।

अथेदानीं जीवत्पितृकाधिकारिकेषु श्राद्धेपूच्यन्ते।

तत्राह विष्णुः।

पितरि जीवति श्राद्धं कुर्य्यात् येषां पिता कुर्य्यात् तेषां कुर्य्यात्। पितरि-पितामहे च जीवति येषां पितामहः। पितरि पितामहे प्रपितामहे च जीवति नैव कुर्य्यात् यस्य पिता प्रेतः स्यात् स पित्रे पिण्डं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात्। यस्य पिता पितामहश्च प्रेतौ स्यातां स ताभ्यां पिण्डौ दत्वा पितामह पितामहाय दद्यात्। यस्य पितामहः प्रेतः स्यात् स तस्मै पिण्डं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात्। यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स ताभ्यां पिण्डौ दत्त्वा पितामह पितामहाय दद्यात्।

मातामहानामप्येवं कुर्य्यात् श्राद्धं विचक्षणः।
संख्योहेन यथान्यायं शेषाणां मन्त्रवर्ज्जितम्॥

अस्यार्थः। पितरि जीवति श्राद्धं कुर्य्यात् येषां पिता कुर्य्यात्। पितर्य्येव जीवत्यन्येषु प्रमीतेष्विति प्रथमः पक्षः। पितरि पितामहे च जीवति अन्येषु प्रमीते-ष्विति द्वितीयः। त्रयो जीवन्तीति तृतीयः। यस्य पिता प्रेतः स्यात् पितामह-प्रपितामहौ जीवत इति चतुर्थः। यस्य पिता पितामहश्च प्रेतौ स्यातां प्रपितामहश्च जीवतीति पञ्चमः। पितामहपितामहो वृद्धप्रपितामहः। यस्य पितामहः प्रेतः स्यात् पिता प्रपितामहश्च जीवत इति षष्ठः। यस्य पिता प्रपितामहश्च प्रेतौ स्यातां पितामहश्च जीवति इति सप्तमः।

अयमत्राशयः। अन्तर्हितेभ्योऽनन्तर्हितेभ्यो वा प्रेतेभ्यस्त्रिभ्यः क्रमेण श्राद्धं कर्तव्यमिति। न्यायप्राप्ते ऊहे पुनर्वचनं एकप्रयोगतया तदप्राप्त्याशङ्कायां शेषाणां मन्त्रवर्जितमिति। पितृमातामहव्यतिरिक्तानां ऊहितमन्त्रवर्जितं पितृपदवानेव मन्त्रः स्यादित्यर्थः। अत्र च संख्योहवचनं लिङ्गम्, न पुनः पितृव्यादि श्राद्धमन्त्र-निषेधः। कुर्य्यादिति यच्छब्दायोगादकरणे न जीवत्पितृकस्य प्रत्यवायः किन्तु कुर्व्वाणस्य फलविशेषो भवतीति।

अथ जीवच्छ्राद्धदेवताः।

ब्रह्मा, विष्णुः, ईश्वरः, रुद्रः, इन्द्रः, प्रकृतिः, मुद्गलः, पुरुषः, शिवइत्यष्टौ। शर्वः, शर्वपत्नी, भवो, भवपत्नी, रुद्रो, रुद्रपत्नी, उग्रः, उग्रपत्नी, भीमो, भीमपत्नी, ईशः, ईशपत्नी, महादेवो, महादेवपत्नी, पशुपतिः, पशुपतिपत्नी, इति षोडश।

प्राणापानव्यानसमानोदानाः, एषामधिपतयः पूषातका रुद्राश्चेति दश। अग्निवाय्वादित्या व्याहृतिदेवतास्तिस्रः। सपत्नीकाः पित्रादयो मातामहादयश्चेति षट्। पार्व्वणोपदिष्टाग्नौकरणवैश्वदेविकदेवताश्च। एताश्च विधिना मन्त्रवर्णे-नातिदेशेन चावगताः। विध्यादींश्च तत्तत् प्रकरणे दर्शयिष्यामः। इति जीवच्छ्राद्ध-देवताः।

अथ सन्न्यासाङ्गभूतश्राद्धेषु देवताः।

तत्र देवश्राद्धे ब्रह्मविष्णुमहेश्वराः। ऋषिश्राद्धे देवर्षिब्रह्मर्षि क्षत्रर्षयः। क्वचिद्ग्रन्थे देवर्षिक्षत्रर्षिमनुष्यर्षयः। दिव्यश्राद्धे वसुरुद्रादित्याः। मनुष्यश्राद्धे सनकसनन्दनसनातनाः। भूतश्राद्धे पृथिव्यादीनि भूतानि, चक्षुरादीनि कराणि, चतुर्व्विधभूतग्राम इति तिस्रः। पितृश्राद्धे पितृ-पितामहा मातामह-प्रमातामह वृद्ध-प्रमातामहाश्च। मातृश्राद्धे मातृपितामहीप्रपितामह्यः। आत्मश्राद्धे आत्मपितृ-पितामहाः। एते च सर्व्वे नान्दीमुखविशेषणवन्तो देवताः। यतः शौनकप्रोक्ते सन्न्यासविधौ पठ्यते।

अथातः सन्न्यासविधिं व्याख्यास्यामः। पूर्व्वेद्युर्नान्दीमुखश्राद्धं कुर्य्यादेव। ऋषिदिव्यमनुष्यभूतपितृमात्रात्मादीनां पृथक् पिण्डदानैर्युग्मैर्ब्राह्मणैरष्टौ श्राद्धानि कुर्य्यादिति। एषाञ्च श्राद्धानां सन्न्यासार्थत्वेन कर्माङ्गत्वादिष्टिश्राद्धे क्रतुर्दक्ष इति विश्वेदेवाः सत्यवसुसंज्ञका वा "सत्यो नान्दीमुखे वसुः" इतिवचनात्।

इति सन्न्यासाङ्गश्राद्धे देवताः।

तदेवमुक्ताः श्राद्धशब्दार्थान्तर्गत-ब्राह्मणभोजन-पिण्डनिर्व्वपणात्मकप्रधानकर्म्म-द्वय सम्बन्धिन्यो देवताः।

अथेदानीं श्राद्धान्तर्गताग्नौकरणसंज्ञक-प्रधानकर्म्म-सम्बन्धिन्योऽभिधीयन्ते।

तत्तावच्छतपथेपिण्डपितृयज्ञप्रकरणे।

स उद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्यः। देवान् वा एष उपावर्त्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत् पितृयज्ञेनेवाचारीत्तदु देवेभ्यो निन्हुते स देवैः प्रसूतोऽथैतत् पितृभ्यो ददाति तस्मादुद्वास्याग्नौ द्वे आहुती जुहोति देवेभ्यः। स वा अग्नये च सोमाय च जुहोति[१]।

महाभारतेऽपि पुराकल्परूपार्थवादसहितोऽग्नौकरणे अग्निविधिर्दृश्यते।

तथा—

> तत्र यज्ञे प्रवृत्ते[२] तु सर्व्व एव महर्षयः।
> पितृयज्ञानकुर्व्वंस्ते विधिदृष्टेन कर्म्मणा॥
> ऋषयो धर्मनित्याश्च कृत्वा निवपनान्युत।
> तर्पणञ्चाप्यकुर्व्वन् वै तीर्थाम्भोभिर्यतव्रताः॥

---

१. (शतपथ ब्राह्मणे २ अ० ४. २. १)। २. पुराकल्पप्रवर्त्ते इति।

निवापैर्दीयमानैश्च चातुर्व्वर्ण्येन भारत।
तर्पिताः पितरो देवास्तेऽन्नं न जरयन्ति वै॥
अजीर्णेनाभ्यहन्यन्त ते देवाः पितृभिः सह।
सोममेवाभ्यपद्यन्त निवापान्नाभिपीडिताः॥
तेऽब्रुवन् सोममासाद्य पितरो जीर्णपीडिताः।
निवापान्नेन पीडा नः श्रेयो नोऽत्र विधीयताम्॥
तान् सोमः प्रत्युवाचाथ श्रेयश्चेदीप्सितं सुराः।
स्वयम्भूसदनं यात स च श्रेयो विधास्यति॥
ते सोमवचनाद्देवाः पितृभिः सह भारत।
मेरुशृङ्गे समासीनं पितामहमुपागमन्॥

देवपितर ऊचुः।

निवापान्नेन भगवन् भृशं पीड्यामहे वयम्।
प्रसादं कुरु नो देव श्रेयो नः संविधीयताम्॥
इति तेषां वचः श्रुत्वा स्वयम्भूरिदमब्रवीत्।
एष मे पार्श्वतो वह्निर्युष्मच्छ्रेयो विधास्यति॥

अग्निरुवाच।

सहितास्तत्र भक्ष्यामो निवापे समुपस्थिते।
जरिष्यत्यथ वोऽप्यन्नं मया सार्द्धं न संशयः॥
एतच्छ्रुत्वा तु पितरस्ततस्ते विज्वरा बभुः।
एतस्मात् कारणादग्नेः प्राक्तनं दीयते नृप॥
न्युप्ते चैवाग्निपूर्व्वे वै निवापे पुरुषर्षभ।
न ब्रह्मराक्षसास्तं वै निवापं धर्षयन्त्युत॥
रक्षांसि चापवर्त्तन्ते स्थिते देवे विभावसौ॥

ब्रह्मवैवर्त्तब्रह्माण्डपुराणयोः यमस्यापि देवतात्वमाहुतिमन्त्राम्नानादवगम्यते।

अग्नये कव्यवाहनाय स्वधा चाङ्गिरसे नमः।
सोमाय पितृमते स्वधा चाङ्गिरसे नमः॥
यमाय वैवस्वते स्वधा नम इति ब्रुवन्निति॥

आपस्तम्बसूत्रे यमस्य वैकल्पिकं देवतात्वमुक्तम्। न यमाय जुहोतीत्येक-इत्यभिधानात्। एवमुक्ताः श्राद्धे प्रधानकर्म्मदेवताः।

अथेदानीं वैश्वदेविकाख्याङ्ग समवायिन्योऽभिधीयन्ते। तत्र विश्वेषां देवानामुत्पत्तिर्ब्रह्माण्डब्रह्मवैवर्त्तयोः।

दक्षस्य दुहिता साक्षाद्विश्वा नामेति विश्रुता।
विधिना सा तु धर्म्मज्ञ दत्ता धर्म्माय धीमते॥
तस्याः पुत्रा महात्मानो विश्वेदेवा इति श्रुतिः।
विख्यातास्त्रिषु लोकेषु सर्व्वलोकनमस्कृताः॥

एतेषां स्वरूपं गरुणपुराणे ।

विश्वायां दक्षकन्यायां जाता धर्म्मान्महात्मनः ।
विश्वेदेवा इति ख्याता देववर्य्या महाबलाः ॥
शक्रेण सह योद्धॄणां विजेतारस्तु रक्षसाम् ।
यन्नामस्मरणादेव प्रद्रवन्त्यसुराः क्षणात् ॥
वाणवाणासनधरा द्विभुजाः श्वेतवाससः ।
केयूरिणः कुण्डलिनः किरीटकटकान्विताः ॥
धैर्य्यसौन्दर्य्यसंयुक्ता दिव्यस्रगनुलेपनाः ।
इन्द्रस्यानुचराः सर्व्वे गोप्तारस्त्रिदिवस्य ते ॥

यमसंहितायाम्—

विश्वेऽपि विश्वेदेवास्तु दक्षिणे वाणपाणयः ।
द्विहस्ता वामभागे तु शरासनपरायणाः ॥

पद्मपुराणे—

विश्वांस्तु देवान् शरचापपाणीन् ।
ध्यायेद्विचित्राभरणान् सुवेशान् । इति ।

एतेषां श्राद्धदेवतात्वे इतिहासस्तु ब्रह्माण्डब्रह्मवैवर्त्तयोः ।

समा नव महात्मानश्चेरुरुग्रंमहत्तपः ।
हिमवच्छिखरे रम्ये देवर्षिगणसेविते ॥
सर्व्वाप्सरोभिश्चरिते नित्यं गन्धर्व्वसेविते ।
शुद्धेन मनसा प्रीताः पितरस्तानथाब्रुवन् ॥
वरं वृणीध्वं प्रीताः स्म कं कामं करवामहे ।
ब्रह्मा चाह महातेजास्तपसासौ सुतर्पितः ॥
प्रीतोऽस्मि तपसानेन कं कामं वितरामि वः ।
एवमुक्तास्तदा विश्वे ब्रह्मणा विश्वकर्म्मणा ॥
ऊचुस्ते सहिताः सर्व्वे ब्रह्माणं लोकपावनम् ।
श्राद्धेऽस्माकं भवेद्देयं स ह्येष काङ्क्षितो वरः ॥
प्रत्युवाच ततो ब्रह्मा तान् वै त्रिदशपूजितः ।
भविष्यत्येवमेवेति काङ्क्षितो वो वरस्तु यः ॥
पितृभिश्च तथेत्युक्तमेवमेतन्न संशयः ।
सहास्माभिस्तु भोक्तव्यं यत् किञ्चित् पच्यते त्विह ॥
अस्माकं कल्पिते श्राद्धे भवन्तोऽग्याशिनो हि वै ।
भविष्यन्ति मनुष्येषु सत्यमेतदुदाहृतम् ।
माल्यैर्गन्धैस्तथान्नेन युष्मांश्चैवार्चयन्तु वै ॥
दत्ते दत्ते तु युष्मभ्यमस्मभ्यन्दास्यते ततः ।
विसर्जनमथास्माकं पूर्व्वं पश्चात्तु दैवतम् ॥

रक्षणंचैव श्राद्धस्य अतिथेस्तु विधिश्च यः।
भूतानां देवतानाञ्च पितॄणां श्राद्धकर्म्मणि ॥
एवं कार्य्यञ्च सम्यक् तु सर्व्वमेतद्भविष्यति ॥
एवं दत्त्वा वरं तेषां ब्रह्मा पितृगणैः सह।
भूतानुग्रहकृद्देवः स चचार यथासुखम् ॥ इति।

तथा क्रतुस्मृतिभविष्यत्पुराणयोः—

सदैवं भोजयेच्छ्राद्धं तत्पूर्व्वञ्च प्रवर्त्तयेत्।
अन्यथा ह्यवलुम्पन्ति सदेवासुरराक्षसाः ॥

अत्र विश्वान् देवानुद्दिश्य क्रियमाणं श्राद्धाङ्गभूतं कर्म्म दैवमित्युच्यते। तेन सहितं सदैवं, सदैवेतिनियमेन तत्पूर्व्वं दैवपूर्व्वं प्रवर्त्तयेत् कुर्यात्।

यदि तन्न क्रियते तदा श्राद्धफलं रक्षांस्यपघ्नन्ति स्वयं वा आददते। अत्र खलु दैवेन कर्म्मणा सह वर्त्तते श्राद्धशब्दवाच्यं कर्म्मेति समासार्थावगमात् श्राद्धाद्भेदेनाप्रधानत्वेन च दैवस्य व्यपदेशादङ्गत्वमवगम्यते। श्राद्धरक्षार्थत्वाभिधानेनोपकारकत्वावगमात्।

मनुस्मृतावपि।

दैवकार्य्याद्द्विजातीनां पितृकार्य्यं विशिष्यते।
दैवं हि पितृकार्य्यस्य पूर्व्वमाप्यायनं स्मृतम् ॥
तेषामारक्षभूतन्तु पूर्व्वं दैवं नियोजयेत्।
रक्षांसि हि विलुम्पन्ति[१] श्राद्धमारक्षवर्जितम् ॥

अस्यार्थः। पितृकार्य्यं विशिष्यते प्रधानतया श्रेष्ठतां लभते। कथमित्यत आह दैवं हि पितृकार्यस्य पूर्व्वं क्रियमाणं विघ्नकारकराक्षसनिवारणद्वारेणाप्यायननिर्वाहिकं भवतीति। अनेनापि वैश्वदेविकमङ्गकर्म्मैवेति ज्ञायते, पित्रादिदैवत्य-मातामहदैवत्य-प्रधानद्वयवत्यमावास्याश्राद्धप्रयोगे "तन्त्रं वा वैश्वदेविकम्" इति याज्ञवल्क्येन प्रधानप्रवृत्तत्वाभिधानाच्च[२] तत् पूर्व्वं प्रवर्त्तयेदित्युक्तम्। अतो वक्ष्यमाणान् पदार्थान् प्रत्येकं वैश्वदेवस्थाने कृत्वा पितृस्थाने कुर्य्यात्।

तथा च देवलः।

यत्र तत् क्रियते कर्म्म पैतृके ब्राह्मणान् प्रति।
तत्सर्व्वं तत्र कर्त्तव्यं वैश्वदैवत्यपूर्व्वकम् ॥

पैतृके पितृदैवत्ये कर्म्मणि श्राद्ध इत्यर्थः।

विष्णुधर्मोत्तरेऽपि।

आदौ समर्च्चयेद्विप्रान् वैश्वदेवनिवेशितान्।
निवेशितांश्च पित्रर्थे ततः पश्चात् समर्च्चयेत् ॥

---

१. रक्षांसि विप्रलुम्पन्तीति। २. प्रधानद्वयोपकारार्थमिति।

वृद्धशातातपोऽपि ।

उदङ्मुखस्तु देवानां पितृणां दक्षिणामुखः ।
प्रदद्यात् पार्व्वणश्राद्धे दैवपूर्व्वं विधानतः ॥

पार्व्वणग्रहणादमावास्याश्राद्ध एव वैश्वदेवपूर्व्वकत्वं नियम्यते। एकोद्दिष्टाभ्युदयिकनित्यश्राद्धेषु वैश्वदेविकाभावो वक्ष्यते ।

भविष्यत्पुराणे ।

तप्यमानास्तपस्तीव्रं प्रोषिता ब्रह्मशासनात् ।
विश्वेदेवास्तु रक्षार्थे पितृयज्ञे च सर्व्वदा ॥
अतः पूर्व्वं प्रदातव्यं तेभ्योऽन्नं पितृकर्म्मणि ॥

अन्नग्रहणं गन्धादीनामप्युपलक्षणार्थम्। एवं सर्व्वेषां श्राद्धसम्बन्धिनां पदार्थानां वैश्वदेवपूर्व्वत्वप्राप्तौ क्वचिदपवादः प्रदृश्यते ब्रह्माण्डपुराणे ।

पश्चाद् विसर्जयेद्देवान् पूर्व्वं पैतामहान् द्विजान् ।
मातामहानामप्येवं सह देवैः क्रमः स्मृतः ॥

पैतामहग्रहणं पैत्रप्रपैतामहयोरप्युपलक्षणार्थम् ।

शातातपस्मृति—विष्णुधर्म्मोत्तरयोः ।

विश्वेदेवनिविष्टानां चरमं हस्तधावनम् ।
विसर्जनञ्च निर्दिष्टं तेषु रक्षा यतः स्थिता ।
सर्व्वमन्यत् प्रदातव्यमादौ तेषां नराधिप ॥

'चरमं' पाश्चात्यम्। 'हस्तधावनं' भोजनान्नावलिप्तहस्तक्षालनार्थजलदानम् ।

तदेवमेतद्ब्रह्मवैवर्त्ताद्युक्तं विश्वेषां देवानां श्राद्धे देवतात्वं नित्यश्राद्धादावपोह्यते ।

आह शातातपः ।

नित्यश्राद्धमदैवं स्यादेकोद्दिष्टं तथैव च ।
मातृश्राद्धन्तु युग्मैः स्याददैवं प्राङ्मुखैः पृथक् ॥
योजयेद्दैवपूर्व्वाणि श्राद्धान्यन्यानि यत्नतः ॥

मातृश्राद्धमत्राभ्युदयिकपूर्व्ववर्त्ति विवक्षितम् । ब्राह्मणयुग्मत्वप्राङ्मुखोपवेशनलिङ्गात्। तच्च यदापि पित्रा मातामहादिश्राद्धद्वयात् पृथग्भिन्नकालेऽनुष्ठीयते तदानीमदैवं वैश्वदेवरहितं कर्तव्यम्। यदा पुनरेकस्मिन्नेव काले श्राद्धत्रयं क्रियते तदा तन्त्रेणावृत्त्या वा वैश्वदेविकानुष्ठानमिति श्राद्धत्रयं प्रकुर्व्वीत। "तन्त्रं वा वैश्वदेविकमिति" वशिष्ठवचनादवगन्तव्यम्। तत्र भिन्नकाले श्राद्धत्रयानुष्ठानम् ।

पूर्व्वेद्युर्मातृकं श्राद्धं कर्म्माहे पितृकं तथा ।
उत्तरेद्युः प्रकुर्व्वीत मातामहगणस्य तु ॥

इत्यादिभिर्वचनैराभ्युदयिकश्राद्धप्रकरणे दर्शयिष्यते। पृथगनुष्ठीयमानमातृ-श्राद्धव्यतिरिक्तान्याभ्युदयिकनिमित्तकानिश्राद्धानि विकल्पेन वैश्वदेवविहीनानि कार्य्याणि। तथा चाभ्युदयिकं प्रकृत्य मार्कण्डेयपुराणे उक्तम्।

विश्वेदेवविहीनन्तु केचिदिच्छन्ति मानवाः।
युग्माश्चात्र द्विजाः कार्य्यास्ते पूज्याश्च प्रदक्षिणम्॥

केचिद्ग्रहणादत्र विकल्पो गम्यते

शातातपभविष्यत्पुराणयोः।

एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते।
तदप्यदैवं कर्त्तव्यमयुग्मानाशयेत् द्विजान्॥

ब्रह्मपुराणे।

पार्व्वणं दैवपूर्व्वं स्यादेकोद्दिष्टं सुरैर्विना।

तथा एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकमित्यादि चैकोद्दिष्टप्रकरणे वक्ष्यते। अत्रैकोद्दिष्टेषु वैश्वदेविककर्म्माभावे कारणं नागरखण्डेऽभिहितम्।

वृत्रासुरस्य सङ्ग्रामे प्रमीतानां दिवौकसाम्।
निवापाय गयाकूपमवाप त्रिदशेश्वरः॥
नगरे नगरे तत्र चतुर्दश्यां महालये।
श्राद्धानि श्रद्धया कर्त्तुमारेभे विधिवद् वृषा॥
श्राद्धमन्त्रैरथाहूतानग्निष्वात्तादिकान् पितॄन्।
अन्यान्यपि स्ववर्गीयान्[१] प्रेतान् शस्त्रहतांश्च तान्॥
ब्राह्मणानां शरीरेषु विशतः सन्ददर्श सः।
विश्वान् देवांस्तु नापश्यत्तदर्थञ्च व्यलम्बत॥
अथ शक्रेण सहसा दृष्टः पृष्टश्च नारदः।
विश्वेषां प्राह देवानामनागमनकारणम्॥
गयायां कुर्व्वतः श्राद्धं ब्रह्मणः परमेष्ठिनः।
विश्वेदेवा मया दृष्टाः तत् किमर्थं विलम्बसे॥
इति नारदवाक्येन क्रुद्धो वृद्धश्रवास्ततः।
विश्वैर्देवैर्व्विना श्राद्धमेकोद्दिष्टविधानतः॥
चक्रे शतक्रतुस्तेऽपि प्रेताः प्रापुः परां गतिम्।
एवं विधञ्च समयं श्रावयामास तान् [२]द्विजान्॥
विश्वे हि देवाः श्राद्धस्य रक्षणार्थं व्यवस्थिताः।
तैर्विना श्राद्धसंरक्षा मयैव हि विधास्यते॥

---

१. अन्यांश्च पितृवर्गांश्चेति।

२. स इति।

अवैश्वदेविकं श्राद्धमत ऊर्द्ध्वं प्रवर्त्तताम् ।
इति तस्मिन् वदत्युच्चैर्विश्वेदेवाः समाययुः ॥
पुरुहूत पुरा हूता वयं देवेन वेधसा ।
त्वया तु चरमं नाथ[१] विमृश्यैवं प्रसीद नः ॥
मघवन्नघवन्तोऽद्य न भवामः कथञ्चन ।
बहिः करोषि श्राद्धेऽद्य[२] कस्मादस्मान् दिवष्पते ॥
इति वाष्पाम्बुकल्लोलक्षालितः क्षितिशोकतः ।
अभ्यर्थनाभिस्तेषां स प्रससाद न सीदताम् ॥
अथ वाष्पोष्मणस्तस्मादण्डान्यासन्ननेकशः ।
जज्ञिरे पुरुषास्तेभ्यो लक्षशो राक्षसोपमाः ॥
विश्वैर्देवैस्तथादिष्टास्ते जगद्ग्रासलालसाः ।
अस्मद्विरहितं श्राद्धमाहारो वो भविष्यति ॥
जाताः क्षित्यूष्मजैरण्डैस्तेन कूष्माण्डसंज्ञिताः ।
विहरध्वमिति प्रोच्य विश्वदेवास्तिरोदधुः ॥
अथ कूष्माण्डसंकीर्णविश्वमालोक्य विश्वसृक् ।
आहूय विश्वानिन्द्रञ्च व्यवस्थां विदधे विधिः ॥
एकोद्दिष्टाभिधानानि सदा श्राद्धान्यतः परम् ।
विश्वैर्देवैर्विना सन्तु सत्यवागस्तु वृत्रहा ॥
अवैश्वदेविकं श्राद्धमन्यत् कूष्माण्डतृप्तये ।
भविता भस्मरेखाभिः पात्ररक्षा च यत्र न ॥
कूष्माण्डीभिरतोऽग्निरस्तु सलिलैरभिमन्त्रितैः ।
अप्रोक्षितः श्राद्धपाको भवद्भिर्भुज्यतां सुखम् ॥
इत्युक्त्वा प्रीणनं चक्रे कूष्माण्डानां पितामहः ।
अग्नये वायवेऽर्काय प्रददौ प्रविभज्य तान् ॥
पितृपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः ।
श्राद्धं शस्त्रहतस्यैव कार्यं नान्यस्य कस्यचित् ॥
इत्यूचिवान् विरिञ्चोऽन्तर्दधे सर्वान् विसर्ज्य तान् ।
अवैश्वदेविकं श्राद्धमेकोद्दिष्टं ततोऽभवत् ॥

अथैतेषां विश्वेषां नामान्युच्यन्ते। तत्र तावन्महाभारते ।

विश्वे नाग्निमुखादेवाः संख्याताः पूर्वमेव ते ।
तेषां नामानि वक्ष्यामि भागार्हाणां महात्मनाम् ॥
सहः कृतिर्विपाप्मा च पुण्यकृत् पावनस्तथा ।
ग्राष्णिक्षमः समूहश्च दिव्यभानुस्तथैव च ॥
विवस्वान् वीर्यवान् ह्रीमान् कीर्तिमान् कृत एव च ।
विध्यर्थः सोमपूर्वश्च सूर्यश्रीश्चेति नामतः ।

---

१. तातेति । २. श्राद्धेभ्य इति ।

सोमाय सूर्यः सावित्रो दत्तात्मा पुण्डरीयकः ।
उष्णीलाभो नभोदश्च विश्वायुर्दीप्तिरेव च ॥
समूहनः सुवेषश्च यमारिः शङ्करो भवः ।
ईशः कर्त्ता कृतिर्धाता भुवनो दिव्यकर्मकृत् ॥
गणितः पञ्चवीर्यश्च प्राचीनोरञ्जितस्तथा ।
सप्तकृत् सोमवर्च्चाश्च विश्वकृत् कविरेव च ॥
अनुगोप्ता सुगोप्ता च नप्ता चेश्वर एव च ।
जितात्मा मुनिवीर्यश्च दृप्तरोमा प्रभङ्करः ॥
अग्निकर्मा प्रतीतश्च प्रदाता चांशुमांस्तथा ।
शैलाभः परमक्रोधी धारोष्णी भूपतिस्तथा ॥
सजीवो विकरी चैव विश्वेदेवाः सनातनाः ।
कीर्तितास्ते महाभागाः कालस्य गतिगोचराः ॥

एते च महाभारतोक्ता सहकृत्यादिनामानो विश्वेदेवाः यथोक्तैर्नामभिः संबुद्ध्यादिविभक्त्यन्तैः प्रतिपदार्थं सङ्कीर्त्य श्राद्धे समुच्चयेन विनियोज्याः । संक्षेपेण वा सकृत् सर्वानपि बुद्धावारोप्य सहकृत्यादयो विकरीपर्यन्ता विश्वेदेवा इदं वः पाद्य-मित्यादि प्रकारः प्रयोगो विधेयः । एते च परस्परमेव समुच्चीयन्ते न तु बृहस्पत्या-द्युक्त पुरूरवार्द्रवादिभिः सहेति । यतस्तेषां नामानि वक्ष्यामि । भागार्हाणां महात्मना-मित्यनेन भागशब्दवाच्यहविःसम्बन्धविधायकेन शास्त्रेण तेषामिति सर्वनामरूपैक-पदोपात्तानामेतेषामेव सहकृत्यादीनां परस्परसापेक्षाणामेव प्रयोगनिर्वर्त्तकत्वमव-गम्यते ।

ननु शास्त्रान्तरविहितपुरूरवार्द्रवादि सापेक्षाणामिति न वाच्यम् । इष्टिश्राद्धे-क्रतुर्दक्ष इत्यादिना वचनेन विशेषविहित पुरूरवार्द्रवादिभिरेव सर्वेषां श्राद्धानामव-रुद्धत्वात् सहकृत्यादयो न क्वचिदवकाशं लभन्त इति न वैश्वदेविके देवतात्वेन-कीर्त्तनार्हा इति । आनर्थक्यप्रहतानां विपरीतं बलाबलमिति न्यायात् सामान्यतो विहिता अपि विशेषतो विहितान् पुरूरवार्द्रवादीन् बाधित्वा देवतात्वेन निविशन्ते । ते च विशेषग्रहणाभावात् सर्वेष्वपि श्राद्धेष्विति मन्यमानं प्रतिविशेषग्रहणमुच्यते । प्रकृतौ वा द्विरुक्तत्वादिति न्यायात् प्रकरणात् पार्वण एव निविशन्ते । न पार्वण-विकृतिभूतेषु कर्माङ्गादिश्राद्धेषु ।

नन्वतिदेशाद्भविष्यति । न । आतिदेशिकैः क्रत्वादिभिर्बाधात् ।

तदेवं पार्वणश्राद्धे सहकृत्यादीनां वैश्वदेविके कर्म्मणि पुरूरवार्द्रवाभ्यां सह विकल्पेन देवतात्वं सिद्धम् ।

अथैतेषां यैर्नामभिः कर्मसमवायः प्रसिद्धस्तान्युच्यन्ते ।

बृहस्पतिस्मृतौ

क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथैव च ।
धुरिश्च रोचनश्चैव तथा चैव पुरूरवाः ॥

आर्द्रवश्च दशैते तु विश्वेदेवाः प्रकीर्तिताः ।
एते एषु श्राद्धेषु विभज्य विनियोज्याः ।

उक्तं बृहस्पतिस्मृतावेव ।

इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः ।
नैमित्तिके कालकामौ काम्ये च धुरिरोचनौ ॥
पुरूरवा आर्द्रवश्च पार्वणे समुदाहृतौ ॥ इति ।

शङ्खस्मृतावपि ।

इष्टिश्राद्धे क्रतुर्दक्षः संकीर्त्यौ वैश्वदेविके ।
नान्दीमुखे सत्यवसू काम्ये च धुरिरोचनौ ॥
पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ ।
नैमित्तिके कालकामाविति सर्वत्र कीर्तयेत् ॥ इति ।

इष्टिश्राद्धशब्देनात्र कर्माङ्गं श्राद्धं गृह्यते । तथा चाधानसोमयागनिषेकादि संस्कारादिभूतमपि श्राद्धं लभ्यते । कर्माङ्गञ्च श्राद्धभेदप्रकरणे वक्ष्यते ।

निषेककाले सोमे च सीमन्तोन्नयने तथा ।
ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं वृद्धिवत् कृतम् ॥ इति ।

अत्र कर्माङ्गमिति परिभाष्यते । वृद्धिवदिति नान्दीमुखे दैवतत्व स्वाहा शब्दप्रयोगो दधिबदरादिमिश्रपिण्डवत्वादयो वृद्धिश्राद्धधर्मा अतिदिश्यन्ते । विहितं बृद्धिश्राद्धं याज्ञयल्क्यादिस्मृतिषु ।

एवं प्रदक्षिणीकृत्य वृद्धौ नान्दीमुखान् पितृन्
यजेतेत्यादिभिर्वचनैः । वृद्धिश्राद्धञ्च वृद्धवशिष्ठादिभिर्दर्शितम् ।
पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतम् । इति ।

अत्राभ्युदयिकश्राद्धविशेषे वृद्धिश्राद्धशब्दः परिभाष्यते । आदिशब्देन गर्भाधान-पुंसवन-सीमन्तोन्नयन-व्यतिरिक्तानामन्नप्राशनचूड़ाकरणादि संस्कारकर्मणां ग्रहणम् । गर्भाधानादि संस्कारत्रयाङ्गभूतस्याभ्युदयिकस्य कर्माङ्गशब्देनाभिधानात् । एतच्च वृद्धिश्राद्धाद्भिन्नं कर्म्माङ्गं वृद्धिवदिति पारस्करेऽतिदेशे दर्शनात् । भेदे ह्यतिदेशो भवति । श्राद्धभेदोद्देशे भेदाभिधानाच्च ।

काम्यपार्व्वणादिभेदास्तत्तत् प्रकरणे वक्ष्यन्ते ।

ननु नैमित्तिके कालकामावित्युक्तं एकोद्दिष्टञ्च श्राद्धं नैमित्तिकशब्देनोच्यते, 'एकोद्दिष्टञ्च यच्छ्राद्धं तन्नैमित्तिकमुच्यते' इत्येवं परिभाषितत्वात् ।

एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकमित्येवञ्चैकोद्दिष्टे वैश्वदेविकनिषेधात् कथं कालकामौ । न च निमित्ते भवं नैमित्तिकमित्येवं व्युत्पत्त्या नवान्नलाभादिनिमित्तविहितमपि नैमित्तिकशब्देनाभिधातुं शक्यम् । तस्य सामान्यशास्त्रस्थानीयस्य योगस्य विशेषशास्त्ररूपिण्या परिभाषया बाधस्य न्याय्यत्वात् । सत्यमेवं,

तथापि प्रकृते विरोधात् योगमेवाश्रित्य नैमित्तिकशब्देन नवान्नलाभादिनिमित्तविशेषे क्रियमाणं श्राद्धमुच्यते।

यदुक्तमादित्यपुराणे।

विश्वेदेवौ क्रतुर्दक्षः सर्व्वास्विष्टिषु कीर्त्तितौ।
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके॥
नवान्नलाभे द्वौ देवौ कालकामौ सदैव हि।
अपि कन्यागते सूर्य्ये श्राद्धे च धुरिरोचनौ॥
पुरूरवार्द्रवौ चैव विश्वेदेवौ तु पार्व्वणे॥ इति।

सर्व्वास्विष्टिषु सर्व्वेषु कर्म्माङ्गश्राद्धेषु, नवान्नलाभे, नवान्नलाभनिमित्ते सति। अत्रापि श्राद्धविधिः श्राद्धकालप्रकरणे व्रीहियवपाकैरित्यादिना वक्ष्यते। स्मृतिचन्द्रिकाकारस्तु नवान्नलाभे सति नवान्नभोजनोपक्रमात् पूर्व्वं पितृभक्त्या नवान्नेन श्राद्धे क्रियमाणे द्वौ कालकामौ वैश्वदेविकेकर्म्मणि देवतात्वेन कीर्त्तनीयावित्याह।

एतच्च निमित्ताधिकारेण क्रियमाणानां वैश्वदेविकान्वितानामुपरागादि श्राद्धानामुपलक्षणार्थम्। कन्यागते सूर्ये इति भाद्रपदापरपक्षे, एतच्च काम्यश्राद्धोपलक्षणार्थम्।

तदेवं विरोधाद्वचनाच्च नैमित्तिकशब्देन नवान्नलाभादिनिमित्ते क्रियमाणं श्राद्धमुच्यत इति सिद्धम्।

अथवा नैमित्तिके कालकामावित्यत्र नैमित्तिकशब्देनैकोद्दिष्टाभिधायिना एकोद्दिष्टयुक्तं सपिण्डीकरणमुच्यते। तत् हि एकोद्दिष्ट पार्व्वणरूप प्रधानद्वयात्मकम्। अतो वैश्वदेविकं तत्रास्तीति कालकामयोर्विधिर्युक्तः।

शङ्खधरहरिहरौ पुनरेवमाहतुः।

केचित् प्रत्यब्दमेकोद्दिष्टमिच्छन्ति। अन्ये तु पार्व्वणम्। अतो नैमित्तिकशब्दवाच्यस्यैकोद्दिष्टस्य स्थाने क्रियमाणं क्षयाहिकं पार्व्वणमपि नैमित्तिकशब्दं लब्धुमर्हतीति तस्मिन् कालकामविधिरिति। इयं वा अनयोरुत्प्रेक्षा प्रागुक्तरीत्या वचनार्थव्यवस्थोपपत्तेर्नाविचार्य ग्रहीतव्या।

अथेदं चिन्त्यते।

किं पुरूरव आर्द्रवयोः पार्वणप्रयोगे समुच्चितयोः प्रयोग उत विकल्पितयोरिति। एवमिष्टिश्राद्धे क्रतुदक्षयोः, एवं नान्दीमुखादिविहित सत्यवस्वादिषु युग्मेष्वपि विकल्पनीयम्।

तत्र तावद्विकल्पितयोरितिगृह्यते। व्यवस्थापने क्रतुर्द्दक्ष इति पृथगेकैकस्य कर्म्मसम्बन्धावगमात्। नत्वेकैकस्य पृथग् देवतात्वात् द्रव्यदेवतासम्बन्धभेदात् कर्म्मण एव भेदः स्यात्। को विकल्पस्यावकाशः। एककर्म्मान्वयिनोर्ह्येकद्वारत्वे विकल्पाभिधा। अस्तु नाम कर्म्मभेदः। एकप्रयोगानन्वयमात्रेण विकल्पाभिधा।

वस्तुतस्तु न देवताभेदात् कर्म्मभेदः। शब्दान्तराभ्यास-संख्या-गुण-प्रक्रिया-नामधेयानां कर्म्मभेदकत्वाभिधानात्।

ननु देवतापि गुण इति भेदिका भवितुमर्हति। मैवम्। न हि गुण इत्येव भेदकः, किन्त्वेकस्मिन् कर्मण्यलभमानोऽन्वयम्। अन्यथा द्रव्यविकल्पो देवताविकल्पः तयोः समुच्चयो वा क्वचिन्न स्यात्। दृश्यते चाग्निहोत्रादीनां द्रव्यादौ विकल्पः समुच्चयश्च। सोमे च देवतासमुच्चयः।

न च वाच्यम्।

यथा सप्तदश प्राजापत्यानित्यत्र पृथक्त्वनिवेशिन्या संख्यया द्रव्यदेवतासम्बन्धभेद एवमत्रापि देवताभेदेन सम्बन्धभेदात् कर्म्मभेद इति। यत एवं मन्यमानो भवानिन्द्रवाय्वाद्यनेकदेवतान्वितं सोमयागमेव स्मरतु।

ननु स्मृत एवं, किन्तु तत्रेन्द्रवाय्वादीनामेकयागसम्बन्धित्वेनावगतद्रव्यसम्बन्धावगमात् न कर्म्मभेदकत्वम्। इह तु न तथेति भेदकत्वमिति। न। उत्पत्तिवाक्ये हि श्रूयमाणो गुणो भेदकः।

ननु उत्पन्ने कर्म्मणि गुणं विधातुं प्रवृत्ते वाक्ये तस्य हि कर्म्मभेदकत्वेन क्वापि विकल्पसमुच्चयौ स्याताम्।

अतो विकल्पितयोः प्रयोग इति प्राप्ते —

उच्यते।

"यत्तत्र क्रियते कर्म्म पैत्रिकैर्ब्राह्मणान प्रति।
तत् सर्व्वं तत्र कर्तव्यं वैश्वदेविकपूर्व्वकम्"॥

इत्यादिषु देवलादिवाक्येषु वैश्वदेविकं कर्तव्यमित्येवंविधे उत्पत्तिविधाववगते विश्वेषां देवानामेकपदोपादानादन्योन्यसहितानां देवतात्वेऽवगते सति तेषां समुच्चयोवगम्यमानो न गुणवाक्येन पृथक्प्रयोगेण बाधितुं शक्यते।

ननु एकपदोपादानेन स्वरसतः सर्व्वेषामेव विश्वेषां साहित्यमवगतम्। तच्चेद्व्यवस्थावचनेन त्रिचतुरादिषु विश्वेदेवेषु भग्नं तदा भग्नमेवास्य साहित्यप्रतिपादनपरत्वमिति कथं समुच्चयः।

उच्यते। सामान्यतोऽवगम्यमानो वचनार्थो यावत्यंशे वचनान्तरेण बाधितस्तदन्यस्मिन्नंशे व्यवतिष्ठतीति समुच्चितयोर्देवतात्वम्। अस्त्वेवमिदन्तु सन्दिह्यते।

किमेकैकं स्वेन स्वेन नाम्ना पृथग्विभक्त्यन्तेनोद्दिश्यैकैको वैश्वदेविकपदार्थोऽनुष्ठेयः, उत द्वौ द्वौ द्वन्द्वसमासप्रयुक्तेन नामद्वयेनोद्दिश्येति।

तदर्थमिदं विचिन्त्यते।

किं सहितयोर्देवतात्वं, उत देवतयोः साहित्यमिति। यदि देवतयोः साहित्यं तदा प्रत्येकं देवतात्वात् प्रत्येकमुद्देशे तत् सम्पूर्व्वत्वात् पृथक् पृथक् चतुर्थ्यादिप्रयोगं कृत्वा पदार्थोऽनुष्ठेयः।

उक्तं हि । एतस्या इति सङ्कल्पउद्देशोऽत्राभिधीयते इति। यदा तु सहितयोर्देवतात्वं तदा पुरूरव-आर्द्रव संज्ञकयोरग्निषोमयोरिवैकदेवतात्वरूपाधिष्ठानभूतत्वाद्द्वन्द्वसमासेनोद्देशं कृत्वा प्रयोगो विधेयः। तत्र "इष्टिश्राद्धे क्रतुर्दक्षः सङ्कीर्त्यौ वैश्वदेविके" इत्येवंविधेन शङ्खादिवचनेन देवताविधिः, वैश्वदेविकपूर्व्वकमित्येवंविधेन देवतादिवचनेन कर्म्मविधिः, क्रमविधिर्वा। वैश्वदेविकशब्दस्तत्प्रख्यन्यायेन नामधेयमिति वा मन्यमानः एकैकस्य पृथग्विभक्त्यन्तेन नाम्नोद्देशमाह।

न च वाच्यम्। तद्धितचतुर्थ्यादिविधायकभावार्थानामश्रवणात् कथं देवताविधिः। इत्थं वैश्वदेविके इत्यनेनानूदिते भावार्थे क्रतुदक्षादीनां विधौ तेषां द्रव्यरूपत्वाभावात् पारिशेष्याद्देवतात्वेन विनिवेशे तद्धितचतुर्थ्यादीनामनुपयोगात्।

एवं प्राप्तेऽभिधीयते

यत्र तद्धितभावार्थविधायकास्तत्र न विधिरन्यत्रविधिरित्येतत् कस्य हृदयं प्रवेशं लभेत्।

ननु यत्रैते सर्व्वे तस्य क्रमपरत्वमवगम्यते। यावत् यावद्विधेयान्तरमुपादीयते तावत्तावद्विधिशक्तिस्तत्र तत्र सञ्चरतीति न्यायात्। सत्यमेवम्। कर्म्मविधौ तु सर्व्वविशेषणविशिष्टं कर्म्म विधातुं शक्यमिति तत्र देवताविधौ न दोषः।

तत्र चेद्विहिता देवताः द्वयोरेकपदोपादानात् साहित्यविशिष्टयोर्देवतात्वमित्यग्नीषोमवत्पुरूरवार्द्रवयोर्द्वन्द्वसमासेनोद्दिश्यप्रयोगो विधेयः। नामधेयतापि तत्प्रख्यशास्त्रान्तरोपपादनान्निरस्तैवेति।

ननु पुरूरवार्द्रवप्रभृति नामद्वन्द्वनिर्देशो विवक्षित एव नामद्वयस्याप्रयोज्यत्वात्तत्कुतस्तदनुरोधाद्विकल्पसमुच्चयन्याससमासानां प्रसङ्गः। यदि पुनः प्रयोज्यं स्यात्तदा एतन्नामद्वयानभिज्ञस्य देवतानभिज्ञत्वाच्छ्राद्धे नाधिकार एव स्यात्। दर्शितश्च तस्याप्यधिकारः।

उत्पत्तिर्नाम वै तेषां न विदुर्ये द्विजातयः।
अयमुच्चारणीयस्तैः श्लोकः श्रद्धासमन्वितैः॥
आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।
ये यत्र विहिता श्राद्धे सावधाना भवन्तु ते॥

इत्यनेन शास्त्रेण यदि च नामद्वयं प्रयोज्यं स्यात् तदा विश्वेदेवास आगत शृणुताम इमं हवमित्यादिमन्त्रेण श्रूयमाणं वहुवचनं विरुध्येत।

तस्माद्विश्वेदेवा इत्येतच्छब्दोल्लिखनैर्वा अर्घ्यादिदानं कर्तव्यम्।

नन्वनुष्ठानकाले नामद्वयानुच्चारणे तत् कथनस्य किं प्रयोजनमिति चेत्, समुद्रध्यानवदनुचिन्तनमात्रमिति ब्रूमः।

अत्रोच्यते।

नामद्वयाप्रयोगेऽपि व्यवस्थावाक्यस्य देवतासंख्याप्रतिपादनपरत्वाद्वस्तुवृत्त्या द्वयोरेव देवतात्वात् मन्त्रस्थवहुवचनविरोधस्तदवस्थ एवेति।

अथैतद्भूयः प्रमुखस्य गणस्य विवक्षितत्वात् पूजार्थत्वाद्वा न विरोधः। तर्हि नामद्वयप्रयोगेऽपि तस्यैव विवक्षितत्वादविरोध इति क्रतुदक्षादि नामद्वन्द्वानि प्रयोज्यान्येव। एवञ्च सति—

"इष्टिश्राद्धे क्रतुर्दक्षः सङ्कीर्त्यौ वैश्वदेविके" इति सङ्कीर्त्तनविधिरभ्युपपन्नः स्यात्।

यत्तु हरिहरेणाविवक्षितत्वाभिधानं कृतं तद्द्वित्वाभिप्रायेण न नामाभिप्रायेण। अतो नामद्वयप्रयोगेऽपि बहुवचनमेव प्रयोक्तव्यं न द्विवचनमिति तस्याभिप्रायो वेदितव्यः। यदत्र स्मृतिचन्द्रिकाकारेण बहुवचनप्रयोगे कारणमुक्तम्—

विश्वान्देवानावाहयिष्य इति पृच्छतीति स्मृतिपुराणेषु बहुषु बहुवचनान्तप्रयोगदर्शनादिति, तदस्तु नाम। मन्त्रस्थानीयस्य प्रैषस्य एकैकप्रयोगसमवायात् प्रैषवाक्याभिप्रायेणेदमुक्तमित्यभिप्रायान्तरोत्प्रेक्षासम्भवात्।

यत्तु—"निरङ्गुष्ठं गृहीत्वा तु विश्वान् देवान् समाह्वयेत्" इत्यादि बहुवचनप्रयोगदर्शनादित्युक्तं, तत् सर्व्वप्रयोगसमवायिविश्वेदेवानुसन्धानेनापि विधिवाक्ये बहुवचनोपपत्तेरसाधकमेव।

इतश्चासाधकम्।

"नैमित्तिके कालकामौ काम्ये च धुरिरोचनौ"।

इत्यादि द्विवचनान्ततयापि प्रयोगदर्शनात्। इतश्च बहुवचनान्तप्रयोगः। प्रायेण विश्वशब्दस्य बह्वर्थवाचकत्वात् बहुवचनान्ततया प्रयोगे प्राप्ते तद्विशेषणीभूतानां पुरूरवार्द्रवादिशब्दानां तत् सामानाधिकरण्येन प्रयुज्यमानानां बहुवचनान्तता उचितेति। इदमुच्यते।

किमेकैकब्राह्मणपुरोभागस्थापितैकैकपात्रस्थमन्नं पृथक् पृथक् विश्वान्देवानुद्दिश्य त्याज्यं, उत सकृद्देवोद्दिश्येति।

तत्र देवतैक्यात् सहत्यागो लाघवादितिन्यायात् सकृदिति। अथोच्येत। पृथक्परिकल्पनस्य दृष्टार्थत्वानुरोधात् पृथक् त्याग इति। तन्न। तस्य पृथग्भोजनार्थत्वेनापि दृष्टार्थत्वनिर्व्वाहात्। एकपात्रपरिवेषितानां नानाजातीयानामन्नानां सकृद्बुद्धौ निवेशवन्नानापात्रपरिवेषितानामपि निवेशसम्भवात् सकृत् त्यागोपपत्तिः। एवञ्च परिकल्पनाङ्गानुरोधेन प्रधानावृत्तिर्न भविष्यति। एवं प्राप्त उच्यते।

आपस्तम्बादिभिर्ब्राह्मणानामाहवनीयस्थानीयत्वाभिधानात् तत्प्राप्तिपर्य्यन्तस्तावद्गन्धादित्यागवदन्नत्यागः कार्य्यः। ते च पृथङ्निवेशिताः पृथङ्निवेशितान्यन्नानि न सकृत् प्रापयितुं शक्यन्ते। प्राप्तीनां पृथगिष्टत्वात्।

तस्मात् पृथक्त्याज्यान्यन्नानि। अगत्या च त्यागावृत्तिर्नदोषाय इत्येकैकस्मिन्नधिष्ठाने पुरूरव आर्द्रव संज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमन्नं न ममेत्यादि प्रयोगैस्त्यागो विधेयः। अत्रैतेषु विचारेष्वेवमवस्थानामुद्देश इत्येतावत्येवांशे तात्पर्यम्। यत्पुनरेवम्भूतः प्रयोगोऽप्येवम्भूत इत्युपन्यस्तं तत् प्रयोगस्य विचारप्रयोजनभूतत्वा-

भिप्रायेण न साक्षात्विचार्यत्वाभिप्रायेणेति। अतो देवतास्वरूपविचाराय प्रकृति-प्रकरणे[1] सङ्गतिर्विचारणमिति। इतिवैश्वदेविकदेवतानिर्णयः॥

अथ विकिरभुक्तोच्छिष्टयोर्देवताः।

मनुविष्णू।

असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्।
उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः॥

हारीतः।

अरूढ़दन्ता ये नाम मृता गर्भाद्विनिःसृताः।
मृता ये चाप्यसंस्कारास्तेषां भूमौ प्रदीयते॥

मार्कण्डेयपुराणे।

अन्नप्रक्रिरणं यत्तु मनुष्यैः क्रियते भुवि।
तेन तृप्तिमुपायान्ति[2] ये पिशाचत्वमागताः॥
ये चादन्ताः[3] कुले बालाः क्रियायोग्या ह्यसंस्कृताः।
विपन्नास्तेऽन्नविकिरसम्मार्जनजलाशिनः॥

मनुः।

उच्छेषणं भूमिगतमजिह्मस्याशठस्य च।
दासवर्गस्य तत् पित्र्ये भागधेयं प्रचक्षते॥

वशिष्ठः।

प्राक्संस्कारात् प्रमीतानां[4] सप्रेक्षाणामिति[5] श्रुतिः।
भागधेयं मनुः प्राह उच्छिष्टोच्छेषणे उभे॥
उच्छेषणं भूमिगतं विकिरं लेपनोदकम्[6]।
अनुप्रेतेषु विसृजेदप्रजानामनायुषाम्॥

इति विकिरभुक्तोच्छिष्टयोर्देवताः॥

इति श्रीमहाराजाधिराजश्रीमहादेवस्य सकलश्रीकरणाधिपतिपण्डितश्रीहेमाद्रि-विरचिते चतुर्व्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे देवतानिर्णयप्रकरणं नाम तृतीयोऽध्यायः॥

—०—

१. प्रवर्त्तितप्रकरण इतिपाठः।
२. तृप्तिमथायान्तीति इति वा पाठः।
३. ये वा दग्धा इति।
४. प्राक्संस्कारप्रमीतानामिति।
५. प्रवेशनमितीति।
६. विकिरेल्लेपनोदकमिति।

अथ चतुर्थोऽध्यायः ।

श्राद्धदेशकथनप्रकरणम् ।

यत्पुण्याचरितप्रवाहसरलस्रोतस्विनीनिर्म्मित-
श्रीमत् तीर्थरसावगाहविगलत्पापोपतापो जनः ।
रोमाञ्चैरुपचीयते स सुकृती हेमाद्रिरुद्धारधीः
कर्त्तुं श्राद्धपदार्थनिश्चयमथो यत्नं समालम्बते ॥

तदेवमुक्ते प्रकरणे श्रद्धया पित्रादिरूपदेवतोद्देशेन ब्राह्मणभोजनादि श्राद्धपदार्थ इत्येतत् सिद्धवत्कृत्योद्देश्यपित्रादि निर्णयः कृतः । अथामुमेव श्राद्धशब्दार्थं विचार्य्य-निश्चेतुं प्रकरणान्तरमारभ्यते ।

तत्र तावच्छ्राद्धनिर्वचनेन विचार्य्योऽर्थः प्रस्तूयते ।

बृहस्पतिस्मृतौ ।

संस्कृतं व्यञ्जनाढ्यञ्च पयोमधुघृतान्वितम् ।
श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते ॥

नागरखण्डे ।

श्राद्धे श्रद्धा यतो मूलं तेन श्राद्धं प्रकीर्त्तितम् ।
तस्मिन् प्रक्रियमाणे तु न किञ्चिद् व्यर्थतां व्रजेत् ॥

मूलमिति श्रेष्ठमङ्गम् ।

तथा च कात्यायनकृते श्राद्धकल्पे "श्रद्धान्वितः श्राद्धं कुर्वीतेति" विहितम् । न ह्यत्र श्रद्धानिमित्तत्वेन चोत्पद्यते, किन्तु यः श्राद्धं कुर्वीत स श्रद्धयान्वितः सन् कुर्वीतेति श्रद्धायाः श्राद्धाङ्गत्वमुच्यते ।

तथा च बार्हस्पत्यपाराशरेण तृतीयाविभक्त्या श्राद्धविशेषणत्वेन श्रद्धोक्ता ।

देशे काले च पात्रे च विधिना हविषा च यत् ।
तिलैर्दर्भैश्च मन्त्रैश्च श्राद्धं स्यात् श्रद्धयान्वितम् ॥

अतएव मनुस्मृतौ श्रद्धायोगेन वैशिष्ट्यमुक्तम् ।

यद्यद्ददाति विधिवत् सम्यक् श्रद्धासमन्वितः ।
तत् पितॄणाञ्च भवति परत्रानन्तमक्षयम् ॥ इति ।

नन्दिपुराणेऽपि ।

श्रद्धा पवित्रं सर्व्वेषां पवित्राणां प्रकीर्त्तितम् ।
श्रद्धैव धर्म्मं परमं पावनञ्चैव सर्व्वदा ॥
श्रद्धाभूतानि भूतानि पवित्राणि सदैव तु ।
श्रद्धा तु माता भूतानां श्रद्धा श्राद्धेषु शस्यते ॥

अतएव यमस्मृतौ श्रद्धाभावेन वैगुण्यमुक्तम् ।

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
अश्रद्धया हुतं दत्तं तद्वै रक्षांसि भुञ्जते ॥

बौधायनोऽप्याह ।

श्रद्धया बोध्यते बुद्धिः श्रद्धया शोध्यते मनः ।
श्रद्धया प्राप्यते ब्रह्म श्रद्धा पापविमोचनी ॥
तस्मादश्रद्दधानस्य हविर्नाश्नन्ति देवताः ॥इति॥

ननु सर्वस्यापि सत्कर्मणः श्रद्धाङ्गं, तत् केन विशेषेणास्यैव श्राद्धशब्दोऽयम् ?

तथा च विष्णुधर्मोत्तरे ।

श्रद्धान्वितेन मनसा यद्यत् किञ्चित् समाचरेत्[१] ।
तत्तद्बहुफलं तस्य जायते लोकयोर्द्वयोः ॥
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।
देवश्रद्धा नरा देवाः कथिता देवभाजिनः ॥
पितृश्रद्धाश्च पितरो दैत्यश्रद्धा दितेः सुताः ।
पापश्रद्धास्तथा पापा विज्ञेया नरकङ्गमाः ॥
तस्माच्छ्रद्धां समास्थाय धर्मं धर्मी समाचरेत् ।
पुण्यं बहुफलं तस्य श्रद्धामास्थाय यत्कृतम् ॥

श्रद्धा पवित्रं परमं हि लोके
श्रद्धा शरीरं पुरुषस्य चोक्तम् ।
श्रद्धां समास्थाय नरास्तु कृत्वा
पुण्यानि पुण्यां गतिमाप्नुवन्ति ॥

वृहत्पाराशरे ।

श्रद्धापूतं प्रदातव्यं पात्रे दानमयाचितम् ।
याचितेऽपि हि दातव्यं पूतं स्वं श्रद्धया धनम् ॥इति॥

तदेवं सर्व्वस्यापि सत्कर्म्मणः श्रद्धारूपाङ्गयुक्तत्वात् कथमस्यैव श्राद्धशब्दो नामधेयमिति ।

उच्यते । त्रिविधा शब्दस्यार्थेषु वृत्तिः । रूढ्या, योगेन, योगरूढ्याचेति । तत्र यः समुदायशक्त्या वर्त्तते स तत्र प्ररूढ़ इव भवतीति रूढ्या वर्तते । यस्त्ववयवशक्त्या यावद्योगं वर्तते स तु अवयवार्थयोगाद्वर्त्तत इति योगेन वर्तत इत्युच्यते । यस्त्ववयवशक्त्या वर्त्तमानोऽपि नियतप्रयोगात् यावत् योगं वर्त्तते स योगरूढ्या वर्त्तत इत्युच्यते । तथा च श्राद्धशब्दो योगरूढ्या वर्त्तत इत्यस्यैव नामधेयम् ।

ननु विप्रतिषेधान्न योगरूढिर्घटते । यद्यवयवशक्त्या वर्त्तते न तर्हि समुदायशक्त्येति विप्रतिषेधः । सत्यम् ।

---

[१] समारभेदिति पाठोऽपि ।

अवयवशक्त्यैव वर्त्तमानः प्रयोगनियमात् सङ्कुचितावयवशक्तित्वेन नात्यन्तयोगपरतन्त्र इति रूढ्येव वर्त्तेत इति गौणवादादविरोधः।

केचित् पुनराहुः। प्रत्यक्षपरोक्षानिवृत्तियोगेनैव शब्दोऽर्थे वर्त्तते। यत्राविकृतैरेवावयवैर्वर्तते। यथा निघण्टुशब्दस्तत्रैव सोपि परोक्षया वृत्या वर्तत इत्युच्यते।

तत्रायं श्राद्धशब्दः प्रत्यक्षयैववृत्या श्रद्धायोगेन कर्म्मविशेषे वर्त्तते। किन्तु प्रयोगनियमात् सङ्कुचितावयवशक्तित्वान्नान्यत्र वर्त्तते। यथा गोशब्दो गच्छतीति गौरित्यनया व्युत्पत्या प्रवर्त्तमानो योगिकोऽपि न अश्वादिषु वर्तते। एवं द्रव्यादावप्रसिद्धेः श्राद्धशब्दः कर्म्मणो नामधेयम्।

ननु कर्म्मण्यपि प्रसिद्ध्यभावात् विधेश्च प्रवृत्यर्थत्वात् गुणविधित्वे च गुणांशे पुरुषप्रवृत्तिविशेषजनकत्वेन प्रयोजनवत्त्वात् द्रव्याभिधानं भवेत्।

तदुक्तम्।

प्रसिद्धेर्बलवत्त्वेन प्रयोजनवशेन च।
अधिकत्वात्प्रवृत्तेश्च गुणरूपं विधीयते॥इति॥

अथोच्यते। न तावत् कर्म्मणि गुणविधिः, समभिव्याहृतकर्म्मविशेषाश्रुतेः। न च करोतिवाक्ये भावनामात्रे विधिः। सिद्धरूपस्य साक्षाद्भावनानन्वयात्। नापि-फले गुणविधिः। आश्रयरूपकर्म्मानन्वितस्य फलान्वयासम्भवात्। प्रणयनाद्याश्रित-एव हि गोदोहनादिः फले विधीयते।

तन्न। नामधेयत्वेऽपि हि कस्य नामधेयमिति पर्य्यनुयोगसाम्यात्। नामापिहि न भावनामात्रस्य सम्मतम्। सर्व्वकर्म्मनामत्वापत्तेः।

अथ "प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः।
ये यजन्ति पितॄन् देवान् ब्राह्मणांश्च हुताशनान्"॥

इत्यादि प्रकरणाम्नातवाक्यावगतस्य कर्मणो नामधेयं मन्यसे तदा तदवगत-एव कर्म्मणि फले वाऽयं गुणविधिरिति ममापि निःसरणसरणिः सुलभैव। श्रद्धायोगलक्षणं नाम प्रवृत्तिनिमित्तञ्च तुल्यमेव।

"श्राद्धमामन्तु कर्तव्यमिति वेदविदां स्थितिः"॥

इत्यत्र द्रव्यसामानाधिकरण्यदर्शनाच्च गवादिवत् श्राद्धं देयमिति देयत्वावगमाच्च। न हि दानादिकर्मणो देयत्वं सम्भवति। लाक्षणिको द्रव्ये प्रयोग इति चेन्न। लक्षणायां प्रमाणाभावात्। वाक्यान्तरावगते च कर्म्मणि गुणे विधीयमाने न मत्वर्थलक्षणा। पदैकवाक्यत्वे हि सा न वाक्यैकवाक्यत्वे, नित्यनैमित्तिककाम्यादिव्यपदेशोऽपि चमसगोदोहनादिष्विव द्रव्येऽपि न विरुध्यते। तस्मान्नैतत् कर्म्मनामधेयमिति प्राप्त उच्यते।

तदर्थशास्त्रान्तरसद्भावादग्निहोत्रपदवन्नामता।

यथाहि—यदग्नये च प्रजापतये च सायं जुहोतीत्यादिना प्रकरणाम्नातेन

शास्त्रान्तरेण विधित्सितदेवताप्राप्तिः, एवमत्रापि माष-यव-तिल-गोधूम-मांसादि द्रव्यं पित्रादिभ्यः श्रद्धया देयमित्यादिना श्राद्धशब्दविहितद्रव्यप्राप्तिरस्त्येव। प्रसिद्ध्य-भावाच्च न गुणविधिः। प्रसिद्धेरेव हि सोमेनेत्यादिर्गुणविधिः।

यत्पुनः क्वचित् श्राद्धशब्दस्यामशब्दसामान्याधिकरण्यं, तल्लक्षणावृत्या। देयत्वञ्च द्रव्यस्य लक्षणया द्रव्ये श्राद्धशब्दं प्रयुज्योक्तम्। नित्यनैमित्तिकादिव्यपदेशश्च कर्म्मणि भूयसीं प्रसिद्धिं गतः स्वरसवृत्या न कर्मपक्षपातञ्जहाति।

ननु सर्वत्र प्रधानकर्म्मणो यागादेः करणत्वान्नामत्वे श्राद्धमिति द्वितीयान्तता न स्यात्। उक्तं हि—

"विधाने चानुवादे च यागः करणमिष्यते" ॥इति॥

उच्यते। तदवस्था विवक्षायां द्वितीयान्ततोपपद्यते।

यथा दार्वादिद्वैधीभावफलोद्देशप्रवृत्तायां परशूद्यमननिपतनात्मिकायां करणी-भूतोऽपि परशुस्तद्दारुध्वंससंयोगविभागपरम्परारूपक्रियाफलभागित्वादनीप्सित कर्म्म-भूतस्तथा स्वर्गादिफलोद्देशप्रवृत्तायां भावनायां करणीभूतोऽपि यद् यज्यात्यर्थस्तद्भावना-निवर्त्यत्वेन कर्म्मेत्यग्निहोत्रमित्यादिकं तदवस्थाविवक्षायां द्वितीयान्ततोपपद्यते भावनास्वरूपनिर्वर्त्यस्य यागादेर्निवर्तकभावनायाः स्वर्गादिफलकत्वावस्थायां करण-त्वमित्येकं प्रति कर्म्मत्वकरणत्वयोर्न विरोधः। स्वतः पूर्वापरीभूतस्य साध्यैकस्वभास्य धात्वर्थस्यैव भावनारूपेण करोत्यर्थेन साक्षादन्वयः। सिद्धस्य द्रव्यादेर्भावार्थद्वारेणेति व्यवहितत्वाज्जघन्य इति कर्म्मणो नामधेयं श्राद्धशब्दः।

आपस्तम्बवचनादपि कर्म्मनामत्वमवगम्यते।

अथैतन्मनुः श्राद्धशब्दं कर्म्म प्रोवाच प्रजानिःश्रेयसार्थं तत्र पितरो देवता इति। एवं स्थिते विचार्यते।

किमिदं पिण्डदानस्य ब्राह्मणभोजनस्य वा केवलस्य नामधेयम्? उत प्रकृतानां पिण्डदान-ब्राह्मणभोजन-अग्नौकरणरूपाणांकर्म्मणां समुदायस्येति।

तत्र तावत् कर्कोपाध्यायः पिण्डदानस्यैव नामधेयमित्याह। तथाहि। प्रधानस्य हि इदं नामधेयमधिकारवाक्यगतत्वात्। पिण्डदानञ्च प्रधानतया अस्मिन् प्रकरणेऽव-गम्यते।

तथा च लिङ्गदर्शनम्।

अपि नः स कुले भूयात् यो नो दद्यात् त्रयोदशीम्।
पायसं मधुसर्पिभ्यां वर्षासु च मघासु च ॥इति॥

अत्र खलु श्राद्धदेवतानां पितॄणां पिण्डविषये प्रार्थनातिशयदर्शनात् पिण्डदानं प्रधानमवगम्यते।

महाभारते गयायां पिण्डे प्रदीयमाने पिण्डग्रहणाय पितॄणां हस्तोत्थानस्याभिधा-नाच्च। तथा श्राद्धकर्तव्यतायां विवक्षायां स्मृतिषु पिण्डनिर्व्वपणस्य कर्तव्यतोक्ता।

"सहपिण्डक्रियायान्तु कृतायामस्य धर्म्मतः।
अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः" ॥

इत्यादिना वचनेन ब्राह्मणभोजनासम्भवे पिण्डदानमात्रविधानाच्च ।

तदेवमेतैर्लिङ्गदर्शनैः पिण्डदानस्य प्राधान्यावगमादस्यैव श्राद्धशब्दो नामधेयमिति ।

ननु ब्राह्मणभोजनस्यापि पितृरूपप्रधानदेवताभिसम्बन्धात् प्राधान्यमस्त्येव ।

मैवम् । भोजनस्य "यद्येकं भोजयेच्छ्राद्धे" इतिवचनात् भोजनक्रियासामर्थ्याच्च साक्षात् ब्राह्मणसम्बन्धात् पित्रर्थत्वे प्रमाणाभावात् ।

नन्वेवं सति पिण्डपितृयज्ञवदुपचारः पित्र्यत्वाभिधानं स्यात् । न । श्राद्धार्थब्राह्मणार्थत्वेन तदुपपत्तेः ।

ननु पिण्डदानमात्रे श्राद्धशब्दार्थे पिण्डाभोजनेऽपि श्राद्धमनेन भुक्तमिति प्रयोगः कथम्? लक्षणया श्राद्धाङ्गभूतभुज्यर्थ इतिब्रूमः । तत् सिद्धं पिण्डदानस्यैव नामधेयमिति ।

एवञ्च क्वचित् प्रयोगे पिण्डदानानिष्पत्तौ प्रयोगे विघ्ने समुत्पन्ने सति पिण्डदानार्थं पुनर्ब्राह्मणभोजनाभ्यावृत्तिः प्रधानार्थत्वादङ्गानाम् । अङ्गं हि तद्दानस्य ब्राह्मणभोजनादि ।

अन्येत्वाहुः ।

ब्राह्मणभोजनमेव प्रधानमिति तस्यैव श्राद्धशब्दो नामधेयमिति ।
तथाचापस्तम्बसूत्रे ।

अथैतन्मनुः श्राद्धशब्दं कर्म्म प्रोवाच प्रजानिः श्रेयसार्थं तत्र पितरो देवता ब्राह्मणास्त्वाहवनीयार्थे इति । आहवनीयार्थे आहवनीयकार्य्ये प्रक्षिप्यमाण हविर्द्धारणलक्षणे वर्त्तते ।

न चाभुञ्जानास्ते तत्कार्य्यं कर्त्तुं शक्नुवन्तीत्यर्थात् ब्राह्मणभोजनपर्य्यन्ततास्य वाक्यस्य भवति । अतएव याज्ञवल्क्यः ।

ततो यथासुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः ॥इति॥

तदेवं ब्राह्मणभोजनात्मकप्रयोज्यव्यापारविषयकस्य प्रयोजकव्यापारस्य गौणाहवनीयप्राप्तिपर्य्यन्तत्वात् अधिगतहोमाभिधानस्य श्राद्धशब्दो नामधेयमिति विश्वरूपमेधातिथि-वामदेव-प्रभृतीनां मतम् ।

विहितश्चायं व्यापारविशेषः फलसम्बन्धित्वेन श्राद्धप्रकरणे बह्वीष्वपि स्मृतिषु ।

एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् ।
पुष्कलं फलमाप्नोति तस्मात् यत्नेन भोजयेत् ॥इति॥

शौनकगृह्येऽपि ।

नवावरान् श्रोत्रियान् भोजयेदयुजो वेति ।

मनुस्मृतावपि ।

द्वौ दैवे पितृकार्य्ये[१] त्रीनेकैकमुभयत्र वा ।
भोजयेत् सुसमृद्धोऽपि न प्रसज्येत विस्तरे ॥

तदेवं यजमाननिष्ठस्य ब्राह्मणभोजनाख्यस्य प्रयोजकव्यापारस्य श्राद्ध शब्दो नामधेयम् यत्तु-हरिहरेण । विश्वरूपादीनां मतमुपन्यस्तं, प्रयोजकव्यापारात् विनाभूतत्वात् प्रयोज्यव्यापारस्य ब्राह्मणकर्तृकं प्रयोज्यव्यापाररूपमपि भोजनं श्राद्धशब्दवाच्यम् । अतएव श्राद्धं भुक्तमनेनेति श्राद्धशब्दस्य भुजिसामानाधिकरण्यं दृश्यते ।

तथा ।

एषामन्यतमो यश्च भुञ्जीत श्राद्धमर्चित इत्यादि निर्देशश्च ।

अपि च ।

जीवत्पितृकश्राद्धे जीवद्भिः पिण्डदानाभावे नियते भोजनविधानं भोजनतदनुकूलव्यापारयोः प्राधान्यबोधकम् । विप्रवद्वापि तच्छ्राद्धे स्वकं पितरमाशयेदिति । पितामहो वा तच्छ्राद्धं भुञ्जीतेत्यादि ।

तदेतन्मतमयुक्तमिवावगम्यते । यतः प्रयोज्यव्यापारस्याधिकारिव्यापारत्वाभावात्तस्य फलासम्बन्धे प्रधानत्वानुपपत्तौ कुतः प्रधानकर्म्माभिधायकश्राद्धशब्दाभिधेयत्वम् ।

नन्वेवं तर्हि ऋत्विग्व्यापाराणामाग्नेयादीनां प्रधानत्वाभावे दर्शपूर्णमासशब्दाभिधेयत्वं न स्यात् ।

मैवम् । यजमानव्यापारत्वेनैव विहितस्याग्नेयादेर्वाक्यान्तरविहितयजमानापादित—ऋत्विग्व्यापारनिर्वर्त्त्यत्वेऽपि यजमानभावनारूपव्यापारनिर्वर्त्यत्वात् प्रधानकर्म्माभिधायकदर्शपूर्णमासशब्दाभिधेयत्वं न विरुद्ध्यते । भोजनस्य पुनरयजमानव्यापारनिर्वर्त्यस्य यजमानव्यापारत्वेऽभिधानात् यजमाननिर्वर्त्यभावनाव्यापत्वेऽपि न श्राद्धशब्दाभिधेयत्वम् ।

यथा दानभावनाविधौ प्रतिग्रहस्य व्याप्यत्वाद्भावनान्तर्भावेऽपि न दानशब्दवाच्यत्वम् ।

अत्रापि हि स्व स्वत्वनिवृत्तिपूर्व्वकं परस्वत्वोत्पादनं दानशब्दार्थः । परस्वत्वापादानञ्च न प्रतिग्रहमनापाद्य सिद्ध्यति । प्रतिग्रहेण हि परस्वत्वं निष्पद्यते ।

अतः प्रतिग्रहस्यापि दानभावनाव्याप्यत्वमस्त्येव । किन्तु यजमानव्यापारत्वेन विध्यभावादप्रधानत्वम् । प्रतिग्रहे यजमाननियोगासम्भवात् । स्वव्यापारे हि पुरुषः कर्तृत्वेन नियुज्यत इति न्यायात् । न च प्रतिग्रहो यजमानव्यापार इति ।

---

१. पितृकृत्ये इति पाठेऽपि ।

अथ श्राद्धदेशाः ।

तत्र मनुः ।

शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत् ।
दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत् ॥
अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि ।
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा ॥

यमस्मृतौ ।

दक्षिणाप्रवणं स्निग्धं विविक्तं शुभलक्षणम् ।
शुचिं देशं परीक्ष्याशु गोमयेनोपलेपयेत् ॥
अगारेषु विविक्तेषु तीर्थेषु च नदीषु च ।
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा ॥
नदीतीरेषु तीर्थेषु स्वभूमौ च प्रयत्नतः ।
उपह्वरनितम्बेषु तथा पर्व्वतसानुषु ॥
गोमयेनोपलिप्तेषु विविक्तेषु गृहेषु च ।

उपह्वरमत्र पर्व्वतान्तिकम् ।
पृथ्वीचन्द्रोदये विष्णुधर्म्मे ।
दक्षिणाप्रवणे देशे तीर्थादौ च गृहेऽपि वा ।
भूसंस्कारादिसंयुक्ते श्राद्धं कुर्य्यात् प्रयत्नतः ॥इति॥

स्कान्दे ।

तुलसीकाननच्छाया यत्र यत्र भवेद्द्विज ।
तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे ॥

देवलोऽप्याह ।

श्राद्धस्य पूजितो देशो गया गङ्गा सरस्वती ।
कुरुक्षेत्रं प्रयागश्च नैमिषं पुष्कराणि च ॥
नदीतटेषु तीर्थेषु शैलेषु पुलिनेषु च ।
विविक्तेषु च तुष्यन्ति दत्तेनेह पितामहाः ॥

शङ्खस्मृतावपि ।

गङ्गायमुनयोस्तीरे पयोष्ण्यमरकण्टके ।
नर्म्मदा बाहुदातीरे भृगुलिङ्गे हिमालये ॥
गङ्गाद्वारे प्रयागे च नैमिषे पुष्करे तथा ।
सन्निहत्यां गयायाञ्च दत्तमक्षयतां व्रजेत् ॥
अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ।
गयाशीर्षे वटे श्राद्धं यो नो दद्यात् समाहितः ॥

एष्टव्या वहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥

अथ निषिद्धदेशाः ।

पृथ्वीचन्द्रोदये स्कान्दे ।

त्रिशङ्कोर्व्वर्जयेद्देशं सर्व्वं द्वादशयोजनम् ।
उत्तरेण महानद्या दक्षिणेन तु कीकटात् ॥
देशस्त्रैशङ्कवो नाम श्राद्धकर्म्मणि वर्ज्जितः ॥

वायुपुराणे ।

कारस्कराः कलिङ्गाश्च सिन्धोरुत्तरमेव च ।
प्रणष्टाश्रमधर्माश्च देशाः वर्ज्याः प्रयत्नतः ॥

कारस्करो देशविशेषः । कीकटो मगधः ।

ब्रह्मपुराणे ।

परकीयगृहे यस्तु स्वान् पितॄंस्तर्पयेज्जडः ।
तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलात् ॥

यमस्मृतौ ।

परकीयप्रदेशेषु पितॄणां निर्व्वपेत्तु यः ।
तद्भूमिस्वामिपितृभिः श्राद्धकर्म्म विहन्यते ॥
अटव्यः पर्व्वताः पुण्या नद्यस्तीर्थानि यानि च ।
सर्व्वाण्यस्वामिकान्याहु र्नहि तेषु परिग्रहः ॥
रुक्षं कृमियुतं क्लिन्नं सङ्कीर्णानिष्टगन्धिकम् ।
देशन्त्वनिष्टशब्दञ्च वर्जयेच्छ्राद्धकर्म्मणि ॥

अनिष्टशब्दं प्रतिकूलशब्दमित्यर्थः ।

इति श्रीमहाराजाधिराज श्रीमहादेवस्य सकलश्रीकरणाधिपति पण्डित श्रीहेमाद्रिविरचिते चतुर्व्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे श्राद्धदेशकथनं नाम चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽध्यायः ।

श्राद्धकालनिर्णयप्रकरणम् ।

नमेरोर्मेरोर्वा महिमहरणे धौरिकमिति-
हरीशश्रीरम्यप्रकृतिरहरीशप्रतिकृतिः ।
मनीषी हेमाद्रिर्गुणगरिमगम्भीरचरितः
करोतीह श्राद्धे हितविहितकालप्रकरणम् ॥

अथाधिकरणत्वेन कृत्स्नप्रयोगाङ्गत्वेन सारूप्याद्देशानन्तरं श्राद्धकालोऽभिधीयते ।

गरुड़पुराणे ।

विश्वं सृजत्यवत्यत्ति कालात्मैव जनार्द्दनः ।
अतोऽर्थं कालमेवेह परमं कारणं विदुः ॥
न हि कालमनाश्रित्य लोके वेदेऽपि कुत्रचित् ।
विधयः प्रतिषेधाश्च सम्भवन्ति विशाम्पते ॥
काल एव ततः साध्यः साधनं पुण्यपापयोः ।
तस्मात् कर्म्माणि पुण्येषु कुर्य्यात् कालेषु धार्म्मिकः ॥
नाकाले विदुषा किञ्चित् कर्तव्यमिति निश्चयः ॥

पुण्येषु पुण्यसाधनत्वेनाम्नातेषु, कालेषु कालावयवेषु ।

ननु—अमूर्त्तत्वनित्यत्वविभुत्वैर्हेतुभिर्निरवयवत्वात् कालस्य कथमवयवा इत्येतच्छङ्कापरिहारो देवीपुराणे ।

नित्यो विभुः स्थितः कालो ह्यवस्थास्तस्य हेतुजाः ।
निमित्तादिविशेषैः स लोके पुण्यफलप्रदः ॥इति॥

अस्यार्थः ।

सत्यमस्य न सन्त्येवावयवाः स्वाभाविकाः यतोऽयं नित्यः ते चानित्यस्यैव भवन्ति । यतः सावयवं नामावयवजन्यम् । जन्यश्च विनाशादन्यद्विनश्यत्येव ।

नन्वयवसमवेतमात्रं सावयवं न तु तज्जन्यम् ।

मैवम् । सामान्यस्यापि सावयवत्वप्रसङ्गात् । किञ्च कालस्यावयवास्तज्जातीया अवयविनमपेक्ष्य वाल्पपरिमाणा वक्तव्याः । तथाचास्य विभुत्वैकत्वयोर्हानिः । लिङ्गविशेषाच्च[1] अस्यैकत्वविभुत्वे कणादाक्षपादादिमुनिसम्मते स्मृतिपुराणादिप्रसिद्धे चेति । अतो न सन्त्येवास्यावयवाः स्वाभाविकाः । तथाप्यौपाधिकाः सम्भवन्तीत्याह अवस्थास्तस्य हेतुजा इति ।

---

[1] लेखाविशेषाच्चेति ।

अवस्थाः पूर्वाह्ण-मध्याह्नापराह्ण-दिवस-क्षपा-पक्ष-मास-ऋतु-अयन-संवत्सरादि-रूप विभागात्मिकाः, हेतुः रविपरिस्पन्दप्रचयविशेषरूपोपाधिभेदः, तज्जाः तदवच्छेद-निबन्धनाः। ताश्चास्य नित्य-नैमित्तिक-काम्यकर्म्माङ्गत्वोपाधिभेदेन त्रिविधाः।

अतोऽयं कालो नित्यो नैमित्तिकः काम्य इति त्रिधा व्यपदिश्यते। सोयमेवं त्रिधा विभक्तः पुण्यफलप्रद इति।

अत्र शतपथश्रुतिः।

वसन्तो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो य एवा-पूर्य्यतेऽर्द्धमासः स देवा योऽपक्षीयते स पितरोऽहरेव देवा रात्रिः पितरः पुनरह्नः पूर्व्वाह्णो देवा अपराह्णः पितर इति[१]।

अत्रोत्तरायणदक्षिणायनशुक्लकृष्णपक्षाहोरात्रपूर्वाह्णापराह्णविभागेन देवपितृसम्ब-न्धः कालस्योच्यते।

हारीतोऽथाह।

संवत्सरः प्रजापतिस्तस्योदगयनं शुक्लोऽहः पूर्व्वाह्णश्च देवानां दक्षिणायनं तामिस्रो रात्र्यपराह्णश्च तत् पितृणां नान्यभावः कृत्स्नभावादुभयथा इज्यन्ते व्यामिश्रत्वादहरह-रथाप्यत्रोदाहरन्ति।

यस्येमे वर्त्मनी हव्यकव्ये वहतो देवा यस्यार्द्धं पितरोऽर्द्धं तथैव निमेषा ऋतवो यस्य मूलं तं वै यजन्तममृतमियादिति।

अस्यार्थः।

योऽसौ प्रजापतिर्नाम देवताविशेषः श्रूयते स एवायं संवत्सरात्मकः कालः। तस्यैतस्य भागद्वयं भवति। तत्रोदगयनं शुक्लोऽहः पूर्व्वाह्ण इत्येको भागः। उदगयनं सूर्य्योपभुज्यमानमकरादिराशिषट्कोपलक्षितः कालः, शुक्लः पक्षः अमावास्योत्तरां प्रति-पदमारभ्य पौर्णमासीपर्य्यन्तः कालः। अहर्दिनम्। पूर्वाह्णो द्विधाकृतस्याह्नः पूर्वो भागः।

तथा च स्कन्दपुराणे।

आवर्त्तनात्तु पूर्व्वाह्णो ह्यपराह्णस्ततः परम्। इति।

आङ्मर्यादायाम्। आवर्त्तनाच्छायायाः परिवर्त्तनं मर्य्यादीकृत्य यः कालः स पूर्व्वाह्णः। तदेतत् संवत्सरावयवजातं देवानाम्। अत्र दैविकानि कर्म्माणि कर्तव्यानीत्यर्थः।

दक्षिणायनं तामिस्रो रात्रिश्चेति द्वितीयो भागः।

दक्षिणायनं सूर्य्योपभुज्यमानकर्कटकादिराशिषट्कोपलक्षितः कालः। तामिस्रः कृष्णपक्षः पौर्णमास्युत्तरां प्रतिपदमारभ्यामावास्यापर्य्यन्तः कालः।

रात्रिर्मेरुव्यवहितसूर्यादर्शनावच्छिन्नः कालः। तदेतत् संवत्सरावयवजातं पितृणाम्। अत्र पित्र्यं कर्म्म कर्त्तव्यमित्यर्थः।

---

१. काण्डं २, प्रपा० १ अध्या० १.३.१.

एवं दैवत्वेन पित्र्यत्वेन च द्वैविध्यमेव कालस्य नान्यभावो नान्यरूपत्वम्। कस्मादित्याह कृत्स्नभावात्। यस्मात् संवत्सरातिरिक्तकालाभावादेतावानेव सर्व्वः कालः।

अतो दैवपित्र्यरूपपूर्वाह्णापराह्णात्मककालव्यामिश्रत्वाद्दैवपित्र्यरूपत्वेन देवाश्च-पितरश्चोभयथा पूर्वाह्णापराह्णविभागेनाहरहः प्रतिदिनमिज्यन्ते त्यज्यमानस्य हव्यस्य कव्यस्य चोद्देश्यत्वं प्रार्थ्यन्ते[1]।

अथास्यार्थस्य नेदं प्रथमवाक्यमिति संवादं दर्शयति।

अथाप्यत्रोदाहरन्तीति। अत्रास्मिन् विषये पूर्व्वे महर्षयः उदाहरन्ति पठन्ति-चेत्यर्थः। यस्येमे वर्त्मनी हव्यकव्ये वहतः। यस्य संवत्सरात्मकस्य प्रजापतेर्देवान् पितॄंश्च प्रति हव्यकव्ये नयतः। उत्तरायणदक्षिणायनात्मके देवयानपितृयानात्मके वा द्वे वर्त्मनी द्वौ मार्गौ यस्यार्द्धे देवाश्चार्द्धेश्च पितरः। यस्य च मूलं निमेषाः। निमेषः काष्ठाकलादयः, मूलं अवयवरूपत्वेनारम्भका इत्यर्थः।

तथा यस्य ऋतवो मूलम्। ऋतवः षट्। ते च श्रुतावुक्ताः।

मधुश्चमाधवश्च वासन्तिकावृतू। शुक्रश्चशुचिश्च ग्रैष्मावृतू। नभश्च नभस्यश्च-वार्षिकावृतू। इषश्चोर्जश्च शारदावृतू। सहश्च सहस्यश्च हैमन्तिकावृतू। तपश्च तपस्यश्चशैशिरावृतू। मधुश्चमाधवश्च चैत्रश्च वैशाखश्च द्वौ मासौ वासन्तिकौ वसन्त सम्बन्धिनौ, ऋतू ऋत्ववयवौ। अनेन चैत्रवैशाखमासद्वयात्मको वसन्ताख्यऋतु-र्भवतीत्युक्तं भवति। एवमुत्तरे ग्रीष्मादयः। त एते यस्य संवत्सरस्य मूलं तं संवत्सरं प्राप्य यथाविभागं देवाश्च पितॄंश्च यजन्तं पुरुषममृतं मोक्षादिफलाभिमुखेन इयात् आगच्छतीत्यर्थः।

इति दैवपित्र्यविभागेन कालनिरूपणम्॥

अथ श्राद्धविशेषः।

तत्र याज्ञवल्क्यः।

> अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयम्।
> द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत् सूर्य्यसंक्रमः॥
> व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्य्ययोः।
> श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः॥

अमावास्यादिकालाः स्वस्वप्रकरणे एकैकशो वक्ष्यन्ते। रुचिरिच्छा सा यदा श्राद्धानुष्ठानविषया भवति तदुपलक्षितोऽपि कालः श्राद्धाङ्गं भवति। अस्या निमित्तत्वं पूर्वोक्तश्राद्धानिमित्तत्वनिराकरणन्यायेनैव निराकरणीयम्।

तत्रामावास्योच्यते।

अमावास्या कृष्णपक्षस्य पञ्चदशी तिथिः। अस्याश्च लक्षणं गोभिलेनोक्तम्।

---

[1] प्राप्यन्ते इति।

यः परमो विप्रकर्षः सूर्य्याचन्द्रमसोः सा पौर्णमासी, यः परमः सन्निकर्षः सामावास्येति ।

तत्रामावास्याशब्दनिर्व्वचनं शतपथश्रुतौ ।

ते देवा अब्रुवन् । न वा इममन्यत्सोमाद्धितुयात्सोममेवास्मै सम्भरामेति तस्मै सोमं समभरन्नेष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एतां रात्रिं न पुरस्तान्न पश्चाद्दद्दशे तदिमं लोकमागच्छति स इहेवापश्चौषधीश्च प्रविशति स वै देवानां वस्वन्नं ह्येषां तद्यदेष एतां रात्रिमिहामावसति तस्मादमावास्या नामेति[१] ।

अत्र प्रथमवाक्ये वृत्रबधानन्तरं प्रोषितेन्द्रसमागमे देवानामुक्ते वसुनेन्द्रेण अमा-सह निवासादमावास्येति ।

द्वितीयवाक्ये तु वसोः चन्द्रमसोऽस्यां रात्रावस्मिन् लोके निवासादमावास्येति द्विधा निर्वचनम् ।

पद्मपुराणे ।

अग्निष्वात्ता इति ख्याता यज्वानो यज्ञसंस्थिताः ।
अच्छामा[२] नाम तेषां तु मानसी कन्यका मता[३] ॥
तमथामावसुं नाम पितरं वीक्ष्य साङ्गना ।
वव्रे वरार्थिनी सङ्गं कुसुमायुधपीडनात् ॥
योगाद् भ्रष्टा तु तेनासौ व्यभिचारेण भामिनी ।
धरान्न स्पृशते पूर्व्वं पपाताथ भुवस्तले ॥
पिता चामावसुर्य्यस्मादिच्छाञ्चक्रे न तां प्रति ।
धैर्य्येण तस्य सा लोके अमावास्येति विश्रुता ॥
पितृणां वल्लभा यस्मादत्तस्याक्षयकारिणी ॥

परमसंयमिपितृगणाभिमतब्रह्मचर्य्याप्रच्युतिहेतुभूतामावसुधैर्य्यनिर्वहणप्रतीत-महिमत्वादमावास्येत्युच्यते इत्येतदितिहासतात्पर्य्यम् ।

स्कान्दे नागरखण्डे ।

अमा नाम कलारश्मिः सहस्रप्रमुखस्थितः ।
यस्याश्च तेजसा सूर्य्यः प्रोक्तस्त्रैलोक्यदीपकः ॥
तस्मिन् विशति येनेन्दुरमावास्या ततः स्मृता ।
अक्षया धर्म्मकृत्ये सा पितृकृत्ये विशेषतः ॥

ब्रह्माण्डपुराणे ।

अमा नाम कलारश्मिः सहस्रप्रमुखस्थितः ।
त्रैलोक्यदीपकः प्रोक्तश्चन्द्रलोके प्रतिष्ठितः ॥
यस्मात् सोमो विशत्यस्याममावास्या ततः स्मृता ॥

---

१. काण्ड १. प्रपा० ५. अध्या० ६. ४.५ ।

२. अच्छोदा इति । ३. सतीति ।

मत्स्यवायुपुराणयोः ।

अमा वसेतां ऋक्षे तु यदा चन्द्रदिवाकरौ ।
एषा पञ्चदशी रात्रिरमावास्या ततस्तु सा ॥

अमा सह एकत्रेत्यर्थः ।

आश्रित्य साममावास्यां पश्यतस्तु समागतौ ।
अन्योन्यं चन्द्रसूर्य्यौ तौ यदा तद्दर्श उच्यते ॥

सा च द्विविधा । तथा च स्कन्दपुराणे ।

राका चानुमतिश्चैव पौर्णमासी द्विधा स्मृता ।
सिनीवाली कुहूश्चैव अमावास्या द्विधैव तु ॥

तयोश्च लक्षणं श्रुतौ ।

या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका, या पूर्व्वामावास्या सा सिनीवाली, योत्तरा सा कुहूरिति विज्ञायते ।

अत्र चतुर्दशीमिश्रा सिनीवालीत्युक्तं भवति । अस्याञ्च त्रिमुहूर्ताधिकचतुर्दशीमिश्रायां चन्द्रो भवतीति ज्योतिर्विद्वचनात् प्रायिकं चन्द्रोदयोपलक्षितेयमित्यभिप्रेत्याह व्यासः ।

दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूः स्मृता ।
सिनीवाली सदा पित्र्ये कुहूर्दैवे तु कर्मणि ॥इति॥

अथानयोर्निर्वचनं पर्वसन्धिं प्रकृत्य—

सिनीवाली प्रमाणं तु क्षीणशेषो निशाकरः ।
अमावास्यां विशत्यर्कः सिनीवाली तथा स्मृता ॥

सिनी सिता अवसितेति यावत् । अल्पो बालो बाली । सिनी चासौ बाली च सिनीबाली तत्परिमाणः सिनीबालीप्रमाणः बालाग्रमात्र इत्यर्थः ।

कुहूरिति पिकेनोक्ते यावत्कालः समाप्यते ।
तत्कालसम्मिता ह्येषा अमावास्या कुहूः स्मृता ॥इति॥

कोकिलोच्चारितकुहूशब्दपरिमितपर्व्वसन्ध्युपलक्षितमहोरात्रं कुहूः । नित्यश्चायं श्राद्धकालः ।

तथा च विष्णुधर्मोत्तरे ।

श्राद्धकालममावास्यां नित्यं पार्थिवसत्तम ।
पौर्णमासीं तथा माघीं श्रावणीञ्च प्रचक्षते ॥इति॥

मनुस्मृतावपि ।

पितृयज्ञन्तु निर्व्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥

चन्द्रक्षयोऽमावास्या तस्यां श्राद्धं कुर्यात्। तथापि न सर्व्वस्यां वेलायां किं-तर्हि पितृयज्ञं पिण्डपितृयज्ञं कृत्वेत्यर्थः। विप्रग्रहणमुपलक्षणम्। पिण्डान्वाहार्य्यक-मिति श्राद्धस्य नामधेयम्। मासश्चानुमासश्च तयोर्भवं मासानुमासिकम्। मासानुमास-शब्दो मासगतां वीप्सामाचष्टे। मासि मासि कर्तव्यमिति। अतश्च नित्यतासिद्धिः।

मार्कण्डेये।

काय्यं श्राद्धममावास्यां मासि मास्युडुपक्षये।
तथाष्टकास्वप्यवश्यमिष्टं कालं निबोध मे॥

उडुपश्चन्द्रः। इष्टं कालं निबोध मे इत्येषा वक्ष्यमाणस्यैच्छिकस्य कालस्य प्रतिज्ञा।

ब्रह्मपुराणे।

श्राद्धं देयमुशन्तीह मासि मास्युडुपक्षये।
पौर्णमासीषु च श्राद्धं कर्त्तव्यं ऋक्षगोचरे॥

ऋक्षगोचरे मासनक्षत्रसंयोगे। अत्रापि वीप्सया नित्यत्वम्।

विष्णुपुराणेऽपि।

मासि मास्यसिते पक्षे पञ्चदश्यां नरेश्वर।
तथाष्टकासु कुर्वीत काम्यान् कालान् शृणुष्व मे॥इति॥

अत्र काम्यान् कालानिति वक्ष्यमाणानां काम्यत्वं वदन् पूर्वोक्तानां नित्यत्व-मनुसन्धत्ते।

नागरखण्डे।

श्राद्धं चन्द्रक्षयेऽवश्यं सदा काय्यं विपश्चिता।
यदि वेच्छति स स्वर्गं सन्तानञ्च तथा नृप॥
शीतार्त्ता यद्वदिच्छन्ति वह्निं प्रावरणानि च।
पितरस्तद्वदिच्छन्ति क्षुत्क्षामाश्चन्द्रसङ्क्षयम्॥
दरिद्रोपहता यद्वद्धनं वाञ्छन्ति मानवाः।
पितरस्तद्वदिच्छन्ति क्षुत्क्षामाश्चन्द्रसङ्क्षयन्॥
यथा वृष्टिं प्रवाञ्छन्ति कर्षकाः शस्यवृद्धये।
तथात्मतृप्तये प्रीताः प्रवाञ्छन्तीन्दुसङ्क्षयम्॥
यथोषश्चक्रवाकश्च वाञ्छति! रविदर्शनम्।
पितरस्तद्वदिच्छन्ति श्राद्धं दर्शसमुद्भवम्॥
जलेनापि च यः श्राद्धं शाकेनापि करोति न।
दर्शाहें पितरस्तस्य यान्ति शापप्रदायिनः॥

तथा।

अमावास्या दिने प्राप्ते गृहद्वारं समास्थिताः।
वायुभूताः प्रवाञ्छन्ति श्राद्धं पितृगणा नृणाम्॥

यावदस्तमयं भानोः क्षुत्पिपासासमाकुलाः ।
ततश्चास्तं गते भानौ निराशा दुःखसंयुताः ॥
निःश्वस्य सुचिरं यान्ति गर्हयन्तः स्ववंशजम् ॥इति॥

अस्यामावास्याश्राद्धस्यावश्यकत्वार्थमितिहासे ।

विष्णुधर्मोत्तरे ।

सशरीरो नृपः स्वर्गं तदा प्राप्य पुरूरवाः ।
शक्रेणाभ्यर्चितः काले विजहार यथासुखम् ॥
देवोद्यानेषु सर्व्वेषु उर्वश्या सहितस्तदा ।
नापवारयितुं[१] शक्यः कदाचिदपि पार्थिवः ॥
अमावास्याममावास्यां नियतं चन्द्रभास्करौ ।
द्रष्टुं याति महीपालस्त्वेकराशिगतौ सदा ॥
सहोर्वश्या तु पौत्रस्य यदा वसति चन्द्रमाः ।
तदा सुधारसं देवः स्नेहात् स्रवति मानवः ॥
सोमामृतरसं तच्च पिबन्ति पितरस्तदा ।
श्राद्धकालस्तदा प्रोक्तो नृणां नृपवरोत्तम ॥
तदा श्राद्धं हि यद्दत्तं सुधारसविमिश्रितम् ।
तदश्नन्ति महीपाल पितरो जलसन्निभाः ॥
अमावास्याममावास्यां तदा श्राद्धं प्रयत्नतः ।
कुरुष्व भूमिपश्रेष्ठ सर्व्वकामानवाप्स्यसि ॥
ये चान्येऽपि करिष्यन्ति तदा श्राद्धं नराधिप ।
तेषामायुर्यशः स्वर्गं दास्यन्ति प्रपितामहाः ॥
राज्यकामः स्वर्गकामः पुष्टिकामस्तथैव च ।
पितॄन् सन्तर्पयेच्छ्राद्धे चन्द्रसूर्य्यसमागमे ॥
वसन्ति सततं राजन् पितरश्चन्द्रमण्डले ।
तेषां मासमहोरात्रविभागं तत्र मे शृणु ॥
कृष्णपक्षाष्टमीमध्ये तेषान्तूदयते रविः ।
शुक्लाष्टम्यां तथैवास्तं तेषां याति दिवाकरः ॥
अमावास्या सदा तेषां मध्याह्नो जायते नृप ।
तस्मात् श्राद्धानि देयानि तस्मिन् काले प्रयत्नतः ॥

अथास्यास्तिथेर्वारविशेषेण पुण्ययोगत्वमाह ।

व्यासः ।

अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण विषुवत् सदृशं फलम् ॥

---

१. नापचारयितुमिति ।

अमा अमावास्या ।

शङ्खोऽपि ।

अमावास्या तु सोमेन सप्तमी भानुना सह ।
चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी ॥
चतस्रस्तिथयस्तैस्तु तुल्याः स्युर्ग्रहणादिभिः ।
सर्व्वमक्षय्यमत्रोक्तं स्नानदानजपादिकम् ॥

भूमिपुत्रो मङ्गलः । सोमपुत्रो बुधः ।

अथ नक्षत्रयोगे पुण्यतमत्वम् ।

ब्रह्मपुराणे ।

अमावास्यायां श्रवणं रक्षोघ्नं वैष्णवं यदा ।
तदा पितृभ्यः श्राद्धन्तु दत्तमक्षय्यमुच्यते ॥

विष्णुपुराणे ।

अमावास्या यदा मैत्रविशाखास्वातियोगिनी ।
श्राद्धे पितृगणस्तृप्तिं तदाप्नोत्यष्टवार्षिकीम् ॥

मैत्रमनुराधानक्षत्रम् ।

अमावास्या यदा पुष्ये रौद्रऋक्षे पुनर्वसौ ।
द्वादशाब्दां तदा तृप्तिं प्रयान्ति पितरोऽर्चिताः ॥

रौद्रमार्द्रा नक्षत्रम् ।

वासवाजैकपादर्क्षे पितृणां तृप्तिमिच्छताम् ।
वारुणेनाप्यमावास्या देवानामपि दुर्लभा ॥

वासवं वसुदैवत्यं धनिष्ठानक्षत्रम् । अजैकपादऋक्षं पूर्व्वभाद्रपदानक्षत्रम् । वारुणं शतभिषानक्षत्रम् ।

माघासिते पञ्चदशी कदाचित्
उपैति योगं यदि वारुणेन ।
ऋक्षेण कालः स परः पितॄणां
नह्यल्पपुण्यैर्नृप लभ्यतेऽसौ ॥
काले धनिष्ठा यदि नाम तस्मिन्
भवेत्तु भूपाल तदा पितृभ्यः ।
दत्तं जलान्नञ्च ददाति तृप्तिं
वर्षायुतं तत्कुलजैर्मनुष्यैः ॥

तस्मिन् काले माघे मासि असितपञ्चदश्यामित्यर्थः ।

तत्रैव चेत् भाद्रपदास्तु पूर्व्वा
काले तदा यत् क्रियते पितृभ्यः ।

श्राद्धं परां तृप्तिमुपेत्य ते च
युगं समग्रं पितरः स्वपन्ति ॥इति॥

तत्रैव तस्यां माघपञ्चदश्यामित्यर्थः।

अथामावास्याश्राद्धविधिनिर्णयः।

तत्राह कात्यायनः।

पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते।
वासरस्य तृतीयेंऽशे नातिसन्ध्यासमीपतः॥

अत्र त्रिधाविभक्तस्य वासरस्य तृतीयेंशे। इन्दुक्षयस्तु कदा भवतीत्यपेक्षायां स एवाह।

अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः।
अमावास्याष्टमेंशे तु पुनः किल भवेदणुः।

इह खलु ग्रहचारविदो राशित्रिंशांशैर्द्वादशभिर्द्वादशभिश्चन्द्रमसः सूर्येण सन्निकर्षे विप्रकर्षे वा एकैका तिथिर्भवतीति वर्णयन्ति। अतश्चतुर्दशीवामावास्या वा द्वादशांशैर्भवति। तत्र चतुर्दश्यष्टमांशान्ते चन्द्रः क्षीयते। अमावास्याष्टमांशान्ते-चाणुर्भूत्वा पुनर्जायते। किलशब्दोऽत्र ज्यौतिषिकैः किलैतद्व्याख्यातमिति। एतमर्थ-माह शतपथश्रुतिः।

स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदश कलाः। ध्रुवै-वास्य षोडशीकला सा रात्रिभिरेव च पूर्य्यते न च क्षीयते। सोमः अमावास्यां रात्रिमेतया षोडश्या कलया सर्व्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते। तस्मादेतां रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्या इति। अत्रायमाशयः।

षोडशकलस्यास्य चन्द्ररूपस्य प्रजापतेः कृष्णपक्षप्रतिपदमारभ्य चतुर्दश्यन्तासु तिथिषु क्रमादेकैककलाक्षयेण चतुर्दशकलाः क्षीणा भवन्ति। चतुर्दशीतृतीयांशे तु पञ्चदश्यपि कला क्षीयते।

ततोऽमावास्यायां ध्रुवया अविनश्वरया षोडशकलया भूर्लोकमागत्य सर्व्वं प्राणिजातं संविशति। अमावास्यातृतीयांशे तु तथैव षोडश्या कलया दिवमारुह्य पुनः प्रादुर्भवतीति।

अमावास्याविशेषे चन्द्रक्षयस्य कालमाह कात्यायन एव।

आग्रहायण्यमावास्या तथा ज्यैष्ठस्य या भवेत्।
विशेषमस्यां ब्रुवते चन्द्रचारविदो जनाः॥
अत्रेन्दुराद्ये[१] प्रहरेऽवतिष्ठते

---

[१] अत्रेन्दुराद्ये प्रहरेऽवतिष्ठेदिति पाठोऽपि।

चतुर्थभागोनकलावशिष्टः ।
तदन्त एव क्षयमेति कृत्स्न—
मेवं ज्योतिश्चक्रविदो वदन्ति ॥

अस्यार्थः । वृषस्थे चन्द्रे ज्यैष्ठस्यामावास्यान्ते वृश्चिकस्थे च अग्रहायण्यमावास्यान्ते च चन्द्रस्य परमोच्चनीचस्थाने तद्वशाच्चन्द्रस्य गतिवैलक्षण्यात् यदन्यास्वमावास्यास्वष्टमे प्रहरेऽस्य रूपं तदनयोरमावास्ययोः प्रथम एव भवतीति ।

ये तु चन्द्रादर्शन एव पिण्डपितृयज्ञादिकं मन्यन्ते तस्मिन्नक्षयेऽपि तान्निराकर्तुं कदाचित् तृतीयायामपि चन्द्रादर्शनं दर्शयति ।

यस्मिन्नब्दे द्वादशैकश्च यव्य-
स्तस्मिन् तृतीया परतो न दृश्यते[१] ।
एवं चारं चन्द्रमसो विदित्वा
क्षीणे तस्मिन्नपराह्णे च दद्यात् ॥

अस्यार्थः । यव्यो मासः यस्मिन्नब्दे द्वादशाधिको भवति तस्मिन्नब्दे मलमासानन्तर तृतीयाया अपरस्यां तृतीयायां चन्द्रो न दृश्यते । न चैतावता चन्द्रादर्शनविहितः पिण्डपितृयज्ञस्तत्र क्रियते । अतश्चन्द्रचारं विदित्वा तस्मिन् क्षीणेऽपि चतुर्दशीमिश्रायाममावास्यायामपराह्णे पिण्डपितृयज्ञादि कुर्य्यादिति । अतश्चतुर्दश्यन्तेऽपि पिण्डान्वाहार्य्यकार्थो निर्व्वापः कर्तव्य इति स्थितिः ।

पूर्व्वपक्षमवतारयन्ति ।

नैतदस्ति चतुर्दश्यन्ते निर्व्वाप इति पिण्डपितृयज्ञानन्तरं विहितम् । पिण्डपितृयज्ञश्चामावास्यायामपराह्णे विहितः । अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति कल्पसूत्रकारवचनात् ।

यत्तु मतम् । औपवसथ्यदिनोपलक्षणार्थोऽमावास्या शब्द इति । तन्न । लक्षणायां प्रमाणाभावात् । विधावन्याय्यत्वाच्चास्याः ।

या तु श्रुतिः ।

तस्मात् पूर्व्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान् यजति पितृभ्य एव तद्यज्ञं निक्रीय यजमानः प्रतनुत इति, तथाग्न्यन्वाधानं प्रकृत्यापराह्णे पिण्डपितृयज्ञेन चरन्तीति कल्पसूत्रकारवचनम् । तदेतद्यस्मिन्नौपवसथ्येऽहन्यपराह्णे अमावास्यास्ति तद्विषयमिति कृत्वा न पूर्व्वदिनमात्रपरं सल्लक्षणायां प्रमाणं भवितुमर्हति ।

अन्ये तु पूर्व्वपक्षयन्ति । चन्द्रोदयोपलक्षितदिनान्तर्गतायाममावास्यायामपि पिण्डान्वाहार्य्यकं न कर्तव्यम् । तस्य पिण्डपितृयज्ञानन्तरं विहितत्वात् । पिण्डपितृयज्ञश्च चन्द्रादर्शनवत्याममावास्यायां विहितः ।

तथा च श्रुतिः ।

---

[१] तृतीयया परिदृश्यो नोपजायते इति ।

यदैवैष न पुरस्तान्न पश्चाद्ददृशेऽथैभ्यो ददातीति[1] सूत्रकारवचनम्। यदहश्च-न्द्रमसं न पश्यन्ति तदहः पितृयज्ञं कुरुत इति। नात्रादर्शनं क्षयोपलक्षणपरम्। क्षीणे-राजनीत्यस्यादर्शनेऽप्यनतिक्रमात्। न च क्रमो विवक्षितः, प्रमाणाभावात्।

अथ मतम्। यदैकस्मिन् दिने द्वयं तदायं क्रमो नान्यदेति। यदा चौपवसथ्य-एव चन्द्रादर्शनं तदैकस्मिन् दिने द्वयमन्यदा पिण्डपितृयज्ञं यजनीयदिनं प्रकृत्य कुरुत-इति। तन्न। तदाद्युत्कर्षन्यायेनान्वाहार्य्यकस्याप्युत्कर्षात्।

यत्तु-लौगाक्षिवचनं—

सिनीवाली द्विजैः कार्य्या साग्निकैः पितृकर्म्मणि।
स्त्रीभिः शूद्रैः कुहूः कार्य्या तथा चानग्निकैर्द्विजैः॥इति॥

तत् पिण्डपितृयज्ञपिण्डान्वाहार्य्यकान्यपितृकार्य्यविषयमस्तु।

अत्रेदमुच्यते।

चतुर्दश्यन्ते न निर्व्वाप इति। तदयुक्तम्। यतश्छन्दोगपरिशिष्टे पिण्डपितृयज्ञं-प्रकृत्याह कात्यायनः।

यथोक्तं दृश्यमानेऽपि तच्चतुर्दश्यपेक्षया।
अमावास्यां प्रतीक्षेत तदन्ते वापि निर्व्वपेत्॥इति॥

यच्च दृश्यमानेऽपि चन्द्रे पिण्डपितृयज्ञं कुर्यादिति श्रुतावुक्तं तच्चतुर्दशी विव-क्षया। अतोऽमावास्यां प्रतीक्षेत चतुर्दश्यन्ते एव एषां निर्व्वपेदिति। अनेन चन्द्र-दर्शनदिने पितृयज्ञः श्रुत्यनुगृहीत एवेति च दर्शितम्। अदर्शनश्रुतेः क्षयोपलक्षण-त्वञ्चाह स एव।

यदुक्तं यदहस्त्वेव दर्शनं नैति चन्द्रमाः।
तत् क्षयापेक्षया[2] ज्ञेयं क्षीणे राजनि चेत्यपि॥इति॥

यच्चान्यत् पूर्व्वपक्षितम्।

चन्द्रोदयोपलक्षितदिनान्तर्गतायाममावास्यायामपि न पिण्डपितृयज्ञपिण्डान्वा-हार्य्यक इति। तदपि यच्चोक्तं दृश्यमानेऽपीत्यादिना कात्यायनवचनेन निराकृतमेव।

दृश्यमानेऽप्यनेन गोभिलवचनेन हारीतेनापि निराकृतम्।

यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते।
अपराह्णे क्षयस्तस्यां पिण्डानां करणं ध्रुवम्॥

इति निर्देशः पिण्डपितृयज्ञं नातिवर्त्तितुमीहते।

पुनः कात्यायनः—

यदा चतुर्दशीयामं तुरीयमनुपूरयेत्।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते॥इति॥

---

[1] काण्ड २ प्रपा० ३ अध्या० ४—२।७। [2] अनयापेक्षयेति।

किञ्च–यजनीयदिनात् पूर्व्वदिने हि पिण्डपितृयज्ञश्राद्धे विहिते तस्मात् पितृभ्यः पूर्व्वेद्युः क्रियत इति। यदा च प्रतिपद्दिने पूर्वाह्लेऽथवा मध्याह्नेऽमावास्या समाप्यते तदा तदहरेव याग इति पूर्व्वस्यां चन्द्रोदयवत्याम्। एवं पिण्डपितृयज्ञादि।

"सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्म्मणि"॥

इत्यस्य पिण्डान्वाहार्य्यकार्य्यव्यतिरिक्तविषयत्वे प्रमाणाभावाच्चेति। तदेवममावास्याद्वैधे सिनीवाल्यां श्राद्धमिति सिद्धम्।

अस्यापवादो बौधायनेनोक्तः।

मध्याह्नात् परतो यत्र चतुर्दश्यनुवर्त्तते।
सिनीवाली तु सा ज्ञेया पितृकार्य्ये तु निष्फला॥इति॥

वृहस्पतिरप्याह।

मध्याह्नाद्या त्वमावास्या परस्तात् संप्रवर्त्तते।
भूतविद्धा तु सा ज्ञेया न सा पञ्चदशी भवेत्॥

ततश्च।

भूतविद्धाममावास्यां मोहादज्ञानतोऽपि वा।
श्राद्धकर्म्माणि ये कुर्य्युस्तेषामायुः प्रहीयते॥

इत्येतत् काष्र्णाजिनिवचनमपराह्नप्रविष्टचतुर्दशीविद्धसिनीवालीविषयमेव व्याख्येयम्। अनेनाभिप्रायेणाह—

वृद्धमनुः।

यस्यामस्तं रविर्य्याति पितरस्तामुपासते।
तिथिन्तेभ्यो यतो दत्तस्त्वपराह्नः स्वयम्भुवा॥इति॥

अनेनापराह्नव्यापिनी चेत् सिनीवाली तर्ह्येव सा ग्राह्या। अन्यदा तु कुहूरेव ग्राह्येत्युक्तं भवति।

तदाह हारीतः।

अपराह्नः पितृणान्तु यापराह्नानुयायिनी।
सा ग्राह्या पितृकार्य्ये तु न पूर्व्वास्तानुयायिनी॥

एवमपराह्नव्यापिन्याः सिनीवाल्याः पितृकार्यार्थं ग्रहणे सिद्धे पूर्वाह्नव्यापिन्याश्चापराह्नव्यापकत्वेऽस्यावश्यकत्वात् सिद्धे तस्या अपि ग्रहणे पुण्यतमत्वं प्रतिपादयितुमाह बौधायनः।

घटिकैकाप्यमावास्या पूर्वाह्नव्यापिनी यदि।
भूतविद्धैव सा कार्य्या पित्र्ये कर्म्मणि सर्व्वदा॥इति॥

अमुमेवार्थं प्रकारान्तरेणाह जाबालः।

प्रतिपत्स्वप्यमावास्या पूर्वाह्नव्यापिनी यदि।
भूतविद्धैव सा कार्य्या पित्र्ये कर्म्मणि सर्व्वदा॥इति॥

पूर्व्वदिने पूर्व्वाह्ण एव प्रवृत्ता परदिने पूर्व्वाह्ण एव समाप्यते तदा सिनीवाल्येव कर्तव्या इत्यर्थः।
यत्तु हारीतवचनं—

तुलामकरमीनेषु कन्यायां मिथुने तथा।
भूतविद्धाप्यमावास्या पूज्या भवति यत्नतः ॥इति॥

तत् व्रतोपवासादिविषयमिति मन्यन्ते।

अथ यथोक्तसिनीवालीपरित्यागेन कुहूग्रहणपराणि दृश्यन्ते तत्र कैश्चिन्निबन्धकारैर्हारीतनाम्ना वचनं लिखितम्।

पूर्वाह्णे चेदमावास्यापराह्णे न भवेद्यदि।
प्रतिपद्यपि कर्तव्यं श्राद्धं श्राद्धविदो विदुः ॥इति॥

अत्र हरिहरेणोक्तम्।

अनिर्ज्ञातमूलमिदं वचनं परस्परव्याहतपदोपबन्धञ्चेति। तथाहि—पूर्व्वाह्णे चेदित्येतावत् प्रतिपद्दिनविषयम्। पूर्वाह्णश्च दिवसस्य तृतीयभागो वा पूर्वार्द्धं वा। एवं च सति सर्वथा कस्मिंश्चिदपराह्णे न भवेदित्येतन्न युज्यते। प्रतिपद्दिने पूर्वाह्णमात्रावस्थितायाश्चतुर्दशीदिनेऽपराह्णसम्बन्धावश्यकत्वात्। षट्घटिकाधिकस्य तिथिह्रासस्याभावात्।

अथ यदि प्रतिपद्दिनापराह्ण एव न भवेदित्युच्यते तर्हि पूर्वाह्णे चेदित्यनर्थकं स्यात्।

अथ यदि पूर्वाह्णशब्दस्य मुख्यार्थमभ्युपेत्य कश्चिदविरुद्धोऽर्थः कल्प्यते तदा स्मृतिमहार्णवे तु कल्पितः।

तथाहि—

तिथिवृद्धौ प्रतिपद्युक्तायाममावास्यायां श्राद्धमुक्तम्। तच्च पितृयज्ञं निर्व्वर्त्त्येत्यादिना पिण्डपितृयज्ञानन्तरमेव मनुना विहितम्। पिण्डपितृयज्ञश्चाहत्य श्रुत्यापराह्णेविहितो नान्यथा कर्तुं शक्यः। तस्य च तिथेरेककालत्वात्तेनैव सकलापराह्णव्याप्तावमावास्याश्राद्धस्य का गतिरित्यत उक्तं पूर्वाह्ण इति नापराह्णे कृत्स्न इत्यर्थः। तदा प्रतिपद्यपि पिण्डान्वाहार्य्यकं कर्तव्यमिति।

स्मृतिचन्द्रिकाकारस्त्वाह।

यत्र पूर्व्वेद्युश्चन्द्रादर्शनासम्भवेन पिण्डपितृयज्ञोत्कर्षस्तत्र प्रतिपदि पिण्डपितृयज्ञविधानार्थमिति।

इदन्तु व्याख्यानमपरिस्फुटार्थं मन्दञ्चेत्युपेक्ष्यते। अथान्यान्यपि हरिहरेण कुहूग्रहणपराण्येवानिर्ज्ञातकर्तृत्वेन महार्णवलिखितत्वेन चोपालभ्य कैश्चिदुक्तानीत्युक्त्वोपन्यस्तानि।

अरुणोदयवेलायाममावास्या यदा भवेत् ।
स कालः परमो ज्ञेयः पितृणां दत्तमक्षयम् ॥
घटिकैका त्वमावास्या प्रतिपत्सु न चेत् तदा ।
भूतविद्धा तु सा कार्य्या दैवे पित्र्ये च कर्म्मणि ॥
मुहूर्तमप्यमावास्या प्रतिपद्यपि चेद्भवेत् ।
तदा तदुत्तमं ज्ञेयं पर्व्वशेषन्तु पर्व्ववत् ॥इति॥

अत्रारुणोदयवेलायामित्येतत्सामान्यप्रवृत्तं विशेषोल्लेखप्रवृत्तबाधायासमर्थम् । अतः कस्मिंश्चिच्छ्राद्धविशेषे प्रवर्त्तते ।

पित्र्ये कर्मणीदमस्तु । एवमन्यदपि मुहूर्तमप्यमावास्येत्येतत् तुलापुरुषादि-दानविषयम् ।

अथवा ।

त्रिमुहूर्तापि कर्त्तव्या पूर्व्वा दर्शा च बह्वृचैः ।
कुहूरध्वर्युभिः कार्य्या यथेष्टं सामगायिभिः ॥

इत्येतद्वचनानुसारिणी व्यवस्थास्तु ।

—०—

अथ कुतपव्याप्तिप्रयुक्तपूर्व्वापरामावास्याग्रहणपराणि ।

तत्र हारीतः ।

भूतविद्धाप्यमावास्या प्रतिपन्मिश्रितापि वा ।
पित्र्ये कर्म्मणि विद्वद्भिर्ग्राह्या कुतपकालिकी ॥इति॥

स्मृत्यन्तरेऽपि ।

मध्याह्नव्यापिनी या तु तिथिः पूर्व्वापरापि वा ।
तदहः कर्म्म कुर्वीत ह्रासवृद्धी न कारणम् ॥इति॥

आह प्रचेताः ।

सिनीवाली कुहूश्चैव श्रुत्युक्ते श्राद्धकर्म्मणि ।
स्यातां न चेत्तु मध्याह्ने[१] श्राद्धादि स्यात् कथं तदा ॥
तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूर्मता ।
साम्येति च कुहूर्ज्ञेया वेद-वेदाङ्ग-वेदिभिः ॥इति॥

अत्र श्राद्धाङ्गत्वेन कुतपोऽपराह्णश्च विहितः ।

---

[१]. स्यातां यदि न मध्याह्ने इति ।

तत्र येऽपराह्णमाद्रियन्ते यत्र पिण्डपितृयज्ञपिण्डान्वाहार्य्यकादिकं विशेषतोऽपराह्णे विहितं ते च तच्चापराह्णव्याप्तिं पुरस्कृत्य सिनीवाल्यां कुह्वां वा श्राद्धं कुर्य्युः।

ये तु कुतपमाद्रियन्तेऽनग्निकादयः यच्च विशेषतः कुतपविहितमेकोद्दिष्टमामश्राद्धादि ते तच्च कुतपव्याप्तिं पुरस्कृत्य पूर्व्वस्यां परस्यां वा अमावास्यायां श्राद्धं कुर्य्युः। तदा विहितकालसमुच्चयो लभ्यते। तथा च स्मृतिः।

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्॥इति॥

अत्र येऽन्येऽपि केचन सिनीवालीनिषेधास्ते तिथिवृद्धिविषयत्वेनानग्निकविषयत्वेनापराह्णव्याप्तिराहित्यविषयत्वेन दानादिविषयत्वेनापवादत्वेनोपसंहारत्वेन कल्पसूत्रविभागेन वा सति सम्भवे व्याख्येयाः।

कुहूविषयोऽप्येवं न तु सहसा विहितप्रतिषिद्धत्वेन विकल्पोऽभ्युपेयः।

श्रुतिद्वैधं तु यत्र स्यात् तत्र धर्मावुभौ स्मृतौ।
स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक् पृथक्॥

इत्यमावास्यानिरूपणम्।

अथाष्टकाः।

अष्टकाशब्देन मार्गशीर्षादिमासचतुष्टयापरपक्षाष्टम्यः।

"हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका" इति शौनकस्मरणात्। केषाञ्चिन्मते तिस्र एवाष्टकास्तिस्रश्चान्वष्टकाः।

तथा च विष्णुः।

अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टका इति।

अष्टकानामनुपश्चाद्भवन्तीत्यन्वष्टकाः। अष्टकानामुपरितना नवम्यः।

कूर्म्मपुराणे।

अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु।
तिस्रश्चान्वष्टकाः पुण्या माघी पञ्चदशी तथा॥इति॥

विष्णुधर्म्मोत्तरे।

अग्रहायण्यतिक्रान्तौ कृष्णास्तिस्रोऽष्टकास्तथेति।

अथ पूर्व्वोक्ताष्टकाचतुष्टयव्यतिरिक्तापि भाद्रपदापरपक्षेऽष्टका। तस्याश्चेतिहासपूर्व्वकमुत्पत्तिः प्रशंसा चोच्यते।

पद्मपुराणे।

अग्निष्वात्ता इति ख्याता यज्वानो यज्ञसंस्थिताः।
अच्छोदा नाम तेषान्तु मानसी कन्यका मता[१]॥

---

[१] नदीति।

तमथामावसुं नाम पितरं वीक्ष्य साङ्गना।
वव्रे वरार्थिनी सङ्गं कुसुमायुधपीडनात्[१]॥
योगाद्भ्रष्टा तु तेनाथ व्यभिचारेण भामिनी।
धरान्न स्पृशते पूर्व्वं पपाताथ भुवस्तले॥
अच्छोदाधोमुखी दीना लज्जिता तपसः क्षयात्।
सा पितॄन् प्रार्थयामास पुनरात्मसमृद्धये॥
विलप्यमाना पितृभिरिदमुक्ता तपस्विनी।
इदमूचुर्म्महाभागाः प्रसादं शुभया गिरा॥
अष्टाविंशे भवित्री तु द्वापरे मत्स्ययोनिजा।
नाम्ना सत्यवती ख्याता व्यासस्य जननी शुभा॥
व्यतिक्रमात् पितॄणां त्वं कष्टं कुलमवाप्स्यसि।
तस्माद्राज्ञो वसोः कन्या त्वमवश्यं भविष्यसि॥
प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यसि।
आयुरारोग्यदा नित्यं सर्व्वकामफलप्रदा॥

ब्रह्मवैवर्त्तवायुपुराणयोः।

अथ कालं प्रवक्ष्यामि श्राद्धकर्म्मणि पूजितम्।
काम्यनैमित्तिकाजस्रश्राद्धकर्म्मविधायिभिः॥
पुत्रदा धर्म्ममूलं[२] स्युरष्टकास्तिस्र एव च।
कृष्णपक्षे विशिष्टा[३] हि पूर्व्वा चैन्द्री उदाहृता[४]॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदैविकी[५]।
आद्यापूपैः सदा कार्य्या मांसैरन्या भवेत्तदा॥
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः।
अष्टका च पितॄणां वै नित्यमेव विधीयते॥
या वाप्यन्या चतुर्थी स्यात्ताञ्च कुर्य्याद्विशेषतः।
तासु श्राद्धं बुधः कुर्य्यात् सर्व्वस्वेनापि नित्यशः॥
परत्रेह च सर्व्वेषु नित्यमेव सुखी भवेत्।
पूजकानां सदोत्कर्षो नास्तिकानामधोगतिः॥
पितरः सर्व्वकालेषु तिथिकालेषु देवताः।
सर्व्वे पुरुषमायान्ति निपानमिव[६] धेनवः॥
यस्य ते प्रतिगच्छेयुरष्टकाभिरपूजिताः।
मोघस्तस्य भवेल्लोको लब्धश्चास्य विनश्यति॥
देवांस्तु दायिनो यान्ति तिर्य्यग्गच्छन्त्यदायिनः।

अत्र चतुर्थी फाल्गुनकृष्णपक्षाष्टमी।

---

१. कुसुमायुद्धपीडितेति।
२. पित्र्यदानाय मूले इति।
३. वरिष्ठा इति।
४. विभाव्यते इति।
५. वैश्वदेविकीति।
६. निपानस्येवेति।

"हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाष्टमी" इति शौनकस्मरणात्।

पौषमासकृष्णाष्टमीमारभ्य तिस्रोऽष्टका इत्येतन्मतपरिग्रहे चतुर्थी भाद्रपदापरपक्षाष्टमीसन्निहिता दर्शिता पद्मपुराणे इतिहासानुसारात्।

ब्रह्मपुराणे च।

चतसृष्वष्टकासु क्रमेणाधिदेवतानिरूपणे पितृतर्पणद्रव्यनिरूपणे च भाद्रपदापरपक्षाष्टम्या ग्रहणात्।

ऐन्द्रयान्तु प्रथमायाञ्च शाकैः सन्तर्पयेत् पितॄन्।
प्राजापत्या द्वितीया स्यान्मांसैः शुद्धैश्च तर्पयेत्॥
वैश्वदेव्यां तृतीयायामपूपैश्च यथाक्रमम्।
वर्षासु मध्ये शाकैश्च चतुर्थ्यामेव सर्व्वदा॥इति॥

अत्र शाकमांसापूपशब्दाः श्राद्धे विहितस्य सर्व्वस्यापि भोज्यस्य तत्तद्द्रव्यप्रधानत्वप्रतिपादनपराः न तु द्रव्यान्तरनिवृत्तिपराः। यतो विधेरेकविध्यन्तराबाधेनैव तावद्गतिं न्याय्यां मन्यन्ते, किमु बहुतरविध्यन्तराबाधेन दृष्टाविरोधेन च। दृष्टं हि शाकप्रधानस्य भोज्यस्य तर्पकत्वं न तु केवलस्य शाकस्येति।

आह वशिष्ठः।

"श्रावण्याग्रहायण्योश्चाष्टकासु पितृभ्यो दद्यात्"। अष्टकान्वष्टकास्वपि चावश्यकमेव श्राद्धम्।

यदाह पितामहः।

अमावास्याव्यतीपात पौर्णमास्यष्टकासु च।
विद्वान् श्राद्धमकुर्व्वाणो नरकं प्रतिपद्यते॥ इति॥

वायुपुराणे "तिर्य्यग्गच्छन्त्यदायिनः" इत्यष्टकाश्राद्धमकुर्व्वाणस्य तिर्य्यग्योनिप्राप्तिरूपानिष्टाभिधानाच्च।

विष्णुना अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकाः माघी प्रौष्ठपद्यूर्द्ध्वं कृष्णत्रयोदशी व्रीहियवपाकोवेत्यनुक्रम्योक्तम्।

एतांश्च श्राद्धकालान् वै नित्यानाह प्रजापतिः॥इति॥

विष्णुधर्म्मोत्तरे।

श्राद्धकालममावास्या नित्यं पार्थिवसत्तम।
पौर्णमासी तथा माघी श्रावणी च नृपोत्तम॥
प्रौष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी।
आग्रहायण्यतिक्रान्तौ कृष्णास्तिस्रोऽष्टकास्तथा॥
शाकैश्च प्रथमा कार्य्या मांसैश्च तदनन्तरा।
तृतीया च तथापूपैर्नित्यमेव विजानता॥
एतानि श्राद्धकालानि नित्यान्याह प्रजापतिः।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते॥इति॥

देवलः ।

मनुना श्राद्धकल्पोऽयं मानवः समुदाहृतः ।
वहुपिण्डाष्टका तु स्यादेकपिण्डा तु नाष्टका ॥इति॥

अत्र वहुपिण्डैकपिण्डशब्दौ पार्व्वणैकोद्दिष्टविधिनिषेधपरौ ।

ब्रह्मपुराणे ।

अष्टकासु च कर्त्तव्यं श्राद्धं हैमन्तिकासु वै ।
अन्वष्टकासु क्रमशो मातृपूर्व्वं तदिष्यते ॥इति॥

अत्र स्मृतिः ।

अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरं तथा ।
मातृश्राद्धं पृथक् कुर्य्यादन्यत्र पतिना सह ॥इति॥

शङ्खस्मृतिः ।

अन्वष्टका तथा मातुः श्राद्धञ्चैव मृताहनि ।
एकोद्दिष्टं तथा मुक्त्वा स्त्रीषु नान्यत् पृथग् भवेत् ॥इति॥

विष्णुधर्म्मोत्तरेचास्मिन् मातृश्राद्धे कर्षूविधिरुक्तः ।

अन्वष्टकासु च स्त्रीणां श्राद्धं कार्य्यं तथैव च[१] ।
अष्टकाविधिना हुत्वा क्रमेणैतासु पञ्चकम् ॥
मात्रे राजन् पितामह्यै श्राद्धं कार्य्यं यथाविधि ।
तथैव प्रपितामह्यै वैश्वदेवपुरःसरम् ॥
पिण्डनिर्व्वपणं कार्य्यं तस्यैव पितृवन्नृप ।
भुक्तवत्सु तु विप्रेषु तत्र कार्य्यं[२] निबोध मे ॥
प्रादेशमात्रा राजेन्द्र चतुरङ्गुलमायताः ।
तावदेव समुत्सेधाः षट्कर्षूस्तत्र कारयेत् ॥
प्रत्येकं कर्षूमूले तु परिस्तीर्य्य हुताशनम् ।
अग्नीसोमयमानाञ्च यागं कृत्वा यथापुरा ॥
कर्षूत्रितयमूले तु पुरुषाणान्तु कारयेत् ।
पितृनिर्व्वपणं प्राग्वदेकैकस्मिन् यथाविधि ॥
कर्षूणां त्रितयं तच्च क्षीरान्नाभ्यां प्रपूरयेत् ।
कर्षूत्रितयमूले च स्त्रीणां निर्व्वपणं भवेत् ॥
दध्ना मांसेन पयसा कर्षूणाञ्चैव पूरणम् ।
अन्नोदकविमिश्रेण कार्य्यं मनुजपुङ्गव ॥
भवतीभ्यो भवत्वेतदक्षय्यमिति न त्यजेत् ॥

इत्यष्टकानिरूपणम् ।

---

१. तथाविधीति । २ कर्म्मेति ।

अथ वृद्धिश्राद्धम् ।

वृद्धिर्नाम पुत्रजन्मादिनिमित्तोपलक्षितः कालः ।

तथा च वृद्धवशिष्ठः ।

पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतम् ।।इति।।

जाबालिः ।

यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः ।
पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत् ।।इति।।

विष्णुपुराणे ।

जातस्य जातकर्म्मादि क्रियाकाण्डमशेषतः ।
पुत्रस्य कुर्व्वीत पिता श्राद्धञ्चाभ्युदयात्मकम् ।।

कात्यायनः ।

स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्म्मसु ।
पिण्डानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात् ।।इति।।

अथ संस्कारः ।

गर्भाधान - पुंसवन-सीमन्तोन्नयन - जातकर्म-नामकरण - निष्क्रमण-अन्नप्राशन चौड़ोपनयन-व्रतचर्य्याध्ययन-समावर्त्तन-विवाहयज्ञदानादि ।

तत्रैतेषु सुतसंस्कारेषु पिता स्वपितृभ्यो दद्यात् । शेषेषु संस्कारेषु स्वयमेवाधिकारीत्येतद्विस्तरेणोक्तमेवाधिकारनिरूपणे ।

विष्णुपुराणे ।

कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः ।
नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा ।।
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ।।

पुत्रादिमुखदर्शने पुत्रजन्मनीत्यर्थः ।

ब्रह्मपुराणे ।

कर्म्मण्यथाभ्युदयिके मङ्गल्ये चातिशोभने ।
जन्मन्यथोपनयने विवाहे पुत्रकस्य च ।।
पितॄन्नान्दीमुखान्नाम तर्पयेद्विधिपूर्व्वकम् ।

वशिष्ठः ।

पूर्व्वेद्युर्मातृकं श्राद्धं कर्म्माहे पैतृकं तथा ।
उत्तरेद्युः प्रकुर्व्वीत मातामहगणस्य तु ।।

वृद्धशातातपः ।

पृथग्दिनेष्वशक्तश्चेदेकस्मिन् पूर्व्ववासरे ।
श्राद्धत्रयं प्रकुर्व्वीत वैश्वदेवञ्च तान्त्रिकम् ॥

एकस्मिन्नपि दिने क्रियमाणानां कालभेदेनानुष्ठानं कार्य्यमित्याह शातातपः ।

पूर्वाह्णे मातृकं श्राद्धमपराह्णे च पैतृकम् ।
ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम् ॥

एवंविधस्यापि कालभेदस्यासम्भवे आह वृद्धमनुः ।

अलाभे भिन्नकालानां नान्दीश्राद्धत्रयं बुधः ।
पूर्व्वेद्युर्वै प्रकुर्व्वीत पूर्व्वाह्णे मातृपूर्व्वकम् ॥

बौधायनसूत्रे ।

वेदकर्म्माणि प्रयोक्ष्यन् पूर्व्वेद्युरेव युग्मान् ब्राह्मणान् भोजयेदिति । नान्दीमुखा-एवैते उक्ता भवन्ति । नैकाहेन पित्र्यं दैवञ्च कुर्व्वन्ति । यस्यैकाह्ना पित्र्यं दैवञ्च कुर्व्वन्ति प्रजा अस्य प्रमायुका भवन्ति । तस्मात् पितृभ्यः पूर्व्वेद्युः करोति पितृभ्य-एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुत इति ब्राह्मणमप्यत्र पूर्व्वमुपन्यस्तम् ।

सकलश्राद्धकालोद्देशस्थानीये याज्ञवल्क्यवचने वृद्धिशब्दस्याशेषनान्दीमुखश्राद्ध-कालोपलक्षणपरत्वात् कर्म्माङ्गश्राद्धकाला अपि संगृहीताः ।

तेनाह पारस्करः ।

निषेककाले सोमे च सीमन्तोन्नयने तथा ।
ज्ञेयं पुंसवने श्राद्धं कर्म्माङ्गं वृद्धिवत्कृतम् ॥

निषेककालः षोडशरात्रात्मको भार्याया ऋतुकालः । तत्र पुण्यनक्षत्रान्विते गर्भाधानाख्यकर्म्माङ्गश्राद्धं कार्य्यम् । सोमशब्दोऽत्राग्निहोत्रादिकर्म्मणामुपलक्षणार्थः ।

इति वृद्धिश्राद्धनिरूपणम् ।

अथ कृष्णपक्षः ।

तत्र वाजसनेयसूत्रे कात्यायनः ।

अपरपक्षे श्राद्धं कुर्वीतोद्ध्वं वा चतुर्थ्या यदहः सम्पद्येतेति । अपरपक्षे प्रतिपत्-प्रभृत्यमावास्यान्ते कृष्णपक्षे ऊद्ध्वं वा चतुर्थ्या यस्मिन् वा अहनि श्राद्धसाधनसम्पत्ति-स्तस्मिन्नहनि श्राद्धं कुर्व्वीतेति ।

गौतमोऽपि ।

अमावास्यायां पितृभ्यो दद्यात् पञ्चमीप्रभृति वापरपक्षस्य यथाश्रद्धं सर्व्वस्मिन् वा द्रव्य-देश-ब्राह्मणसम्भवे कालनियमः शक्तित इति । अपरपक्षे एकस्मिन्नहनि श्राद्ध-मित्येकः पक्षः । प्रत्यहमित्यपरः । कालनियमः शक्तित इति तृतीयः । यथा सामर्थ्यं कालव्यवस्थेत्यर्थः ।

अत्र नित्यं श्राद्धम् ।

तथा च कात्यायनः ।

"शाकेनापि नापरपक्षमतिक्रामेत्" इति ।

यत्तु मार्कण्डेयपुराणादिषु—

"प्रतिपद्धनलाभाय द्वितीया पशुसम्पदे"

इत्यादिभिर्वचनैरपरपक्षान्तर्गतासु तिथिषु प्रत्येकं फलसम्बन्ध उक्तो न तेनापरपक्षे श्राद्धस्य नित्यता हीयते । दर्शपूर्णमासवन्नित्यत्व-काम्यत्वयोरुपपत्तेः । यदापि चैतदेकस्मिन्नेवाहनि क्रियते तदाप्यमावास्याश्राद्धात् पृथगेव कार्य्यम् ।

"अमावास्याष्टका वृद्धिः कृष्णपक्षः"

इत्यत्र याज्ञवल्क्यवचने अमावास्यातः कृष्णपक्षस्य पृथगुपन्यासात् । अनेन यदत्र कैश्चिदुक्तं, अमावास्यादिश्राद्धेन सहापरपाक्षिकंश्राद्धं विकल्पत इति तदपास्तम् ।

यत्तु निगमस्मरणम्—

"अपरपक्षे यदहः सम्पद्येतामावास्यायां विशेषेणेति;"

तत् पृथक्कृत्वापृथक्कृत्वोभयपक्षाविरोधीति न विकल्पे प्रमाणमिति स्मृतिचन्द्रिकाकारः ।

केचित्तु विकल्पमेव मन्यन्ते ।

आह आपस्तम्बः ।

"मासि मासि कार्य्यमपरपक्षस्यापराह्णः श्रेयांस्तथापरपक्षस्य जघन्यान्यहानीति" जघन्यानि दशम्यादीनि ।

नैतत् पूर्व्वेषां नवम्यादीनामश्रेयस्त्वाभिधानार्थं किन्तु पूर्व्वेभ्यः परेषां श्रेष्ठतमत्वप्रतिपादनार्थम् । तदेतच्चतुर्दशीं वर्जयन्नाह मनुः ।

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ।।इति।।

अत्र चतुर्दशी नात्यन्तं वर्जनीया किन्तु शस्त्रादिहतव्यतिरिक्तदैवत्यश्राद्ध एवेत्याह याज्ञवल्क्यः ।

प्रतिपत् प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।
शस्त्रेण तु हता ये वै तेषां तत्र[१] प्रदीयते ।।इति।।

शस्त्रग्रहणमन्येषामपि केषाञ्चिन्मरणकारणानामुपलक्षणार्थमिति वक्ष्यते ।

अथ भाद्रपदापरपक्षः ।

अत्र यद्यप्यपरपक्षे श्राद्धं कुर्वीत, शाकेनापि नापरपक्षमतिक्रामेदित्यादिभिर्द्वादशापरपक्षग्राहकैः सामान्यवचनैः भाद्रपदापरपक्षोऽपि गृहीत एव । तथापि तस्य

---

१. तेभ्यस्तत्रेति ।

पुण्यतमत्वप्रतिपादनार्थं तदतिक्रमे प्रत्यवायप्रतिपादनार्थञ्च स्मृतिपुराणादिषु विशेषतस्तस्याभिधानं कृतम् ।

तद्यथा विष्णुधर्म्मोत्तरे ।

उत्तरादयनाद्राजन्[1] श्रेष्ठं स्याद्दक्षिणायनम् ।
याम्यायनाच्चतुर्म्मासं तत्र सुप्ते तु केशवे[2] ॥
प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः ।
पञ्चम्यूद्ध्र्वन्तु तत्रापि दशम्यूर्द्धन्ततोप्यति ।
मघा युक्ता तु तत्रापि शस्ता राजंस्त्रयोदशी ॥इति॥

उत्तरायणाद्दक्षिणायनं श्राद्धकरणे श्रेष्ठम् । सर्व्वस्माद्दक्षिणायनादपि तन्मध्यवर्त्युपेन्द्रनिद्रादिनादाषाढ्याः पौर्णमास्याः प्रभृति मासचतुष्टयं श्रेष्ठम् । तस्मादपि सर्व्वस्मात् प्रौष्ठपदस्य मासस्यापरपक्षः । तत्रापि पञ्चम्या ऊद्ध्र्वं दशदिवसाः, तत्रापि दशम्या उद्ध्र्वं पञ्च । तत्रापि मघायुक्ता त्रयोदशीति ।

ब्रह्मपुराणे ।

आश्वयुक्कृष्णपक्षे तु श्राद्धं कार्य्यं दिने दिने[3] ।
त्रिभागहीनं पक्षं वा त्रिभागन्त्वर्द्धमेव वा ॥
श्यामाकैस्तु विशेषेण प्रसिद्धैस्तु पितृप्रियैः ।

अत्र विष्णुधर्म्मोत्तरे । प्रौष्ठपदमाससम्बन्धिनि कृष्णपक्षे श्राद्धमित्युक्तम् । ब्रह्मपुराणे तु आश्वयुङ्मास सम्बन्धिनीति, सोयमनयोर्विसंवादः परिह्रियते । तथाहि ।

इह खलु शुक्लपक्षप्रतिपदुपक्रम्य मासनामप्रवर्त्तिकां पौर्णमासीं मध्यावयवीकृत्यामावास्यान्तं चान्द्रमासं दाक्षिणात्याः परिकल्पयन्ति । औत्तरास्तु—कृष्णपक्षप्रतिपदुपक्रम्य नामप्रवर्त्तकपौर्णमास्यन्तम् । एवं च सति दाक्षिणात्यव्यवहारेण प्रौष्ठपदयुक्तायां पौर्णमास्यां प्रौष्ठपदामावास्याद्यपक्षसमाप्तौ तदुत्तरः पक्षः प्रौष्ठपद्यो भवति । उत्तरव्यवहारेण तु तस्यामेव पौर्णमास्यां प्रौष्ठपदमाससमाप्तौ तदुत्तरः पक्षः आश्वयुङ्मासमध्ये भवतीत्येक एव व्यवहारद्वयेन व्यपदेशद्वयं लभते ।

आदित्यपुराणे ।

प्रावृड्ऋतौ यमः प्रेतान् पितॄंश्चाथ यमालयात् ।
विसर्जयति मानुष्ये कृत्वा शून्यं स्वकं पुरम् ॥
क्षुधार्त्ताः कीर्त्तयन्तश्च दुष्कृतं ते स्वयंकृतम् ।
काङ्क्षन्ति पुत्रपौत्रेभ्यः पायसं मधुसंयुतम् ॥
तस्मात्तांस्तत्र विधिना तर्पयेत् पायसेन तु ।
मध्वाज्यतिलमिश्रेण तथा शीतेन चाम्भसा ॥

---

१. श्राद्ध इति । २. चातुर्मास्यञ्च तत्रापि प्रसुप्ते केशवे हितमिति ।
३. कुर्य्याद्दिने दिने इति ।

ग्रासमात्रं परगृहादन्नं यः प्राप्नुयान्नरः।
भिक्षामात्रेण यः प्राणान् सन्धारयति वा स्वयम्॥
यो वा सन्धारयेद्देहं प्रत्यहं स्वात्मविक्रयात्।
श्राद्धं तेनापि कर्तव्यं तैस्तैर्द्रव्यैः सुसञ्चितैः॥इति॥

नागरखण्डे पितॄन् प्रति ब्रह्मवचनम्।

आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे॥
तस्य संवत्सरं यावत् तृप्ताः स्युः पितरो ध्रुवम्।

शाट्यायनिरप्याह।

नभस्यस्यापरे पक्षे तिथिषोडशकस्तु यः।
कन्यागतान्वितश्चेत् स्यात् स कालः श्राद्धकर्म्मणि॥

ब्रह्मपुराण-मार्कण्डेयपुराणयोः।

दिव्यभौमान्तरिक्षाणि स्थावराणि चराणि च।
पिण्डमिच्छन्ति पितरः कन्याराशिगते रवौ॥
कन्यागते सवितरि यान्यहानि तु षोडश।
क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत्॥
राजसूयाश्वमेधाभ्यां य इच्छेद्दुर्लभं फलम्।
अप्यम्बुशाकमूलान्नैः पितॄन् कन्यागतेऽर्च्चयेत्॥

यद्यपि कन्यागते मासमात्रं भवति तथाप्यपरपक्षस्यैव पैत्र्यत्वाद्वचनान्तर-संवादाच्च तत्रैव श्राद्धमित्यनुसन्धेयम्।

आदित्यपुराणे।

कन्यागते सवितरि यान्यहानि तु षोडश।
क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयम्॥इति॥

अत्र यद्यपि बहुषु वचनेषु पक्षस्यैव श्राद्धकालत्वमुक्तं, पक्षश्चपञ्चदशतिथ्यात्मक-एव। तथापि कदाचित् तिथिवृद्धौ षोडशदिनात्मको भवति। तत्रैकदिनहानिर्म्मा-भूदित्यनेनाभिप्रायेणात्र तिथिषोडशक इत्युक्तम्।

अमावास्योत्तरां प्रतिपदमपि वा संग्रहीतुं पूर्व्वां पौर्णमासीं वा, तस्यां हि नान्दी-मुखानां श्राद्धं वक्ष्यते। अत्र पक्षमध्ये यस्मिन् कस्मिंश्चिदप्यहनि कन्यासंक्रमे सति प्रतिपदादिषोडशाप्यहान्युपादेयानि। न तु संक्रमणात् पूर्वाणि हेयानीत्येवं वेदितव्यम्। अतएवाह वृहन्मनुः।

मध्ये वा यदि वाप्यन्ते यत्र कन्यां रविर्व्रजेत्।
स पक्षः सकलः पूज्यः श्राद्धं तत्र विधीयते॥

अत्र कन्यागतत्वस्योक्तिः प्रशस्ततरत्वप्रतिपादनार्था, न तु कन्यागतत्वराहित्ये तत्परित्यागार्था ।

तथा चादित्यपुराणे ।

पक्षान्तरेऽपि कन्यास्थे रवौ श्राद्धं प्रशस्यते ।
कन्यागते पञ्चमे तु विशेषेणैव कारयेत् ॥
आषाढीमवधिं कृत्वा यः स्यात् पक्षस्तु पञ्चमः ।
श्राद्धं तत्र प्रकुर्वीत कन्याङ्गच्छति वा न वा ॥इति॥

कार्ष्णाजिनिः ।

पुत्रानायुस्तथारोग्यमैश्वर्य्यमतुलं तथा ।
प्राप्नोति पञ्चमे दत्वा श्राद्धं कामांश्च पुष्कलान् ॥

एवं भाद्रपदापरपक्षे कृते विशिष्टेष्टप्राप्तिरुक्ता । तस्मिन्नकृतेत्वनिष्टप्राप्तिमाह कार्ष्णाजिनिः ।

प्रेतास्तञ्चैव हिंसन्ति पञ्चमं यो व्यतिक्रमेत् ।
तस्मान्नातिक्रमेद्विद्वान् पञ्चमे पैतृकं विधिम् ॥

नागरखण्डे ।

आषाढ्याः पञ्चमे पक्षे यः श्राद्धं न करिष्यति ।
शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपेष्यति ॥
आसनं शयनं भोज्यं स्पर्शनं भाषणं तथा ।
तेन सार्द्धं न कर्त्तव्यं हव्यं कव्यं कदाचन ॥
ये न श्राद्धं करिष्यन्ति ते ते पापतरा नराः ।
भविष्यन्ति न सन्देहः सन्तत्या च विवर्जिताः ॥
न सुखं धनधान्यञ्च तेषां भावि कदाचन ॥इति॥

ब्रह्मपुराणे ।

सूर्य्ये कन्यागते कुर्य्यात् श्राद्धं यो न गृहाश्रमी ।
धनं पुत्राः कुतस्तस्य पितृनिःश्वासपीडया ॥
न सन्ति पितरश्चेति कृत्वा मनसि यो नरः ।
श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते ॥

अथ केनचित् प्रकारेण श्राद्धमन्तरेणैवोक्तस्य पक्षस्यातिक्रमे तन्निमित्तस्य श्राद्धस्य तदुत्तरदिनेष्ववधिविशेषावच्छिन्नेषु कर्तव्यतोच्यते ।

यमस्मृतौ ।

हंसे श्राद्धन्तु कन्यास्थे शाकेनापि गृहे वसन् ।
पञ्चम्योरन्तरे दद्यादुभयोरपि पक्षयोः ॥

हंसः सूर्य्यः। उभयपक्षपञ्चम्योरन्तर इति भाद्रपदकृष्णपञ्चम्याः परस्तादाश्विनशुक्लपञ्चम्याः पूर्व्वमन्तरालकाल इत्यर्थः। अनेनाश्विनशुक्लपञ्चमीपर्य्यन्तं श्राद्धमभ्यनुज्ञातं भवति।

ब्रह्मपुराणे।

यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः।
तावच्छ्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा॥

तथा।

कन्यागते सवितरि पितरो यान्ति वै सुतान्।
शून्या प्रेतपुरी सर्व्वा यावद्वृश्चिकदर्शनम्॥
ततो वृश्चिकसम्प्राप्ता निराशाः पितरो गताः।
पुनश्च भवनं यान्ति शापं दत्वा सुदारुणम्॥

नागरखण्डे।

न ददाति नरः श्राद्धं पितॄणां चन्द्रसङ्क्षये।
क्षुत्पिपासापरीताशाः पितरस्तस्य दुःखिताः॥
प्रेतपक्षं प्रतीक्षन्ते[1] गुरुवाञ्छासमन्विताः।
कर्षका जलदं[2] यद्वद्दिवानक्तमतन्द्रिताः॥
प्रेतपक्षेऽप्यतिक्रान्ते यावत् कन्यागतो रविः।
तावच्छ्राद्धं प्रवाञ्छन्ति दत्तं वै पितरः सुतैः॥
ततस्तुलागतेऽप्येके सूर्य्ये वाञ्छन्ति पार्थिव।
श्राद्धं स्ववंशजैर्दत्तं क्षुत्पिपासासमाकुलाः॥
तस्मिन्नपि व्यतिक्रान्ते काले वृश्चिकगे रवौ।
निराशाः पितरो दीनास्ततो यान्ति निजालयम्॥
मासद्वयं प्रतीक्षन्ते[3] गृहद्वारं समाश्रिताः।
वायुभूताः पिपासार्त्ताः क्षुत्क्षामाः पितरो नृणाम्॥
यावत्कन्यागतः सूर्य्यः तुलास्थश्च महीपते।

सुमन्तुराह।

कन्याराशौ महातेजा यावत्तिष्ठेद्विभावसुः।
तस्मात् कालात्तु वै देयं वृश्चिकं यावदागमः॥
येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि।
तस्यां दद्यान्न चेद्दत्तं पितॄणां वै महालये॥

अत्र महालयो भाद्रपदापरपक्षः।

---

[1] परीक्षन्ते इति।

[2] कर्षुका हि जलमिति।

[3] परीक्षन्ते इति।

यत्तु जातूकर्ण्येनोक्तम्।

आकाङ्क्षन्ति स्वपितरः पञ्चमं पक्षमाश्रिताः।
तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निष्फलम्॥

इति तत् फलातिशयहानिपरं, न सर्व्वथा फलहानिप्रतिपादकम्।

—०—

अथात्र त्रयोदशीश्राद्धं प्रपञ्चेनोच्यते।

मनुस्मृतौ।

यत् किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्यात् वर्षासु च मघासु च॥

यमः।

गाथाश्च पितृभिर्गीताः कीर्त्तयन्ति पुराविदः।
अपि नः स्वकुले भूयात् यो नो दद्यात् त्रयोदशीम्॥
पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च।

अत्र पितृगीते गाथे भवतः।

विष्णुः।

अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः।
प्रावृट्काले सिते पक्षे त्रयोदश्यां समाहितः॥
मधूत्कटेन यः श्राद्धं पायसेन समाचरेत्।
कार्त्तिकं सकलं वापि प्रच्छाये कुञ्जरस्य च॥

पैठीनसिरप्याह।

छागेन सर्व्वलोहेन वर्षासु च मघासु च।
पुत्रो वा यदि वा पौत्रो यो नो दद्यात् त्रयोदशीम्॥
जायेत किमसौ कश्चिद्धार्मिको वंशवर्द्धनः॥

महाभारते।

अपि नः स्वकुले भूयात् यो नो दद्यात् त्रयोदशीम्।
मघासु सर्पिषा युक्तं पायसं दक्षिणामुखः॥

शङ्खलिखितौ।

पिता पितामहश्चैव तथैव प्रपितामहः।
जातं पुत्रं प्रशंसन्ति पिप्पलं शकुना इव॥
मधुमांसेन खड्गेन पयसा पायसेन वा।
एष दास्यति नः श्राद्धं वर्षासु च मघासु च॥

याज्ञवल्क्यः ।

यो ददाति[1] गयास्थश्च सर्व्वमानन्त्यमश्नुते ।
तथा वर्षात्रयोदश्यां मघासु च विशेषतः[2] ॥
प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं हि कर्त्तव्यं मधुना पायसेन च ॥

प्रशस्ततरा चैषा तिथिर्भाद्रपदापरपाक्षिकाभ्योऽपि तिथिभ्यः ।

तथा च ब्रह्मपुराणे ।

यो वा सम्बर्द्धयेद्देहं प्रत्यहं स्वात्मविक्रयात् ।
श्राद्धं तेनापि कर्त्तव्यं तैस्तैर्द्रव्यैः सुसञ्चितैः ॥
त्रयोदश्यां प्रयत्नेन वर्षासु च मघासु च ।
नास्मात्परतरः कालः श्राद्धेष्वन्येषु वर्त्तते ॥
यदत्र पितरो दत्तं गृह्णन्ति स्मृतमक्षयम् ।

मार्कण्डेयपुराणे ।

उत्तरादयनाद्राजन् श्रेष्ठं स्याद्दक्षिणायनम् ।
चातुर्म्मास्यन्तु तत्रापि प्रसुप्ते केशवेऽधिकम् ॥
प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः ।
पञ्चपूर्व्वन्तु तत्रापि दशपूर्व्वं ततोप्यति[3] ॥
मघायुक्ता च तत्रापि शस्ता राजन् त्रयोदशी ॥इति॥

अत्र पञ्चपूर्व्वं पञ्चमीमारभ्य, दशपूर्व्वं दशमीमारभ्येत्यर्थः । आवश्यकञ्चेदं श्राद्धमुक्तम् ।

विष्णुधर्म्मोत्तरे ।

श्राद्धकालममावास्या नित्यं पार्थिवसत्तम ।
पौर्णमासी तथा माघी श्रावणी च नृपोत्तम ॥
प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी ।
अष्टकान्वष्टकास्तिस्रस्तथैव च नृपोत्तम ॥
एतानि श्राद्धकालानि नित्यान्याह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥इति॥

विष्णुरपि । अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकाः । माघी प्रौष्ठपद्यूर्द्ध्वं कृष्णा त्रयोदशीत्युपन्यस्य एतानि श्राद्धकालानीत्यमुमेव श्लोकमुक्तवान् ।

अथात्र निषेधवचनानि ।

---

१. यद्ददातीति ।

२. न संशय इति ।

३. पञ्चम्यूद्र्ध्वन्तु तत्रापि दशम्यूद्र्ध्वं ततोप्यति, इति ।

ज्योतिर्बृहस्पतिः ।

कृष्णपक्षे त्रयोदश्यां यः श्राद्धं कुरुते नरः ।
पञ्चत्वं तस्य जानीयात् ज्येष्ठपुत्रस्य निश्चितम् ॥

षट्त्रिंशन्मते ।

गृही त्रयोदशीश्राद्धं न कुर्य्यात् पुत्रवानपि ।
उपवासञ्च संक्रान्तौ ग्रहणे चन्द्रसूर्य्ययोः ॥
त्रयोदश्यान्तु वै श्राद्धं न कुर्य्यात् पुत्रवान् गृही ।
नेष्यते चोपवासश्च कैश्चिदप्ययनद्वये ॥

आपस्तम्बः ।

त्रयोदश्यां बहुपुत्रो बहुमित्रो दर्शनीयापत्यो युवमारिणस्तु भवन्तीति ।

कात्यायनश्चाह ।

युवानस्तत्र म्रियन्त इति ।

स्कान्दे नागरखण्डे ।

यो वाञ्छति नरो मुक्तिं पितृभिः सह चात्मनः ।
असन्तानश्च यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी ॥
सन्तानयुक्तो यः कुर्य्यात्तस्य वंशक्षयो भवेत् ।

आनर्त्त उवाच ।

त्रयोदश्यां कृते श्राद्धे कस्माद्वंशक्षयो भवेत् ।
एतन्मे सर्व्वमाचक्ष्व विस्तरेण महामुने ॥

भर्त्तृयज्ञ उवाच ।

आसीद्रथन्तरे कल्पे पूर्व्वं पार्थिवसत्तम ।
सिताश्वो नाम पञ्चालदेशीयः पितृभक्तिमान् ॥
मधुना कालशाकेन खड्गमांसेन केवलम् ।
स हि श्राद्धं त्रयोदश्यां कुरुते पायसेन वा ॥
कदाचिद् ब्राह्मणैर्भूयः स पृष्ठः कौतुकान्वितैः ।
अन्येषु विद्यमानेषु विचित्रेषु कुतो नृप ॥
अस्वादु खड्गमांसञ्च कालशाकञ्च यच्छसि ।
अप्रत्याख्येयमत्याज्यं श्राद्धे दत्तं हविर्द्विजैः ॥
इति तद्भुज्यतेऽस्माभिस्तदा मे कारणं वद ।
एतच्छ्रुत्वा वचस्तेषां ब्राह्मणानां वचोऽब्रवीत् ॥
अवाच्यमपि वक्ष्यामि शृणुध्वं सुसमाहिताः ।
अहमासन् पुरा हिंस्रो लुब्धकः पितृभक्तिमान् ॥
भ्रमन् कदाचित् प्राप्तोऽहं अग्निवेश्माश्रमं निशि ।
शिष्यानुपदिशन् विप्रो दूरस्थेन मया श्रुतः ॥

अग्निवेश्म उवाच।

ऋक्षे पैत्रे यदा चन्द्रो हंसश्चैव करे स्थितः।
त्रयोदश्यां तु सा छाया विज्ञेया कुञ्जराह्वया॥
श्राद्धेष्वतिप्रशस्ता सा पितॄणां तृप्तिकारिणी।
तत् प्रातः श्राद्धसम्भाराः सम्भ्रियन्तामतः शुभाः॥

"पैत्रमृक्षं" मघा। हंसः सूर्य्यः। करे हस्ते।

सिताश्व उवाच।

इति तस्य मुनेर्वाक्यमाकर्ण्येदमचिन्तयम्।
अहञ्चापि करिष्यामि प्रातः श्राद्धक्रियामिति॥
ततः प्रभाते श्राद्धीयद्रव्यार्थं पर्य्यटन् वने।
खड्गमांसं कालशाकं मधु च प्राप्तवानहम्॥
यथोपपन्नैस्तैर्द्रव्यैस्त्रयोदश्यां समाहितः।
निजान् पितॄन् समुद्दिश्य स्वजातीयान् त्वभोजयम्॥
श्राद्धेन तादृशेनापि पितरो द्वादशाब्दिकीम्।
तृप्तिमाप्तुरहञ्चापि नृपो जातिस्मरोऽभवम्॥
अतो मघात्रयोदश्यामेतैरेव हि साधनैः।
करोमि श्रद्धया श्राद्धं तत्प्रभावमनुस्मरन्॥
तस्य तद्वचनं श्रुत्वा ते चान्ये च जना भुवि।
नभस्यस्य त्रयोदश्यां श्राद्धं चक्रुर्मुदान्विताः॥
प्रापुश्च परमां सिद्धिं स्पर्द्धमानाः सुरोत्तमैः।
ईर्षालवस्ततस्तेषु वसुरुद्रादयः सुराः॥
असंशयं त्रयोदश्यां श्राद्धकर्तॄन् क्षुधान्विताः।
अद्य प्रभृति यः श्राद्धं त्रयोदश्यां करिष्यति॥
कन्यासंस्थे सहस्रांशौ तस्य स्याद्वंशसंक्षयः।
इति शापेन देवानां निर्दग्धेयं महातिथिः॥
ततः प्रभृति नैतस्यां क्रियते श्राद्धमुत्तमम्।
यः प्रमादेन कुरुते तस्य स्याद्वंशसंक्षयः॥
एतत्त्रयोदशीश्राद्धं वंशच्छेदस्य कारणम्।
अतः श्राद्धं विना देयं तद्दिने मधुपायसम्॥
खड्गमांसं कालशाकं वार्ध्रीणसास्यमेव च।

वार्ध्रीणसो वक्ष्यमाणलक्षणो वृद्धच्छागः।

तस्याभावे प्रदातव्यं क्षीरोदनमनुत्तमम्।
तस्मिन्नहनि विप्रेभ्यः पितॄणां तुष्टये नृप।
तस्याभावेऽपि दातव्यं जलं तिलविमिश्रितम्॥इति॥

अथात्र केचिदाहुः । त्रयोदशीश्राद्धनिषिद्धवाक्यानामप्रामाण्यमेव । यत्किञ्चिन्मधुनामिश्रमित्यादि मनुवचनविरोधात् । मनुस्मृतिर्हि स्वाध्यायात् प्रसिद्धत्वात् वहुभिः सम्प्रदायेन पठ्यमानत्वात् अपभ्रष्टपाठासम्भवात् मूलान्तरा वेति क्षुद्रतरेभ्यो नाममात्रेणाप्रसिद्धेभ्यः केनचिदप्यपठ्यमानेभ्योऽनवस्थितपाठेभ्यः सम्भावितभ्रान्त्यादिमूलेभ्यः स्वविरोधप्रत्यक्षश्रुतिवद् बलीयसीति ।

अतएव वृहस्पतिः ।

वेदार्थोपनिबन्धृत्वात् प्रामाण्यन्तु मनोः स्मृतम् ।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते ॥इति॥

मनुरप्याह ।

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्त्तितः ।
स सर्व्वो विहितो वेदे सर्व्वज्ञानमयो हि सः ॥इति॥

उच्यते ।

यत्तावदुक्तं मनुस्मृतेः श्रुतितुल्यत्वेन विधेः स्मृत्यन्तरेभ्यो बलीयस्त्वमिति, तत्कल्पमात्रम् । वृहस्पतिवचनं मन्वर्थविपरीतानां वुधादिस्मृतीनामप्रामाण्यमाह ।

ननु शिष्टत्रैवर्णिकस्वीकृतानां कात्यायनादिस्मृतीनां वेदार्थप्रतिबद्धत्वादित्यप्रामाण्यहेत्वविद्यमानत्वात् । अतो मनुशब्देनात्र सर्व्वे वेदार्थस्मर्त्तारः कात्यायनादयोऽभ्युपलक्ष्यन्ते । अथवा मन ज्ञान इति धातुपाठात् वेदार्थज्ञानवान् मुनिर्मनुरुच्यते ।

अन्येत्वाहुः । कस्यचिदपि श्राद्धस्य निषेधानुपपत्तेः निषेधवाक्यानामप्रामाण्यमिति ।

तथाहि ।

न तावन्नित्यस्य श्राद्धस्य निषेधोऽयम् ।

यत आह मनुः ।

दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वाऽपि पितृभ्यः प्रीतिमाहरन् ॥इति॥

दक्षोऽप्याह ।

अस्नात्वा वाप्यहुत्वा वा अदत्वा यः समश्नुते ।
देवादीनामृणी भूत्वा अप्रजः स व्रजत्यधः ॥इति॥

अहरहः स्वाध्यायं कुर्य्यादुदपात्रात्तथैनं पितृयज्ञं समाप्नोतीति । एवमेतैर्व्वचनैर्नित्यस्य श्राद्धस्याहरहर्विधानादकरणादधोगमनाभिधानात् त्रयोदश्यां तदनुष्ठानमर्हति । नापि नैमित्तिकस्य निषेधः । न तावन्मृताहादिनिमित्तकस्य ।

यत आह याज्ञवल्क्यः ।

मृताहनि तु दातव्यं प्रतिमासन्तु वत्सरम् ।
प्रतिसंवत्सरञ्चैवमाद्यमेकादशेऽहनि ॥इति॥

कात्यायनोऽप्याह ।

ततः संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् । यस्मिन्नहनि प्रेतः स्यादिति सिद्धान्तेनैकोद्दिष्टं कुर्य्यादित्यर्थः । एवमन्येष्वपि स्मृतिपुराणेषु च । मृताहादिविहितस्य मृताहादिष्वपेक्षितत्वात्तदनुष्ठानं न प्रतिषेधः प्रतिषेद्धुमर्हति । नापि वृष्ट्यादिनिमित्तस्य–

"पुत्रजन्मनि कर्त्तव्यं जातकर्म समं नरैः" ।

इत्यादिभिर्वाक्यैः पुत्रजन्मादिकालेषु जातकर्म्मवदावश्यकत्वेन विहितत्वात्तदनुष्ठानमपि प्रतिषेधाः प्रतिषेद्धुमर्हन्ति । नापि त्रयोदशीनिमित्तकस्य पार्व्वणस्यैव, यतः—

"अन्ये त्रयोदशी श्राद्धं पुत्रवत्यशुभाय वै ।
एकस्यैव न तत् कुर्य्यात् पार्व्वणन्तु समाचरेत्" ॥

इति तस्यावश्यकत्वेन विधानात् एकस्यैव वर्गस्य न कुर्य्यात् । पार्व्वणं समाचरेदिति पितृवर्गस्य मातामहवर्गस्य च इत्येवं वर्गद्वयस्य कुर्य्यादित्यर्थः । न चैकवर्गीय दीयमानस्य श्राद्धस्य निषेधः । तथाविधस्य तन्निमित्तकस्य श्राद्धस्यप्राप्तेरभावात् । "पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम्" इति धौम्यवचनेन वर्गद्वयस्यैव श्राद्धविधिदर्शनात् ।

नापि काम्यस्य, तस्यापि त्रयोदशीसम्बन्धेनैव विशेषविहितत्वात् । तदेवं विषयासम्भवात् प्रतिषेधवाक्यानामप्रामाण्यमित्युच्यते । नित्यस्य नैमित्तिकस्य वैशेषिकस्य च कदाचित् प्रतिषेधः । यथा सूतकादौ विशेषविहितत्वस्यापि त्रयोदशीनिमित्तकस्य विशेषवचनेन तन्मात्रविषयकेन प्रतिषेधः सम्भवति । यथा नातिरात्रे षोडशिनं गृह्णातीत्यत्र ग्रहणप्रतिषेधः । त्रयोदशीश्राद्धस्य च नित्यवद् यथाकथञ्चिदनुष्ठाने प्राप्ते सत्यामपि धौम्यस्मृतौ व्यामोहादेकवर्गीयश्राद्धस्यानुष्ठाने प्रतिषेधसम्भवात् । तस्माद्विषयासम्भवात् प्रतिषेधवाक्यानामप्रमाण्यमिति मतम् । तस्मादत्र व्यवस्था वक्तव्या ।

तत्र तावच्छङ्खधरः ।

मघात्रयोदशीश्राद्धविधिवाक्यानि वर्गोद्देशेनानुष्ठीयमानं श्राद्धमाश्रयन्ते । निषेधास्त्वेकवर्गोद्देशेनानुष्ठीयमानं श्राद्धमाश्रयन्ते ।

अतएव कार्ष्णाजिनिः ।

श्राद्धं नैवैकवर्गस्य त्रयोदश्यामुपक्रमेत् ।
न तृप्तास्तत्र ये यस्य प्रजां हिंसन्ति तत्र ते ।।इति॥

एकस्य वर्गस्य पित्रादिमात्रस्य मातामहादिमात्रस्य वा नोपक्रमेत् । किन्तु

मातामहादिसहितस्य कुर्य्यात्। षण्णां पुरुषाणां श्राद्धाकरणे त्रयोदशीप्रतिषेधदोष इत्यर्थः।

अन्ये तु, सन्ति प्रमीतानां पितृभावङ्गतानां वर्गाः पितृव्यवर्गो भ्रातृवर्गो मातुलवर्ग इत्येवमादयः। अथवा पितृपक्षीयाणां सपिण्डानां वर्गो मातृपक्षीयाणां सपिण्डानाञ्चेत्येवं वर्गद्वयम्।

एषां वर्गाणां मध्ये श्राद्धे लब्धाधिकारेण पुरुषेण दिनान्तरे कस्यचिद्वर्गस्य श्राद्धं कृतं, करिष्यते वा कस्यचिदित्येवं किञ्चत्कारणमनुसन्धाय मघात्रयोदश्यां न कर्त्तव्यम्। किन्तु सर्व्वेषां वर्गाणां कर्तव्यम्। यतो मघात्रयोदश्याः पितृतृप्तिकारणभूतानां तिथीनां मध्ये श्रेष्ठतमत्वात् सर्व्वेषां पितृणां मधुमिश्रपायसादिद्रव्येण दीयमानस्य श्राद्धस्यापेक्षितत्वात्। येभ्य एव न दीयते त एव कुपिताः श्राद्धकर्तुः प्रजां नाशयन्ति।

तदेवं निषेधवाक्यानामेकस्यैव वर्गस्य क्रियमाणं श्राद्धं विषय इति। अन्येत्वाहुः, पुत्रवता गृहिणा क्रियमाणं त्रयोदशीश्राद्धं विषय इति।

ज्योतिर्वृहस्पतिः।

कृष्णपक्षे त्रयोदश्यां यः श्राद्धं कुरुते नरः।
पञ्चत्वं तस्य जानीयात् ज्येष्ठपुत्रस्य निश्चितम्॥

षट्त्रिंशन्मते।

गृही त्रयोदशीश्राद्धं न कुर्य्यात् पुत्रवानपि।
उपवासञ्च सङ्क्रान्तौ ग्रहणे चन्द्रसूर्य्ययोः॥

स्मरन्ति च।

त्रयोदश्यां तु वै श्राद्धं न कुर्य्यात् पुत्रवान् गृही।
नेष्यते चोपवासश्च कैश्चिदप्ययनद्वये॥

आपस्तम्बः।

त्रयोदश्यां बहुपुत्रो बहुमित्रो दर्शनीयापत्यो युवमारिणस्तु भवन्तीति। कात्यायनः।

युवानस्तत्र म्रियन्त इति।

केचित्पुनः पुत्रमरणरूपेण दोषेण न त्रयोदशीश्राद्धनिवृत्तिं मन्यन्ते। ते ह्याहुः।

नैयोगिकत्वादस्य फलस्य काम्यमानमेवैतद्भवति नत्वेवमेव,

तदुक्तम्।

काम्यमानं फलं ज्ञातं नानिच्छोस्तद्भविष्यतीति।

तस्मात् क्रियमाणेऽपि श्राद्धे न पुत्रमरणरूपं काम्यमानं कर्म्मफलं भवतीति गृहिणा पुत्रवतापि कर्त्तव्यं त्रयोदशीश्राद्धमिति। तदयुक्तम्।

"त्रयोदश्यां तु वै श्राद्धं न कुर्य्यात् पुत्रवान् गृही" इत्यादि निषेधवाक्यापेक्षितानर्थरूपफलविशेषप्रापणं,

"पञ्चत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितम्"

इत्यादि वाक्यैः क्रियते न पुनः कस्यचित् पुत्रमरणेच्छोरभिचाररूपं त्रयोदशीश्राद्धं विधीयते। निषेध्यमानक्रियाफलञ्चानर्थरूपत्वान्न कश्चिदिच्छति।

न च सकृदुच्चरितं वाक्यं कञ्चित्पुरुषं प्रत्यर्थत्वेन कञ्चिच्च प्रत्यनर्थत्वेन पुत्रमरणं बोधयुतुं शक्तम्। वाक्यभेदप्रसङ्गात्।

यत्तु—कैश्चिदुक्तम्—मघात्रयोदश्यां श्राद्धाचरणस्य धर्म्मरूपत्वात्तदनुष्ठाने पुत्रमरणाद्यनिष्टं भवतीति न युक्तमिति।

तथा तृप्ताः सन्तः पितरोऽनिष्टं फलं प्रयच्छन्तीत्यपि न युक्तमिति। तन्न वक्तव्यम्। यतः शास्त्रबोधितोऽर्थो न युक्तिमात्रेण निवर्त्तयितुं शक्यते। शास्त्रैकगम्यस्यार्थस्य युक्त्यविषयत्वात्।

यत्तु महाभारते दानधर्म्मेषु—

"ज्ञातीनान्तु भवेच्छ्रेष्ठः कुर्व्वन् श्राद्धं त्रयोदशीम्।
नावश्यन्तु युवानोऽस्य प्रमीयन्ते नरा गृहे"॥

इति युवमरणरूपस्य दोषस्य आपस्तम्बाद्युक्तस्य निराकरणं कृतम्। तदपि नात्यन्तं कृतम्। नावश्यमित्यभिधानेन दोषस्य पाक्षिकत्वाभ्यनुज्ञानात्।

यत्ववश्यं न म्रियन्त एवेति स्मृतिचन्द्रिकाकारस्य व्याख्यानं तच्छङ्खधर हरिहरादीनां न सम्मतमिति।

अन्येतु—

"अयनद्वितये श्राद्धं विषुवद्वितये तथा।
युगादिषु च सर्व्वासु पिण्डनिर्व्वपणादृते"॥

इति पुलस्त्यवचनाद्भाद्रपदापरपक्ष त्रयोदश्याश्च युगादित्वात् पिण्डनिर्व्वपणं विना श्राद्धं कर्तव्यमिति निषेधवाक्यानां पिण्डदानसहितं श्राद्धं विषय इत्याहुः।

केचित्तु—पायसादिद्रव्यव्यतिरिक्तद्रव्येण श्राद्धाचरणं निषिद्धमित्येवंविधं विषयमाहुः। तदयुक्तम्। पायसादिद्रव्यव्यतिरिक्तद्रव्येणामश्राद्धकरणे नागरखण्डे दोषस्योक्तत्वात्। हरिहरस्त्वत्रैवं कारणमुक्तवान्। तदयुक्तम्। अपदार्थवाक्यार्थापत्तेः।

पुत्रवान् गृही त्रयोदशीश्राद्धं न कुर्य्यादित्येते पदार्थाः।

पायसव्यतिरिक्तद्रव्येण श्राद्धं न कर्तव्यमिति वाक्यार्थइति। हरिहरः स्वयन्त्वीदृशीं व्यवस्थामाह।

भाद्रपदापरपक्षान्तर्गतमघान्वितत्रयोदश्यां नित्यं महाफलञ्च श्राद्धम्। तदर्थमेव च पितॄणां पौराणिकीषु गाथासु पुत्रप्रार्थनं महता प्रबन्धेन श्रूयते। अतस्त्रयोदशीमात्र-सम्बन्धीनि निषेधवाक्यानि सामान्यशास्त्ररूपत्वाद्भाद्रपदापरपक्षत्रयोदशीं परित्यज्य शेषास्वेकादशसु त्रयोदशीषु कृतार्थयन्त्यात्मानमिति। एतत्तु विशेषतो भाद्रपदापरपक्ष-त्रयोदश्यामेव श्राद्धनिषेधस्य नागरखण्डेतिहासे स्पष्टमेव दर्शितत्वात्।

अनतिश्लाघ्यं काम्यश्राद्धविषयत्वेन वा प्रतिषेधवचनानि व्यवस्थापनीयानि। यतः कामसम्बन्ध एव श्राद्धे दोषः स्मर्यते।

तथाहि।

त्रयोदशीश्राद्धकर्त्तुर्ज्ञातिश्रैष्ठ्यं बहुपुत्रत्वादिफलं सङ्कीर्त्य व्यासापस्तम्बाभ्यां युवमरणलक्षणो दोषोऽपि तत्रैवोदितः। तदेवं निषेधवाक्यानामेतावन्तो विषयाः, एक-वर्गश्राद्धं पिण्डवच्छ्राद्धं पुत्रवद्गृहमेधिकर्तृकंश्राद्धं काम्यश्राद्धमिति।

विधिवाक्यानाञ्चान्यानि श्राद्धानि विषय इति मन्यन्ते।

इति मघात्रयोदशीश्राद्धनिरूपणम्॥

——०——

अथापरपक्ष एव चतुर्दशीश्राद्धम् ।

तत्र याज्ञवल्क्यः ।

प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।
शस्त्रेण[१] तु हता ये वै तेभ्यस्तत्र प्रदीयते ॥

मार्कण्डेयब्रह्मपुराणयोः ।

युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ।
तेन कार्य्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ॥

ब्रह्मवैवर्त्तवायुपुराणयोः ।

युवानस्तु गृहे यस्य मृतास्तेषां प्रदापयेत् ।
शस्त्रेण वा हता ये वै तेषां दद्याच्चतुर्दशीम् ॥

वृद्धमनुः ।

चतुर्दशीं वर्जयित्वा श्राद्धं श्राद्धविशारदाः ।
प्रीयन्ते पितरस्तस्य ये च शस्त्रहता रणे ॥

काम्यप्रक्रमे च मनुः ।

ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यान्तु सुप्रजाः ।
प्रीयन्ते पितरस्तस्य ये च शस्त्रहता रणे ॥इति॥

शस्त्रग्रहणमुपलक्षणम् ।

ब्रह्मपुराणे ।

प्रायोऽनशनशस्त्राग्निविषोद्बन्धनिनान्तथा ।
चतुर्दश्यान्तु कर्त्तव्यं तृप्त्यर्थमिति निश्चयः ॥

नागरखण्डे ।

येषाञ्च शस्त्रमृत्युः स्यादपमृत्युरथापि वा ।
उपसर्गात् मृतानाञ्च विषमृत्युमुपेयुषाम् ॥
वह्निना च प्रदग्धानां जलमृत्युमुपेयुषाम् ।
सर्पव्याघ्रहतानाञ्च शृङ्गैरुद्बन्धनैरपि ॥
श्राद्धं तेषां प्रकर्त्तव्यं चतुर्दश्यां नराधिप ।
तेषां तस्मिन् कृते तृप्तिस्ततस्तत्पक्षजा भवेत् ॥

अपमृत्युरकालमृत्युरप्राप्तजरसामेव मृत्युरित्यर्थः । यक्षभूतग्रहाद्युपसृष्टानां यन्मरणं तदुपसर्गान्मरणम् । तत्पक्षजा सर्व्वस्मिन्नपरपक्षे श्राद्धकरणात् यावती तृप्तिस्तावतीत्यर्थः ।

---

१. अस्त्रेण इति ।

मरीचिरपि ।

विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम् ।
चतुर्द्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता ॥

विषादिभिर्घातो येषां ते तथोक्ताः ।

अनेन शस्त्रादिहतानामेव चतुर्दशीति कालमात्रं नियम्यते । न तु चतुर्दश्यामेव शस्त्रादिहतानाम् । किन्तु तेषामन्यस्मिन्नपि काले भवत्येव श्राद्धमिति ।

प्रचेता अपि ।

वृक्षारोहणलोहाद्यैर्विद्युज्ज्वालाविषादिभिः ।
नखदंष्ट्रैर्विपन्नानां तेषां शस्ता चतुर्दशी ॥

आदिशब्देन गिरिशिखरादिविषमस्थलारोहणपतनलगुडाद्यभिघातोद्बन्धनोपघातादयः प्रागुक्तसधर्म्माणो मरणोपायाः संगृह्यन्ते ।

यत्तूक्तविरुद्धार्थं शाकटायनवचनं—

"जलाग्निभ्यां विपन्नानां सन्यासे वा गृहे पथि ।
श्राद्धं कुर्व्वीत तेषां वै वर्जयित्वा चतुर्दशीम्" ॥इति॥

तत् प्रायश्चित्ताद्यर्थविहितजलाग्न्यादिमरणयुक्तप्राणिविषयम् ।

ये हि पापमृत्यवस्तेषामत्र चतुर्दश्यां श्राद्धं कर्तव्यम् । वृक्षारोहणेत्यादौ प्रचेतोवचने पापमृत्युप्रायपाठात् ।

अतएव प्रमीते पत्यौ विहिताग्निप्रवेशविधिनानुमरणकृतां योषितामपि चतुर्दशीश्राद्धं न कर्तव्यम् । तदेवमविहितैर्ज्वलनादिभिर्मृतानां मनुब्रह्मपुराणवचनप्रामाण्यात् संग्रामप्रायोपवेशनमृतानाञ्च कृष्णचतुर्दशीश्राद्धमिति सिद्धम् । अथैतत् सपिण्डीकरणादूर्द्ध्वमप्येकोद्दिष्टमेव कर्तव्यम् ।

यदाह गार्ग्यः ।

चतुर्दश्यान्तु यच्छ्राद्धं सपिण्डीकरणात्परम् ।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः ॥इति॥

मनुः ।

एकपिण्डीकृतानान्तु पृथक्त्वं नोपपद्यते ।
सपिण्डीकरणादूर्द्ध्वं मृते कृष्णचतुर्दशीम् ॥इति॥

भविष्यत्पुराणे ।

समत्वमागतस्यापि पितुः शस्त्रहतस्य तु ।
एकोद्दिष्टं सुतैः कार्य्यं चतुर्दश्यां महालये ॥

प्रेतत्वपरित्यागेन पितृत्वं प्राप्तैः पितामहादिभिः सह सपिण्डीकरणात् प्रेतत्व-परित्यागेन पितृत्वप्राप्त्या सारूप्यमागतस्यापीत्यर्थः। शस्त्रहतस्य पितुर्महालये चतुर्दश्यामेकोद्दिष्टश्राद्धे कृतेऽपि दिनान्तरे पार्व्वणं श्राद्धं कार्य्यम्। एकोद्दिष्टश्राद्धेन पितामहादितृप्त्यसिद्धेः।

नन्वेवं मृताहेऽप्येकोद्दिष्टश्राद्धे कृते पार्व्वणश्राद्धमपि पितामहादितृप्तिसिद्धयर्थं कर्तव्यं स्यात्।

मैवम्। पितुर्मृताहे पितामहादेस्तर्पणीयत्वास्मरणात्तत्तृप्त्यर्थं श्राद्धस्याननुष्ठेयत्वात्[१]।

महालये तु—

"काङ्क्षन्ति पुत्रपौत्रेभ्यः पायसं मधुसंयुतम्।
तस्मात्तांस्तत्र विधिना तर्पयेत् पायसेन तु॥
मध्वाज्यतिलमिश्रेणेति"

पितामहादेरपि तर्पणीयत्वस्मरणात्तत्तृप्तये दिनान्तरे पार्व्वणश्राद्धं कार्य्यमिति। यस्य तु पितामहोऽपि शस्त्रादिना हतस्तस्य महालये पितामहश्राद्धमपि चतुर्दश्यामेकोद्दिष्टरूपं कार्य्यम्।

तथा च स्मृत्यन्तरे।

एकस्मिन् द्वयोर्वैकोद्दिष्टविधिरिति।

एकस्मिन् पितरि पितामहे वा शस्त्रादिना हते पित्रादित्रयमध्ये द्वयोर्वा शस्त्रादिना-हतयोश्चतुर्दश्यामेकोद्दिष्टविधिना प्रत्येकं श्राद्धं कार्य्यमित्यर्थः। द्वयोरेकोद्दिष्टविधानेन प्रत्येकं श्राद्धे कृतेऽपि प्रपितामहतृप्तिसिद्धयर्थं दिनान्तरे पार्व्वणश्राद्धं कार्य्यम्। पित्रादिषु त्रिष्वपि शस्त्रादिहतेषु नैकोद्दिष्टविधिरिति गम्यते।

अत्रकेचिदाहुः। पृथगेकोद्दिष्टानि कार्य्याणीति।

अन्येत्वाहुः।

एकस्मिन् द्वयोर्वेत्यभिधानात् त्रिषु पितृ-पितामह-प्रपितामहेषु शस्त्रादिना हतेषु नैकोद्दिष्टविधिरिति। तेन त्रिषु शस्त्रादिहतेषु चतुर्दश्यां पार्व्वणविधिरेव। युक्तश्चैतत्।

सपिण्डीकृतानां शस्त्रादिहतानां त्रयाणामपि चतुर्दशीरूपविहितकालसम्भवे सत्यशस्त्रहताप्राप्तिकृतकालासम्भवनिबन्धनस्यैकोद्दिष्टविधेरनवतारात्।

अनेनाभिप्रायेणापरार्केणोक्तम्।

"तत्र चैकस्य शस्त्रहतत्वे एकोद्दिष्टविधानं, न तु त्रयाणां तथात्वे तत्र तु पार्व्वणमेव" इति।

त्रयाणां तथात्वे नैकोद्दिष्टविधानं, किन्तु तत्र पार्व्वणमेवेति तस्यार्थः।

तदयुक्तम्।

---

[१] श्राद्धस्यानुक्तत्वादिति।

एकस्मिन् द्वयोर्वेत्येतस्योपलक्षणत्वात्। एकोद्दिष्टविधेश्च शस्त्रादिहतत्वनिमित्तत्वात् न कालासम्भवः। निबन्धनकालासम्भवस्याश्रुतत्वात्। एकोद्दिष्टविधेस्तु तन्निबन्धनत्वे कल्पनामात्रमूलत्वापत्तेः। अतएव देवस्वामिनाभिहितम्।

त्रिष्वपि शस्त्रादिहतेषु पृथगेकोद्दिष्टत्रयमेव कार्य्यं, न तु पार्व्वणम्, आहत्यवचनाभावादिति।

अत्र शस्त्रादिहतानां चतुर्द्दश्यामेकोद्दिष्टमिति वाक्यार्थावगमात् मृताहादौ पार्व्वणमेव कर्तव्यम्।

ये तु चतुर्द्दश्यामेव शस्त्रादिभिर्मृतास्तेषां मृताहे किं पार्व्वणम्? एकोद्दिष्टं वेति संशयेऽभिधीयते।

चतुर्द्दशीनिमित्तकस्य मृताहनिमित्तकस्य च श्राद्धस्य कालसमवायप्रकरणे वक्ष्यमाणन्यायेन भेदेऽपि युगपदनेकनिमित्तोपनिपाते एकेनैव नैमित्तिकेन कुतपादिकालावरोधे द्वितीयस्यानवकाशे देश-काल-कर्त्तृ-देवतैक्ये विशेषाग्रहणात्तन्त्रेण नैमित्तिकानुष्ठाने सति स्वकुलवृद्धपरम्परानुसारात् मृताहेऽपि यैरेकोद्दिष्टपक्षपरिग्रहः कृतस्तेषां मृताहनिमित्तकमपि चतुर्द्दश्यामेकोद्दिष्टमेव।

यैस्तु पार्व्वणपक्षपरिग्रहः कृतः स तैरुदितानुदितहोमवत् यावज्जीवं परिगृहीत एवेति चतुर्द्दश्यामपि न तैरसौ परित्याज्यः।

यस्तु चतुर्द्दश्यां पार्व्वणत्वनिषेधः श्राद्धस्य, स चतुर्द्दशीनिमित्तकस्य, न मृताहनिमित्तकस्यापि।

ननु चतुर्द्दश्यां न पार्व्वणमित्यत्र चतुर्दशीमिमित्तकं न चतुर्द्दश्यामिति विशेषणेऽध्याहारवाक्यभेदौ स्याताम्।

मैवम्। प्रकृतत्वादिना विशेषलाभस्योपन्यस्तदोषानास्पदत्वात्। यच्च नागरखण्डे चतुर्द्दश्यां क्रियमाणस्य पार्व्वणस्य वैफल्यमुक्तम्, तदपि चतुर्द्दशीनिमित्तकस्यैव, न मृताहनिमित्तकस्येति।

अथ चतुर्दशीनिमित्तमेकोद्दिष्टं मृताहनिमित्तकञ्च पार्व्वणमिति श्राद्धद्वयं कुर्य्यादेकमेव वा अङ्गवैधर्म्यात् गृह्यमाणविशेषत्वेन तन्त्रानुष्ठानासम्भवात् संशयः।

तत्र समानेऽहनि नैकः श्राद्धद्वयं कुर्य्यादित्यस्य निषेधस्य भिन्ननिमित्तकश्राद्धगोचरत्वाभावात् श्राद्धद्वयं कुर्य्यात्।

मैवम्। देवतैक्यात् प्रधानद्वयस्य सहानुष्ठाने भूयसां श्राद्धधर्म्माणामनुग्रहाय पार्व्वणधर्म्मैरेकोद्दिष्टधर्म्मबाधे पार्व्वणेन नैमित्तिकस्य सिद्धौ न भेदेन श्राद्धद्वयानुष्ठानमिति।

ननु काम्यमपि चतुर्दशीश्राद्धमस्ति, कामप्रवणप्रवृत्तित्वाच्च नराणां कामप्रवृत्तेरुत्कटत्वाच्चतुर्दशीनिमित्तके श्राद्धेऽनुष्ठेये सत्येकोद्दिष्टधर्म्मा एव प्राप्नुवन्ति। भवेदेवं यदि भूयसामनुग्रहोऽत्र विशेषो नावगम्येत।

अस्तु वास्यान्तिथौ निमित्तभेदे श्राद्धद्वयमिति, महालयपक्षे च यथाकथञ्चिच्चतुर्दश्यां श्राद्धासम्भवे तत्पक्षमध्ये कस्मिंश्चिदपि दिने कर्तव्यम्। प्रशस्ततरमुख्यकालासम्भवेऽपि तत्पक्षकर्त्तव्यस्य श्राद्धस्यावश्यकत्वात्। दिनान्तरे च शस्त्रहतानामपि पार्व्वणमेव, चतुर्दश्यामेवैकोद्दिष्टविधानात्। चतुर्दश्यां शस्त्रादिहतानामेकोद्दिष्टमेव कर्तव्यमित्यत्र कारणमुक्तम् नागरखण्डे।

आनर्त्त उवाच।

कस्माच्छस्त्रहतानाञ्च प्रोक्ता श्राद्धे चतुर्दशी।
एकोद्दिष्टं कुतः श्राद्धं कारणं प्रब्रवीहि मे॥

भर्तृयज्ञ उवाच।

वृहत्कल्पे पुरा राजन्[1] हिरण्याक्षो महासुरः।
बभूव वलवान् शूरः सर्व्वदेवभयङ्करः॥
ब्रह्मा प्रतोषितस्तेन विधाय विविधन्तपः।
कृष्णपक्षे चतुर्द्दश्यां नभस्ये मासि संस्थिते॥

ब्रह्मोवाच।

परितुष्टोस्मि ते वत्स प्रार्थयस्व यथेप्सितम्।
अदेयमपि दास्यामि दुर्लभं यत्सुरासुरैः॥

हिरण्याक्ष उवाच।

भूताः प्रेताः पिशाचाश्च राक्षसा दैत्यदानवाः।
बुभुक्षिताः प्रधावन्ति मां नित्यं पद्मसम्भव॥
पितृपक्षे कृते श्राद्धे कन्यासंस्थे दिवाकरे।
एतस्मिन्नहनि प्रायस्तृप्तिः स्याद्वर्षसम्भवा॥
तदेषामत्र दिवसे[2] तृप्त्युपायं कुरु प्रभो।

ब्रह्मोवाच।

यः कश्चिन्मानवः श्राद्धं स्वपितृभ्यः प्रदास्यति।
पितृपक्षे चतुर्दश्यां नभस्ये मासि संस्थिते॥
प्रेतानां राक्षसानाञ्च भूतानां तद्भविष्यति।
एवमुक्त्वा ततो ब्रह्मा गतश्चादर्शनं नृप॥
हिरण्याक्षोऽपि संहृष्टः स्वीयमेव गृहं ययौ॥
यच्च शस्त्रहतानाञ्च तस्मिन्नहनि दीयते।
एकोद्दिष्टं नरैः श्राद्धं तत्ते वक्ष्यामि कारणम्॥
संख्ये शस्त्रहता ये च निर्व्विकल्पेन चेतसा।
युध्यमाना न ते मर्त्ये जायन्ते मनुजाः पुनः॥

---

१. महाराज इति।

२. तदेषामेकदिवसे इति।

पराङ्मुखा ये हन्यन्ते पलायनपरायणाः ।
ते भवन्ति नराः प्रेता एतदाह पितामहः ॥
सन्मुखा अपि ये दैन्यं हन्यमाना वदन्ति च ।
पश्चात्तापञ्च वा कुर्य्युः प्रहारैर्जर्जरीकृताः ॥
तेऽपि प्रेता भवन्तीह मनुः स्वायम्भुवोऽब्रवीत् ।
कदाचिच्चित्तचलनं शूराणां संप्रजायते ॥
तेषामपि दिने तत्र देयं प्रेतत्वशङ्कया ।
अपमृत्युगतानाञ्च सर्व्वेषामेव देहिनाम् ॥
प्रेतत्वं जायते यस्मात्तस्मात्तेषां हि तद्दिनम् ।
श्राद्धार्हं पार्थिवश्रेष्ठ विशेषेण प्रकीर्त्तितम् ॥
एकोद्दिष्टं प्रकर्त्तव्यं तस्मात्तत्र दिने नरैः ।
सपिण्डीकरणादूर्द्ध्वं तत्ते वक्ष्यामि कारणम् ॥
यदि प्रेतत्वमापन्नः कदाचित्तत् पिता भवेत् ।
तृप्त्यर्थं तस्य कर्त्तव्यं श्राद्धं तस्य दिने नृप ॥
पितामहाद्यास्तत्राह्नि श्राद्धं नार्हन्ति कुत्रचित् ।
अथ चेत् भ्रान्तितो दद्यात् ह्रियते राक्षसैस्तु तत् ॥
ब्रह्मणो वचनाद्राजन् भूतप्रेतैश्च दानवैः ।
तेनैकोद्दिष्टमेवात्र कर्त्तव्यं न तु पार्व्वणम् ॥
पितृपक्षे चतुर्दश्यां कन्यासंस्थे दिवाकरे ।
एतस्मात् कारणाच्छ्राद्धं पार्व्वणं न विधीयते ॥
तस्मिन्नहनि सम्प्राप्ते व्यर्थं श्राद्धं भवेद्यतः ॥

॥ इति चतुर्दशीश्राद्धनिरूपणम् ॥

अथैतद्भाद्रपदापरपक्षश्राद्धं मलमासे न कर्त्तव्यमित्युच्यते ।

काठकगृह्ये ।

यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव च ।
मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत् ॥

वार्हस्पत्ये ज्योतिः शास्त्रे—

यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव च ।
संसर्पांहस्पतीमासावधिमासश्च निन्दितः ॥

नन्दिपुराणे ।

अमावास्यामहोरात्रे यदा सङ्क्रमते रविः ।
स तु मासः पवित्रः स्याद् व्यतीते ह्यधिको भवेत् ॥

आह भृगुः ।

एकराशिस्थिते सूर्य्ये यदा दर्शद्वयं भवेत् ।
हव्यकव्यक्रियाहन्ता तदा ज्ञेयोऽधिमासकः ॥इति॥

पैठीनसिरपि ।

श्रौतस्मार्त्तक्रियाः सर्व्वा द्वादशे मासि कीर्त्तिताः ।
त्रयोदशे तु सर्व्वास्ता निष्फला इति संज्ञिताः ॥
तस्मात् त्रयोदशे मासि कुर्य्यात्ता न कथञ्चन ॥इति॥

उक्तं सुमन्तुना ।

न कुर्य्यादधिके मासि कर्म्मी कर्म्म कदाचन ।
मलं वदन्ति कालस्य मासं कालविदोऽधिकम् ॥इति॥

गृह्यपरिशिष्टेऽपि ।

मलिम्लुचस्तु मासो वै मलिनः पापसम्भवः ।
गर्हितः पितृदेवेभ्यः सर्व्वकर्म्मसु सन्त्यजेत् ॥

शातातपः ।

वत्सरान्तर्गतः पापो यज्ञानां फलनाशकृत् ।
नैर्ऋत्ययातुधानाद्यैः समाक्रान्तो विनाशकः ॥
मलिम्लुचः समाख्यातः सूर्य्यसंक्रान्तिवर्जितः ।
मलिम्लुच इति ख्यातो गर्हितः सर्व्वकर्म्मसु ॥

सत्यव्रतः ।

मलिम्लुचस्तु यो मासः स मासः पापसंज्ञितः ॥

न चैषां वचनानां पितृकार्य्यव्यतिरिक्तविषयत्वं मन्तव्यम् । हव्यकव्यक्रिया-हन्तेति गर्हितः पितृदेवेभ्य इति च पितृकार्य्यस्यापि निषेधात् ।

यत्तु ज्योतिः पराशरेणोक्तं ।

उपाकर्म्म तथोत्सर्गं प्रवासाद्युत्सवाष्टकाः ।
मासवृद्धौ पराः कार्य्या वर्जयित्वा तु पैतृकम् ॥इति॥

तत् प्रसवनिमित्तकपैतृकमात्रविषयम् ।

उक्तं हि मत्स्यपुराणे ।

चन्द्रसूर्य्यग्रहे चैव मरणे पुत्रजन्मनि ।
मलमासेऽपि देयं स्याच्छ्राद्धमक्षयकारकम् ॥

अष्टकागतस्य तु पैतृकस्य नात्र प्रतिप्रसवः । तत्र साक्षान्निषेधस्य दर्शयिष्यमाणत्वात् ।

नन्वावश्यकत्वादपरपक्षश्राद्धस्य मलमासेऽपि कर्तव्यता न विरुध्यते ।

उक्तं हि गृह्यपरिशिष्टे ।

मलं वदन्ति कालस्य मासं कालविदोऽधिकम् ।
नेहेतात्र विशेषेज्यामन्यत्रावश्यकाद्विधेः ॥इति॥

नैतदेवम् ।

अस्य वचनस्यानन्यगतिकनित्यविषयत्वात् ।

तथा च स्मृतिः ।

अनन्यगतिकं नित्यं कुर्य्यान्नैमित्तिकं तथा ॥इति॥

यस्य नित्यस्य मुख्यकालातिक्रमे जघन्यस्य कालान्तरस्यानभ्यनुज्ञानादत्यन्त-लोपः, प्रायश्चित्तञ्च प्रसज्यते तत्कर्म्मानन्यगतिः । तत् मलमासेऽपि कुर्य्यात् ।

भाद्रपदापरपक्षश्राद्धस्य उत्तरकालाभ्यनुज्ञादर्शनान्नानन्यगतिकत्वम् । अतो मलमासे न कर्त्तव्यम् । अतएवास्य मलमासे स्पष्टो निषेधो दृश्यते ।

तत्र तावत् काठकगृह्यपरिशिष्टे ।

तथा मलेऽनन्यगतिं नित्यां नैमित्तिकीं क्रियाम् ।
सोमयागादिकर्म्माणि नित्यान्यपि मलिम्लुचे ॥
पुष्टीष्ट्याग्रयणाधानचातुर्मास्यादिकान्यपि ।
महालयाष्टकाश्राद्धोपाकर्म्मोत्सर्गकर्म्म यत् ॥
स्पष्टं मासविशेषाख्याविहितं वर्जयेन्मले ।

महालयो भाद्रपदापरपक्षः ।

भृगुस्मृतावपि ।

वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यञ्च न कुर्य्याद्भानुलङ्घिते ॥

ज्योतिः पितामहोऽपि ।

मासः कन्यागते भानावसंक्रान्तो भवेद्यदि ।
दैवं पित्र्यं तदा कर्म्म तुलास्थे कर्तुरक्षयम् ॥इति॥

देवलः ।

अर्के तु तस्य कन्यास्थे श्राद्धपक्षः प्रकीर्त्तितः ।
सिनीवालीमतिक्रम्य यदा कन्यां व्रजेद्रविः ॥
तदा कालस्य वृद्धत्वादतीतैव पितृक्रिया ॥इति॥

तस्मान्मलमासान्तर्गते भाद्रपदापरपक्षे श्राद्धं न कर्त्तव्यम् ।

यत्तु ज्योतिः सिद्धान्ते ।

घटकन्यागते सूर्य्ये वृश्चिके वापि धन्विनि ।
मकरे वाथ कुम्भे वा नाधिमासो विधीयते ॥इति॥

तत् संवत्सरमध्ये मलमासद्वये सति वेदितव्यम् ।

तथा च ब्रह्मसिद्धान्ते ।

मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत् ।
प्राकृतस्तत्र पूर्व्वः स्यादधिमासस्तथोत्तरः ॥

अत्र सिंहसङ्क्रान्तिमारभ्य मीनसङ्क्रमणावधिके काले यो मासः पूर्व्वः स प्राकृत एव, तत् पुनर्वैकृतो मलमासो भवतीत्यर्थः।

"चैत्रादर्व्वाङ् नाधिमासः परतस्त्वधिको भवेत्"

इत्यस्यापि ब्रह्मसिद्धान्तवचनस्यायमेवार्थो व्याख्येयः।

तस्मात् मलमासान्तर्गते महालयापरपक्षे श्राद्धं न कर्त्तव्यमिति स्थितम्। ननु किं तदा लुप्यत एव तत्, कालान्तरे वा क्रियमाणमपुण्यकालं स्यात्। नहि। यतस्त-दुत्तरकाले कर्त्तव्यमिति।

अत आह पराशरः।

रविणा लङ्घितो मासश्चान्द्रः ख्यातो मलिम्लुचः।
तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत्॥

तथा।

पक्षद्वयेऽर्कसङ्क्रान्तिर्यदा न स्यात् सितासिते।
तदा तन्मासिकं कार्य्यमुत्तरे मासि कारयेत्॥
एवं षष्टिदिनोमासस्तदर्द्धञ्च मलिम्लुचम्।
त्यक्त्वा तदुत्तरे[1] कुर्य्यात् पितृदेवादिकाः क्रियाः॥

प्रजापतिः।

उपाकर्म्म च हव्यञ्च कव्यं पर्व्वोत्सवं तथा।
उत्तरे नियतं कुर्य्यात् पूर्वे तन्निष्फलं भवेत्॥

ज्योतिः शास्त्रेऽपि।

षष्ठ्या तु दिवसैर्मासः कथितो बादरायणैः।
पूर्व्वमर्द्धं परित्यज्य उत्तरार्द्धं प्रशस्यते।
अमावास्याद्वयं यत्र रविसङ्क्रान्तिवर्जितम्॥
मलिम्लुचः स विज्ञेय उत्तरस्तूत्तमाभिधः।

अथ मलमासे श्राद्धकर्म्मणां प्रतिप्रसवाः।

आह यमः।

गर्भे वार्द्धुषिके कृत्ये श्राद्धकर्म्मणि मासिके।
सपिण्डीकरणे नित्ये नाधिमासो विधीयते॥
तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः।
जातकर्म्मान्त्यकर्म्माणि नवश्राद्धं तथैव च॥
मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश।
चन्द्रसूर्य्यग्रहे स्नानं श्राद्ध-दान-जपादिकम्॥
कार्य्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा।

---

[1] तत्कालादुत्तरे इति।

नारदीयपुराणे ।

नित्यनैमित्तिके कुर्य्यात् प्रयतः सन्मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ॥

काठकपरिशिष्टेऽपि ।

प्रेतसंस्कारमारभ्य श्राद्धपिण्डोदकक्रियाः ।
सपिण्डीकरणान्ताश्च यथाकालमुपस्थिताः ॥
यवव्रीहितिलैर्होमो जातकर्म्मादिकाः क्रियाः ।
मघात्रयोदशीश्राद्धं प्रत्युपस्थितहेतुकम् ॥
अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे ॥

सौरपुराणे ।

एकोद्दिष्टन्तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।
तत्कार्य्यं मलमासेऽपि कालाधिक्येऽपि धर्मतः ॥

व्यासः ।

जातकर्म्मणि यच्छ्राद्धं दर्शश्राद्धं तथैव च ।
मलमासेऽपि कर्तव्यं व्यासस्य वचनं यथा ॥

शातातपः ।

प्रतिसंवत्सरे श्राद्धे नाधिमासं विवर्जयेत् ।
मलमासेऽपि कर्त्तव्यं श्राद्धं यत् प्रतिवत्सरम् ॥

एतदाद्यसांवत्सरिकविषयम् ।

मलमासे सांवत्सरिकं श्राद्धं कृत्वा तदुत्तरमासे पुनस्तदेवावर्त्तनीयमित्येवंविध-मतानुसारि चेदं वचनम् ।

अत्र वचनानि ।

वृद्धवशिष्ठः ।

असङ्क्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः ।
तथैव मासिकं श्राद्धं सपिण्डीकरणं तथा ॥

पैठीनसिः ।

मलमासमृतानाञ्च श्राद्धं यत् प्रतिवत्सरम् ।
मलमासेऽपि कर्तव्यं नान्येषान्तु कदाचन ॥

यमः ।

आब्दिकं प्रथमं यत् स्यात् तत् कुर्वीत मलिम्लुचे ।
त्रयोदशे तु सम्प्राप्ते कुर्व्वीत पुनराब्दिकम् ॥

लघुहारीतः ।

प्रत्यब्दं द्वादशे मासि कार्य्या पिण्डक्रिया द्विजैः ।
कचित्त्रयोदशेऽपि स्यादाद्यं मुक्त्वा तु वत्सरम् ॥

वशिष्ठः ।

आब्दिकाहनि सम्प्राप्ते अधिमासो भवेद्यदि ।
श्राद्धद्वयं प्रकुर्व्वीत एवं कुर्व्वन्न मुह्यति ॥

तदेवं सपिण्डीकरणान्तानि प्रेतश्राद्धानि पुत्रजन्मनिमित्तकमुपरागनिमित्तकमाद्यं सांवत्सरिकमनाद्यमपि मलमासमृतसांवत्सरिकं गजच्छायाश्राद्धममावास्याश्राद्धं प्रत्यहमनुष्ठीयमानञ्च नित्यश्राद्धं वर्जयित्वान्यच्छ्राद्धं मलमासे नानुष्ठेयमिति स्थितम् ।

इति मलमासनिरूपणपूर्व्वको मलमासेऽपरपक्षादि श्राद्धापवादः ।

पर्य्यवसितञ्चापरपक्षनिरूपणम्

—०—

अथायनादयः श्राद्धकालाः ।

तत्र यद्यपि याज्ञवल्क्यवचने द्रव्यब्राह्मणसम्पत्तिभ्यां व्यवधाय अयनविषुवत्सङ्क्रान्तयो निरूपितास्तथाप्यत्र सङ्क्रान्तित्वसाधर्म्म्यादव्यवस्थानेन निरूप्यन्ते ।

तत्र विष्णुपुराणे ।

उपप्लवे चन्द्रमसो रवेश्च
त्रिष्वष्टकास्वप्ययनद्वये च[१] ।
पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः ॥
श्राद्धं कृतं तेन समा सहस्रं
रहस्यमेतत् पितरो वदन्ति ॥

अत्र किल पानीयमपीति वचनादावश्यकता श्राद्धद्वयस्योच्यत इति मन्यन्ते ।

यत्तु—
आदित्यसङ्क्रमश्चोभे अयने विषुवद्वयम् ।
व्यतीपातोऽथ जन्मर्क्षं चन्द्रसूर्य्यग्रहस्तथा ॥
एतांस्तु श्राद्धकालान् वै काम्यानाह प्रजापतिः ।

इति विष्णुवचनेन ग्रहणादेः काम्यश्राद्धकालत्वमुक्तं, तन्न नित्यत्वनिराकरणक्षमं, वाक्यद्वयबलेनाग्निहोत्रादिवन्नित्यत्वकाम्यत्वयोरविरोधात् ।

आह शङ्खः ।

हस्तिच्छायासु यद्दत्तं यद्दत्तं राहुदर्शने ।
विषुवत्ययने चैव सर्व्वमानन्त्यमुच्यते ॥

---

१. त्रिष्विति आर्षप्रयोगः ।

अत्रायनद्वयं विषुवत्सूर्य्यसङ्क्रम इत्यस्मिन् याज्ञवल्क्यवचने च अयनयोर्विषुवतोश्च सङ्क्रान्तिपदेनैव संग्रहसिद्धावपि द्वयोरपि यत् पृथगभिधानं, तत् सङ्क्रान्त्यन्तरेभ्यो विषुवः, विषुवादयनमिति यथापूर्व्वं प्राशस्त्यातिशयप्रतिपादनार्थमिति मन्तव्यम्।

तथा च विष्णुधर्म्मोत्तरे।

श्राद्धं सङ्क्रमणे भानोः प्रशस्तं पृथवीपते।
विषुवद्वितयं तत्राप्ययने द्वे विशेषतः॥

विषुवतोरयनयोश्च लक्षणम्।

नागरखण्डे।

यदा स्यान्मेषगो भानुस्तुलाञ्चाथ यथा व्रजेत्[१]।
तदा स्याद्विषुवाख्यस्तु कालश्चाक्षयकारकः॥
मकरे कर्कटे चैव यदा भानुर्व्रजेन्नृप।
तदायनाभिधानश्च विषुवत् स विशिष्यते॥

अस्मिंश्च काले पिण्डनिर्व्वपणं विनैव श्राद्धं कर्तव्यम्।

यदाह पुलस्त्यः।

अयनद्वितये श्राद्धं विषुवद्वितये तथा।
युगादिषु च सर्व्वासु पिण्डनिर्व्वपणादृते॥

ब्रह्मपुराणे सर्व्वास्वपि सङ्क्रान्तिषु पिण्डनिर्व्वपणं विना श्राद्धमुक्तम्।

अयनद्वितये श्राद्धं विषुवद्वितये तथा।
सङ्क्रान्तिषु च सर्व्वासु पिण्डनिर्व्वपणादृते॥इति॥

एतेषु कालेषु पिण्डनिर्व्वपणं विना श्राद्धं कर्तव्यम्।

एतत्कालनिमित्तक एव श्राद्धे पिण्डनिर्व्वपणप्रतिषेधोऽयं, न मृताहादिनिमित्तके प्रसङ्गादयनादिषु पतिते।

यस्मादयनद्वितये श्राद्धमित्यनेनायनादिभिर्नित्यान्वितं श्राद्धमवगम्यते। तन्निमित्तकमेव च तैर्नित्यान्वितं नान्यत्। नित्यान्वयश्चानित्यान्वयाद्बलीयान् भवति।

किञ्च।

अत्र हि विधीयमानस्य श्राद्धस्य पिण्डनिर्व्वपणादृत इति विशेषणं न प्रसङ्गात्तत्कालपतितं मृताहादिश्राद्धमाश्रयितुमर्हति। यद्येवंविधं श्राद्धमेतेषु कालेषु विधीयते तदा भावार्थविधिरित्येष गुणो भवति।

—o—

अथ सङ्क्रान्तितद्भेदतत्कालपरिमाणाद्युच्यते।

नागरखण्डे।

रवेः संक्रमणं राशौ सङ्क्रान्तिरिति कथ्यते।
स्नान-दान-जप-श्राद्ध होमादिषु महाफलम्॥

---

१. तुलायां वा यदा भवेदिति।

राशौ मेषादिसंज्ञे ज्योतिःशास्त्रप्रसिद्धे ।

देवीपुराणे ।

समायनं ऋतुर्मासपक्षाहादि क्रमेण तु ।
सूक्ष्म-स्थूलविभागेन देवी सर्व्वगता विभो ॥
द्वादशैव समाख्याताः समा सङ्क्रान्तिकल्पनाः ।
सप्तधा सा तु बोद्धव्या एकैका तु[१] यथा शृणु ॥
मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता सङ्क्रान्तिः सप्तधा नृप ॥
मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी यथा ।
क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरैर्महोदरी[२] ज्ञेया दारुणर्क्षैश्च राक्षसी ।
मिश्रिता चैव निर्दिष्टा मिश्रितर्क्षैस्तु सङ्क्रमे ॥
त्रिचतुःपञ्चसप्ताष्ट नव द्वादश एव च ।
क्रमेण घटिका ह्येतास्तत्पुण्यं पारमार्थिकम् ॥
अतीतानागतो भोगो नाड्यः पञ्चदश स्मृताः ।
एष स्थूलविभागस्तु मुक्तिकामस्य कीर्त्तितः ॥
परमार्थेन या संख्या कथयामि नृपोत्तम ।
स्वस्थे नरे सुखासीने यावत् स्पन्दति लोचनम् ॥
तस्य त्रिंशत्तमं भागं तत्परं परिकीर्त्तितम् ।
तत्पराच्छतभागस्तु त्रुटिरित्यभिधीयते ॥
त्रुट्याः सहस्रभागार्द्धं तत्कालं रविसङ्क्रमः ॥इति॥

समानयेत्यादि । 'देवी' सङ्क्रान्तिरूपा, सा समायनादिभिः स्थूलैः सूक्ष्मैश्चावयवैः 'सर्व्वगता' सर्व्वव्यापिनी । संवत्सरादयः सङ्क्रात्यवयवाः । कथमित्याह—द्वादशैवेत्यादि । द्वादशैव सङ्क्रान्तिकल्पनाः, 'समा' संवत्सरो भवति ।

अयमाशयः ।

द्वादशभिः सङ्क्रान्तिभिरेकः संवत्सरः । षड्भिः सङ्क्रान्तिभिरयनम् । सङ्क्रान्तिद्वयेन ऋतुः । एकसङ्क्रात्यवच्छिन्नः कालो मासः । सङ्क्रान्त्यर्द्धः पक्षः । सङ्क्रान्तेस्त्रिंशांशोऽहोरात्रम् । आदिशब्देन यामार्द्ध—याममुहूर्त्तादयः । एवमयं सङ्क्रान्तिरूपस्तपनपरिस्यन्दः शक्त्यात्मिका देवीति ।

एकैकस्याः सङ्क्रान्तेर्ध्रुवादिनक्षत्रसंयोगे पुण्यकालपरिमाणार्थं मन्दादिसंज्ञामाह । 'मन्देत्यादि' । 'ध्रुवाणि' रोहिण्युत्तरात्रयञ्चेति चत्वारि । 'मृदूनि' चित्रानुराधामृगशिरोरेवतीति चत्वारि । 'क्षिप्राणि' अश्विनी पुष्यो हस्तोऽभिजिदिति चत्वारि ।

---

१. एकैकवेति ।

२. चारैर्महोदरीति ।

'उग्राणि' पूर्व्वात्रयं भरणीमघेति पञ्च। 'चराणि' श्रवणा धनिष्ठा शततारका पुनर्व्वसुः स्वातीति पञ्च।

'दारुणानि' मूलं ज्येष्ठार्द्राश्लेषेति चत्वारि। 'मिश्रे' विशाखा कृत्तिकेति द्वे।

एकैका सप्तधेति निर्देशात् ध्रुवादीनि दिननक्षत्राणि विज्ञायन्ते, न महानक्षत्राणि। तेषु न एकैकस्याः सप्तधात्वमुपपन्नम्।

पुण्यकालपरिमाणमाह।

त्रिचतुः पञ्चेति।

मन्दायां तिस्रो घटिकाः पुण्यकालः। मन्दाकिन्यां चतस्रः। ध्वाङ्क्ष्यां पञ्च। घोरायां सप्त। महोदर्य्यां अष्टौ। राक्षस्यां नव। मिश्रायां द्वादशेति। तत्र कृते दानयज्ञतपःश्राद्धादिकर्म्मणि सङ्क्रान्तिकालनिमित्तकं पुण्यं पारमार्थिकमतिशयितमित्यर्थः।

इतः किञ्चिदूनफलः सर्व्वसङ्क्रान्तिषु पञ्चदशघटिकात्मकः पुण्यकालोस्तीत्याह-अतीतानागत इत्यादि। 'भोगः' व्याप्तिः, 'अतीते' सङ्क्रमणात् पूर्व्वस्मिन्। 'अनागते' परस्मिन् काले। सङ्क्रान्तिसमयात् पूर्व्वतः परतश्च पञ्चदशघटिकाः पुण्यकाल इत्यर्थः। अतीतानागतकालव्याप्तिश्च पूर्वोक्तेषु व्यादिश्यमानेष्वपि वेदितव्या।

अत्र पुण्यकालस्य पूर्व्वभावित्वं पश्चाद्भावितत्वञ्च वक्ष्यमाणव्यवस्थयानुसर्तव्यम्। एवं स्थूलं पुण्यकालमुक्त्वा प्रशस्ततमफलं सूक्ष्मकालमाह परमार्थेनेत्यादि। त्रुटिसहस्रतमभागार्द्धस्य दुर्लभत्वेऽपि तत्सन्निहितकालग्रहणार्थप्रतिपादनम्।

आह वशिष्ठः।

सङ्क्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः[१]।
तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः॥

अत्र त्रिंशन्नाड्यः पूर्व्वं पञ्चदश, पश्चात् पञ्चदशेत्येवं सङ्कलनया द्रष्टव्याः। एवं हि सति देवीपुराणेन सह संवादो भवति।

ब्रह्मवैवर्त्ते।

मेषादिराशिषु रविः क्रमाद्गच्छति सङ्क्रमात्।
द्वादशैव भवन्त्येषां द्विज नामानि मे शृणु॥

मेषादिराशिषु सूर्य्यगत्या तद्राशिसंज्ञका एव द्वादश सङ्क्रमाः स्युः। तेषामेव प्राशस्त्यतारतम्यभोगपौर्व्वापर्य्याद्युपदेशार्थं विष्णुपदादि संज्ञाचतुष्टयमाह।

एकं विष्णुपदं नाम षडशीतिमुखं तथा।
विषुवच्च तृतीयञ्च अयने दक्षिणोत्तरे॥
कुम्भालिगोहरिषु विष्णुपदं वदन्ति
स्त्रीचापमीनमिथुने षडशीतिवक्त्रम्।
अर्कस्य यानमयनं शशिधाम्नि याम्यं
सौम्यं झषे तु विषुवं त्वजतौलिनोः स्यात्॥

---

[१] पिशिताशनैरिति पाठोऽपि।

'कुम्भः' प्रसिद्धः। 'अलिः' वृश्चिकः। 'गौः' वृषः। 'हरिः' सिंहः। एषु राशिषु रवेरयनं सङ्क्रमणं 'विष्णुपदं' विष्णुपदसंज्ञं भवति। 'स्त्री' कन्या। 'चापं' धनुः। 'मीनमिथुनौ' प्रसिद्धौ। एतेषु षडशीतिमुखम्। 'शशिधाम्नि' कर्कटके, याम्यायनम्। 'झषे' मकरे। सौम्यायनम्। 'अजः' मेषः। 'तौली' तुलाधारः, तयोर्विषुवसंज्ञम्।

वशिष्ठोऽपि।

अयने द्वे विषुवे चैव चतस्रः षडशीतयः।
चतस्रो विष्णुपद्यश्च सङ्क्रान्त्यो द्वादश स्मृताः॥
झषकर्कटसङ्क्रान्ती द्वे तूदग्दक्षिणायने।
विषुवती तुला-मेषौ तयोर्मध्ये ततोऽपराः॥
वृष-वृश्चिक-कुम्भेषु सिंहे चैव यदा रविः।
एतद्विष्णुपदं नाम विषुवादधिकं फलम्॥
कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः।
षडशीतिमुखा प्रोक्ता षडशीतिगुणा फले॥

लौगाक्षिः।

यस्यायने विष्णुपदे तथादौ
दानाद्यनन्तं विषुवे तु मध्ये।
वदन्त्यतीते षडशीतिवक्त्रे
महर्षयः खल्वयने च सौम्ये॥

बौधायनः।

भविष्यत्ययने विष्णोर्वर्तमाने विषुवति।
षडशीतिमुखेऽतीते व्यतीते चोत्तरायणे॥

देवीपुराणे।

षडशीतिमुखेऽतीते मध्ये[१] च विषुवद्वये।
भविष्यत्ययने पुण्यमतीते चोत्तरायणे॥

वृद्धवशिष्ठः।

अतीतानागते पुण्ये द्वे उदग्दक्षिणायने।
तूपरागे तु तत्कालं व्यतीते चोत्तरायणे॥

वायुपुराणे।

मध्ये दानं विषुवति दक्षिणे वैष्णवे पुरः।
षडशीतिमुखेऽतीते व्यतीते चोत्तरायणे॥

---

१. वृते इति।

अत्र सर्वेषु वचनेष्वतीते चोत्तरायण इत्यत्र चकारादनागते चेति स्मृतिनिबन्धकारा मन्यन्ते ।

उक्तस्य पूर्व्वोत्तरादिपुण्यकालस्य परिमाणमाह ।

बौधायनः ।

नाड्यो विषुवति प्रोक्ता दश पूर्व्वा दशापराः ।
पुण्यः कालोऽर्कसङ्क्रान्तौ स्नानदानजपादिषु ॥

वशिष्ठः ।

त्रिंशत् कर्कटके नाड्यो मकरे विंशतिः स्मृताः ।
वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश ॥
षडशीत्यां व्यतीतायां षष्ठिरुक्तास्तु नाडिकाः ।
पुण्यास्तु विष्णुपद्याश्च प्राक्पश्चादपि षोडश ॥

ब्रह्मवैवर्त्ते ।

विषुवत् षण्मुहूर्त्तं स्यात् षडशीतिमुखे त्रयम् ।
तथा विष्णुपदे त्रीणि पुण्यानि कवयो विदुः ॥
त्रिंशत् कर्कटके नाड्यो मकरे तु दशाधिकाः ।
भविष्यत्ययने पुण्या अतीते चोत्तरायणे ॥

बृहस्पतिः ।

भविष्यत्ययने पुण्यास्त्रिंशदेव तु दक्षिणे ।
अतीव उत्तरे नाड्य इति प्राहुः पुराविदः ॥इति॥

गौतमः ।

अर्वाक् षोडशनाड्यस्तु परतः षोडशैव तु ।
ता एव दक्षिणे पूर्व्वमतीते चोत्तरायणे ॥

मरीचिः ।

नाड्यः षोडशपूर्व्वेण सङ्क्रान्तेरपरेण वा ।
राहोर्दर्शनमात्रेण पुण्यकालः प्रकीर्त्तितः ॥

शातातपः ।

संक्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः ।
चन्द्रसूर्य्योपरागे तु यावद्दर्शनगोचराः ॥

अत्र केषुचिद्वचनेषु पुण्यकालपरिमाणमधिकमुक्तम् । केषुचित्न्यूनमुक्तम् । तत्र यन्न्यूनं तत् फलातिशयप्रतिपादनार्थम् । यत्त्वधिकं तत् पुण्यकालत्वमात्रप्रतिपादनार्थम् । न पुनर्न्यूनमधिकनिराकरणार्थमधिकं वा न्यूननिराकरणार्थमिति मन्तव्यम् ।

अतएवाह शातातपः ।

या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमा मताः ।

एवञ्च सति सर्व्वेषां पुण्यकालावधिवचनानां अविरोधे सति विरोधपरिहारार्थं वचनार्जवभङ्गो न कर्तव्यो भवति ।

अत्राह वशिष्ठः ।

अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम् ।
रात्रौ संक्रमणे पुण्यं दिनार्द्धं[१] स्नानदानयोः ॥इति॥

अनेन संक्रमणसन्निहितोऽपि रात्रिरूपः पुण्यकालो न भवति । किन्तु दिनार्द्ध-रूप एवेत्युक्तं भवति । सोऽपि यः संक्रमणसन्निहितः स एव ग्राह्यः ।

तदाह गोभिलः ।

रात्रौ संक्रमणे भानोर्दिवा कुर्य्यात्तु तत्क्रियाम् ।
पूर्व्वस्मिन् परतो वाऽपि प्रत्यासत्तेश्च तत्फलम् ॥इति॥

प्रत्यासत्तेरित्यनेनेदमुक्तं, यदि पूर्व्वरात्रे संक्रमणं भवति, तदा पूर्व्वस्य दिनस्योत्तरार्द्धं पुण्यम् । यद्यपररात्रे तदा अपरस्य दिनस्य पूर्वार्द्धमिति ।

यदि मध्यरात्रे तदा विशेषग्रहणाभावात् पूर्व्वस्योत्तरार्द्धमुत्तरस्य च पूर्व्वार्द्ध-मित्येतद्द्वयमपि पुण्याहमिति ।

तदाह वशिष्ठः ।

अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरि क्रिया ।
ऊद्र्ध्वं संक्रमणे भानोरुदयात् प्रहरद्वयम् ॥
पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः ।
तदा दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ ॥इति॥

मकरकर्कटविषये तु यज्ञपार्श्ववचनम् ।

आसन्नसंक्रमं पुण्यं दिनार्द्धं स्नानदानयोः ।
रात्रौ संक्रमणे भानोर्विषुवत्ययने दिने ॥

अयने दिन इति । दक्षिणोत्तरायणयोस्तु दिन एव संक्रमणे सति दिने पुण्य-कालः । तेन रात्रावयनसंक्रमे रात्रावेव प्रशस्ततरः पुण्यकालः ।

बौधायनः ।

अस्तं गते यदा सूर्य्ये झषं याति दिवाकरः ।
प्रदोषे वार्द्धरात्रे वा तदा पुण्यं दिनान्तरम् ॥
कार्मुकन्तु परित्यज्य झषं संक्रमते रविः ।
प्रदोषेवार्द्धरात्रे वा तदा भोगः परेऽहनि ॥

---

१. भानोर्दिनार्द्धमिति ।

स्कन्दपुराणे ।

धनुर्मीनावतिक्रम्य कन्याञ्च मिथुनं यदा ।
पूर्व्वापरविभागेन रात्रौ संक्रमते यदा ॥
दिनान्ते पञ्चनाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदये च तथा पञ्च दैवे पित्र्ये च कर्म्मणि ॥

अत्र पुण्यतमत्वाभिधानाद्दिनार्द्धपक्षेण सहाविरोधः ।

निगमः ।

विष्णुपद्यां धनुर्म्मीननृयुक्कन्यासु वै यदा ।
परतः पूर्व्वतो वाऽपि रात्रौ[१] संक्रमणं भवेत् ॥
पूर्वाह्णे पञ्चनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः ।
अपराह्णे तु पञ्चैव श्रौते स्मार्त्ते च कर्म्मणि ॥इति॥

नृयुक् मिथुनराशिः । तिथिभेदनिबन्धनमपि संक्रान्तिभोगस्य पूर्वापरविभागमाह ।

आदौ पुण्यं विजानीयात् यद्यभिन्ना तिथिर्भवेत् ।
अर्द्धरात्रे व्यतीते तु विज्ञेयमपरेऽहनि ॥

अर्द्धरात्रादनन्तरमपि यदि पूर्व्वतिथिमध्ये संक्रमस्तदा पूर्व्वमेव दिनं पुण्यम् । अपरतिथिसंक्रमेत्वपरमेवेति वचनार्थः ।

अथ रात्रौ निषिद्धस्य स्नानादेः संक्रान्तिविशेषप्रतिप्रसवाभिधानार्थं निषेधस्तावदुच्यते ।

भविष्यत्पुराणे ।

रात्रौ स्नानं न कुर्व्वीत दानञ्चैव विशेषतः ।
नैमित्तिकन्तु कुर्व्वीत स्नानं दानञ्च रात्रिषु ॥

विष्णुः ।

विवाह-व्रत-संक्रान्ति-प्रतिष्ठा-ऋतु-जन्मसु ।
तथोपरागपातादौ स्नाने दाने निशा शुभा ॥

'ऋतुः' गर्भाधानम् । चन्द्रार्कदृष्टिसन्निपातसमयः पातः ।

गोभिलः ।

राहुदर्शनसंक्रान्ति विवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्य्युर्निशि काम्यव्रतेषु च ॥

'अत्ययः' बन्धुमरणम् । अत्र संक्रान्तिशब्देन मकरकर्कटावेव गृह्यते, रात्रौ संक्रमणे दिनस्य पुण्यतां वदता वशिष्ठेन मुक्त्वा मकरकर्कटावित्यभिधानात् । अतो-

---

[१] भानोरिति ।

मकरकर्कटयोरेव रात्रौ स्नानादेः प्रतिप्रसव इति गम्यते। संक्रान्त्यन्तरेषु गोभिलादि-वचनानुसारादस्त्येव रात्रौ स्नानादेर्निषेधइति।

अत्र मन्यन्ते।

मुक्त्वा मकरकर्कटावित्येष पूर्व्वदिनोभयग्रहणापवादो, न तु सर्व्वात्मना दिना-पवादेन रात्रिग्रहणोपदेशः।

बौधायनादिवचनेषु रात्रौ मकरसंक्रमणे परदिनस्यैव पुण्याहत्वाभिधानात्-दिनार्द्धग्रहणवचनानि तु केनचित् प्रकारेण रात्रौ संक्रमण-सन्निहितषोडशनाडिकादि-परिमितकाले स्नानदानाद्यसम्भवे व्यवहितमपि दिनार्द्धं ग्राह्यमित्येवंपराणीति सर्व्वा-स्वपि संक्रान्तिषु रात्रौ स्नानदानादिप्रतिप्रसव इत्याहुः।

अन्ये तु रविसंक्रमणे दिनं पुण्यं, ग्रहान्तरसंक्रमणे तु रात्रिरेव पुण्येत्याहुः।

ग्रहान्तरसंक्रमणसमयस्यापि पुण्यतामाह जैमिनिः।

नक्षत्रराश्यो रविसंक्रमे स्यु—
र्वाक्परत्रापि रसेन्दुनाड्यः।
पुण्यास्तथेन्दोस्त्रिधरापलैर्यु
गेकैव नाडी मुनिभिः शुभोक्ता॥
नाड्यश्चतस्रः सपलाः कुजस्य
बुधस्य तिस्रो मनवः पलानि।
सार्द्धाश्चतस्रः पलसप्तयुक्ता
गुरोश्च शुक्रे सपलाश्चतस्रः॥
द्विर्नागनाड्यः पलसप्तयुक्ताः
शनैश्चरस्याभिहिताः सुपुण्याः।
आद्यन्तमध्ये जपदानहोमं
कुर्व्वन्नवाप्नोति नरेन्द्रधाम॥

नक्षत्रे राशौ वा सूर्य्यस्य संक्रमणे सति, पूर्व्वतः परतोऽपि रसेन्दुनाड्यः षोडश-घटिकाः पुण्यकालः। इन्दोस्तु त्रिधरापलैर्युक् त्रयोदशभिः पलैर्युक्ता एकैव घटिका। 'कुजस्य' भौमस्य तु एकपलयुक्ताश्चतस्रो घटिकाः। बुधस्य चतुर्दशपलयुक्तास्तिस्रः। 'गुरोः' बृहस्पतेः, सप्तत्रिंशत्पलयुक्ताश्चतस्रः। शुक्रस्य पलाधिकाश्चतस्रः। शनैश्चरस्य पलसप्तयुक्ताः द्विर्नागनाड्यः। 'नागाः' अष्टौ, द्विरावृत्ता नागा द्विर्नागाः।

तदेतेषु रात्रित्यागपरिग्रहपक्षेषु क्षोदक्षमो ग्राह्यः।

॥ इति संक्रान्तिनिरूपणम्॥

अथ व्यतीपातः।

तत्र प्रशंसादि याज्ञवल्क्यः।

शतमिन्दुक्षये दानं[1] सहस्रन्तु दिनक्षये।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम्॥

वाराहपुराणे।

दर्शे शतगुणं दानं तच्छतघ्नं दिनक्षये।
तच्छतघ्नञ्च संक्रान्तौ शतघ्नं विषुवे ततः॥
युगादौ तच्छतगुणमयने तच्छताहतम्।
सोमग्रहे तच्छतघ्नं रविग्रहे त्वसंक्षयम्॥
व्यतीपाते त्वनन्तञ्च दानं वेदविदो विदुः।

'शतघ्नं' शतगुणमित्यर्थः। व्यतीपातोऽत्र विष्कम्भादिषु योगेषु सप्तदशो योगः।

अस्योत्पत्तिमाह गालवः।

चन्द्रार्कयोर्नयनवीक्षणजातमूर्त्तिः
कालानलद्युतिनिभः पुरुषोऽतिरौद्रः।
अन्योन्यतोऽनुनिपतंश्च[2] निरीक्ष्यमाणः
सञ्जातयेवमिति च व्यतिपातयोगः॥

अस्य चोत्पत्ति-भ्रमण-पतनसमयेषु पतनानन्तरञ्च क्रियमाणं स्नानदानश्राद्धादिकं महाफलं भवति।

तथाह याज्ञवल्क्यः।

उत्पत्तौ लक्षगुणं, कोटिगुणं भ्रमणनाडिकायान्तु।
अर्बुदगुणितं पतने, जपदानाद्यक्षयं पतिते॥

उत्पत्त्यादिमानञ्च ज्योतिः शास्त्रे।

विंशतिर्द्वियुतोत्पत्तौ भ्रमणे चैकविंशतिः।
पतने दशनाड्यस्तु पतिते सप्तनाडिकाः॥

वृद्धमनुना तु प्रकारान्तरेण व्यतीपातो दर्शितः।

श्रवणाश्विधनिष्ठार्द्रा नागदैवतमस्तके।
यद्यमा रविवारेण व्यतीपातः स उच्यते॥

नागदैवतमाश्लेषा। मस्तक इति श्रवणादिभिः प्रत्येकं सम्बध्यते। केचित्तु मस्तकं मृगशिर इति व्याचक्षते। 'अमा' अमावास्या। सा यद्येतेषु नक्षत्रेष्वादित्यवारयुक्ता भवति तदा स एव योगो व्यतीपातसंज्ञो भवति।

शास्त्रान्तरे।

पञ्चाननस्थौ गुरुभूमिपुत्रौ—
मेषे रविः स्याद्यदि शुक्लपक्षे।

---

१. पुण्यमिति। २. अस्त्रौघतोनुविपतंश्चेति।

पाशाभिधाना करभेण युक्ता
तिथिर्व्यतीपात इतीह योगः ॥
अस्मिन् हि गोभूमिहिरण्यवस्त्र-
दानेन सर्व्वं परिहाय पापम् ।
शूरत्वमिन्द्रत्वमनामयत्वं
मर्त्याधिपत्यं लभते मनुष्यः ॥

'पञ्चाननः' सिंहः । 'गुरु-भूमिपुत्रौ' बृहस्पत्यङ्गारकौ । 'पाशाभिधाना' द्वादशी । 'करभं' हस्तनक्षत्रम् ।

आह भृगुः ।

क्रान्तिसाम्यसमयः समीरितः
सूर्य्यपर्व्वसदृशो मुनीश्वरैः ।
तत्र दत्त हुत जप्तपूजनं
यागकोटिगुणमाह[१] भार्गवः ॥

अयमर्थः ।

सूर्य्याचन्द्रमसोः क्रान्तिसाम्ये पुण्यकालद्वयं भवति । एको व्यतीपाताख्यः । अपरो वैधृत्याख्यः । तत्र क्रान्तिसाम्यलक्षणस्य व्यतीपातस्य गण्डोत्तरार्द्धादारभ्य क्रमात् सार्द्धेषु पञ्चयोगेषु सम्भवोऽस्ति ।

वैधृतिसंज्ञस्य तु शुक्लयोगादारभ्य क्रमात् सार्द्धेषु पञ्चयोगेषु सम्भवः । तत्पर्व्व-कालसंख्या च दशघटिकाभ्यः समारभ्यैकसप्तत्यधिकशतपर्य्यन्तं सम्भाव्यते ।

तथा च वेदाङ्गे ज्योतिषे ।

गण्डोत्तरार्द्धात्व्यतिपातसम्भवः
शुक्लादितो वैधृतिसंज्ञको भवेत् ।
सार्द्धेषु पञ्चसु परेषु तथेष्यते सः
एवं द्वयं तत् सुकृतैकसाधकम् ॥

आह विष्णुः ।

वैधृतौ च व्यतीपाते दत्तमक्षयकृत् भवेत् ।

भरद्वाजः ।

व्यतीपाते वैधृतौ च दत्तस्यान्तो न विद्यते ।
व्यतीपाते विशेषेण स हि सूक्ष्मः प्रकीर्त्तितः ॥

स्थूलप्रकारेण प्रसिद्धस्तु सप्तविंशतितमो योगो वैधृत इति ।

अत्र च व्यतीपाते श्राद्धं कर्तव्यमित्याह पितामहः ।

अमावास्या व्यतीपात पौर्णमास्यष्टकासु च ।
विद्वान् श्राद्धमकुर्व्वाणः प्रायश्चित्तीयते तु सः ॥

---

१. लक्षकोटिगुणमाहेति ।

अत्र प्रायश्चित्तीयते इति वचनं श्राद्धस्यावश्यकतां गमयति ।

॥ इति व्यतीपातनिरूपणम् ॥

अथ गजच्छाया ।

स्कन्दपुराणे ।

यदेन्दुः पितृदैवत्ये हंसश्चैव करे स्थितः ।
तिथिर्वैश्रवणी या च गजच्छायेति सा स्मृता ॥

'इन्दुः' चन्द्रमाः । 'पितृदैवत्ये' नक्षत्रे मघायां । 'हंसः' सूर्य्यः' । 'करः' हस्तः । 'तिथिर्वैश्रवणी' त्रयोदशी ।

नरसिंहपुराणे ।

हंसे हंसस्थिते या तु मघायुक्ता त्रयोदशी ।
तिथिर्वैश्रवणी नाम सा छाया कुञ्जरस्य तु ॥

ब्रह्मपुराणे ।

योगो मघात्रयोदश्योः कुञ्जरच्छायसंज्ञकः ।
भवेन्मघायां संस्थे च शशिन्यर्के करस्थिते ॥इति॥

अयमर्थः ।

सूर्य्ये हस्तस्थिते चन्द्राधिष्ठिताभिर्मघाभिस्त्रयोदश्या योगो गजच्छायसंज्ञकः । स च भाद्रपदापरपक्षे सम्भवति ।

विभाषा सेनासुराच्छायेति छायाशब्दस्य नपुंसकत्वम् ।

हंसे हंसस्थिते या तु अमावास्या करान्विता ।
सा ज्ञेया कुञ्जरच्छाया इति बौधायनोऽब्रवीत् ॥

'हंसः' सूर्य्यः । हंसदैवतत्वात् हस्तनक्षत्रमपि हंसः । 'करान्विता' चन्द्रयुक्त हंसान्विता ।

सैंहिकेयो यदा सूर्य्यं ग्रसते पर्व्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥इति॥

'सैंहिकेयः' राहुः । 'पर्व्वसन्धिषु' अमावास्याप्रतिपदोः सन्धिषु । 'गजच्छाया' प्रसंगाद्देशरूपापि गजच्छायोच्यते ।

मनुः ।

अपि नः स कुले भूयाद्यो नो दद्यात् त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥

प्राचीच्छाया यस्मिन् देशे स प्राक्छायो देशः तस्मिन् कुञ्जरः प्रसिद्धः । महाभारतेऽपि ।

अनेन सर्व्वलोहेन वर्षासु नियतव्रतः ।
हस्तिच्छायासु विधिवत् कर्णव्यजनवीजितः ॥

श्राद्धं दद्यादिति शेषः ।

'सर्व्वलोहेन' लोहितसर्व्वाङ्गेन । कर्णव्यजनवीजितइत्यनेनैतद्वचनं प्रत्यक्ष-गजच्छायाविषयमित्यवगम्यते ।

मार्कण्डेयपुराणे ।

वनस्पतिगते सोमे च्छाया तु प्राङ्मुखी भवेत् ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥

अमावास्यापराह्ण इत्यर्थः ।

वायुपुराणे ।

घृतेन भोजयेद् विप्रान् घृतं भूमौ समुत्सृजेत् ।
छायायां हस्तिनश्चैव दद्याच्छ्राद्धं न शोचति ॥

विष्णुधर्म्मोत्तरे पितृवाक्यम् ।

गयायां दर्शने राहोः खड्गमांसेन योगिनम् ।
भोजयेत्तु कुलेऽस्माकं छायायां कुञ्जरस्य च ॥
आकल्पकालिकी तृप्तिस्तेनास्माकं भविष्यति ।
दाता सर्व्वेषु लोकेषु कामचारी भविष्यति ॥
यदैतत् पञ्चकं न स्यादेकेनापि वयं तदा ।
तृप्तिं प्राप्स्यामो महतीं किं पुनः सर्वसम्पदा ॥इति॥

अत्र श्राद्धभोक्तुर्दोषः स्मृत्यन्तरे दर्शितः ।

कृष्णाजिनप्रतिग्राही विक्रयी चैव रेतसः ।
गजच्छायाश्रितो भुक्त्वा न भूयः पुरुषो भवेत् ॥इति॥

ब्रह्मपुराणेप्युक्तम् ।

मृतके सूतके चैव ग्रहणे चन्द्रसूर्य्ययोः ।
छायायां कुञ्जरस्याथ भुक्त्वा तु नरकं व्रजेत् ॥इति॥

अयञ्च गजच्छायायां भोजने दोषः ।

केनचित् प्रत्यक्षगजच्छायायामित्युक्तं, केनचित् पारिभाषिकगजच्छायाया-मिति । तत्र विस्पष्टो विशेषहेतुर्नोपलभ्यते ।

इति सार्वत्रिक एवं दोषः ।

॥ इति गजच्छायानिरूपणम् ॥

अथ चन्द्रसूर्य्ययोर्ग्रहणम् ।

तत्र प्रशंसादि ।   शातातपः ।

स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
आसुरीं रात्रिमन्यत्र तस्मात्तां परिवर्जयेत् ॥

देवलः ।

यथा स्नानञ्च दानञ्च सूर्य्यस्य ग्रहणे दिवा ।
सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते ॥

मार्कण्डेयपुराणे ।

चन्द्रे वा यदि वा सूर्य्ये दृष्टे राहौ महाग्रहे ।
अक्षयं कथितं पुण्यं तत्रार्के तु विशेषतः ॥

'दृष्टे' दर्शनयोग्य इत्यर्थः ।

व्यासः ।

सर्व्वं भूमिसमं दानं सर्व्वे ब्रह्मसमा द्विजाः ।
सर्व्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ॥
इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः ।
गङ्गातोये तु सम्प्राप्ते इन्दोः कोटी रवेर्दश ॥

देवीपुराणे ।

कार्त्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे ।
मार्गे तु ग्रहणं पुण्यं देविकायां महामुने ॥
पौषे तु नर्मदा पुण्या माघे सन्निहती शुभा ।
फाल्गुने वरणा पुण्या चैत्रे पुण्या सरस्वती ॥
वैशाखे ग्रहणे पुण्या चन्द्रभागा सरिद्वरा ।
ज्यैष्ठे तु कौशिकी पुण्या आषाढ़े तापिका नदी ॥
श्रावणे सिन्धुनामा च प्रौष्ठे श्रेष्ठा च गण्डकी ।
आश्विने सरयूः श्रेष्ठा भूयः पुण्या तु नर्मदा ॥
गोदावरी महापुण्या चन्द्रे राहुसमन्विते ।
सूर्य्ये च शशिना ग्रस्ते तमोरूपे महामते ॥
नर्मदातोयसंसर्गात् कृतकृत्यो भवेन्नरः ।
स्पृशन्ति चावगाहन्ति नराः प्रकृतिमानुषाः ॥
स्मृत्वा शतक्रतुफलं दृष्ट्वा गोदानजं फलम् ।
स्पृष्ट्वा गोमेधजं पुण्यं पीत्वा सौत्रामणीं लभेत् ॥
स्नात्वा वाजिमखं पुण्यं प्राप्नुयादविचारतः ।
रविचन्द्रोपरागे च अयने चोत्तरे तथा ।
एवं गङ्गापि द्रष्टव्या तद्वद्देवी सरस्वती ॥

गङ्गायमुनमित्यत्र सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवतीत्येकवद्भावः ।

अत्र यद्यपि पौषे तु नर्मदा पुण्येत्यतिदेशप्रधानो व्यपदेशो दृश्यते तथापि कार्त्तिके ग्रहणं श्रेष्ठमित्याद्युपक्रमानुरोधात् सर्व्वत्र ग्रहणकालस्यैव प्राधान्यमवगन्तव्यम् ।

व्यासः ।

सूर्य्यवारे भवेद्भानोः सोमे सोमग्रहस्तथा ।
चूड़ामणिरिति ख्यातस्तत्रानन्तं फलं भवेत् ॥
वारेष्वन्येषु यत्पुण्यं ग्रहणे चन्द्रसूर्य्ययोः ।
तत्पुण्यं कोटिगुणितं योगे चूड़ामणौ स्मृतम् ॥

विष्णुपुराणे ।

राहोश्च दर्शने दत्तं श्राद्धमाचन्द्रतारकम् ।
गुणवत् सर्वकामीयं पितॄणामुपतिष्ठते ॥

ऋष्यशृङ्गः ।

राहुग्रस्ते तु वै सूर्य्ये यस्तु श्राद्धं प्रकल्पयेत् ।
तेन वै सकला पृथ्वी दत्ता विप्रस्य वै करे ॥

वृद्धवशिष्ठः ।

त्रिदशाः स्पर्शसमये तृप्यन्ति पितरस्तथा ।
मनुष्या मध्यकाले तु मुक्तिकाले च राक्षसाः ॥इति॥

ग्रहणस्यादिमध्यावसानेषु कृते श्राद्धे क्रमात् त्रिदशादयस्तृप्यन्तीत्यर्थः ।

लिङ्गपुराणे शातातपः ।

सर्व्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने ।
अकुर्व्वाणस्तु तच्छ्राद्धं पङ्के गौरिव सीदति ॥

इति वचनं श्राद्धस्यावश्यकताङ्गमयति । कूर्मपुराणे चास्य श्राद्धस्य नैमित्तिकत्वेनावश्यकतां प्रतिपाद्य काम्यत्वमपि प्रतिपादितम् ।

अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु ।
तिस्रश्चान्वष्टकाः पुण्या माघी पञ्चदशी तथा ॥
त्रयोदशी मघायुक्ता वर्षासु च विशेषतः ।
तस्य पाकश्राद्धकाला नित्याः प्रोक्ता दिने दिने ॥
नैमित्तिकं तु कर्त्तव्यं ग्रहणे चन्द्रसूर्य्ययोः ।
बान्धवानाञ्च मरणे नारकी स्यादतोऽन्यथा ॥
काम्यानि चैव श्राद्धानि शस्यन्ते ग्रहणादिषु ।
अयने विषुवे चैव व्यतीपातेप्यनन्तकम् ॥
सङ्क्रान्त्यामक्षयं श्राद्धं तथा जन्मदिनेष्वपि ।
नक्षत्रेषु च सर्व्वेषु कार्य्यं काम्यं विशेषतः ॥इति॥

मार्कण्डेयपुराणे ।

विशिष्टब्राह्मणप्राप्तौ सूर्य्येन्दुग्रहणेऽयने ।
विषुवे रविसंक्रान्तौ[1] व्यतीपाते च पुत्रक ॥
श्राद्धार्हद्रव्यसम्प्राप्तौ[2] तथा दुःस्वप्नदर्शने ।
जन्मर्क्षग्रहपीडासु श्राद्धं कुर्व्वीत चेच्छया ॥इति॥

अत्र सूर्य्यग्रहणादिकालेषु तथा 'इच्छया' स्वर्गफलकामनया, श्राद्धं कुर्य्यादिति इच्छयेत्यस्यार्थः, न पुनर्यदीच्छति कर्त्तुं तर्हि कुर्य्यात् न चेन्न कुर्य्यादिति ।

मत्स्यपुराणे ।

चन्द्रसूर्य्यग्रहे चैव मरणे पुत्रजन्मनि ।
मलमासेऽपि देयं स्याद्दत्तमक्षयकारकम् ॥

शातातपः ।

आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा ।
आमश्राद्धं द्विजो दद्याच्छूद्रो दद्यात् सदैव तु ॥

षट्त्रिंशन्मते ।

सूर्य्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा ।
तत्र स्नानं न कुर्व्वीत दद्याद्दानं न च क्वचित् ॥

॥ इति ग्रहणनिरूपणम् ॥

अथ युगादयः ।

भविष्यपुराणे ।

वैशाखस्य तृतीया या नवमी कार्त्तिकस्य तु ।
युगादयः स्मृता ह्येता दत्तस्याक्षयकारिकाः ॥

नभस्यो भाद्रपदः । अत्र त्रयोदशीव्यतिरिक्ताः सर्वाः शुक्लाः ।

तथा च ब्रह्मपुराणे ।

वैशाखशुक्लपक्षे तु तृतीयायां कृतं युगम् ।
कार्त्तिके शुक्लपक्षे तु त्रेता च नवमेऽहनि ॥
अथ भाद्रपदे कृष्णत्रयोदश्यान्तु द्वापरम् ।
माघे तु पौर्णमास्याञ्च घोरं कलियुगं तथा ॥
युगारम्भास्तु तिथयो युगाद्यास्तेन संस्मृताः ।

कृतयुगं प्रवृत्तमिति शेषः ।

अत्रकेचित् । 'द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः' इति नारदीयपुराण-वचनात् युगादिद्वयस्य कृष्णपक्षस्थत्वं मन्यमाना माघस्यामावास्यामेव युगादिमाहुः ।

---

१. सति संक्रान्तौ इति । २. श्राद्धार्थे द्रव्यसम्प्राप्तौ इति ।

तथा च नागरखण्डे।

अधुना शृणु राजेन्द्र युगाद्याः पितृवल्लभाः।
यासां सङ्कीर्त्तनेनापि क्षीयते पापसञ्चयः॥
नवमी कार्त्तिके शुक्ला तृतीया माधवे सिता।
अमावास्या च तपसो नभस्ये च त्रयोदशी॥
त्रेता-कृत-कलीनान्तु द्वापरस्यादयः क्रमात्।
स्नाने दाने जपे होमे विशेषात् पितृतर्पणे॥
कृतस्याक्षयकारिण्यः सुकृतस्य महाफलाः।

'माधवे' वैशाखे, 'सिता' शुक्ला, 'तपसः' माघस्य।

विष्णुपुराणे।

वैशाखमासस्य तु या तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे।
नभस्य मासस्य च कृष्णपक्षे
त्रयोदशी पञ्चदशी च माघे॥
पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः।
श्राद्धं कृतं तेन समा सहस्रं
रहस्यमेतत् पितरो वदन्ति॥

यासौ तृतीया यासौ नवमीत्यादि सम्बन्धः।

भविष्योत्तरे।

वैशाखस्य तृतीया या समा कृतयुगेन सा।
नवमी कार्त्तिके या तु त्रेतायुगसमा तु सा॥
त्रयोदशी नभस्ये तु द्वापरेण समा मता।
माघे पञ्चदशी राजन् कलिकालसमा स्मृता॥
एताश्चतस्रो राजेन्द्र युगानां प्रभवाः शुभाः।
युगादयस्तु कथ्यन्ते तेनैताः पूर्व्वसूरिभिः॥
उपवासस्तपोदानं श्राद्धं होमो जपस्तथा।
यदत्र क्रियते किञ्चित् सर्व्वं कोटिगुणं भवेत्॥

कृतयुगेन समेति। समग्रेऽपि कृतयुगे प्रत्यहं क्रियमाणेन कर्म्मणा यावत् पुण्यं भवति तावदस्यामेव तिथावित्यर्थः। कोटिशब्दोऽत्र बाहुल्यातिशयपरः।

मत्स्यपुराणे।

वैशाखस्य तृतीया या नवमी कार्त्तिकस्य तु।
पञ्चदश्यपि माघस्य नभस्ये तु त्रयोदशी॥
युगादयः स्मृता ह्येता दत्तस्याक्षयकारिकाः।

देवलः ।

तृतीया रोहिणीयुक्ता वैशाखस्य तु या सिता ।
मघाभिः सहिता कृष्णा नभस्ये तु त्रयोदशी ॥
युगादयः स्मृता ह्येता दत्तस्याक्षयकारिकाः ।

ब्रह्मपुराणे ।

वैशाखस्य तृतीयायां नवम्यां कार्त्तिकस्य तु ।
श्राद्धं कार्य्यन्तु शुक्लायां संक्रान्तिविधिना नरैः ॥
त्रयोदश्यां भाद्रपदे माघे चन्द्रक्षयेऽहनि ।
श्राद्धं कार्य्यं पायसेन दक्षिणायनवच्च तत् ॥

पिण्डनिर्व्वपणं विनेत्यर्थः ।

॥ इति युगादयः ॥

अथ युगान्ताः ।

ब्रह्मपुराणे ।

सूर्य्यस्य सिंहसंक्रान्त्यामन्तः कृतयुगस्य तु ।
अथ वृश्चिकसंक्रान्त्यामन्तस्त्रेतायुगस्य तु ॥
ज्ञेयस्तु वृषसंक्रान्त्यां द्वापरान्तश्च संज्ञया ।
तथा च कुम्भसंक्रान्त्यामन्तः कलियुगस्य तु ।
युगादिषु युगान्तेषु श्राद्धमक्षयमुच्यते ॥

॥ इति युगान्ताः ॥

अथ मन्वन्तरादयः ।

तत्र मात्स्यब्रह्मपुराणयोः ।

आश्वयुक् शुक्लनवमी द्वादशी कार्त्तिकस्य च ।
चैत्रस्य तु तृतीया या तथा भाद्रपदस्य तु ॥
फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा ।
श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा ॥
आषाढस्य तु दशमी माघमासस्य सप्तमी ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठे पञ्चदशी तथा ॥
मन्वन्तरादयश्चैता दत्तस्याक्षयकारिकाः ।
स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ।
सर्व्वमेवाक्षयं विद्यात् कृतं मन्वन्तरादिषु ॥

अमावास्याष्टमीव्यतिरेकेण सर्व्वाः शुक्ला एव ।

नारदीयपुराणे ।

श्रावणस्यामावास्या भाद्रपदस्य कृष्णाष्टमी मन्वन्तरादय इति प्रतिपादितम्।

तद्यथा।

आश्विने शुक्लनवमी द्वादशी कार्त्तिके तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥
श्रावणस्याप्यमावास्या पौषस्यैकादशी तथा।
आषाढस्यापि दशमी माघमासस्य सप्तमी॥
नभस्यस्याष्टमी कृष्णा तथाषाढीयपूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठे पञ्चदशी तथा॥
मन्वन्तरादयो ह्येता दत्तस्याक्षयकारिकाः।

नागरखण्डे माघशुक्लतृतीयापि मन्वन्तरादिरित्युक्तम्।

मन्वादिरपि ते वत्स ताः शृणुष्व नराधिप।
पितृणां वल्लभा नित्यं सर्व्वपापक्षयावहाः॥
यासु तोयमपि क्ष्मायां प्रदत्तं तिलमिश्रितम्।
पितृभ्योऽक्षयतां याति श्रद्धापूतेन चेतसा॥
आश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकस्य च।
तृतीयापि च माघस्य तथा भाद्रपदस्य च॥
अमावास्या तपस्यस्य पौषस्यैकादशी तथा।
तथाषाढस्य दशमी माघमासस्य सप्तमी॥
श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा।
तथा कार्त्तिकमासस्य तथा वै फाल्गुनस्य च॥
चैत्रस्य ज्यैष्ठमासस्य पञ्चैताः पूर्णिमा नृप।
मन्वन्तरादयः प्रोक्ता आसां पूर्णाश्च या तव॥
आसु तोयमपि स्नात्वा तिलदर्भविमिश्रितम्।
पितॄनुद्दिश्य यो दद्यात् स गतिं परमां लभेत्॥
इहलोके परे चैव पितॄणाञ्च प्रसादतः।
किं पुनर्विविधैरन्नैरसैर्वस्त्रैस्तु दक्षिणैः॥

मात्स्यब्राह्मपुराणयोः।

यस्यां मन्वन्तरस्यादौ रथमाप दिवाकरः।
माघमासस्य सप्तम्यां सा तु स्यात् रथसप्तमी॥
पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः।
श्राद्धं कृतं तेन समासहस्रं
रहस्यमेतत् पितरो वदन्ति॥

॥ इति मन्वन्तरादयः॥

अथ कल्पादयः ।

तत्र नागरखण्डे ।

अथ कल्पादयो राजन् कथ्यन्ते तिथयः शुभाः ।
यासु श्राद्धे कृते तृप्तिः पितॄणामक्षया भवेत् ॥
चैत्रशुक्लप्रतिपदि श्वेतः कल्पः पुराभवत् ।
तस्य शुक्लत्रयोदश्यामुदानः समजायत ॥
कल्पस्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत् ।
अथ कृष्णत्रयोदश्यां गौरीकल्पोऽप्यकल्पयत् ॥
वैशाखस्य तृतीयायां शुक्लायां नीललोहितः ।
चतुर्दश्यान्तु शुक्लायां प्रवृत्तो गारुडाभिधः ॥
समानस्तु द्वितीयायां कृष्णायामुपपद्यते ।
माहेश्वरश्चतुर्दश्यां कृष्णपक्षे समागमत् ॥
ज्यैष्ठशुक्लतृतीयायां वामदेवस्य सम्भवः ।
पौर्णमास्यान्तु तस्यैव कौर्मः प्रववृते नृप ॥
कृष्णपक्षे तृतीयायामाग्नेयः समगच्छत ।
पितृपक्षे त्वमावास्यान्तस्यैवाश्रित्य पप्रथे ॥
शुचौ शुक्लचतुर्थ्यान्तु कल्पो रथ्यन्तरोऽभवत् ।
तस्यान्तस्यैव कृष्णायां सोमकल्पः समापतत् ॥
श्रावणे शुक्लपञ्चम्यां रौरवः समवर्त्तत ।
तस्यैव कृष्णपञ्चम्यां मानवः समपद्यत ॥
षष्ठीं प्रौष्ठपदे शुक्लां प्राप्य प्राणाधिपोऽभवत् ।
सितेतरायां षष्ठ्यान्तु तस्य तत् पुरुषाह्वयः ॥
वहुकल्पस्तु सप्तम्यां शुक्लायामाश्विनस्य तु ।
कृष्णायामपि वैकुण्ठः प्रविवेश विशाम्पते ॥
कार्त्तिकस्य सिताष्टम्यां कल्पः कन्दर्पसंज्ञकः ।
असितायां पुनर्जज्ञे लक्ष्मीकल्पस्य कल्पना ॥
मार्गे शुक्लनवम्यान्तु कल्पः सङ्खोऽभ्यपद्यत ।
असितायान्तु सावित्रीकल्पः प्रारम्भमभ्यगात् ॥
पौषे दशम्यां शुक्लायां ईशानः प्रादुरास ह ।
असितायामघोरस्य कल्पस्योपक्रमोऽभवत् ॥
एकादश्यान्तु शुक्लायां माघे व्यानः प्रजज्ञिवान् ।
तस्यामेव तु मिश्रायां वाराहः प्राप भूपते ॥
सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य च ।
कृष्णायामथ वै राजन् विराजस्तु महामते ॥
इति त्रिंशदमी कल्पास्तिथयः परमेष्ठिनः ।
आरम्भतिथयस्तेषामुक्ताः पुण्यतमा मया ॥
तासु श्राद्धे कृते पुण्यमाकल्पाय प्रकल्पते ।

मत्स्यपुराणे ।

वैशाखस्य तृतीया या कृष्णा या फाल्गुनस्य च ।
पञ्चमी चैत्रमासस्य तस्यैवान्त्या तथा परा ॥
शुक्ला त्रयोदशी माघे कार्त्तिकस्य च सप्तमी ।
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ॥
कल्पानामादयो ह्येता दत्तस्याक्षयकारिकाः ।

'अन्त्या' अमावास्या। वैशाखतृतीया, फाल्गुनतृतीया, चैत्रपञ्चमी, चैत्रामावास्येति कृष्णाः। माघत्रयोदशी, कार्त्तिकसप्तमी, मार्गशीर्षनवमी एताः शुक्लाः।

॥ इति कल्पादयः ॥

अथ द्रव्यब्राह्मणसम्पत्त्योपलक्षितः कालः ।

तत्र हारीतः ।

तीर्थद्रव्योपपत्तौ तु न कालमवधारय ।
पात्रञ्च ब्राह्मणं प्राप्य सद्यः श्राद्धं विधीयते ॥

'तीर्थं' गयादि, 'द्रव्यं' अन्नादि वक्ष्यमाणम्। श्रोत्रियेत्यादिविशेषणविशिष्ठञ्च ब्राह्मणं प्राप्य न कालान्तरं प्रतीक्षेत, किन्तु तस्मिन्नेव काले श्राद्धं कुर्य्यात्। अत्र सद्य-इति वचनादावश्यकत्वं प्रतीयते।

मार्कण्डेयपुराणे ।

विशिष्टब्राह्मणप्राप्तौ सूर्य्येन्दुग्रहणेऽयने ।
श्राद्धार्हद्रव्यसम्पत्तौ तथा दुःस्वप्नदर्शने ॥
जन्मर्क्षग्रहपीडासु श्राद्धं कुर्वीत चेच्छया ॥इति॥

अत्रेच्छापदं यथा नित्यत्वेन न विरुध्यते तथा व्याख्यातमेव ग्रहणप्रकरणे ।

ब्रह्मपुराणे ।

यदा च श्रोत्रियोऽभ्येति गेहं वेदविदग्निचित् ।
तेनैकेनापि कर्त्तव्यं श्राद्धं विषुववच्छुभम् ॥
श्राद्धीयद्रव्यसम्प्राप्तिर्यदा स्यात् साधुसङ्गमः ।
पार्व्वणेन विधानेन श्राद्धं कार्य्यं द्विजोत्तमैः ॥

विष्णुपुराणे ।

द्रव्यब्राह्मणसम्पत्त्युपलक्षिते काले काम्यमपि श्राद्धमुक्तम् ।
तथाहि तत्र 'काम्यान् कल्पान् शृणुष्व' इत्यस्यानन्तरं भवति वचनम् ।

श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजम् ।
श्राद्धं कुर्वीत विज्ञाय व्यतीपातेऽयने तथा ॥

॥ इति द्रव्यब्राह्मणसम्पत्त्युपलक्षितकालनिरूपणम् ॥

अथ प्रकीर्णकालः ।

मत्स्यपुराणे ।

अतः परं प्रवक्ष्यामि विष्णुना यदुदीरितम् ।
श्राद्धं साधारणं नाम भुक्तिमुक्तिफलप्रदम् ॥
अयने विषुवे युग्मे सामान्ये वार्कसंक्रमे ।
अमावास्याष्टकायां वा कृष्णपक्षे विशेषतः ॥
आर्द्रा-मघा-रोहिणीषु द्रव्यब्राह्मणसङ्गमे ।
गजच्छायाव्यतीपाते विष्टिवैधृतवासरे ॥

तथा ।

वैशाख्यामुपरागे तु तथोत्सवमहालये ।

ब्रह्मपुराणे ।

श्राद्धं देयमुशन्तीह मासि मास्युडुपक्षये ।
पौर्णमासेऽपि च श्राद्धं कर्त्तव्यमृक्षगोचरे[१] ॥
नित्यं श्राद्धं विधेयञ्च मनुष्यैरिह गोपते ।
वृद्धिश्राद्धञ्च कर्त्तव्यं जातकर्म्मादिके बुधैः ॥
कन्यागते सवितरि दिनानि दश पञ्च च ।
पार्व्वणेनेह विधिना श्राद्धं तत्र विधीयते ॥

आह जातूकर्णः ।

ग्रहोपरागे च सुते च जाते
पित्र्ये मघायामयनद्वये वा ।
नित्यञ्च शङ्खे च तथैव पद्मे
दत्तं भवेन्निष्कसहस्रतुल्यम् ॥

अत्र यन्नित्यं दत्तमित्यन्वयं मन्यमाना ग्रहोपरागादिषु श्राद्धादेर्नित्यतां ब्रुवते । अथवा 'नित्यम्' अहरहर्यावज्जीवम् । 'पित्र्ये मघायाम्' इति भाद्रपदापरपक्षस्थितासु मघास्वित्यर्थः ।

शङ्खपद्मयोर्लक्षणमपि स एवाह ।

शङ्खं प्राहुरमावास्यां क्षीणसोमां द्विजोत्तमाः ।
अष्टकासु भवेत्पद्मं तयोर्दत्तं तथाक्षयम् ॥इति॥

शङ्खस्त्वाह ।

यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च ।
पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम् ॥इति॥

---

[१] कर्त्तव्यं वृषगोचरे इति ।

विष्णुधर्म्मोत्तरे ।

आश्विनस्यापरे पक्षे प्रथमे कार्त्तिकस्य च ।
यस्तु श्राद्धं सदा कुर्य्यात् सोऽश्वमेधफलं लभेत् ॥
निद्रां त्यजति सर्व्वात्मा तस्मिन् काले जनार्दनः ।
तत्र श्राद्धमथानन्तं नात्र कार्य्या विचारणा ॥

तथा ।

अक्षयञ्च तथा श्राद्धं विज्ञेयं राहुदर्शने ।
व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव ।
न तौ त्याज्यौ महाराज विना श्राद्धं कथञ्चन ॥

शातातपः ।

नवोदके नवान्ने च गृहप्रच्छादने तथा ।
पितरः स्पृहयन्त्यन्नं वर्षासु च मघासु च ।
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥

आह पितामहः ।

अमावास्या-व्यतीपात-पौर्णमास्यष्टकासु च ।
विद्वान् श्राद्धमकुर्व्वाणो नरकं प्रतिपद्यते ॥

॥ इति प्रकीर्णकालाः ॥

अथ काम्यश्राद्धकालाः ।

तत्र तावत्तिथयः ।

आह कात्यायनः ।

अथ काम्यानि भवन्ति । स्त्रियः प्रतिरूपाः प्रतिपदि । द्वितीयायां स्त्रीजन्म । अश्वाः तृतीयायाम् । चतुर्थ्यां क्षुद्रपशवः । पुत्राः पञ्चम्याम् । षष्ठ्यामध्वभागी । कृषिः सप्तम्याम् । वाणिज्यमष्टम्याम् । एकशफं नवम्याम् । दशम्याङ्गावः । परिचारका एकादश्याम् । द्वादश्यां धनधान्यं कुप्यं जातिश्रैष्ठ्यम् । हिरण्यानि त्रयोदश्याम् । युवानः शस्त्रहतस्य चतुर्दश्याम् । अमावास्यायां सर्वमिति ।

आपस्तम्बः ।

सर्व्वेष्वेवापरपक्षस्याहःसु क्रियमाणे पितॄन् प्रीणाति । कर्त्तुस्तु कालनियमात्-फलविशेषाः । प्रथमेऽहनि क्रियमाणे स्त्रीप्रायमपत्यं जायते । द्वितीये स्तैणम् । तृतीये ब्रह्मवर्चसम् । चतुर्थे क्षुद्रपशुः । पञ्चमे पुमान् बह्वपत्यो न चानपत्यः प्रमीयते । षष्ठेऽध्वशीलोऽक्षशीलश्च । सप्तमे कृषेराप्तिः । अष्टमे पुष्टिः । नवमे एकखुरम् । दशमे व्यवहारशुद्धिः । एकादशे कृष्णायसं, त्रपुशीसं । द्वादशे पशुमान् । त्रयोदशे बहुमित्रो दर्शनीयापत्यो युवपरिमाणस्तुभवति । चतुर्दशे आयुधसिद्धिः । पञ्चदशे पुष्टिः । सततं श्राद्धं कुर्व्वन्नाप्नोत्यधिकारे विष्णुः ।

गृहे सरूपास्त्रियः प्रतिपदि। कन्यां वरां द्वितीयायाम्। अश्वांस्तृतीयायाम्। यशश्चतुर्थ्याम्। श्रियं पञ्चम्याम्। द्यूतविजयं षष्ठ्याम्। कृषिःसप्तम्याम्। वाणिज्यमष्टम्याम्। पशून् नवम्याम्। वाजिनो दशम्याम्। पुत्रान् ब्रह्मवर्चस्विनस्त्वेकादश्याम्। कनकरजते द्वादश्याम्। सौभाग्यं त्रयोदश्याम्। सर्व्वान् कामान् पञ्चदश्याम्। शस्त्रहतानां श्राद्धकर्म्मणि चतुर्दशी प्रशस्ता।

श्राद्धं कुर्य्यादित्यधिकारे हारीतः।

पञ्चमीं पुत्रकामः। षष्ठीं धनकामः। सप्तमीं पशुकामः। अष्टमीं राज्यकामः। नवमीं जेतुकामः। दशमीमन्नकामः। एकादशीं वृद्धिकामः। द्वादशीं स्त्रीकामः। त्रयोदशीं यशस्कामः। चतुर्दशीं भूतिकामः। स्वस्तिकामोऽमावास्यायां सर्व्वकामः। पैठीनसिः।

पञ्चम्यां पुत्रकामो यजेत। षष्ठ्यां पशुकामः। सप्तम्यां वृद्धिकामः। अष्टम्यामन्नाद्यकामः। नवम्यां ब्रह्मवर्चसकामः। दशम्यां सर्व्वकामः। एकादश्यां धनकामः। द्वादश्यां क्षेत्रकामः। त्रयोदश्यां स्त्रीवशित्वम्। चतुर्दश्यां शस्त्रेण हतानाम्। सर्व्वकामोऽमावास्यायाम्।

मनुः।

कुर्व्वन् प्रतिपदि श्राद्धं सरूपान् लभते सुतान्।
कन्यकां तु द्वितीयायां तृतीयायान्तु वन्दिनः॥
पशून् क्षुद्रांश्चतुर्थ्यान्तु पञ्चम्यां शोभनान् सुतान्।
षष्ठ्यां द्यूतं कृषिञ्चापि सप्तम्यां लभते नरः॥
अष्टम्यामपि वाणिज्यं लभते श्राद्धदः सदा।
नवम्यामेवैकखुरं दशम्यां द्विखुरं तथा॥
एकादश्यां तथा रौप्यं ब्रह्मवर्चस्विनः सुतान्।
द्वादश्यां जातरूपञ्च रजतं कुप्यमेव च॥
ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यान्तु सुप्रजाः।
प्रीयन्ते पितरश्चास्य ये च शस्त्रहता रणे॥
पक्षत्यादिविनिर्दिष्टान् विपुलान् मनसः प्रियान्।
श्राद्धदः पञ्चदश्यान्तु सर्व्वान् कामान् समश्नुते॥

'वन्दिनः' स्तावकान्।

ब्रह्मपुराण मार्कण्डेयपुराणयोः।

कन्यागते सवितरि दिनानि दश पञ्च च।
पार्व्वणेनेह विधिना श्राद्धं तत्र विधीयते॥
प्रतिपद्धनलाभाय द्वितीया द्विपदप्रदा।
वरार्थिनी तृतीया तु चतुर्थी पापनाशिनी[१]॥

---

१. शत्रुनाशिनीति।

श्रियं प्राप्नोति पञ्चम्यां षष्ठ्यां पूज्यो भवेन्नरः ।
गणाधिपत्यं सप्तम्यां अष्टम्यां बुद्धिमुत्तमाम् ॥
श्रियो नवम्यां प्राप्नोति दशम्यां पूर्णकामताम् ।
वेदांस्तथाप्नुयात् सर्व्वानेकादश्यां क्रियापरः ॥
द्वादश्यां जयलाभञ्च प्राप्नोति पितृपूजकः ।
प्रजां मेधां पशून् वृद्धिं स्वातन्त्र्यं पुष्टिमुत्तमाम् ॥
दीर्घमायुरथैश्वर्य्यं कुर्व्वाणस्तु त्रयोदशीम् ।
अवाप्नोति न सन्देहः श्राद्धं श्रद्धापरो जनः ॥
युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ।
तेन कार्य्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ॥
श्राद्धं कुर्व्वन्नमावास्यां यत्नेन पुरुषः शुचिः ।
सर्व्वान् कामानवाप्नोति स्वर्गे वासं समश्नुते[1] ॥

विष्णुधर्म्मोत्तरे ।

स्त्रियः सुरूपाश्च गृहे कन्याजन्म तथा धनम् ।
सर्व्वान् कामान् यशश्चैव श्रियं द्यूतजयं कृषिम् ॥
वाणिज्यञ्च पशूंश्चैव वाजिनश्च तथा सुतान् ।
सुवर्णरौप्यसौभाग्यं प्राप्नोति श्राद्धदः क्रमात्[2] ॥
प्रतिपत्प्रभृतिष्वेतद्यावद्राजन् त्रयोदशीम् ।
चतुर्दश्यां तु कर्त्तव्यं ये नराः शस्त्रघातिताः ॥
श्राद्धं सदा पञ्चदशीषु कुर्व्वन्
कामान् समग्रान् लभते मनुष्यः ।
तस्मात् प्रयत्नेन नरेन्द्र कार्य्यं
श्राद्धं सदा पञ्चदशीषु तज्ज्ञैः ॥

विष्णुधर्म्मोत्तरे ।

कन्यागते सवितरि कृष्णपक्षेऽष्टमी तु या ।
सा च पापहरा पुण्या शिवस्यानन्दवर्द्धनी ॥
स्नानं दानं जपो होमः पितृदेवाभिपूजनम् ।
सर्व्वं प्रीतिकरं स्याद्धि कृतं तस्यां त्रिलोचने ॥
विशेषतः कृतं श्राद्धं होमश्च विधिवन्मुने ।
तस्मात् श्राद्धं प्रयत्नेन तस्यां कुर्य्याद्विचक्षणः ॥
एकभक्तं तु पञ्चम्यां षष्ठ्यां नक्तं विदुर्व्बुधाः ।
उपवासस्तु सप्तम्यां अष्टम्यां पूजयेच्छिवम् ॥

---

१. स्वर्गञ्चानन्तमश्नुते इति ।
२. सदेति ।

पूजयित्वा शिवं भक्त्या पितृश्राद्धं तु कल्पयेत् ।
कृत्वा तु विधिवच्छ्राद्धं भुञ्जीत पितृसेवितम् ॥
यस्त्वस्यां कुरुते श्राद्धं पूजयित्वा त्रिलोचनम् ।
तस्य वर्षाणि तृप्ताः स्युः पितरो दश पञ्च च ॥

॥ इति काम्यास्तिथयः ॥

अथ नक्षत्राणि ।

तत्र मनुः ।

युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते ।
अयुक्षु तु पितॄनर्च्चन्[१] प्रजां प्राप्नोति पुष्कलाम् ॥

'युक्षु' समेषु । 'अयुक्षु' विषमेषु ।

यमः ।

युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामानवाप्नुयात् ।
गजच्छायां पितॄनर्च्चन् प्रजां प्राप्नोति पुष्कलाम् ॥

याज्ञवल्क्यः ।

स्वर्गं ह्यपत्यमोजश्च शौर्य्यं क्षेत्रं बलं तथा ।
पुत्रं श्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां श्रुतम् ॥
प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतींस्तथा ।
अरोगित्वं यशो वीतशोकतां परमां गतिम् ॥
धर्म्मं विद्यां भिषक्सिद्धिं कुप्यङ्गाश्चाप्यजादिकम् ।
अश्वानायुश्च विधिवत् यः श्राद्धं संप्रयच्छति ॥
कृत्तिकादिभरण्यन्तं सर्व्वान् कामानवाप्नुयात् ।
आस्तिकः श्रद्दधानश्च व्यपेतमदमत्सरः ॥

'प्रवृत्तचक्रता' अप्रतिहताज्ञाशास्तित्वम् ।

विष्णुः ।

स्वर्गं कृत्तिकासु । अपत्यं रोहिणीषु । ब्रह्मवर्च्चसं सौम्ये । रौद्राणां सिद्धिं- रौद्रे । भुवं पुनर्वसौ । पुष्टिं पुष्ये । श्रियं सार्पे । सर्व्वान् कामान् पैत्र्ये । सौभाग्यं- भाग्ये । धनमार्य्यम्णे । ज्ञातिश्रैष्ठ्यं हस्ते । रूपवतः सुतांस्त्वाष्ट्रे । वाणिज्यसिद्धिं स्वातौ । कनकं विशाखासु । मित्राणि मैत्रे । राज्यं शाक्रे । कृषिं मूले । समुद्रयान- सिद्धिमाप्ये । सर्व्वान् कामान् वैश्वदेवे । श्रैष्ठ्यमभिजिति । सर्व्वान् कामान्- श्रवणे । बलं वासवे । आरोग्यं वारुणे । कुप्यद्रव्यमाजे । गृहमाहिर्ब्रध्ने । गाः पौष्णे । तुरङ्गमा आश्विने । जीवितं याम्ये ।

---

१. सर्वानिति ।

'सौम्यं' मृगशिरः। 'रौद्रं' आर्द्रा। 'सार्पम्' आश्लेषा। 'पैत्र्यं' मघा। 'भाग्यं' पूर्व्वफाल्गुन्यः। 'आर्य्यम्णं' उत्तराफाल्गुन्यः। 'त्वाष्ट्रं' चित्रा। 'मैत्रम्' अनुराधा। 'शाक्रं' ज्येष्ठा। 'आप्यं' पूर्वाषाढा। 'वैश्वदेवम्' उत्तराषाढा। 'वारुणं' शतभिषा। 'वासवं' घनिष्ठा। 'आजं' पूर्व्वाभाद्रपदा। 'आहिर्ब्रघ्नः' उत्तराभाद्रपदा। 'पौष्णं' रेवती। 'आश्विनम्' अश्विनी। 'याम्यं' भरणी।

विष्णुधर्म्मोत्तरे।

स्वर्गं ह्यपत्यानि तथा ब्रह्मवर्च्चसमेव च।
रौद्राणां कर्म्मणां सिद्धिं भुवं पुष्टिं तथा श्रियम्॥
सर्व्वान् कामांश्च सौभाग्यं धर्म्मं ज्ञातिप्रधानताम्।
रूपयुक्तांश्च तनयान् वाणिज्यं धनसम्पदम्॥
कनकं सुहृदो राज्यं सफलाश्च तथा कृषिम्।
समुद्रयानलाभश्च सर्व्वान् कामांस्तथैव च॥
श्रैष्ठ्यं कामांस्तथा सर्व्वान् बलमारोग्यमेव च।
कुप्यद्रव्यं गृहङ्गाश्च तुरगांश्चैव जीवितम्॥
कृत्तिकादिभरण्यन्ते क्रमादुडुगणे नरः।
एकैकस्मिन् क्रमात् कुर्व्वन् श्राद्धमाप्नोत्यसंशयम्॥

मार्कण्डेयपुराणे।

कृत्तिकासु पितॄनर्च्चन्[१] स्वर्गमाप्नोति मानवः।
अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां[२] लभेत्॥
शौर्य्यमार्द्रास्ववाप्नोति क्षेत्रादि च पुनर्व्वसौ।
पुष्टिं पुष्ये सदाभ्यर्च्य आश्लेषासु वरान् सुतान्॥
मघासु स्वजनश्रैष्ठ्यं सौभाग्यं फल्गुनीषु च।
प्रदानशीलो भवति सापत्यश्चोत्तरासु च॥
प्रयाति श्रेष्ठतां यस्य हस्ते श्राद्धप्रदो नरः।
रूपयुक्तस्तु[३] चित्रासु तथापत्यान्यवाप्नुयात्॥
वाणिज्यलाभदा स्वातिर्विशाखा[४] पुत्रकामदा।
कुर्व्वन्तश्चानुराधासु लभन्ते चक्रवर्त्तिताम्[५]॥
आधिपत्यञ्च ज्येष्ठासु मूलेचारोग्यमुत्तमम्।
आषाढासु यशः प्राप्तिमुत्तरासु विशोकताम्॥
श्रवणे च शुभान् लोकान् धनिष्ठासु धनं महत्।
वेदवित्वमभिजिति भिषक्सिद्धिं च वारुणे॥

---

१. पितॄनर्च्येति। २. चौजस्वितामिति।
३. रूपयुक्तानीति। ४. वाणिज्यलाभं स्वात्यान्त्विति।
५. कुर्व्वन्तश्चानुराधासु दद्युश्चक्रप्रवर्त्तनमिति।

अजादिकं प्रौष्ठपदे विन्देद्भार्य्यां तथोत्तरे।
रेवतीषु तथा कुप्यमश्विनीषु तुरङ्गमान्॥
श्राद्धं कुर्वंस्तथाप्नोति भरणीष्वायुरुत्तमम्।
तस्मात् काम्यानि कुर्व्वीत ऋक्षेष्वेतेषु तत्त्ववित्॥

ब्रह्मवैवर्त्ते।

यमस्तु यानि श्राद्धानि प्रोवाच शशिविन्दवे।
तानि त्वं शृणु काम्यानि नक्षत्रेषु पृथक् पृथक्॥
श्रद्धायोगे तु यः श्राद्धं करोति सततं नरः।
अग्निदाता सुधीमान् यो यजते स गतज्वरः॥
अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां लभेत्।
क्रूराणां कर्म्मणां सिद्धिं आर्द्रायां श्राद्धमाचरन्॥
क्षेत्रभागी भवेत् पुत्री श्राद्धं कुर्व्वन् पुनर्व्वसौ।
पुष्टिकामः पुनः पुष्ये श्राद्धं कुर्व्वीत मानवः॥
आश्लेषासु पितॄनर्च्चन् वीरान् पुत्रानवाप्नुयात्।
श्रेष्ठो भवति ज्ञातीनां मघासु श्राद्धमाचरन्॥
फाल्गुनीषु पितॄनर्च्चन् सौभाग्यं लभते नरः।
प्रधानशीलः सोऽवश्यमुत्तरासु करोति यः॥
स सर्व्वमुख्यो भवति हस्ते यस्तर्पयेत् पितॄन्।
चित्रायाञ्चैव यः कुर्य्यात् पश्येद्रूपवतः सुतान्॥
स्वातीषु चैव यः कुर्य्याद्वाणिज्याल्लाभमाप्नुयात्।
पुत्रार्थी तु विशाखासु श्राद्धमीहेत मानवः॥
अनुराधासु कुर्व्वाणो नरश्चक्रं प्रवर्त्तयेत्।
आधिपत्यं लभेच्छ्रेष्ठं ज्येष्ठासु सततन्तु यः॥
मूलेनारोग्यमिच्छन्ति आषाढासु महेश्वरः।
उत्तरासु त्वषाढासु तीर्णशोको भवेन्नरः॥
श्रवणे मनुलोकेषु प्राप्नुयात् परमां गतिम्।
राज्यभोगं धनिष्ठासु प्राप्नुयाद्विपुलं धनम्॥
श्राद्धं त्वभिजिते कुर्व्वन् वेदान् साङ्गानवाप्नुयात्।
नक्षत्रे वारुणे कुर्व्वन् भैषज्ये सिद्धिमाप्नुयात्॥
पूर्व्वे प्रौष्ठपदे भक्तो विन्देताजादिकं बहु।
उत्तरास्वनतिक्रम्य विन्देद् गावः सहस्रशः॥
वहुकुप्यकृतं द्रव्यं विन्देत् कुर्व्वंस्तु रेवतीम्।
अश्वानाश्वयुजे भुंक्ते भरण्यामायुरुत्तमम्॥
इमं श्राद्धविधिं कुर्व्वन् शशिबिन्दुर्महीमिमाम्।
कृत्स्नाञ्च लेभे सोत्कृष्टो[1] लब्ध्वा च प्रशशास ताम्।

१. विसर्गलोपे सन्धिरार्षः।

कूर्म्मपुराणे ।

स्वर्गञ्च लभते कृत्वा कृत्तिकासु द्विजोत्तमः ।
अपत्यमथ रोहिण्यां सौम्ये तु ब्रह्मवर्च्चसम् ॥
रौद्राणां कर्म्मणां सिद्धिमार्द्रायां शौर्य्यमेव च ।
पुनर्व्वसौ क्षेत्रसिद्धिं पुष्ये पोषमवाप्नुयात् ॥
सर्व्वान् कामांस्तथा सार्पे पैत्र्ये सौभाग्यमेव च ।
आर्य्यम्णे तु धनं विन्द्यात् फाल्गुन्यां पापनाशनम् ॥
ज्ञातिश्रैष्ठ्यं तथा हस्ते चित्रायाञ्च बहून् सुतान् ।
वाणिज्यसिद्धिं स्वातौ तु विशाखासु सुवर्णकम् ॥
मैत्रे बहूनि मित्राणि राज्यं शाक्रे तथैव च ।
मूले कृषिं लभेत् यानसिद्धिमाप्ये समुद्रतः ॥
सर्व्वान् कामान् वैश्वदेवे श्रैष्ठ्यन्तु श्रवणे पुनः ।
धनिष्ठायां तथा कामान् वारुणे च परं बलम् ॥
अजैकपादे कुप्यं स्यादाहिर्ब्रध्ने गृहं शुभम् ।
रेवत्यां बहवो गावः अश्विन्यां तुरगांस्तथा ॥
याम्ये तु जीवितव्यं स्यात् यः श्राद्धं सम्प्रयच्छति ।

अत्रान्यान्यपि ब्रह्मपुराणादिवचनानि वैलक्षण्येऽपि सर्व्वथा पूर्वोक्तानतिरिक्तार्थानीति न लिख्यन्ते ।

ब्रह्माण्डपुराणे ।

मघासु कुर्व्वन् श्राद्धानि सर्व्वान् कामानवाप्नुयात् ।
प्रत्यक्षमर्चितास्तेन भवन्ति पितरः सदा ॥

॥ इति काम्यानि नक्षत्राणि ॥

अथ वाराः ।

अत्र विष्णुः ।

सततमादित्येऽह्नि श्राद्धं कुर्व्वन्नारोग्यमाप्नोति । सौभाग्यं चान्द्रे । समरविजयं कौजे । सर्व्वान् कामान् बौधे । विद्यामभीष्टां जैवे । धनं शौक्रे । जीवितं शनैश्चरे । 'कौजे' मङ्गलदिने । 'जैवे' बृहस्पतिदिने ।

विष्णुधर्म्मोत्तरे ।

अथ काम्यानि वक्ष्यामि श्राद्धानि तव पार्थिव ।
आरोग्यमथ सौभाग्यं समरे विजयं तथा ।
सर्व्वान् कामांस्तथा विद्यां धनञ्जीवितमेव च ॥
आदित्यादिदिनेष्वेवं श्राद्धं कुर्व्वन् सदा नरः ।
क्रमेणैतदवाप्नोति नात्र कार्य्या विचारणा ॥

कूर्म्मपुराणे ।

आदित्यवारे त्वारोग्यं चन्द्रे सौभाग्यमेव च ।
कुजे सर्व्वत्र विजयं सर्व्वान् कामान् बुधस्य तु ॥
विद्यामभीष्टाञ्च गुरौ धनं वै भार्गवे पुनः ।
शनैश्चरे लभेदायुरारोग्यञ्च सुदुर्लभम् ॥

भविष्यत्पुराणे ।

ब्रह्मोवाच ।

ये त्वादित्यदिने प्राप्ते श्राद्धं कुर्व्वन्ति मानवाः ।
सप्तजन्मानि ते जाताः सम्भवन्त्यविरोधिनः ॥
पञ्चतारं भवेद्यत्र नक्षत्रं गोवृषध्वज ।
वारे तु देवदेवस्य स वारः पुत्रदः स्मृतः ॥
उपवासो भवेत्तत्र श्राद्धं कार्य्यं तथा भवेत् ।
प्राशनञ्चापि पिण्डस्य मध्यमस्य प्रकीर्त्तितम् ॥
सोपवासस्तु वै भक्त्या पूजयेच्चैव गोपतिम् ।
धूप-माल्योपहारैस्तु दिव्यगन्धसमन्वितैः ॥
एवं पूज्य विवस्वन्तं तस्यैव पुरतो निशि ।
भूमौ स्वपिति वै वीर जपन् श्वेतं महामते ॥
प्रातरुत्थाय च स्नानं कृत्वा दत्वार्घ्यमुत्तमम् ।
रक्तचन्दनसंमिश्रैः करवीरैर्गणाधिपम् ॥
संपूज्य ग्रहभूतेशमासीनं तु त्रिलोचनम् ।
वीरञ्च पूजयित्वा तु ततः श्राद्धं प्रकल्पयेत् ॥
पञ्चभिर्ब्राह्मणैर्देव दिव्यैर्भौमैश्च सुव्रत ।
मगसंज्ञैस्तत्र दैवं ब्राह्मणैः परिकल्पयेत् ॥
पित्र्यांस्तु ब्राह्मणान् भौमान् प्रकल्प्यान्धकसूदन ।
कुर्य्यादेवं ततः श्राद्धं पार्व्वणं भास्करप्रियम् ॥
श्राद्धे समाप्ते विधिना त्वद्यात् पिण्डं तु मध्यमम् ।
पुरतो देवदेवस्य स्थित्वा मन्त्रेण सुव्रत ॥
स एष पिण्डो देवेश योऽभीष्टस्तव सर्व्वदा ।
अश्नामि पुरतस्तुभ्यं येन मे सन्ततिर्भवेत् ॥
प्रसादात्तस्य देवस्य यन्मेऽभ्यर्थयते मनः ।
इत्थं संपूजितो यत्र भास्करः पुत्रदो भवेत् ॥
अतोऽयं पुत्रदो वारो देवस्य परिकीर्त्तितः ।
एवमत्र सदा यस्तु भास्करं पूजयेन्नरः ॥
उपवासपरः श्राद्धे स पुत्रं लभते धनम् ।
धनं धान्यं हिरण्यञ्च आरोग्यं सुखमुत्तमम् ॥

सूर्य्यलोकं स्वयं प्राप्तस्ततो राजा भवेन्नृप।
प्रभया द्विजसङ्काशः कान्त्या जम्बुकसन्निभः॥
वीर्य्येण गोपतेस्तुल्यो गाम्भीर्य्ये कलशोद्भवः।

'अविरोधिनः' शत्रुशून्याः। रोहिण्यश्लेषामघाहस्ताख्यानि चत्वारि नक्षत्राणि-पञ्चताराणि। श्रेष्ठो गौः 'गोवृषः' स ध्वजो यस्य स 'गोवृषध्वजः'। वृष-व्याघ्र-पुङ्गव-कुञ्जराणां श्रैष्ठ्यवाचिता उत्तरपदे, भरतर्षभादिषु दर्शनात्। 'देवदेवः' सूर्य्यः। उपवासोऽत्र शनैश्चरदिने। श्राद्धमादित्यवारे।

एतच्च प्रातरुत्थायेत्यादिना ग्रन्थेन व्यक्तीभविष्यति। मध्यमपिण्डप्राशनमत्र यजमानस्यैव प्रतीयते, श्राद्धान्तरेषु तु पत्न्या विहितत्वात्तत्कृतमेव।

अत्र तु दम्पत्योः पुत्रकामयोः सहाधिकाराद्विशेषानभिधानाच्च द्वयोरपि पिण्ड-प्राशनमिति युक्तम्। दृश्यते च पुत्रकामकर्म्मान्तरे द्वयोरपि शेषप्राशनम्।

तद्यथा शतपथे।

'क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम्' इत्यादि। तथात्रैव होमानन्तरं हुत्वोद्धृत्य प्राश्नाति प्राश्येतरस्याः प्रयच्छतीति। 'गोपतिः' सूर्य्यः, स सुवर्णादि-प्रतिमायां भविष्यत्पुराणोक्तप्रकारेण व्योम्नि वा पूजनीयः। 'श्वेतः' महाश्वेताख्यः षडक्षरः सूर्य्यमन्त्रः खगोल्काय नमः इत्येवं प्रसिद्धः।

अर्घ्यदानमम्बरस्थसूर्य्याभिमुखो भूत्वा स्थण्डिले कुर्य्यात्। 'पूजयित्वा' इति पुनः पूजनोपादानात् पूजनान्तरावगतौ ग्रहभूतेशादयः पञ्चदेवताः प्रणवादिमिश्रतुर्थ्यन्तैः स्वस्वनामभिः पीठे पूज्याः। 'दिव्या मगाः' भोजकाख्या ब्राह्मणविशेषत्वेनोत्तरापथे प्रसिद्धाः, तदन्ये 'भौमाः'। अत्र वैश्वदेवीकस्य स्थाने मगानुपवेश्य पित्र्यस्थाने ब्राह्मणा-न्तराण्युपवेशयेत्।

एवमत्र 'सदा' इति विशिष्टफललाभार्थमावृत्तिकथनम्। 'प्रभा' औज्ज्वल्यम्। 'द्विजः' चन्द्रमाः। 'कान्तिः' तेजः। 'जम्बुकः' वरुणः। वरुणो वै जम्बुक इति। वरुणश्चादित्यविशेषः, वरुणो माघमासे तु तपतीति दर्शनात्। 'गोपतिः' शम्भुरित्यर्थः। 'कलशोद्भवः' अगस्त्यः, स च गम्भीरतया विवक्षितः।

पद्मपुराणे।

शुक्राङ्गारकयुक्ता या चतुर्थी जायते तदा।
श्रद्धया श्राद्धकृद्विप्रो न प्रेतो जायते मृतः॥

स्कन्दपुराणे।

अमायां यदि सोमः स्यात् सप्तम्यां वै दिवाकरः।
चतुर्दश्यां चतुर्थ्यां वा वारः स्यान्मङ्गलस्य चेत्॥
तदा श्राद्धं प्रकर्त्तव्यं पितृणां तृप्तिमिच्छता।
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च॥

नन्दन्ति पितरः स्वर्गे विमानाम्बरमास्थिताः ।
तावन्तमेव कालं हि श्राद्धकर्त्तुस्तथा फलम्[1] ॥

॥ इति काम्यवाराः ॥

अथ काम्याः प्रकीर्णकालाः ।

तत्र विष्णुपुराणे ।

मासि मास्यसिते पक्षे पञ्चदश्यां नरेश्वर ।
तथाष्टकाः प्रकुर्व्वीत काम्यान् कालान् शृणुष्व मे ॥
श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजम् ।
श्राद्धं कुर्व्वीत विज्ञाय व्यतीपातेऽयने तथा ॥
विषुवे चापि सम्प्राप्ते ग्रहणे शशिसूर्य्ययोः ।
समस्तेष्वेव भूपाल राशिष्वर्केऽनुगच्छति ॥
नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने ।
इच्छाश्राद्धानि कुर्व्वीत नवसस्यागमे तथा ॥

मार्कण्डेयपुराणे ।

कार्य्यं श्राद्धममावास्यां मासि मास्युडुपक्षये ।
तथाष्टकास्वप्यवश्यमिच्छाकालं[2] निबोध मे ॥
विशिष्टब्राह्मणप्राप्तौ सूर्य्येन्दुग्रहणेऽयने ।
विषुवे रविसङ्क्रान्तौ व्यतीपाते च पुत्रक ॥
श्राद्धार्हद्रव्यसम्प्राप्तौ[3] तथा दुःस्वप्नदर्शने ।
जन्मर्क्षग्रहपीडासु श्राद्धं कुर्व्वीत चेच्छया ॥

विष्णुरप्याह ।

सङ्क्रान्ति विषुवे चैव विशेषेणायनद्वयम् ।
व्यतीपातोऽथ जन्मर्क्षं चन्द्रसूर्य्यग्रहस्तथा ॥
इत्येतान् श्राद्धकालांस्तु काम्यानाह प्रजापतिः ।
श्राद्धमेतेषु यद्दत्तं तदानन्त्याय कल्प्यते ॥

ब्रह्मवैवर्त्ते ।

अमावास्यां प्रयत्नेन श्राद्धं कुर्य्याच्छुचिः सदा ।
सर्व्वान् कामानवाप्नोति स्वर्गञ्चान्ते समश्नुते ॥
घृतं दद्यादमावास्यां सोमस्याप्यायनं महत् ।
एवमाप्यायितः सोमः त्रीन् लोकान् धारयिष्यति ॥
सिद्धचारणगन्धर्व्वैः स्तूयते नित्यपूजितः ।
सर्व्वैः पुष्पैर्मनोज्ञैश्च सर्व्वकामपरिच्छदैः ॥

---

१. फल इति । २. इष्टं कालमिति ।
३. श्राद्धार्हद्रव्यसम्पत्ताविति ।

नृत्यवादित्रगीतैः स्यादप्सरोभिः सहस्रशः ।
उपक्रीडेद्विमानस्थः पितृभक्तो दृढव्रतः ॥
स्तुवन्ति देवगन्धर्वाः सिद्धसङ्घाश्च तं सदा ।
पितृभक्तस्त्वमावास्यां सर्व्वान् कामानवाप्नुयात् ॥
पितृदेवान् यजन् भक्त्या यतोऽस्यामक्षयं फलम् ।

तथा ।

पुष्टिं प्रजां स्मृतिं मेधां पुत्रानैश्वर्य्यमेव च ।
कुर्व्वाणः पौर्णमास्यान्तु सर्व्वं सम्पूर्णमश्नुते ॥

ब्रह्मपुराणे ।

नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
पौर्णमास्यान्तु कर्त्तव्यं वराहवचनं यथा ॥

भाद्रपदमासान्तर्गते यत्र कचन दिने कन्याराशौ रविसंक्रमणे जाते तन्मासमध्यवर्त्तिन्यां पौर्णमास्यां नान्दीमुखानां पितॄणां श्राद्धं कर्तव्यम् । तच्चावश्यकं प्रत्यब्दमिति वचनात् ।

नान्दीमुखशब्देन चात्र त्रयः प्रपितामहात्परे विवक्षिताः । यस्मादस्मिन्नेव पुराणे अस्य वचनस्यानन्तरमेवोक्तम् ।

ये स्युः पितामहादूर्द्ध्वं ते स्युर्नान्दीमुखास्त्रयः ।
प्रसन्नमुखसंज्ञास्तु मङ्गलीया यतस्तु ते ॥इति॥

अत्र पितामहशब्देन प्रपितामहो लक्षणीयः ।

यदुक्तं ब्रह्मपुराणे ।

पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयो ह्यश्रुमुखा ह्येते पितरः सम्प्रकीर्त्तिताः ॥
तेभ्यः पूर्व्वे त्रयो ये तु ते तु नान्दीमुखाः स्मृताः ॥इति॥

अस्य नान्दीमुखवचनस्यैतत्पौर्णमासीनिमित्तकश्राद्धविधिनैकवाक्यतापन्नत्वात् श्राद्धान्तरे नान्दीमुखशब्देन प्रपितामहात्परे त्रयो न ग्राह्याः ।

अथैतेषां नान्दीमुखसंज्ञा किमर्था ।

अथ यथा 'वसवः पितरो ज्ञेया' इत्यादौ वस्वादिशब्दो वस्वाद्यभेददृष्टिविधानार्थः, तथात्र वाराहकल्पीयपितृगणाभेदप्रकरणोक्तनान्दीमुखाख्यपितृगणाभेददृष्टिविधानार्थ उच्यते । तन्न ।

यतोऽत्र प्रसन्नमुख इत्यादिना नन्दनमुखयोगान्नान्दीमुखशब्दनिष्पत्तिरभिप्रेतेति[1] दर्शितम् । अतो नाभेददृष्ट्युपदेशार्थः ।

---

[1]. नान्दीमुखशब्देनैषां व्युत्पत्तिरभिप्रेतेति ।

अथ यथा कौण्डपायिनीये मासहोमेऽग्निहोत्रमिति परशब्दः परत्र प्रयुज्यमानः परसारूप्यभावङ्गमयन्नैयमिकाग्निहोत्रधर्म्मातिदेशार्थः, तथात्र नान्दीमुखशब्दोऽपि पुत्रजन्मादिकालविहितप्रसिद्धनान्दीमुखधर्म्मातिदेशार्थ इति। तन्न। उक्तोत्तरत्वात्।

न ह्ययं परशब्दः परसारूप्यविवक्षया प्रयुक्तः, किन्तु नन्दनमुखत्वयोगादिति। अतोऽस्य प्रशंसैव प्रयोजनं मन्यामहे।

हारीतः।

अष्टका माघाभ्युदयास्तीर्थयात्रोऽपपत्तयः।
पितृणामतिरेकोऽयं मासि कार्य्ये ध्रुवः स्मृतः॥

ब्रह्मवैवर्त्तवायुपुराणयोः।

अथ कालं प्रवक्ष्यामि श्राद्धकर्म्मणि पूजितम्।
काम्यनैमित्तिकाजस्रश्राद्धकर्म्मविधायिभिः॥
पुत्रदा धनमूलं स्युरष्टकास्तिस्र एव च।

॥ इति काम्याः प्रकीर्णकालाः॥

अथ वैशेषिकाः श्राद्धकालाः।

तत्र याज्ञवल्क्यवचनोपवद्धकालप्रक्रममनुसरद्भिरस्माभिर्वृद्धिश्राद्धकालाः पूर्व्वमेव निरूपिताः।

अथेदानीं सांवत्सरिकश्राद्धकालाः कथ्यन्ते।

तत्र तावत् क्षयाहनिर्णयः।

ब्रह्मपुराणे।

प्रतिसंवत्सरं कार्य्यं मातापित्रोर्मृताहनि।
पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि॥

मात्रादीनां श्राद्धं कार्य्यमित्यनेनार्थात् पुत्रादीनां कर्तव्यमुक्तम्। एतच्चाधिकारमात्रोपलक्षणार्थम्। भ्रातुरित्यत्रापुत्रस्येत्यनुषञ्जनीयम्। ज्येष्ठस्येत्यनेन कनिष्ठस्य भ्रातुर्नावश्यकं सांवत्सरिकमिति दर्शितम्।

तथा च।

"न पुत्रस्य पिता दद्यान्नानुजस्य तथाग्रजः"

इति नियताधिकारनिराकरणात् स्नेहादिनात्वनियतेनाधिकारेणापुत्रस्य कनिष्ठस्यापि सांवत्सरिकं कर्त्तव्यमेव।

तथा चोक्तम्।

अपि स्नेहेन कुर्य्याच्चेत् सपिण्डीकरणं विना॥इति॥

एतच्च प्रागेवाधिकारप्रकरणे प्रपञ्चेनोक्तम्।

प्रभासखण्डे ।

मृताहनि पितुर्यस्तु न कुर्य्यात् श्राद्धमादरात् ।
मातुश्चैव वरारोहे वत्सरान्ते मृताहनि ॥
नाहं तस्य महादेवि पूजां गृह्णामि नो हरिः ।

भविष्यत्पुराणे ।

सर्व्वेषामेव श्राद्धानां श्रेष्ठं सांवत्सरं मतम् ।
क्रियते यत् खगश्रेष्ठ मृतेऽहनि बुधैः सदा ॥
मृतेऽहनि पितुर्यस्तु न कुर्य्यात् श्राद्धमादरात् ।
मातुश्च खगशार्दूल वत्सरान्ते मृतेऽहनि ॥
नाहं तस्य खगश्रेष्ठ पूजां गृह्णामि नो हरिः ।
न ब्रह्मा न च वै रुद्रो न चान्ये देवतागणाः ॥
तस्माद्यत्नेन कर्त्तव्यं वर्षे वर्षे मृतेऽहनि ।
नरेण खगशार्दूल भोजकेन विशेषतः ॥
भोजको यस्तु वै श्राद्धं न करोति खगाधिप ।
मातापितृभ्यां सततं वर्षे वर्षे मृतेऽहनि ॥
स याति नरकं घोरं तामिस्रं नाम नामतः ।
ततो भवति दुष्टात्मा नगरे शूकरः खग ॥

अत्र मृताहशब्देन मरणाहर्वर्त्तिनी तिथिर्विवक्षिता, संवत्सरान्ते मुख्यमृताहस्यासम्भवात् । न हि तान्येवाहानि परिवर्त्तन्ते । न ह्यहां प्रातिस्विकं नामास्ति चिह्नम् ।

अतो यत्र कचनाह्नि सांवत्सरिकं प्राप्नुयात्, संवत्सरान्तिमाहर्ग्रहणान्नेति चेत् । न । मृताहर्ग्रहणानर्थक्यापत्तेः ।

अतो मरणाहर्व्वर्त्तिनी तिथिर्विवक्षिता । अहर्ग्रहणं रात्रेरप्युपलक्षणार्थम् । तेन रात्रिमृतस्यापि सा तिथिर्लभ्यते ।

एवं च संवत्सरान्ते मृताहसम्बन्धिन्यां तिथौ सांवत्सरिकं कर्तव्यमिति लभ्यते ।

अत्र च ।

यान्तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्म्मसु ॥
यान्तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥

इति देवलादिवचनानुसाराद्यथा कर्म्मकालेष्वविद्यमानाया अपि तिथेः सम्पूर्णत्वकल्पनया ग्रहणं, न तथा मृताहर्वर्त्तिन्यास्तिथेर्मरणसम्बन्धितया ग्रहणं, किन्तु मरणकालिन्या एव ।

अतः सांवत्सरिके मृताहशब्देनोक्ता मरणकालिक्येव तिथिर्वेदितव्या ।

तदाह नारदीयपुराणे वशिष्ठः ।

पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ।
पित्र्येऽस्तमयवेलायां स्पृष्टा पूर्णा निगद्यते ॥

'तात्कालिकी' यस्मिन् काले उपवासादिव्रतपारणं मरणं वा तत्कालवर्त्तिन्येव-तयोस्तिथिः । न पुनरतत्कालवर्त्तिनी । प्रातरादिषु त्रिमुहूर्त्तादिना पित्र्ये सांवत्सरिकादावस्तमयवेलायामहरन्ते स्पृष्टापि मरणकालिकी तिथिः सम्पूर्णा निगद्यते । मरणकालिक्यां तिथौ सांवत्सरिके कर्तव्ये प्राप्ते यदि सास्तमयवेलायामपि दिनान्तेऽस्ति तदा सा कुतपापराह्णयोरस्तीति मत्वा तदुपलक्षित एव दिवसे कुतपादिषु श्राद्धं कर्तव्यमिति ।

अथवात्र मृताहशब्देनोपलक्षणत्रयविशिष्टमहोरात्रमभिप्रेतम् ।

तदाह व्यासः ।

मासपक्षतिथिस्पृष्टे यो यस्मिन् म्रियतेऽहनि ।
प्रात्यब्दन्तत्तथाभूतं क्षयाहं तस्य तं विदुः ॥इति॥

तथाभूतमित्युपलक्षणत्रयोपेतम् ।

अत्र मासपक्षाहोरात्राणि चान्द्राण्येव ग्राह्याणि, न सौरसावनानि । सन्ति च तानि ब्रह्मसिद्धान्ते निरूपितानि ।

दर्शाद्दर्शश्चान्द्रस्त्रिंशद्दिवसस्तु सावनो मासः ।
रविसङ्क्रान्तिविशिष्टः सौरो मासो निगद्यते तज्ज्ञैः ॥

तथा ।

चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः ।
एकराशौ रविर्य्यावत् कालं मासः सभास्करः ॥इति॥

एषु च मासेषु मध्ये सांवत्सरिकादिपितृकार्य्ये च चान्द्रस्यैव ग्रहणमाह

व्यासः ।

विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः ।
आब्दिके पितृकार्य्ये च मासश्चान्द्रमसः स्मृतः ॥इति॥

लघुहारीतः ।

चक्रवत्परिवर्त्तेत सूर्य्यः कालवशाद् यतः ।
अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिह्नितम् ॥
मासचिह्नन्तु कर्त्तव्यं पौषमाघाद्यमेव हि ।
यतस्तत्र विधानेन मासः स परिकीर्त्तितः ॥

पौषादिसंज्ञा चान्द्रस्यैव ग्राह्या । तत्र यद्यपि परस्मिन्नपि दिने कर्म्मकालव्याप्तिसम्भवः, तथापि प्रथमातिक्रमे कारणाभावात् पूर्व्वस्मिन्नेवाहनि श्राद्धम् ।

आह सुमन्तुः ।

द्विरह्व्यापिनी चेत्स्यात् मृताहस्य तु या तिथिः ।
पूर्व्वस्यान्निर्वपेत् पिण्डमित्याङ्गिरसभाषितम् ॥

वृद्धयाज्ञवल्क्यः ।

दैवकार्य्ये तिथिर्ज्ञेया यस्यामस्तमितो रविः ।

शिवरहस्यसौरपुराणयोः ।

प्रायः प्रान्त उपोष्यः स्यात्तिथेदवफलेप्सुभिः ।
मूलं हि पितृतृप्त्यर्थं पैत्र्यं चोक्तं महर्षिभिः ॥

'मूलं' आरम्भः ।

नारदीयपुराणे ।

तिथिप्रान्तं सुराख्यं हि उपोष्यं कवयो विदुः ।
पैत्रं मूलं तिथेः प्रोक्तं शास्त्रज्ञैः कालकोविदैः ॥

निगमः ।

पूर्व्वाह्णिकास्तु तिथयो देवकार्य्ये फलप्रदाः ।
अपराह्णिकास्तथा ज्ञेया पित्रर्थे तु शुभावहाः ॥

अत्रापराह्णः सूक्ष्मकालः, वक्ष्यमाणेष्वपराह्णेष्वन्यतमो वेदितव्यः ।

अतः पूर्व्वदिनसम्बन्धिनी मृताहतिथिः सांवत्सरिकेऽभ्युपेया । सा च यद्यपराह्णे त्रिमुहूर्त्ता भवेत् तदैव ग्राह्या । न तु त्रिमुहूर्त्तान्न्यूना ।

तदाह बौधायनः ।

उदिते दैवतं भानौ पित्र्यञ्चास्तमिते रवौ ।
द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः ॥इति॥

अस्यार्थः ।

भानावुदिते सत्युत्तरकाले अह्नो मुहूर्त्तद्वयं 'दैवतं' देवदेवत्यम् । तस्मिंश्चास्तमिते तत्पूर्व्वकालीनमह्नो मुहूर्त्तत्रयं 'पित्र्यं' पितृदेवत्यम् ।

अतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमात् हव्यकव्ययोर्ग्राह्येति ।

तदेवमस्तमयात्पूर्व्वं त्रिमुहूर्त्ता ग्राह्येति स्थिते—

यद्भविष्यत्पुराणे ।

व्रतोपवासस्नानादौ घटिकैकापि या भवेत् ।
उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके ॥इति॥

'विपरीता' अस्तमय सम्बन्धिनी । यच्च व्यासोक्तं ।

अह्नोऽस्तमयवेलायां कलामात्रापि या भवेत् ।
सैव प्रत्याब्दिके ग्राह्या इतरा पुत्र हानिदा ॥इति॥

यच्च वशिष्ठोक्तं।

पित्र्येऽस्तमयवेलायां स्पृष्टा पूर्व्वा निगद्यते ॥इति॥

तदेतत् पूर्व्वदिनापराह्णत्रिमुहूर्त्तव्यापि, किं पुनर्न्यायेन प्रशंसार्थम्। न तु घटिकामात्रकालीनायाः परिग्रहार्थं, तथाविधायाः कर्म्मापर्य्याप्तत्वात्। उत्तरदिने कर्म्म-पर्य्याप्तापराह्णे व्याप्तिलाभाच्च।

अतएव हारीतः।

तथाहि।

पुष्येण युक्तश्चन्द्रो यस्यां पौर्णमास्यां सा पौषी। सा यस्मिन् मासे स पौषमासः। एवं माघादयोऽपि।

तदाह पाणिनिः। नक्षत्रेण युक्तः कालः! सास्मिन् पौर्णमासीति संज्ञायामिति। न च सौरसावनयोः एवंविधास्ति संज्ञा, एवंविध पौर्णमासीयोगनियमोवा। अतः सांवत्सरिकादौ चान्द्र एव मासो ग्राह्यः।

यत्पुनर्वचनम्।

यस्मिन्राशौ गते सूर्य्ये विपत्तिं याति मानवः।
तद्राशावेव कर्त्तव्यं पितृकार्य्यं मृताहनि॥

तदेतदधिमासविषयम्।

अधिमासे विपत्तिश्चेत् सौरं मानं समाश्रयेत्।
स एव दिवसस्तस्य श्राद्धं पिण्डोदकादिषु॥

व्याख्यातो मासः। अस्यार्द्धं पक्षः। तिथिस्तु चान्द्रमहोरात्रम्।

तदुक्तं ब्रह्मसिद्धान्ते।

सावनं स्यादहोरात्रमुदयादुदयो रवेः।
रवेस्त्रिंशत्तु राश्यंशस्तिथिसम्भोग ऐन्दवः॥

सूर्य्योदयात् सूर्य्योदयान्तरपर्य्यन्तं सावनमहोरात्रम्। मेषादिसंज्ञकराशि-त्रिंशांशभोगो रवेः राश्यंशः सौरसंज्ञक इत्यर्थः। तिथिसम्भोग इति।

यावता कालेन राशेर्द्वादशत्रिंशांशाश्चन्द्रमसा भुज्यन्ते तावत्कालस्तिथिसम्भोगः, तच्चान्द्रमहोरात्रं, तदेतत् प्रतिपदादिसंज्ञाभिर्व्यवह्रियते।

एवं मासोपलक्षितमासविशेषणत्रयोपेतं सावनमहोरात्रं मृताहशब्देनोक्तं वेदितव्यम्।

॥ इति क्षयाहनिर्णयः ॥

अथ क्षयाहद्वैधनिणयः।

तत्र क्षयाहश्राद्धतिथिद्वैधे कर्म्मकालव्यापिनी ग्राह्या।

यदाह व्यासः ।

कर्म्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
तया कर्म्माणि कुर्व्वीत ह्रासवृद्धी न कारणम् ॥

यदा तु तिथिसाम्ये द्वयोरपि तिथ्योरपराह्णसम्बन्धस्तदानीं पार्व्वणेतिकर्तव्यताके सांवत्सरिके पूर्व्वैव तिथिः ।

अपराह्णे पितृणान्तु या पराह्णानुयायिनी ।
सा ग्राह्या पितृकार्य्ये तु न पूर्वाह्णानुयायिनी ॥

भविष्यत्पुराणेऽपि ।

व्रतोपवासनियमे घटिकैका यदा भवेत् ।
सा तिथिः सकला ज्ञेया पित्रर्थे चापराह्णिकी ॥इति॥

अस्तादिशब्दाश्चापराह्णपरा एव ।

तथा च वृद्धमनुः ।

यस्यामस्तं रविर्य्याति पितरस्तामुपासते ।
तिथिस्तेभ्यो यतो दत्ता ह्यपराह्णे स्वयम्भुवा ॥

मनुरपि ।

यस्यामस्तं रविर्य्याति पितरस्तामुपासते ।
सा पितृभ्यो यतो दत्ता ह्यपराह्णे स्वयम्भुवा ॥

अतएव शिवरहस्य-ब्रह्मवैवर्त्त-सौर-नारदीयपुराणेषु—

दर्शे च पौर्णमासे च पितुः सांवत्सरं दिनम् ।
पूर्व्वविद्धमकुर्व्वाणो नरकं प्रतिपद्यते ॥इति॥

यत्तु-

युग्माग्नियुगभूतानामित्यादि निगमवाक्यं, तद्व्रतोपवासादिविषयम् ।

तदाह व्यासः ।

द्वितीयादिषु युग्मानां पूज्यता नियमादिषु ।
एकोद्दिष्टादिवृद्ध्यादौ वृद्धिह्रासादि चोदनात् ॥इति॥

एकोद्दिष्टेत्यादि पैतृकश्राद्धोपलक्षकम् ।

तदेवं तिथिसाम्ये पूर्व्वा ग्राह्येति सिद्धम् ।

वैषम्ये तु आह बौधायनः ।

सा तिथिस्तदहोरात्रं यस्यामभ्युदियाद्रविः ।
वर्द्धमानस्य पक्षस्य ह्रासे त्वस्तमियाद्रविः ॥

क्षयाहमेव विषयीकृत्य स एवाह ।

> अपराह्णद्वयव्यापिन्यतीतस्य यदा तिथिः ।
> क्षये पूर्व्वा तु कर्त्तव्या वृद्धिकार्य्ये तथोत्तरा ॥

यत्तु व्याघ्रेण तिथिसाम्येऽपि परतिथिग्रहणमुक्तम् ।

> खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् ।
> खर्वदर्पौ परौ पूज्यौ हिंसा स्यात् पूर्व्वकालिकी ॥इति॥

'खर्वः' साम्यं । 'दर्पः' वृद्धिः । 'हिंसा' क्षयः ।

तदेतत् साम्यशास्त्रं क्षयाहव्यतिरिक्ततिथिविषयमास्ताम् ।

यच्च—

> शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
> कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥

इति मार्कण्डेयवचनम् ।

तत्तु शुक्लपक्षशब्दयोर्दैवपित्र्यकर्म्मोपलक्षकत्वात् दैवपित्र्यकर्म्मकालविभागमात्र-परत्वेन व्यवस्थापनीयम् ।

तदेवं पार्व्वणैकसम्बन्धोऽपराह्णस्पर्शपराधीननिर्णयः । पार्व्वणेतिकर्तव्यता-कस्य सांवत्सरिकस्यायमङ्गभूतः कालो विवेचितः ।

एकोद्दिष्टस्य माध्याह्निकत्वात् पूर्व्वोत्तरयोर्मध्याह्नस्पर्शपुरस्कारेणैव एकोद्दिष्टविधिं निर्वर्त्त्य सांवत्सरिकश्राद्धाङ्गकालनिर्णयो विधेयः ।

तत्र मनुः ।

> पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्व्वणम् ।
> एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥

हारीतोऽपि ।

> आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टन्तु मध्यतः ।
> पार्व्वणञ्चापराह्णे तु प्रातर्वृद्धिनिमित्तकम् ॥

वृद्धगौतमः ।

> मध्याह्नव्यापिनी या स्यात् सैकोद्दिष्टे तिथिर्भवेत् ।
> अपराह्णव्यापिनी या पार्व्वणे सा तिथिर्भवेत् ॥
> मध्याह्नव्यापिनी या तु तिथिः पूर्व्वा परापि वा ।
> तस्यां पितृभ्यो दातव्यं ह्रासवृद्धी न कारणम् ॥

॥ इति क्षयाहद्वैधनिर्णयः ॥

अथ क्षयाहापरिज्ञाने सांवत्सरिक श्राद्धकालाः ।

भविष्यत्पुराणे ।

अरुण उवाच ।

न जानाति दिनं यस्तु मासं वाप्यमराधिप ।
मृतयोस्तु महाप्राज्ञ पित्रोस्तु स कथं नरः ।।
श्राद्धं करोतु वै ताभ्यां विधिवत् वत्सरात्मकम् ।

अत्र पित्रोरित्युपलक्षणम् ।

आदित्य उवाच ।

मृताहं यो न जानाति मानवो विनतात्मज ।
तेन कार्य्यममावास्यां श्राद्धं सांवत्सरं नृप ।।

यस्य प्रोषितस्याप्रोषितस्य वा मृतस्य तिथिर्न ज्ञायते तस्य तन्मासामावास्यायां सांवत्सरिकं कार्य्यमित्यर्थः ।

तदाह वृहस्पतिः ।

न ज्ञायते मृताहश्चेत् प्रमीते प्रोषिते सति[१] ।
मासश्चेत् प्रतिविज्ञातस्तद्दर्शे स्यान्मृताहनि ।।

प्रोषिते इत्यज्ञानकारणोपलक्षणम् । 'दर्शे' तन्मासामावास्यायाम् । 'मृताहनि' तत्र कर्तव्यन्तदिति शेषः ।

अस्मिन्नेव विषये एकादश्यां श्राद्धमाह मरीचिः ।

श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृताहनि ।
एकादश्यां तु कर्त्तव्यं कृष्णपक्षे विशेषतः ॥

अत्र विशेषत इति कृष्णपक्षस्य प्रशस्ततरत्वाभिधानेन शुक्लपक्षोऽप्यनुज्ञायत इति गम्यते । ततश्च शुक्ल-कृष्णैकादश्योर्विकल्पे प्राप्ते एवं व्यवस्था । मासे पक्षे च विज्ञाते तिथिमात्रस्यापरिज्ञाने तस्य मासस्य तत्पक्षस्थितायामेकादश्यां श्राद्धं कार्य्यम्, विज्ञायमानपक्षपरित्यागे कारणाभावात् । पक्षस्याप्यपरिज्ञाने कृष्णैकादश्यां, तदलाभे-शुक्लैकादश्यामपीति ।

भविष्यत्पुराणे ।

दिनमेव विजानाति मासं नैव तु यो नरः ।
मार्गशीर्षेऽथ वा भाद्रे माघे वाऽथ समाचरेत्[२] ॥

यस्य तु मृताहः परिज्ञायते मासस्तु न ज्ञायते तस्य मार्गशीर्षे भाद्रपदे माघे वा तस्मिन्नहनि श्राद्धं कार्य्यम् ।

तदाह वृहस्पतिः ।

यदा मासो न विज्ञातो विज्ञातं दिनमेव तु ।
तदा मार्गशिरे मासि माघे वा तद्दिनं भवेत् ॥

---

१. प्रोषिते संस्थिते सतीति ।   २. माघे वा तद्दिनं भवेदिति ।

यदा तु प्रोषितमृतस्य दिनमासावुभावप्यविज्ञातौ स्यातां तदा तत्प्रस्थानकालिकयोर्दिनमासयोस्तत् सांवत्सरिकं कार्य्यम्।

तदाह वृहस्पतिः।

दिनमासौ न विज्ञातौ मरणस्य यदा पुनः।
प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तया दिशा॥

इत्यस्यायमर्थः।

प्रस्थानतिथ्यज्ञाने तन्मासज्ञाने च तन्मासवर्त्तिन्याममावास्यायां सांवत्सरिकं, प्रस्थानतिथिज्ञाने मासाज्ञाने च मार्गशीर्षे माघे वा तस्यामेव तिथौ कुर्य्यात्। प्रस्थानतिथिमासयोरुभयोरप्यज्ञाने तु तन्मरणश्रवणकालिकयोस्तिथिमासयोः कुर्य्यात्।

तदाह प्रचेताः।

अविज्ञातमृते अमावास्यायां श्रवणदिवसे वा। 'श्रवणदिवसे' मरणवार्त्ताकर्णनतिथौ।

भविष्योत्तरेऽपि।

मृतवार्त्ताश्रुतौ ग्राह्यौ तौ पूर्व्वोक्तक्रमेण तु।

श्रवणतिथिस्मरणे च मार्गशीर्षे माघे वा तस्यामेव तिथौ कार्य्यम्। श्रवणतिथिमासयोरुभयोरपि विस्मरणे माघस्य मार्गशीर्षस्य वा अमावास्यायां कार्य्यम्।

तदुक्तं प्रभासखण्डे।

मृतस्याहो न जानाति मासं वापि कथञ्चन।
तेन कार्य्यममावास्यां श्राद्धं माघेऽथ मार्गके॥

'कथञ्चन' मरण-प्रस्थान-श्रवणरूपेण केन केनाप्युपलक्षणेनेत्यर्थः।

भविष्योत्तरे।

प्रवासमन्तरेणापि स्यातान्तौ विस्मृतौ यदा।
तदानीमपि तौ ग्राह्यौ पूर्व्ववन्मृतकादिके॥

यस्य तु प्रोषितस्य मरणवार्त्ता तज्जीवनवार्त्तापि नागता, पञ्चदशवर्षपर्य्यन्तमागमनं नास्ति तस्य तदूद्ध्वं पालाशीभिः समिद्भिः कुशैर्वा शरीरप्रतिकृतिं कृत्वा यथाविधि दाहसंस्कारं निर्व्वर्त्य तदानीन्तनपक्षमासतिथिस्पृष्टेऽहनि सांवत्सरिकं कर्त्तव्यमित्याह जातूकर्णः।

पितरि प्रोषिते यस्य न वार्त्ता नैव चागतिः।
ऊद्ध्वं पञ्चदशाद्वर्षात् कृत्वा तु प्रतिरूपकम्॥
कुर्य्यात्तस्य च संस्कारं यथोक्तविधिना ततः।
तदादीन्येव सर्व्वाणि शेषकर्म्माणि सञ्चरेत्॥

एतच्च प्रोषितमृतश्राद्धप्रयोगप्रकरणे विस्तरेण दर्शयिष्यते ।

॥ इति क्षयाहापरिज्ञाने सांवत्सरिकदिनकालः ॥

॥ इति सांवत्सरिककालनिरूपणम् ॥

—o—

अथ प्रेतश्राद्धानां कालः ।

तत्र तावन्नवसंज्ञकानां श्राद्धानां, तत्र चान्तर्दशाहं क्रियमाणानां नवश्राद्धसंज्ञां निवेशयन्नाश्वलायनो दशाहपर्य्यन्तं नवश्राद्धसंज्ञकत्वमाह ।

नागरखण्डे भर्तृयज्ञः ।

त्रीणि सञ्चयनस्यार्थे तानि वै शृणु साम्प्रतम् ।
यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत् ॥
एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः ।
ततः सञ्चयनस्थाने तृतीयं श्राद्धमिष्यते ॥
पञ्चमे सप्तमे तद्वदष्टमे नवमे तथा ।
दशमैकादशे चैव नवश्राद्धानि तानि च ॥
वैतरण्यामसम्प्राप्तः प्रेतस्तृप्तिमवाप्नुयात् ।

ब्रह्मपुराणे ।

तृतीयेऽहनि कर्त्तव्यं प्रेतदाहावनौ द्विजाः ।
सूतकान्ते गृहश्राद्धमेकोद्दिष्टं प्रचक्षते ॥

आह कात्यायनः ।

चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥

व्यासः ।

प्रथमे सप्तमे चैव नवमैकादशे तथा ।
युत्त वै दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥

आह शङ्खः ।

आद्यं श्राद्धमशुद्धोऽपि कुर्य्यादेकादशेऽहनि ।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥

'आद्यं' नवम् 'आद्यं' नवन्

पैठीनसिः ।

सद्यः शौचे प्रदातव्यं प्रेतस्यैकादशेऽहनि ।
स एव दिवसस्तस्य श्राद्धशय्यासनादिषु ॥

कूर्म्मपुराणे ।

प्रेताय च गृहद्वारि प्रथमे भोजयेद्द्विजान् ।
द्वितीयेऽहनि कर्त्तव्यं क्षुरकर्म्म सबान्धवैः ॥
चतुर्थे बान्धवैः सर्व्वैरस्थ्नां सञ्चयनं भवेत् ।
पूर्व्वान् विप्रान् प्रयुञ्जीत युग्मांस्तु श्रद्धया शुचीन् ॥
पञ्चमे नवमे चैव तथैवैकादशेऽहनि ।
युग्मांश्च भोजयेद्विप्रान् नवश्राद्धन्तु तद्विदुः ॥

ब्रह्मपुराणे ।

चतुर्थे ब्राह्मणानाञ्च पञ्चमेऽहनि भूभृताम् ।
नवमे वैश्यजातीनां शूद्राणां दशमात्परे ॥

अत्रिः ।

प्रेतार्थं सूतकान्ते तु ब्राह्मणान् भोजयेत्ततः ।
अत्र श्राद्धनिमित्तन्तु एवमेकादशेऽहनि ॥

एवं सत्येकादशाहिकान्नवश्राद्धादशौचान्तविधीयमानं ब्राह्मणभोजनं कर्म्मान्तरमिति मन्यते ।

बृहस्पतिः ।

चतुर्थेऽहनि विप्रेभ्यो देयमन्नं हि बान्धवैः ।
गावः सुवर्णं वित्तञ्च प्रेतमुद्दिश्य शक्तितः ॥

'चतुर्थे' सञ्चयाहनीत्यर्थः ।

यदिष्टञ्जीवतश्चासीत्तद्दद्यात्तस्य यत्नतः ।

तस्य प्रेतस्य जीवतो यत्किञ्चिदभीष्टमासीत्तद्दद्यादित्यर्थः ।

॥ इति नवश्राद्धकालाः ॥

अथ षोडशश्राद्धानीत्येवं प्रसिद्धानां प्रेतश्राद्धानां कालाः ।

तत्र ब्रह्मपुराणे ।

पितृणान्त्यक्तदेहानां श्राद्धं षोडश सर्व्वदा ।
चतुर्थे पञ्चमे चैव नवमैकादशे तथा ॥
ततो द्वादशभिर्म्मासैः श्राद्धा द्वादशसंख्यया ।
कर्त्तव्याः श्रुतितस्तेषां तत्र विप्रांश्च तर्पयेत् ॥

जातूकर्णः ।

द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा ।
सपिण्डीकरणञ्चैव इत्येतच्छ्राद्धषोडशम् ॥

षाण्मासिके इत्येतेन विहितयोः श्राद्धयोर्निरूपणार्थमाह ।

एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः ।
न्यूनाः संवत्सराश्चैव स्यातां षाण्मासिके तदा ॥

एकेनाह्ना त्रिभिर्वा यदा षण्मासाः, न्यूनाः स्युः संवत्सराश्च तदा षण्मासाब्दिके कार्य्ये इत्यर्थः ।

भविष्यत्पुराणे ।

अस्थिसञ्चयने श्राद्धं त्रिपक्षे मासिकानि च ।

पैठीनसिः ।

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्व्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशेऽपि च ॥

तथा ।

सपिण्डीकरणादर्व्वाक् कुर्य्याच्छ्राद्धानि षोडश ।
एकोद्दिष्टविधानेन कुर्य्यात् सर्व्वाणि तानि तु ॥

ब्रह्मपुराणे ।

द्वादशेऽहनि मासे च त्रिपक्षे च ततः परम् ।
मासि मासि तु कर्त्तव्यं यावदावत्सरं द्विजाः ॥
ततः परतरं कार्य्यं सपिण्डीकरणं क्रमात् ।
कृते सपिण्डीकरणे चरमं प्रोच्यते पुनः ॥
ततः प्रभृति निर्मुक्तः प्रेतत्वात् पितृताङ्गतः ।

व्याघ्रपादः ।

एकादशे चतुर्थे च मासि मासि च वत्सरम् ।
प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि ॥

अग्निमत्प्रेतश्राद्धे विशेषमाह कात्यायनः ।

श्राद्धमग्निमतः कार्य्यं दाहादेकादशेऽहनि ।
ध्रुवाणि तु प्रकुर्व्वीत प्रमीताहनि सर्व्वदा ॥

त्रैपक्षिकादूर्द्धानि ध्रुवाणि ।

अतएवाह जातूकर्णः ।

ऊर्द्ध्वं त्रिपक्षात् यच्छ्राद्धं मृताहन्येव तद्भवेत् ।
अधस्तु कारयेद्दाहमाहिताग्नेर्द्विजन्मनः ॥इति॥

हारीतस्त्वसमर्थविषये मासिकानां कालविकल्पानाह ।

मुख्यं श्राद्धं मासि मासि अपर्य्याप्तावृतुं प्रति ।
द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाथवा[१] ॥इति॥

---

१. द्वादशाहेन वा भोज्या एकाहे द्वादशापि चेति ।

तत्रोपरितने प्रकरणे वृद्धावुपस्थितायां सपिण्डीकरणापकर्षणं वक्ष्यते। तन्निबन्धनं मासिकानामपकर्षमपुनरावृत्तिञ्च तत्रैव वक्ष्यामः।

॥ इति षोडशश्राद्धानीत्येवं प्रसिद्धश्राद्धानां कालः ॥

अथ सपिण्डीकरणकालः।

तत्र यथाकालं द्वादशसु मासिकेष्वनुष्ठितेषु पूर्णे संवत्सरे तदूर्द्ध्वमौत्सर्गिकोऽनग्निसपिण्डीकरणस्य कालः।

तथा च मार्कण्डेयपुराणे मासिकान्तानि श्राद्धान्युक्त्वाभिहितम्।

अथ संवत्सरे पूर्णे यथावत् क्रियते नरैः।
सपिण्डीकरणं सम्यक् तत्रापि विधिरुच्यते ॥

अस्य च कालस्यानग्निमत्कर्तृकानग्निमद्दैवत्य सपिण्डीकरणाङ्गत्वं नैमित्तिकञ्च कालान्तरमुक्तं भविष्यत्पुराणे।

सपिण्डीकरणं कुर्याद्यजमानो ह्यनग्निमान्।
अनाहिताग्नेः प्रेतस्य पूर्व्वेद्युर्भरतर्षभ ॥

उक्तञ्च पुलस्त्येन।

निरग्निः सहपिण्डत्वं पितुर्म्मातुश्च धर्म्मतः।
पूर्णे संवत्सरे कुर्य्याद्वृद्धिर्वा यदि वा भवेत् ॥

वृद्धिश्चौड़मौञ्जीविवाहादिरूपोऽभ्युदयः।

उपलक्षणञ्चैतन्नान्दीश्राद्धनिमित्तभूतस्य कर्ममात्रस्य। एतच्चाधानाद्युपसंप्राप्तावित्युशनोवचने—

'कर्त्तुं नान्दीमुखम्'

इति शाट्यायनिवचने च स्फुटीभवति।

सैषा यस्मिन् दिने वृद्धिरापद्यते ततः प्रागेवापकृष्य सपिण्डीकरणं कृत्वा तदङ्गभूतं नान्दीमुखसंज्ञकं कुर्य्यादित्यर्थः।

अनेन प्रवृत्ताधिकारस्यापरिसमापितप्रेतश्राद्धस्य चौड़-मौञ्जीविवाहाधानादौ तदङ्गभूते च नान्दीश्राद्धेऽनधिकारोऽपि दर्शितः।

आह लघुहारीतः।

भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव च।
सहपिण्डक्रियां कुर्य्यात्[1] कुर्य्यादभ्युदयं ततः ॥

नागरखण्डे।

ततः सपिण्डीकरणं वत्सरादूर्द्ध्वतः स्थितम्।
वृद्धिर्वा गामिनी चेत् स्यात्तदर्वागपि कारयेत् ॥

---

१. कृत्वा इति।

आधानाङ्गभूतान्नान्दीश्राद्धात् प्रागपकर्षमभिप्रेत्याहोशनाः ।

पितुः सपिण्डीकरणं वार्षिकं मृतवत्सरे ।
आधानाद्युपसंप्राप्तावेतत् प्रागपि वत्सरात् ॥

अत्र चापकृष्यमाणसपिण्डीकरणे तदन्तमपकर्षे स्यादिति न्यायात् ।

पूर्वाणि मासिकान्यपकृष्य सपिण्डीकरणं कर्त्तव्यम् ।

वृद्धवशिष्ठोऽप्याह ।

श्राद्धानि षोडशादत्वा न तु कुर्य्यात् सपिण्डनम् ।
तद्धानौ तु यतः प्रेतः पितृत्वं न प्रपद्यते ॥

अपकर्षपक्ष एवैतत् । अनपकर्षे क्रमविधानादेव तत्सिद्धेः ।

अतएव शाट्यायनिः ।

प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणं तथा ।
अपकृष्य प्रकुर्व्वीत कर्त्तुं नान्दीमुखं द्विजः ॥

यत्तु लौगाक्षिवचनम् ।

यस्य संवत्सरादर्वाक् सपिण्डीकरणं भवेत् ।
मासिकं चोदकुम्भञ्च देयं तस्यापि वत्सरम् ॥इति॥

तत्तु तदन्तापकर्षन्यायेन कृतेष्वपि मासिकेषु—

"तान्येव तु पुनः कुर्य्यात्"

इति कल्पसूत्रकारवचनोक्तपुनरनुष्ठानविषयत्वेन व्याख्येयम् ।

अपकृष्येत्यनुवृत्तावाहोशनाः ।

वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत् ।
स श्राद्धी नरके घोरे पितृभिः सह पच्यते ॥

अनुपस्थितायां वृद्धौ यः प्रेतश्राद्धान्यपकर्षेदित्यर्थाद् वृद्धिमन्तरेणानपकर्षोऽयं समर्थविषयः । असमर्थविषये तु वृद्धिश्राद्धप्रत्युपस्थानं विनाप्यपकृष्यमाणस्य च काल-विकल्पानाह गोभिलः ।

"पूर्णे संवत्सरे षण्मासे त्रिपक्षे वा यदहर्वा वृद्धिरापद्येत" ।

अत्र केचित् पूर्णे संवत्सरे यदहर्वा वृद्धिरापद्येतेत्येतयोः पक्षयोरनग्निकैकविष-यत्वम् ।

षण्मासे त्रिपक्षे वेत्येतयोस्तु साग्निकैकविषयत्वमिति व्यवस्थां मन्यन्ते ।

उद्भावयन्ति चात्र पैठीनसिवचनम् ।

त्रिपक्षेऽग्निमतः कालो वृद्धीष्टापूर्त्तकर्म्मसु ।
सपिण्डीकरणं कुर्य्यात् पूर्णे संवत्सरेऽपि वा ॥इति॥

अग्निमत्सपिण्डीकरणकालप्रकरणे वक्ष्यमाणानि वचनान्युपस्यन्ति।

अत्रेदं वक्तव्यम्।

यद्यग्निमत्वविशेषणवतस्त्रिपक्षादिपक्षाः सन्ति, सन्तु तेऽस्य संवत्सरान्ते कर्त्तुं समर्थस्यापि मुख्यकल्पाः।

अनग्निकत्वसामर्थ्यप्रयुक्ताः प्रकृते गोभिलवचनोक्तसंवत्सरपक्षेणैकवाक्यतां गताः सन्तः सन्त्वनुकल्पाः।

व्याघ्रस्त्वग्निरहितानामपि सह षोडशभिः श्राद्धैः सपिण्डीकरणस्य द्वादशाह एव प्रशस्तः काल इत्याह।

आनन्त्यात् कुलधर्म्माणां पुंसां चैवायुषः क्षयात्।
अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते॥

॥ इत्यनग्निकसपिण्डीकरणकालाः॥

अथ साग्निकसपिण्डीकरणकालः।

तत्राह लघुहारीतः।

अनग्निस्तु यदा वीर भवेत् कुर्य्यात्तदा गृही।
प्रेतश्चेदग्निमान् यस्तु त्रिपक्षे वै सपिण्डनम्॥

अत्र गृही श्राद्धकर्त्ता यद्याहवनीयरहितः प्रेतश्चाहवनीयवान् भवेत् तदा स कर्त्ता तस्य प्रेतस्य मृताहदिवसादारभ्य पक्षत्रये पूर्णे सपिण्डीकरणं कुर्य्यात्।

तथा।

यजमानोऽग्निमान् राजन् प्रेतश्चानग्निमान् भवेत्।
द्वादशाहे भवेत् कार्य्यं सपिण्डीकरणं सुतैः॥

अत्र मृताहादारभ्य द्वादशे दिने इति वेदितव्यम्।

आह कात्यायनः।

एकादशाहं निर्व्वर्त्य पूर्णं दर्शाद्यथाविधि।
प्राक् कुर्व्वीताग्निमान् विप्रो मातापित्रोः सपिण्डताम्॥

अस्याभिप्रायः।

अग्निमता ह्यमावास्यायां पिण्डपितृयज्ञः पिण्डान्वाहार्य्यकं कर्त्तव्यम्। तच्च प्रमीतमातापितृकस्य सपत्नीकपित्रादि दैवतम्। न चाकृतसपिण्डीकरणयोस्तयोर्दर्श-श्राद्धादौ देवतात्वमुपपद्यते। तस्य सपिण्डीकरणोत्तरकालिकत्वस्मरणात्।

अतः पिण्डपितृयज्ञश्राद्धयोर्लोपो मा भूदिति मत्वा अग्निमान् विप्र एकादशाह-कर्त्तव्यं प्रेतकार्य्यं निर्व्वर्त्य दर्शात् प्रागेव यस्मिन् कस्मिन्नप्यहनि मातापित्रोः सपिण्डी-करणं कुर्य्यादिति। विप्रग्रहणमुपलक्षणम्। क्षत्रियादिष्वपि न्यायस्य तुल्यत्वात्।

पक्षान्तरमाह हारीतः ।

'या तु पूर्व्वममावास्या तस्यामिति' ।

अतएवाह जाबालः ।

सपिण्डीकरणं कुर्य्यात् पूर्व्वे दर्शेऽग्निमान् सुतः ।
परतो दशरात्रस्य पूर्णत्वे तु तथापरः ॥

मृताहमारभ्य यद्दशरात्रं तस्मात् परतो यः प्रथमो दर्शो भवेत् तस्मिन्नग्निमान् सुतः पित्रोः सपिण्डीकरणं कुर्य्यादित्यर्थः । दशरात्रग्रहणमशौचकालोपलक्षणार्थम् ।

तदेवं साग्निकस्य त्रयः सपिण्डीकरणकाला उक्ता भवन्ति ।

"द्वादशाहः, दशाहात् परकालीनाया अमावास्यायाः पूर्व्वं किमप्यहः, दशाहात् परामावास्या चेति" ।

॥ इति साग्निकसपिण्डीकरणकालाः ॥

॥ इति त्रैवर्णिकानाम् ॥

अथ शूद्रस्य सपिण्डीकरणकालाः ।

तत्र सपिण्डीकरणं कर्त्तव्यमित्यनुवृत्तौ विष्णुः ।

मन्त्रवर्ज्जं हि शूद्राणां द्वादशेऽहनि कीर्त्तितमिति ।

अमावास्याश्राद्धकारिशूद्रविषयमिति वृद्धाः ।

वचनबलादशौचमध्य एव श्राद्धकरणम् ।

॥ इति शूद्रस्य सपिण्डीकरणकालाः ॥

॥ इति सपिण्डीकरणकालाः ॥

तदेवमेते सपिण्डान्वाहार्य्यक–साधारणसंज्ञकोभयविध–पार्व्वणवृद्धिकर्म्माङ्ग-काम्य-सांवत्सरिक-श्राद्धानां नवश्राद्धषोडशश्राद्धानीत्येवं प्रसिद्धानां सपिण्डीकरणस्य चास्मिन् प्रकरणे कालाः प्रतिपादिताः ।

अथान्येषां श्राद्धकालेषु वक्तव्येष्विदमुच्यते ।

तीर्थश्राद्ध-शुद्धिश्राद्ध-दैविकश्राद्ध-यात्राश्राद्ध-जीवच्छ्राद्ध-गोष्ठीश्राद्धानान्त्वधिकारवाक्योपदिष्टा एव काला इति । ते विशेषाधिकारप्रकरण एव निरूपिताः ।

तत्र च अकाले काले वा तीर्थप्राप्तिस्तदनन्तरमेव तीर्थश्राद्धकालः ।

"अकालेऽप्यथ काले वा तीर्थे श्राद्धं यथा नरैः" ।

इति मत्स्यपुराणस्मरणात् ।

पापक्षयार्थकृच्छ्रादिव्रतसमाप्तौ शुद्धिश्राद्धकालः ।

"श्राद्धं कुर्य्याद् व्रतान्ते तु गोहिरण्यान्नदक्षिणाः" ।

इति जाबालवचनात् ।

प्रीणनीयतत्तद्देवताधिष्ठितं तिथिवारादिकं दैविकश्राद्धस्य कालः । 'तन्नित्यश्राद्धवच्छ्राद्धं दर्शादिषु च यत्नतः' इति भविष्यत्पुराणदर्शनात् ।

तीर्थयात्रादिनात्पूर्व्वदिनं, समापिततीर्थयात्रस्य गृहप्रवेशानन्तरदिनञ्च यात्राश्राद्धस्य कालः ।

गच्छेद्देशान्तरमित्यादि भविष्यत्पुराणस्य यः कश्चित्तीर्थयात्रामित्यादि ब्रह्मपुराणाग्निपुराणयोश्च श्रवणात् ।

अरिष्टदर्शनानुमितमरणकालस्य मुमुक्षोरुत्तरकालः जीवच्छ्राद्धकालः ।

"जीवच्छ्राद्धं प्रकर्त्तव्यम्"

इत्यादि भविष्यत्पुराणादिप्रतिपादनात् ।

कस्यचिद्ब्रह्मणः समागमसमूहसमय एव गोष्ठीश्राद्धकालः । गोष्ठ्यां यत्क्रियते श्राद्धमित्यादि भविष्यत्पुराणोक्तेः ।

सन्न्यासाङ्गानां षोडशश्राद्धानां दैवादिश्राद्धाष्टकदिनात् प्राचीनदिनमेव कालः । दैवादीनान्तु सन्न्यासादित्यादिस्मरणात् ।

॥ इति देवताप्रकरणं निरूपितम् ॥

अथातः सन्न्यासविधिं व्याख्यास्यामः ।

पूर्व्वेद्युर्नान्दीमुखं श्राद्धमित्यादिना शौनकवचनेन दुर्मरणमृतानां पातकविशेषवतां मृताहमारभ्य संवत्सरे पूर्णे या काचिच्छुक्लैकादशी स एव नारायणबलिसंज्ञकस्य श्राद्धस्य कालः ।

तथा च भविष्योत्तरे दुर्मृत्युमृतान् पापविशेषकारिणश्चानुक्रम्योक्तम् ।

पूर्णे संवत्सरे तेषामथ कार्य्यं दयालुभिः ।
एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिम् ॥ इत्यादि ।

॥ इति तीर्थश्राद्धादिकालाः ॥

इति वैशेषिकश्राद्धकालाः ॥

अथ मुख्यकालातिक्रमकालाः ।

ते च गौणा वाचनिकानुकल्पिकाश्चेति द्विप्रकाराः ।

तत्रेदं तावद्विचार्य्यते ।

मुख्यकालासम्भवे गौणकालग्रहणं कार्य्यं न वेति । ननु को मुख्यः को वा गौणः । यो विहितः स मुख्यः । यथा वृद्धिश्राद्धादौ प्रातरादिः । यश्चाविहितः तत् समीपवर्त्ती तेष्वेवाङ्गभावं नीयमानः सङ्गवादिर्गौणः ।

तदाह त्रिकाण्डमण्डनः।

स्वकालादुत्तरो गौणः कालः पूर्व्वस्य कर्म्मणः।
यद्वागामिक्रियामुख्यकालस्याप्यन्तरालवत् ॥
गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि ॥इति॥

अस्यार्थः।

पूर्व्वोत्तरयोः कर्म्मणोर्यः स्वकालस्तस्मादुपरितनः। उत्तरकर्म्मस्वकालाच्च पूर्व्वभावी पूर्व्वापरयोः कर्म्मणोरन्तरालकाल इति यावत्। स पूर्व्वस्मिन् कर्म्मणि गौणो ज्ञेयः।

यद्वा—

यथोक्तान्तरालवदागामिक्रियामुख्यकालस्यापि पूर्व्वस्मिन् कर्म्मणि गौणकालतां मन्यन्त इति।

कथं पुनरुत्तरकर्म्मकालस्य पूर्व्वकर्म्मानुष्ठानाग्रहणमाशङ्क्येत येन स्वकालात्प्रच्युतं पूर्व्वं कर्म्मं तावद्विनष्टप्रायं उत्तरञ्च स्वकालाप्रच्युतत्वादविनष्टरूपम्।

तत्र यद्युत्तरकर्म्मकाले पूर्व्वं क्रियते तदा विनष्टसमाधानार्थमविनष्टविनाशनं प्रसज्येत। तन्मृतजीवनाशया जीवनमरणस्योपक्रमः।

उत्तरकर्म्मकाले द्वयोरवकाशे सतीदमुच्यते न पुनरसत्यपि तस्मिन्निति।

ननु मुख्यकालसमीपवर्त्तिनः कालस्याभिधेयाविनाभूतप्रवृत्तिलभ्यत्वाल्लाक्षणिकमेवोचितम्। सत्यमेव। तथापि तत्र बालातपकालोपलक्षणीभूतया तपमार्दवादिगुणोपनीतया लौकिक्या प्रातरादिशब्दप्रवृत्या तस्य गौणत्वोक्तिर्न विरुध्यते।

ननु तस्यानुपदेशात् कथं ग्राह्यत्वमाशङ्क्यते। प्रतिनिधिन्यायेनेति ब्रूमः।

नन्वेवं तर्हि यथाकथञ्चित् सादृश्यान्मध्याह्नादावपि कदाचित् प्रातरादिशब्दाः प्रसज्येरन्।

किमत्रानिष्टम्, क्रियत एव हि कदाचिदत्यन्तसादृश्यवतः प्रचुरगौणप्रयोगसङ्गिनः सङ्गवादेरलाभे।

तदेवमस्मिन् संशये कचित् पूर्वाह्णे दैविकंश्राद्धमित्यादिकालसंयुक्ते वाक्ये कालं प्रति कर्म्मणो गुणभावेन विधानं मत्वा प्रधानभूतविहितकालातिक्रमे गुणभूतकर्म्मानुग्रहाय कालान्तरानुष्ठानं न कार्य्यमिति पूर्व्वपक्षमभिप्रेत्य सिद्धान्तितवान्।

काले हि कर्म्म चोद्यते न कर्म्मणि कालः।

अतः कर्म्मणामेव प्राधान्यं कालमनूद्य कर्म्मणो विधानात्। ततः कर्म्म प्रति गुणभूतविहितकालातिक्रमे प्रधानभूतकर्म्मानुग्रहार्थं गौणकालेऽप्यनुष्ठानं कार्य्यम्।

कालहानेः कर्म्मणोऽपि त्यागस्यान्याय्यत्वात्। न ह्येकव्यञ्जनविनाशे भोजनमेव संत्यज्यत इति। तदयुक्तम्।

न तावत् कर्म्मगुणीभावेनात्र पूर्व्वपक्षो घटते। कर्म्मणः फलसम्बन्धात्। फलवत्सन्निधावफलं तदङ्गमितिन्यायेन कालस्यैवाङ्गत्वात्। न च कर्म्मणः कालार्थतया परार्थत्वात् फलश्रुतिरर्थत्वानुवाद इति वाच्यम्। कालस्य फलवत् कर्म्मार्थत्वावगमाभावात्। नापि कालभावस्य गुणीभावेनोक्तः सिद्धान्तो घटते। असिद्धहेतुत्वात् सोपन्यासात्।

न ह्यत्र कालानुवादेन कर्म्म विधीयते। कालस्यान्यतः प्राप्तिविरहात्।

ननु कालस्य वाक्यान्तरेण प्राप्त्यभावेऽमावास्यादिरूपेण लोकव्यवहाराय देवज्ञातस्यानुवादो भविष्यति।

मैवम्। लोकसिद्धकालस्वरूपानुवादेन कर्म्मविधौ तस्य स्वयमेव फलतया फलवत्कर्म्माङ्गत्वाभावेन च विधेरानर्थक्यप्रसङ्गः स्यात्।

किञ्चास्मिन् कर्म्मण्युद्देश्यस्य कालस्य न कर्म्मान्तरसम्बन्धो घटते। तस्यैतत्कर्म्मानुष्ठानानन्तरमेव विवक्षितत्वात्।

नन्वेवं तर्हि यजेत स्वर्गकाम इत्यत्रापि स्वर्गकामिनमनूद्य यागविधेरवधारणात् कथं न विधेरानर्थक्यम्।

उच्यते।

यद्यपि स्वर्गकामस्योद्देश्यतया वाक्यान्वयस्तथापि भावनायाः प्रथमं भाव्यस्यापेक्षणत्वात् पुरुषस्यैव सिद्धरूपतया तदनर्हत्वात् स्वर्गकामवत् कामनाविषयभूतः स्वर्ग एव साध्यत्वेन समर्थ्यते। स्वर्गकामस्तु पूर्व्वसिद्ध एवानूद्यते।

यथा लोहितोष्णीषाऋत्विजः प्रचरन्तीत्यादौ विशेष्याणामृत्विजां प्राप्तत्वादप्राप्तविशेषणमात्रपरं वाक्यम्, एवमिहापि।

तदुक्तं मण्डनमिश्रैः।

अपेक्षितत्वाद् भाव्यस्य कामशब्दा हि तत्पराः।
विशेषणप्रधानत्वं दण्डीत्यादिषु दर्शितम्॥

अतः कालानुवादेन तत्र कर्म्मविधिरित्युक्तम्।
तदेवं यथोक्तपूर्व्वोत्तरपक्षावयुक्तो कावत्र तर्हि तौ युक्तौ उच्येते।

तत्र तावत् पूर्व्वपक्षः।

नित्यनैमित्तिकेषु आवश्यकत्वेन प्राप्तेषु तादृग्विधस्वरूपनिर्व्वाहार्थं यथा शक्नुयादित्युपबन्धे विहितायां सम्पत्तौ तत्सदृशप्रतिनिधिग्रहणं कर्त्तव्यमिति स्थिते मुख्यकालासम्पत्तौ गौणकालग्रहणं कार्य्यम्।

तदाह त्रिकाण्डमण्डनः।

मुख्यकाले यदावश्यं कर्म्म कर्त्तुं न शक्यते।
गौणकालेऽपि कर्त्तव्यं गौणोऽप्यत्रेदृशो भवेत्॥इति॥

'ईदृशः' मुख्यकालसदृशः। अनेनास्य प्रतिनिधित्वयोग्यता दर्शिता। स्मृतयोऽपि गौणकालग्रहणं दर्शयन्ति।

यथाकथञ्चित् कर्त्तव्यं नित्यं कर्म्म विजानता।
न प्राप्तेऽस्य विलोपोऽस्ति पैतृकस्य विशेषतः ॥इति॥

तथा।

दिनोदितानि कर्म्माणि प्रमादादक्षतानि वै।
यामिन्याः प्रहरं यावत्तावत् सर्वाणि कारयेत् ॥
सन्ध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः।

इत्यादिकः स्मार्त्तसन्ध्यादिकालविशेषनिषेधश्चागौणत्वेन तत्कालग्रहणप्राप्तौ सत्यामेवावकल्प्यते। नित्यनैमित्तिके च यथा कुर्य्यादित्युपबन्धसामर्थ्यान्नित्यवदाम्नातान्यप्यङ्गान्यनित्यानि भवन्ति।

तदाह पैठीनसिः।

"प्रधानसहितान्यङ्गानि भवन्ति न भवन्ति चेति"।

ननु यदि मुख्यकालातिक्रमे गौणकालग्रहणमविरुद्धं तर्हि दर्शपौर्णमासपार्व्वणश्राद्धादीनाममावास्यादिविहितकालालाभे पञ्चम्यादिकर्त्तव्यत्वं प्रसज्येत। का नामैषा प्रसक्तिः।

अभिमतमेव हि गौणकालस्वीकारवादिनस्तदनुष्ठानम्।

एतच्च गौणकालग्रहणं न काम्येषु। तत्र हि सर्वाङ्गोपसंहारशक्तस्यैवाधिकारप्रतिपादनात्। गौणकालग्रहणेन कर्म्मानुष्ठाने कश्चिद्विशेषस्त्रिकाण्डमण्डनेनोक्तः प्रसङ्गादुच्यते।

गौणेष्वेतेषु कालेषु कर्म्म चोदितमाचरेत्।
प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्।

कालान्तरे चोदितं कर्म्मैतेषु पूर्व्वोक्तलक्षणेषु गौणेषु कालेष्वाचरन् प्रायश्चित्तप्रकरणोक्तां निष्कृतिं प्रायश्चित्तमाचरेत्।

पक्षान्तरमपि तेनैवोक्तम्।

"प्रायश्चित्तमकृत्वा वा गौणकाले समाचरेत्"।

अत्राकृत्वा इत्यत्र पूर्व्वकालताप्रतीतिरविवक्षिता।

तदेवं गौणकालग्रहणे प्राप्ते विधीयते।

सर्व्वत्र सप्तम्यन्तनिर्दिष्टकालस्यानुपादेयत्वेनोद्देश्यैकस्वभावस्य निमित्तत्वेनाभिधानादधिकारिविशेषणत्वे विहितकालमन्तरेणाधिकाराभावात् कालान्तरे कृतमकृतमेव स्यादिति गौणकालग्रहणं न कार्य्यम्। विहितकालाभावेचाधिकाराभावः सान्तपनीयाधिकरणे प्रापणावनिमित्तस्येत्यत्र सूत्रे प्रतिपादितः।

अतएव लौगाक्षिः ।

गणितात् ज्ञायते कालः काले तिष्ठन्ति देवताः ।
वरमेकाहुतिः काले नाकाले लक्षकोटयः ॥

यत्तु—त्रिकाण्डमण्डने गौणकालग्रहणमुक्तम् । तत्पूर्व्वपक्षन्यायशैवसिद्धान्तमभिमन्य नोक्तमित्युपेक्षणीयम् ।

यत्तु—

यथाकथञ्चिदित्यादिस्मरणम्, न तत्र गौणकालग्रहणं प्रतिपद्यते किन्त्वग्रहणमेव ।

यतस्तस्यायमर्थोऽवगम्यते ।

स्वकालं प्राप्तस्य कर्म्मणो मुख्यद्रव्याद्यसम्पत्तिवशात् लोपोऽननुष्ठानं न कार्य्यम् । किन्तु स्वकाल एव यथाकथञ्चिन्मुख्यद्रव्यादिसदृशद्रव्यान्तरोपादानेन किञ्चिद्विफलमपि कर्त्तव्यमिति ।

यच्च दिनोदितानि कर्म्माणीत्यादि वचनं, तेन न सर्व्वेष्वपि कर्म्मसु सर्वेषाञ्च गौणकालानां गौणत्वप्रयुक्तया ग्रहणमुच्यते । किन्तु केषुचिदेव कर्म्मसु किञ्चिदेव कालान्तरमनुकल्पत्वेन मुख्यकालवन्न्यायादप्राप्तमेव विधीयते । श्रुतान्येव तद्वचनबलेन संवत्सरर्त्तुमासतिथ्यादिकालविशेषविहितानि कर्म्माणि तत्कालातिक्रमे कालान्तरेऽपि कर्त्तुं युज्यन्ते ।

यस्तु सन्ध्यारात्र्योः श्राद्धनिषेधः सोऽपि रागप्राप्तस्य भक्षणादेरिव न्यायाभासादिना प्राप्तस्योपपद्यते ।

अथवा "द्रव्यं ब्राह्मणसम्पत्तिः श्राद्धं प्रति रुचिश्च ह ।
अकाले यदि वा काले तीर्थश्राद्धं सदा नरैः ॥
प्रातरेवाह्नि कर्त्तव्यम्" ।

इत्यादिभिरपराह्णव्यतिरिक्तकालप्राप्तस्य श्राद्धस्य सन्ध्यादिकालेष्वयं प्रतिषेधः ।

यत्तु—मुख्यकालातिक्रमे नित्यनैमित्तिकानां गौणकालेऽनुष्ठानं दृश्यते तत् क्वचित्तु गर्हापरिहारमनःपरितोषाद्यर्थं, क्वचिच्चानुकल्पत्वेन कालान्तरविधेरित्यनवद्यम् ।

उपदिष्टकालातिक्रमे चाधिकारभावादेव मुख्यद्रव्यालाभान्मुख्यकालातिक्रमो न कार्य्यः । एतदेव च सन्देहपूर्व्वकमुपन्यस्य त्रिकाण्डमण्डने निश्चितम् । मुख्यकाले हि मुख्यञ्चेत्स्यात् कालातिक्रमो न कार्य्यः । धनं नैव लभ्यते चेत् कालद्रव्ययोः कस्य मुख्यत्वं गौणतापि वा ।

मुख्यकालमुपाश्रित्य गौणमप्यस्तु तद्धनम् ।
न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणम् ॥

तदेवमेतत् सिद्धवचनमन्तरेण गौणग्रहणं न कार्य्यम् । सति तु वचने गौणस्य तस्मात्परस्यापि वा कार्य्यमिति ।

तत्राह ऋष्यशृङ्गः ।

देये पितॄणां श्राद्धे तु अशौचं जायते यदा ।
अशौचे तु व्यतिक्रान्ते तेभ्यः श्राद्धं विधीयते ॥

मुख्यकालिकोपक्रमात् प्राग्यदा श्राद्धाधिकारिणामशौचं जायते, तदा मुख्यकाल-प्रत्यासन्ने अशौचेन चादूषिते अशौचापगमनानन्तरकाल एव पैतृकं कर्म्म कार्य्यमित्यर्थः ।

यत्वत्रिवचनम् ।

तदहश्चेत् प्रदुष्येत केनचित् सूतकादिना ।
सूतकानन्तरं कुर्य्यात् पुनस्तदहरेव वा ॥इति॥

तत्र तिथिपक्षस्त्वादिशब्दोक्तनिमित्तानन्तरविघ्निते मुख्यकालविषये इति पूर्व्व-वचनाविरोधाय कल्पनीयम् ।

एतच्च पक्षान्तरक्षयाहक्रियमाणप्रतिमासिकश्राद्धविषयम् । तत्र मासस्पृष्ट-कालाभावेऽपि पक्षतिथिमात्रस्पृष्टस्यापि ग्राह्यत्वात् ।

अतएवाह देवलः ।

पक्ष इति मृतकसूतकाभ्यां मृताहोपघाते तदतिक्रम्याशौचनिवृत्तौ श्राद्धं कर्त्तव्य-मित्युक्तम् ।

तत्पाकोपक्रमान्निमन्त्रणाद्वा पूर्व्वमेवाशौचविज्ञाने सति नोत्तरकालम् ।

तथा च ब्रह्मपुराणे ।

गृहीतमधुपर्कस्य यजमानस्य ऋत्विजः ।
पश्चादशाहे पतिते नाशौचमिति निश्चयः ॥
तद्वद्गृहीतदीक्षस्य त्रैविद्यस्य महामखे ।
स्नानमवभृथे यावत्तावत्तस्य न विद्यते ॥
निवृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने ।
गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित् ॥
नैष्ठिकस्याथवान्यस्य भिक्षार्थं प्रस्थितस्य च ।
वानप्रस्थस्य वान्यस्य साधिकारस्य सर्वदा ॥
प्रतिग्रहाधिकाराच्च निवृत्तस्य न विद्यते ।
गोमण्डलादौ वैश्यानां रक्षाकालात्ययादपि ॥
निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि ।
निमन्त्रणाद्धि विप्रस्य स्वाध्यायाद्विरतस्य च ॥
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥
अपि दातृगृहीत्रोश्च सूतके मृतके तथा ।
अविज्ञाते न दोषः स्याच्छ्राद्धादिषु कदाचन ॥
विज्ञाते भोक्तुरेव स्यात् प्रायश्चित्तादिकं तथा ।
भोजनार्द्धे तु संभुक्ते विप्रैर्दातुर्विपद्यते ॥

यदा कश्चित्तदोच्छिष्टशेषं त्यक्त्वा समाहितः।
आचम्य परकीयेन जलेन शुचयो द्विजाः॥
विवाहयज्ञयोर्मध्ये सूतके सति वान्तरा।
शेषमन्नं परैर्देयं दातृन् भोक्तृंश्च न स्पृशेत्॥

अत्र—

"निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि"

इति तद्द्वयोपन्यासात् पाकारम्भात् प्राक् यदा निमन्त्रणात् प्रभृत्याकर्म्मसमाप्ते-राशौचाभावः, यदा तु पाकात्पूर्वं निमन्त्रणं कृतन्तदा पाकारम्भप्रभृत्याकर्म्मसमाप्ते-राशौचाभावः, तदादि पाकोपक्रमस्यैव प्रथमावयवरूपत्वेन श्राद्धारम्भाभावत्वम्।

भोजनार्द्धे तु सम्भुक्ते यदि दातुः कश्चिद् विपद्यत इत्येतस्य तत्कालमृतदातृ-सपिण्डनिबन्धनाशौचविषयत्वेन श्राद्धगृहसूताशौचविषयत्वेन वा निमन्त्रितेषु विप्रेष्वि-त्यादिना पूर्वोक्तेन सह विरोधपरिहारो विधेयः। शेषमन्नं परैर्देयमित्येतत्तु भोक्तृगृह-व्यतिरिक्तजन्ममरणविषयम्। दातृन् भोक्तृंश्च न स्पृशेदित्यत्र दोष इति शेषः।

आह क्रतुः।

पूर्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति।

उक्तमिदमशौचदूषितेऽधिकारिणि मुख्यकालमतिक्रम्याशौचनिवृत्तौ श्राद्धं कर्त्तव्यमिति। गृहमेधिनश्च भार्य्यया सहैवाधिकारात्तस्यां रजोदर्शननिबन्धनाशु-चित्वदूषितायां मुख्यकालमतिक्रम्याशुचित्वनिवृत्तावेव श्राद्धे कर्त्तव्ये प्राप्ते रजस्वला-पतिनैवैकाकिनामुख्यकालएवामश्राद्धं कर्त्तव्यमित्याहोशनाः।

अपत्नीकः प्रवासी च यस्य भार्य्या रजस्वला।
सिद्धान्नेन न कुर्व्वीत आमं तस्य विधीयते॥इति॥

अस्यामद्रव्यश्राद्धविधेः कचिदुपसंहारपूर्व्वकमपवादः।

"श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितम्।
अमावास्यादिनियतं माससंवत्सराद्दते"॥

मासिकसांवत्सरिकविषये आमश्राद्धनिषेधः। मृताहे प्राप्ते यस्य भार्य्या रजस्वला भवति तस्मिन्नेव दिने अन्नेनैव श्राद्धं कुर्य्यात् नामेन कालान्तरे वा।

स्मृत्यन्तरे।

आब्दिके समनुप्राप्ते यस्य भार्य्या रजस्वला।
पञ्चमेऽहनि तच्छ्राद्धं न कुर्य्यात्तन्मृतेऽहनि॥

तद्भर्त्तुः प्रत्याब्दिके अपुत्रा पत्नी स्वयमेव श्राद्धकर्त्री यदि—

अपुत्रा तु यदा भार्य्या सम्प्राप्ते भर्त्तुराब्दिके।
रजस्वला भवेत्सा हि तत् कुर्य्यात् पञ्चमेऽहनि॥

इति गौतमस्मरणात् यद्भार्य्यारजोदर्शनादिरूपे श्राद्धविघ्ने सत्यामश्राद्धं कर्त्तव्यमिति प्रकीर्त्तितं तदमावास्यादिकालिकमेव । न तु यन्मृताहकालिकं मासिकं सांवत्सरिकञ्च तदपीत्यर्थः । किन्तु तत् पक्वान्नेनैव कर्त्तव्यम् । तच्चैकभार्य्येण ।

एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते ।
अन्यस्मिंस्तत्तिथौ तस्मिन् श्राद्धं कुर्य्यात् प्रयत्नतः ॥

'अन्यस्मिन्' अनन्तरे मासि । 'तत्तिथौ' मृततिथौ 'तस्मिन्' शुक्ले कृष्णे वा मृतस्तस्मिन् पक्षे । श्राद्धं विघ्नवशादतिक्रान्तं कुर्य्यादित्यर्थः । यदि विघ्न इत्यत्रापि ऋष्यशृङ्गवचनाविरोधायाशौचव्यतिरिक्तनिमित्तेनेति विशेषो द्रष्टव्यः ।

अशौचनिमित्तेन विघ्ने जाते मासिकविषयेऽपि सूतकानन्तरमेव श्राद्धानुष्ठानं ऋष्यशृङ्गवचनोक्तमनुसन्धेयम् ।

अतएव देवस्वामिनाप्युक्तम् ।

एतत् ऋष्यशृङ्गवचनं सूतकाशौचविषयं, निमित्तान्तरैस्तु तदहर्विघाते ।

"एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते" ।

इत्यादि स्मृत्यन्तरवचनमिति ।

यत्पुनर्व्यासवचनम् ।

श्राद्धविघ्ने समुत्पन्ने अन्तरामृतसूतके ।
अमावास्यां प्रकुर्वीत शुद्धावेके मनीषिणः ॥इति॥

'अन्तरामृतसूतके' श्राद्धप्रयोगमध्ये पाकोपक्रमात् प्राक् मृतके सूतके वा जाते । 'अमावास्यां' अमावास्यायाम् । 'शुद्धौ' शुद्ध्यनन्तरम् । एतदविज्ञातमृताहसांवत्सरिकश्राद्धविषयम् ।

अमावास्याग्रहणं शुक्लैकादश्याः कृष्णैकादश्याश्चोपलक्षणम् ।

अतएव मरीचिः ।

श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि ।
एकादश्यान्तु कर्त्तव्यं कृष्णपक्षे विशेषतः ॥

कृष्णपक्षे या एकादशी तस्यां विशेषतः कर्त्तव्यमित्यन्वयः । पितृकार्य्येषु कृष्णपक्षस्यैव ग्राह्यत्वात् । कृष्णैकादशीव्याप्यमावास्यायाः पितृकार्य्यश्रैष्ठ्यं दण्डापूपन्यायसिद्धं बोद्धव्यम् ।

यत्तु षट्त्रिंशन्मतम् ।

मासिकाब्दे तु सम्प्राप्ते अन्तरामृतसूतके[१] ।
वदन्ति शुद्धौ तत्कार्य्यं दर्शे वापि विचक्षणाः ॥इति॥

तावतोक्तान्येव तु पुनः कुर्य्यादिति विहितानुमासिकश्राद्धविषयम् ।

---

[१]. मासिकेचाब्दिके त्वह्नि संप्राप्ते मृतसूतके इति ।

एकोद्दिष्टरूपमासिके पूर्व्वमेवानुकल्पस्योक्तत्वात्।

अत्र शुद्ध्यनन्तरकालो मुख्यकालप्रत्यासन्नत्वाच्छ्रेष्ठः। दर्शकालस्तु ततो-जघन्यः, मुख्यकालप्रत्यासत्यभावादिति मन्तव्यम्।

तथा च ऋष्यशृङ्गः।

शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते।
सा तिथिस्तस्य कर्त्तव्या न त्वन्या वै कदाचन ॥इति॥

अयमर्थः।

शुचीभूतेन तावद्दातव्यम्। तेन मुख्यकाले शुद्ध्यसम्भवे शुद्ध्यनन्तरं या तिथिः प्रतिपद्यते लभ्यते सा तिथिस्तस्य कर्त्तव्या कर्म्माङ्गतया नेया। या मुख्या तिथि-रशौचदूषिता कदाचन सा नानुष्ठेयेति।

अशौचादूषिता तु मुख्या तिथिः सदानुष्ठेयेति।

तिथिच्छेदो न कर्तव्यो विनाशौचं यदृच्छया।
पिण्डं श्राद्धञ्च दातव्यं विच्छित्तिं नैव कारयेत् ॥इति॥

'यदृच्छया' स्वेच्छया, 'श्राद्धं' ब्राह्मणतर्पणं, च शब्देनाग्नौकरणमपि कर्त्तव्यमिति, समुच्चिनोति।

श्राद्धशब्देनात्र ब्राह्मणतर्पणमात्रमुपचारादुच्यते। न तु मुख्यार्थतया। अग्नौ-करण-ब्राह्मणतर्पण-पिण्डदानात्मक कर्मत्रितयसमुदायस्यैव मुख्यार्थत्वात्।

विच्छित्तिं नैव कारयेदित्यस्यायमर्थः।

कृत्स्नस्य श्राद्धशब्दार्थस्य कर्तुमशक्यत्वेऽपि तद्देशमात्रं वा यथासामर्थ्यं कुर्य्यात्। सर्वथा कर्म्मविच्छित्तिं नैव कुर्य्यादिति।

अतएव निगमः।

आहिताग्नेः पित्रर्चनं पिण्डैरेव ब्राह्मणानपि वा भोजयेदिति। तत्र यथासामर्थ्यं व्यवस्था। ततश्च द्वितीयपक्षासामर्थ्ये प्रथमोक्तप्रतीतिर्जायते। तद्बाधो मा भूदित्ये-तदर्थमेवमभ्युपगन्तव्यम्।

ननु दर्शयिष्यमाणैस्त्रिधाचतुर्धादिविभागवचनैर्य्यौगिको दृष्टान्तसारूप्यकल्पना-मूलकश्च विभागो बाध्यताम्। सत्यम्। पारिभाषिकस्य प्रत्यक्षवचनोपदिष्टस्य वानवका-शत्वेन प्रत्यक्षत्वेन च यौगिकात् काल्पनिकाच्च बलीयस्त्वादेव बाधः। किन्तु परि-भाषया यौगिकस्य बाधो मा भूदित्येतदर्थमेव योगसिद्धोऽप्यर्थः।

स्कन्दपुराणे।

आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परम् ॥इति॥

'आवर्त्तनं' दिनम्, इति द्विधा विभक्तस्याह्नो द्वितीयो यो भागोऽपराह्ण इत्येकं मतम्।

अथ त्रिधाविभक्तस्याह्नस्तृतीयोभागोऽपराह्ण इत्यपरं मतम्।

उच्यते तत्र श्रुतिः ।

पूर्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितृणाम् । तस्मादपराह्णे ददातीति ।

अत्र पञ्चदशमुहूर्त्तात्मकदिवसस्य पञ्चदशमुहूर्त्तपरिमितं पूर्व्वाह्णादिनाम्नस्त्रीन् भागान् परिकल्प्य क्रमाद्दैवमानुषपैतृकेषु कर्म्मसु विनियुङ्क्ते श्रुतिरिति प्रतीतिर्जायते ।

अत्रापराह्णकाले विहितस्य पार्व्वणश्राद्धस्य वासरतृतीयांशमानतः कर्त्तव्यतोपदेशकालं विनियोगप्रकरणे दर्शयिष्ये ।

सोऽपि त्रिधाविभक्तस्याह्नस्तृतीयोभागोऽपराह्ण इत्यन्यत्रप्रदर्श्यत्वेनानुसन्धेयः, इति सहाधिकारिभार्य्यादूषणाद्भार्य्यान्तरस्य वा रजस्वलाभावे तद्विषयवचनाभावाद्रजोदर्शनरूपविघ्नापगमकाल एव कर्त्तव्यम् ।

स चोक्तः प्रभासखण्डे ।

संशुद्धा स्याच्चतुर्थेऽह्नि स्नाता नारी रजस्वला ।
दैवे कर्म्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति ॥

स्मृत्यन्तरे ।

मृतेऽहनि तु सम्प्राप्ते यस्य भार्य्या रजस्वला ।
श्राद्धं तदा न कर्त्तव्यं कुर्य्यात्तत् पञ्चमेऽहनि ॥

अधिकारिभार्य्यान्तरयुक्तेन त्वधिकारानपगमान्मुख्यकाल एव कर्त्तव्यम् ।

॥ इति मुख्यकालातिक्रमे कालाः ॥

अथात्र कस्मिंश्चिच्छ्राद्धे प्रातः कालः । कस्मिंश्चित् पूर्व्वाह्णः, कस्मिंश्चिन्मध्याह्नः कस्मिंश्चिदपराह्णो विहितः । सायङ्कालश्च निषिद्धः ।

अतस्तद्विवेकार्थं पूर्व्वाह्णादपराह्णो विशिष्यत इति ।

नन्वत्र श्राद्धविषये पूर्व्वाह्णादपराह्णस्य वैशिष्ट्यमात्रमुच्यते । न पुनरहः द्विधा विभज्य पूर्व्वभागस्य पूर्वाह्णसंज्ञकत्वमिति । अथोच्यते । द्विधा विभक्तस्य मासस्य भागौ पूर्व्वापरौ पक्षौ भवतः । तौ चात्र दृष्टान्तीकृतौ स्वसारूप्यादह्नोऽपि द्विधा विभक्तस्य पूर्व्वापरयोर्भागयोः पूर्वापराह्णसंज्ञकत्वं गमयत इति । तत्र वैशिष्ट्यमात्रेण सारूप्याद्दृष्टान्तत्वोपपत्तेः । सत्यम् । तथा विभागान्तरानुपादानात् सर्व्वसारूप्यानुरोधाच्च विवक्षितविभागप्रतीतिर्जायते । तद्बाधो मा भूदित्येतदर्थमेवमभ्युपगन्तव्यम् ।

इति त्रिधा विभक्तस्य तृतीयो भागोऽपराह्ण इति मतम् ।

अथ विषमैर्भागैश्चतुर्द्धा विभक्तस्य तृतीयोभागोऽपराह्णइत्यपरम् ।

तथा च गोभिलः ।

पूर्वाह्णं प्रहरं सार्द्धं मध्याह्नं प्रहरं तथा ।
आ तृतीयादपराह्णं सायाह्नञ्च ततः परम् ॥इति॥

अत्र सूर्य्योदयात् प्रभृति सार्द्धप्रहरपरिमितं दिनभागं पूर्वाह्णम्। तदूर्ध्वं प्रहर-परिमितं मध्याह्नम्। तदूर्ध्वं तृतीयप्रहरसमाप्तिपर्य्यन्तमर्द्धप्रहरपरिमितमपराह्णम्। तदूर्ध्वं प्रहरमात्रं सायाह्नमाहुरित्यर्थः।

इति चतुर्द्धा विभक्तस्य तृतीयोभागोऽपराह्ण इति मतम्।

अथ समविभागैः पञ्चधा विभक्तस्याह्नश्चतुर्थो भागोऽपराह्ण इत्यपरमपि मतम्।

तत्र शतपथश्रुतिः।

आदित्यस्त्वेव सर्व ऋतवः। यदैवोदेत्यथ वसन्तो यदा सङ्गवोऽथग्रीष्मो यदा मध्यन्दिनोऽथवर्षा यदापराह्णोऽथ शरद्यदैवास्तमेत्यथ हेमन्तः[1] इति।

एवं पञ्चदशमुहूर्त्तसंमितस्य दिवसस्य पञ्चधा विभागे क्रियमाणे त्रिमुहूर्त्तपरि-मिताः प्रातरादयः पञ्च काला भवन्ति।

अत्र यद्यपि तस्मात्तु मध्यन्दिन एवादधीतेत्यनन्तरमेवाम्नायनस्याधानसम्बन्धो मध्यन्दिनविधिः शेषभूतया पञ्चधा विभागः श्रूयते।

तथाहि।

प्रातरादिविहितैः कर्म्मभिराकाङ्क्षित-स्वकालपरिमाणज्ञापकतयोपजीव्यमानः सर्व्वकामसम्बन्धितां लभते। अतएवायं त्रिमुहूर्त्तपरिमाणावयवः पञ्चधा विभागः साधारण्येनैव दृश्यते।

तथा च प्रभासखण्डे।

मुहूर्त्तत्रितयं प्रातस्तावानेव च सङ्गवः।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः॥
सायाह्नस्त्रिमुहूर्त्तोऽथ सर्व्वकर्म्मबहिष्कृतः॥इति॥

अतएव तत्कालविहितकर्म्ममात्रोपयोगितामस्य विभागस्याह पराशरः।

लेखाप्रभृत्यथादित्यान्मुहूर्त्तत्रय एव च।
प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पञ्चमः॥
सङ्गवस्त्रिमुहूर्त्तोऽथ मध्याह्नस्तत्समस्ततः।
ततस्त्रयो मुहूर्त्ताश्च त्वपराह्णो विशिष्यते॥
पञ्चमोऽपि दिनांशो यः स सायाह्न इति स्मृतः।
यद्यदेतेषु विहितं तत्तत्कुर्य्यात् विचक्षणः॥इति॥

उदयमानस्य भास्वन्मण्डलस्य रेखावत्प्रकाशमानः प्रथमोपलम्भयोग्यभागो 'लेखा'। 'आदित्यात्' आदित्योदयात्। तथा च लेखाप्रभृत्यादित्योदयादारभ्य ये तत्र मुहूर्त्तास्ते प्रातः संज्ञा भवन्तीत्युक्तं भवति।

---

[1] शतपथब्राह्मणे—काण्ड २, अध्या० २, प्रपा० २, सू० ८।

उक्तं हि स्कन्दपुराणे ।

लेखाप्रभृत्यथादित्ये त्रिमुहूर्त्तोऽस्थिते तु वै ।
प्रातस्ततः स्मृतः कालो भागश्चाह्नः स पञ्चमः ॥इति॥

यद्यदेतेषु प्रातरादिकालेषु कर्म्म विहितं तत्तदेतेषु यथोक्तेषु त्रिमुहूर्त्तपरिमितेषु कुर्य्यादित्यर्थः ।

अथ यथोक्तवचनप्रपञ्चमिताः पूर्व्वाह्णादिकालाः कल्पा एवोच्यन्ते ।

तत्र द्विधाहर्विभागे भास्वन्मण्डलार्द्धांशनिरीक्षणादारभ्याष्टममुहूर्त्त-पूर्व्वार्द्ध-समाप्तिपर्य्यन्तः पूर्व्वाह्णः ।

त्रिधाविभागे लेखाप्रकाशात् प्रभृति पञ्चमुहूर्त्तावसानावधिः । चतुर्धा विभागे तत एवारभ्य षष्ठमुहूर्त्ततृतीयपादपूर्व्वार्द्धसमाप्तिपर्य्यन्तः । पञ्चधा विभागे तूदयादारभ्य षण्मुहूर्त्तपरिमितस्य कालस्य पूर्व्वाह्णत्वं वक्तव्यम् । तदा हि यौगिकीं वृत्तिं परिकल्प्य पूर्व्वाह्णशब्दस्यार्थो वाच्यः । यद्यपि दिनाद्यस्य मुहूर्त्तषट्कस्य प्रातःसङ्गवात्मकसंज्ञाद्वयावरोधोऽस्ति तथाप्यसौ नियोगविरोधीति न पूर्व्वाह्णसंज्ञानिवेशपरिपन्थितां प्रतिपद्यते ।

इति चतुर्विधपूर्व्वाह्णविवेकः ।

अथ मध्याह्नकल्पाः ।

द्विधाविभागे दिवसस्य मध्यमक्षणादुभयतो मध्याह्नविहितकर्म्मप्रयोगपर्य्याप्तो मध्याह्नः । न चात्र विरुद्धसंज्ञान्तरनिवेशोऽप्यभ्युपेयः । त्रिधा विभागे षष्ठमुहूर्त्तादारभ्य दशममुहूर्त्तावसानावधिर्मध्याह्नः । चतुर्द्धा विभागे षष्ठमुहूर्त्ततृतीयपादोत्तरार्द्धादारभ्य दशममुहूर्त्तद्वितीयपादपूर्व्वार्द्धसमाप्तिपर्य्यन्तः । पञ्चधा विभागे तु षष्ठमुहूर्त्तादारभ्य दशममुहूर्त्तसमाप्तिपर्य्यन्तः ।

॥ इति चतुर्व्विधमध्याह्नविवेकः ॥

अथापराह्णकल्पाः ।

द्विधा विभागे अष्टममुहूर्त्तोत्तरार्द्धादारभ्य पश्चिमसन्ध्यारम्भपर्य्यन्तोऽपराह्णः । त्रिधा विभागे त्वेकादशमुहूर्त्तादारभ्य पश्चिमसन्ध्यापर्य्यन्तः । चतुर्धा विभागे दशम-मुहूर्त्त-द्वितीयपादोत्तरार्द्धादारम्य द्वादशमुहूर्त्ताद्यपादावसानपर्य्यन्तः । पञ्चधा विभागे दशममुहूर्त्तादारभ्य द्वादशमुहूर्त्तावसानपर्य्यतः ।

॥ इति चतुर्व्विधापराह्णविवेकः ॥

अथ सायाह्नकल्पाः ।

अथ सायङ्कालो द्विधा त्रिधा विभागे तत्कालविहितकर्म्मप्रयोगपर्य्याप्तोऽस्तमयात्पूर्व्वं कल्पनीयः ।

चतुर्द्धा तु विभागे द्वादशमुहूर्त्तद्वितीयपादादारभ्य सूर्य्यास्तमयावधिः । पञ्चधा-विभागे त्रयोदशमुहूर्त्तादारभ्य सूर्य्यास्तमयं सायाह्न इति ।

एते च पूर्व्वाह्लादयो वक्ष्यमाणविनियोगानतिक्रमेण यथालाभं ग्राह्याः। प्राशस्त्य-तारतम्यक्रमेण च यो यं कालमपेक्ष्य सूक्ष्मः स तस्मात् प्रशस्ततरः। महावधिवचनेन महतः कालस्य पूर्व्वाह्णत्वे प्रमिते तदेकदेशस्यापि प्रमितमेव पूर्व्वाह्णत्वम्।

यथा हिमवत्कुहरादारभ्य पूर्व्वसमुद्रसीम्नो जलप्रवाहविशेषस्य गङ्गात्वे प्रमिते प्रमितमेव तदन्तर्वर्त्तिनः प्रवाहैकदेशस्यापि गङ्गात्वम्। कथमन्यथा गङ्गायां स्नानं कुर्य्यादपराह्णे पितृयज्ञमाचरेदिति विहितस्य तदेकदेशेऽनुष्ठाने विधेः सिद्धिर्दृश्यते च।

केचित् समुदायतदेकदेशयोः साधारणशब्दाः।

यदुक्तमाचार्य्यैः।

> विन्दौ च समुदाये च तोयशब्दो यथेष्यते।
> संसर्गिद्रव्यरूपत्वात् सूक्तं वाक्यं पदं तथा॥इति॥

अतोऽवान्तरावधिवचन-प्रमितपूर्व्वाह्णैकदेशान्तरनिवर्त्तकत्वेन वा स्वाभिधेय-स्यापि प्राशस्त्यप्रतिपादनपरत्वेन चार्थवत्त्वं वक्तव्यम्। तत्राद्ये पक्षे महावधिवचना-नर्थक्यबाधौ स्याताम्।

अतोऽवान्तरावधिवचनं प्रशस्ततरत्वार्थमिति निश्चीयते।

अथ कुतपकालाः।

स्कन्द-वायुपुराणयोः।

> कुं यत्र गोपतिर्गोभिः कार्त्स्न्येन तपति क्षणे।
> स कालः कुतपो ज्ञेयस्तत्र दत्तं महाफलम्॥

'कुः' पृथ्वीः तां, 'गोपतिः' सूर्य्यः, 'गोभिः' स्वकीयैः करैः, 'कार्त्स्न्येन' समग्रां, यस्मिन् क्षणे 'तपति' उष्णां करोति, स कालः कुतपो ज्ञेयः। तदनेन कुतपशब्दनिर्व्व-चनं कृतम्। निरूपितश्च कुतपोऽयमिति। सर्व्वच्छायासङ्कोचाद्दिवसमध्य एव हि सूर्य्यः कृत्स्नां पृथ्वीं तपति, अतो दिवसमध्यः कुतप इत्येवमसौ निर्द्धारितो भवति।

स च मुहूर्त्तपरिमितोऽपि स्वल्पमनुसन्धायोपचारवृत्या क्षणशब्देनोक्तः।

उक्तं हि वायुपुराण एव।

> मूहूर्त्तात् सप्तमादूर्द्ध्वं मुहूर्त्तान्नवमादधः।
> स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम्॥इति॥

प्रभासखण्डेऽपि।

> अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा।
> तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः॥

खड्गपात्रादिकं तु कुतपपदशक्यमध्याह्नवाच्यवस्थितत्वात् पृथक्कर्त्तुमशक्यमिति मध्याह्नप्रसङ्गादिहैव लिख्यते।

कालिकापुराणे ।

ब्राह्मणाः कम्बलो गावो रूप्याग्न्यतिथयोऽपि च ।
तिला दर्भाश्च मध्याह्नः सर्व्वे ते कुतपाः स्मृताः ॥

प्रभासखण्डे

मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलः ।
रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः ।
अष्टावेते यतस्तस्य कुतपा इति विश्रुताः ॥

कौषीतकिना तु तथान्यः कालकम्बल इति पठितम् ।

॥ इति कुतपः ॥

अथैतेषामपराह्णादिकालानां पार्व्वणादिषु श्राद्धेषु विनियोगः कथ्यते ।

तथाह शातातपः ।

आमश्राद्धं तु पूर्व्वाह्णे प्रातर्वृद्धिनिमित्तकम् ।

मनुरप्याह ।

पूर्व्वाह्णे मातृकं श्राद्धमपराह्णे तु पार्व्वणम् ।
एकोद्दिष्टन्तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥ इति ॥

आह मार्कण्डेयपुराणे ।

शुक्लपक्षस्य पूर्व्वाह्णे श्राद्धं कुर्य्याद्विचक्षणः ।
कृष्णपक्षापराह्णे तु रोहिणं तु न लङ्घयेत् ॥इति॥

अत्र शुक्लपक्षे पूर्व्वाह्णान्तर्गते कुतपपूर्व्वार्द्ध एव पार्व्वणमेकोद्दिष्टं वा श्राद्धमारम्भणीयम् । कृष्णपक्षे त्वपराह्णान्तर्गते कुतपोत्तरार्द्ध एव ।

एतच्च वचनं पार्व्वणे कुतपस्य पूर्व्वार्द्धमेकोद्दिष्टे तु परार्द्धं प्रापयितुम् । वैपरीत्येन हि पूर्व्वापरार्द्धयोः मध्याह्नापराह्णौ विध्यन्तरादेव प्राप्तः ।

अथवा शुक्लपक्षस्येत्यनेन तत्पक्षविहितं दैविकं श्राद्धमुपलक्ष्य पूर्वाह्णो विधीयते । कृष्णपक्षेत्यनेन पैतृकमुपलक्ष्यापराह्ण इति ।

एवञ्च विध्यन्तराविरोधेनैव सत्याङ्गतौ मध्याह्नापराह्णौ च बाधितौ न भविष्यतः ।

तत्रापराह्णस्य तावद्विनियोगो विविच्यते ।

शातातपः ।

दर्शश्राद्धन्तु यत्प्रोक्तं पार्व्वणं तत् प्रकीर्त्तितम् ।
अपराह्णे पितृणान्तु तत्र दानं प्रशस्यते ॥ इति॥

यत् पिण्डपितृयज्ञानुष्ठानरहिताग्निकर्तृकं स्त्रीशूद्रादिकर्तृकं वा दर्शश्राद्धं तत्रामावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति कल्पसूत्रकारोक्तापराह्णकालानुष्ठेयपिण्डपितृयज्ञोत्तरकालत्वं विधेः, तदनुसारेणैव त्रिधाविभक्तस्याह्नस्तृतीयभागो यथालाभमासन्ध्यं ग्राह्यः।

तथाचाह मनुः।

पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते।
वासरस्य तृतीयेंऽशे नातिसन्ध्यासमीपतः ॥इति॥

तथा।

पितृयज्ञन्तु निर्व्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान्।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकम् ॥इति॥

नचैतद्वक्तव्यम्।

"पितृयज्ञन्तु निर्व्वर्त्य तर्पणाख्यन्तु योऽग्निमान्।
पिण्डान्वाहार्य्यकं कुर्य्याच्छ्राद्धमिन्दुक्षये सदा" ॥

इति मत्स्यपुराणवचनात् पञ्चमहायज्ञान्तर्भूततर्पणाख्यपितृयज्ञानन्तर्य्यमन्वाहार्य्यकस्य न पिण्डपितृयज्ञानन्तर्य्यमिति। तदनुरोधेनापराह्णग्रहणमिति।

यत आह लौगाक्षिः।

पक्षान्तं कर्म्म निर्व्वर्त्य वैश्वदेवञ्च साग्निकः।
पिण्डयज्ञं ततः कुर्य्यात्ततोऽन्वाहार्य्यकं बुधः ॥इति॥

अतः पिण्डपितृयज्ञादूर्द्ध्वमनुष्ठेयस्य दर्शश्राद्धस्य पितृयज्ञस्य समाप्त्यनुसारेण नातिसन्ध्यासामीप्यपर्य्यन्तो वासरस्य तृतीयांशो ग्राह्यः।

इत्यपराह्णकालविनियोगः।

अथ पूर्वाह्णकालविनियोगः।

तत्र पूर्व्वाह्णे दैविकं श्राद्धमिति दैविकश्राद्धाङ्गभूते पूर्व्वाह्णे वक्तव्याभावादामश्राद्धाङ्गभूतं प्रत्युच्यते। तत्र च आमश्राद्धन्तु पूर्व्वाह्ण इत्ययं पूर्व्वाह्णविधिर्द्विजकर्तृकामश्राद्धविषय एव न पुनः शूद्रकर्तृकामश्राद्धविषयोऽपीति कश्चिन्निश्चिकाय।

स हि मन्यते, उभयकर्तृकामश्राद्धविषयत्वे एकत्रापराह्णस्यात्यन्तिकं बाधं कृत्वान्यत्र पाक्षिकं निवेश्यमानस्यैकत्र नित्यत्वमन्यत्र पाक्षिकत्वमिति वैशम्यमापद्यते।

तथाहि।

द्विजामश्राद्धे तावदातिदेशिकस्यापराह्णस्यात्यन्तं बाधङ्कृत्वा पूर्व्वाह्णं निवेशयेत्। पूर्व्वाह्णोपदेशो भवत्वित्युपदेशस्यादेशाद्बलीयस्त्वेन नातिदेशिकस्यापराह्णस्य पाक्षिकं बाधङ्कृत्वा निवेशयेदिति। अतो शूद्रामश्राद्धे तूपदेशान्तरेण तुल्यबलत्वादौपदेशिकस्यापराह्णस्य पाक्षिकं बाधङ्कृत्वा निवेशयेत्।

अतो वैषम्यम्। कथं पुनः द्विजामश्राद्धे अपराह्ण आतिदेशिकः, शूद्रामश्राद्धे चौपदेशिक इति।

उच्यते।

मुख्यं हि पार्व्वणं ब्राह्मणभोजनात्मकं नित्यम्। तद्द्विजरूपकर्तृविषयमेव न शूद्रकर्तृविषयम्। तस्य ब्राह्मणभोजनात्मकश्राद्धनिषेधेन नित्यमेवामश्राद्धविधानात्। निषेधं बाधित्वापि यदि तत्र पकान्नविधिरपि निविशेत् तदा शूद्रविषये निषेधबाधसापेक्षो द्विजविषये निरपेक्ष इति वैषम्यमापद्येत।

तदेवं ब्राह्मणभोजनात्मकं यद् ब्राह्मण्यं यन्मुख्यं पार्व्वणं तद्द्विजरूपकर्तृविषयं नित्यञ्च। अनित्यन्तु द्विजानां पाकासम्भवादिनिमित्तविहितमामश्राद्धम्। एवं च सत्यपराह्णप्रभृतयः प्रकृतावुपदिश्यमाना धर्म्मा ब्राह्मणभोजनात्मकस्य नित्यस्यैवोपदेशतो भवितुमर्हन्ति नान्यस्य। द्विजकर्तृकामश्राद्धस्यापि नित्यानित्यसंयोगविरोधात्। यथोपदिश्यमाना दीक्षणीयादयो धर्म्मा नित्यस्यैवाग्निष्टोमसंस्थस्य ज्योतिष्टोमस्योपदेशतो भवन्ति। नानित्यस्यान्यस्यापि। यथा वा क्रयादयः सोमद्रव्यसाध्यस्य नित्यस्यैव ज्योतिष्टोमस्य, नानित्यस्य अन्यद्रव्यसाध्यस्यापि। किन्त्वनित्येऽतिदेशत एव भवन्ति।

अतश्चानित्ये द्विजकर्तृकामश्राद्धेऽतिदेशत एवापराह्णः। शूद्रामश्राद्धस्य तु अनैमित्तिकत्वेन नित्यत्वादुपदेशत एवापराह्ण इत्यौपदेशिकः। पूर्व्वाह्णस्तेन सह तत्र विकल्पतो द्विजामश्राद्धत्वातिदेशिकत्वेन बाधते।

अतश्चायं पूर्व्वाह्णविधिः एकत्र नित्योऽन्यत्र पाक्षिक इत्येवंविधवैषम्याकुलीकृतः सन्नेकमेव विषयमाश्रयितुमर्हति। स चान्यस्य विकल्पदुष्टं शूद्रामश्राद्धं परिहृत्य द्विजामश्राद्धमेवाश्रयते।

एवं च सति—

"मध्याह्नात् परतो यस्तु कुतपः समुदाहृतः।
आममात्रेण तत्रैव पितृणां दत्तमक्षयम्" ॥

इति वचनमत्रापराह्णानुवादकं, साधारणेनैव वचनेनाप्राप्यापराह्णलाभात्।

तस्माच्छूद्रामश्राद्धं कुतपोत्तरार्द्धात् प्रभृति प्रवृत्तेऽपराह्णे। द्विजामश्राद्धन्तु पूर्व्वाह्ण इति।

इति पूर्व्वाह्णविनियोगः ॥

अथ मध्याह्नविनियोगः।

तत्र चैकोद्दिष्टन्तु मध्याह्न इत्यत्र यद्यपि मध्याह्नत्वेन षष्ठोपक्रमाः पञ्च मुहूर्त्ता एकोद्दिष्टकालत्वेनोपदिष्टास्तथापि कुतपस्यातिप्राशस्त्यात् प्रयत्नेन कुतपेन श्राद्धारम्भं सम्पादयेत्।

तदुक्तं मत्स्यपुराणे ।

मध्याह्ने सर्व्वदा यस्मान्मन्दीभवति भास्करः ।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ॥

यथा कुतपे श्राद्धारम्भो विशिष्टस्तथा रोहिणे समाप्तिरपीत्याह गौतमः ।

प्रारभ्य कुतपे श्राद्धं कुर्य्यादारोहिणाद्बुधः ।
विधिज्ञो विधिमास्थाय रोहिणन्तु न लङ्घयेत् ॥इति॥

'रोहिणं' नवमो मुहूर्त्तः । न लङ्घयेदित्येतदपि रोहिणान्तसमाप्तिप्रशंसार्थम् । न रोहिणातिक्रमनिषेधार्थम् । तस्यापि मध्याह्नत्वेनापराह्णत्वेन च श्राद्धाङ्गत्वात् । अत एव मत्स्यपुराणे कुतपात्प्रभृति मुहूर्त्तपञ्चकस्य श्राद्धाङ्गत्वमुक्तम् ।

मुहूर्त्तात् कुतपादूर्द्ध्वं यन्मुहूर्त्तचतुष्टयम् ।
मुहूर्त्तपञ्चकं ह्येतत् स्वधाभवनमिष्यते ॥इति॥

स्वधाभवनमित्यस्याभिप्रायः ।

स्वधाशब्दवतः पार्व्वणस्यैकोद्दिष्टस्य चायङ्कालो न पुनः स्वाहाशब्दवतो दैविकस्य नान्दीश्राद्धस्य वेति । तयोर्हि पूर्व्वाह्णप्रातःकालयोरेव विधानात् ।

इति मध्याह्नविनियोगः ॥

अथ प्रातःकालविनियोगः ।

तत्र प्रातर्वृद्धिनिमित्तकमयं प्रातःकालविधिः पुत्रजन्मनिमित्तकव्यतिरिक्तवृद्धिश्राद्धविषयः । तस्य हि पुत्रजन्मरूपे निमित्ते सति विधानात् । तदनन्तरमेवानुष्ठेयत्वे जन्मनश्चानियतकालत्वे नियतकालत्वमेवावसीयते ।

ननु निमित्ते विहितमपि श्राद्धं वैश्वानरीयस्वकालं प्रति किं नोत्कृष्यते । उत्कर्षकारणाभावादिति जानीहि, न त्वस्याशौचमुत्कर्षकारणम् । न हि वैश्वानरीयेष्टिराशौचदोषनिवृत्त्यर्थमुज्जृम्भिता ।

अथोच्यते ।

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म्म च ।
प्रेतपिण्डक्रियावर्जमाशौचविनिवृत्तये ॥

इत्यादि निषेधानुरोधादुत्कर्ष इति ।

तत्र पुत्रे जाते श्राद्धं कुर्य्यादिति नैमित्तिकविधेर्विशेषशास्त्रेण निषेधबाधकत्वात् । अस्ति च तत्काले नास्त्यशौचमित्येवम्परो वचनप्रपञ्चः ।

तत्र तावच्छङ्खलिखितौ ।

पिता पितामहश्चैव तथैव प्रपितामहः ।
भूयस्तत्रैव जायन्ते तदहर्व्वेदयन्ति च ॥
तस्मात् स दिवसः पुण्यः पितॄणां प्रीतिवर्द्धनः ।

आदित्यपुराणेऽपि ।

देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् ।
आयान्ति तस्मात्तदहः पुण्यं पूज्यञ्च सर्व्वदा ॥
तत्र दद्यात् सुवर्णन्तु भूमिं गां तुरगं रथम् ।
छत्रं वस्त्रञ्च माल्यञ्च शयनञ्चासनं गृहम् ॥

हारीतोऽप्याह ।

जाते च कुमारे पितृणामामोदात् पुण्यन्तदहरिति ।

'पितृणामामोदात्' अतिशयेन हर्षोत्पत्तेः, 'पुण्यं' 'पावनं', तदहः दानादेव । पुण्यस्य स काल इत्यर्थः ।

अत्र पुत्रजन्मदिवसस्याशौचदूषितत्वाभावात्तत्काल एव जन्मनिमित्तं श्राद्धं कर्त्तव्यम् । नाशौचोत्तरकालं प्रत्युत्कर्षणीयम् ।

अत्र यद्यपि शङ्खादिवचने तदहः पुण्यमिति प्रतिभाति तथापि शिशुनालोच्छेदात् पूर्व्वमेवेति वेदितव्यम् ।

तथा च हारीतः ।

प्राङ्नाभ्युच्छेदात् संस्कारपुण्यार्थान् कुर्व्वन्ति, नाभ्यामुच्छिन्नायामाशौचमिति । 'संस्कारः' जातकर्म्म । 'पुण्यार्थान्' गुड़तिलतैलगोभूहिरण्यवस्त्रधान्यादिदानानीति ।

मनुरप्याह ।

प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते ॥इति॥

'वर्द्धनं' छेदः ।

जैमिनिरपि ।

यावत् न नश्यते नालं तावन्नाभ्येति सूतकम् ।
छिन्ने नाले ततः पश्चात् सूतकन्तु विधीयते ॥

विष्णुधर्म्मोत्तरे मार्कण्डेय आह ।

अच्छिन्ननाभ्यां कर्त्तव्यं श्राद्धं वै पुत्रजन्मनि ।
अशौचोपरमे कार्य्यमथवा नियतात्मभिः ॥

पुत्रजन्मन्यानाभिकर्त्तनात्पुण्यं तदहः । तत्र जातकर्म्मामश्राद्धं कुर्य्यात् । पात्राणि सहिरण्यानि वा दद्यात् प्रजापतये । नाभ्यां छिन्नायामशौचम् । अतो नालच्छेदात् पूर्व्वमेव श्राद्धम् । एतच्च नैमित्तिकत्वाद्रात्रावपि कर्त्तव्यम् ।

यदाह व्यासः ।

रात्रौ स्नानं न कुर्वीत दानञ्चैव विशेषतः ।
नैमित्तिकन्तु कुर्वीत स्नानं दानञ्च रात्रिषु ॥

तथा ।

ग्रहणोद्वाहसंक्रान्तियात्रार्त्तिप्रसवेषु च ।
दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति ॥
पुत्रजन्मनि यात्रायां शर्व्वर्य्यान्दत्तमक्षयम् ॥इति॥

एतच्च तत्काले सूतकान्तरनिमित्ताशौचसन्निपाते सत्यपि कर्त्तव्यम् ।

तदाह प्रजापतिः ।

सूतके तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्त्तुस्तात्कालिकी शुद्धिः पूर्व्वाशौचेन शुद्ध्यति ॥

'कर्तुः' जातकर्म्मकर्तुः । पूर्व्वप्रवृत्तजन्माशौचनिवृत्तौ सत्यां स कर्म्मणि शुद्धो भवतीत्यर्थः ।

यदि पुनरिदं तत्काले जातकर्म्मकर्त्तुरनुपपत्तेः शावाशौचान्तरनिपाताद्वा न कृतं स्यात्तदा सूतकानन्तरं कस्मिंश्चिद्दिने प्रातः काल एव कार्य्यम् ।

ननु स्वकालात् परिभ्रष्टमिदं किमिति कालान्तरे कर्तव्यम् ।

न ह्युपरागादिकर्म्माणि निमित्तबन्धनानि कर्म्माणि वा तत्कालातिक्रमेऽपि क्रियन्ते । सत्यमेवम् । इदन्तु वचनात् क्रियते ।

तथा च विष्णुधर्म्मोत्तरे ।

अच्छिन्ननाभ्यां कर्त्तव्यं श्राद्धं वै पुत्रजन्मनि ।
अशौचोपरमे कार्य्यमथवा नियतात्मभिः ॥इति॥

तत्राशौचोपरमोऽप्यस्य कालः । स तु नालच्छेदपूर्व्वकालासम्भवनिबन्धनः । इत्येतत् कुतः । वैजवापायनवचनाद् ब्रूमः ।

जन्मनोऽनन्तरं कार्य्यं जातकर्म्म यथाविधि ।
दैवादतीतकालश्चेदतीते सूतके भवेत् ॥इति॥

इति प्रातःकालविनियोगः ॥

अथ निषिद्धकालाः ।

तत्र व्याघ्रपाद आह ।

स्मार्त्तकर्म्मपरित्यागो राहोरन्यत्र सूतके ।
श्रौतकर्म्मणि तत्कालं स्नानं शुद्धिमवाप्नुयात् ॥

राहुसूतकादन्यस्मिन् सूतके स्मार्त्तं श्राद्धादिकर्म्म न कुर्व्वीत । श्रौतन्तु दर्शपूर्णमासाग्निहोत्रादि स्नात्वा सद्य एव कुर्य्यादित्यपरार्कः । स हि जननाशौचे राहुग्रस्तचन्द्रार्कसाक्षात्पूर्व्वकाले च मृते सूतकशब्दप्रयोगोऽस्तीत्यभिप्रेत्यैवं व्याख्यातवान् ।

अन्यथैवं व्याचक्षते । सूतके जन्माशौचे सर्व्वकर्म्मत्यागः कर्त्तव्यः । "स च राहोरन्यत्र" स च राहुदर्शननिमित्तात्मककर्म्माणि विहायेत्यर्थः । तत्र प्रथमव्याख्याने

जन्ममरणाशौचयोर्द्वितीयव्याख्याने तु जन्माशौचे श्राद्धं न कर्त्तव्यमिति सिद्धं भवति। कर्म्मशब्दश्च प्रेतपिण्डक्रियाव्यतिरिक्तकर्म्मविषयः।

तथा च पैठीनसिः।

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म्म च।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्त्तयेत् ॥इति॥

मनुशातातपौ।

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्त्तिता हि सा।
सन्ध्ययोरुभयोश्चैव[1] सूर्य्ये चैवाचिरोदिते ॥इति॥

रक्षांसि अस्याञ्चरन्ति बलवन्ति वा भवन्तीति राक्षसीत्युच्यते। तस्यां हि रक्षोभिः श्राद्धमवलुप्यते। पूर्व्वापरयोरपि सन्ध्ययोः श्राद्धं न कर्त्तव्यम्।

सन्ध्ययोर्म्मानन्तु याज्ञवल्क्य आह।

उदयात् प्राक्तनी सन्ध्या मुहूर्त्तद्वयमुच्यते।
सा च सन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ॥इति॥

सूर्य्ये चैवाचिरोदित इति यदुक्तं तत्सन्ध्यासमीपकालस्योपलक्षणम्। तेनास्तमयसन्ध्यासमीपोऽपि कालो लभ्यते। तदनेन प्रातःकालविहितं पूर्व्वसन्ध्या-तत्समीपकालयोः प्रसक्तं वृद्धिश्राद्धं निषिध्यते। अपराह्णविहितञ्च पार्व्वणं पश्चिमसन्ध्या-तत्समीपकालयोश्च प्रसक्तं निषिध्यते। मध्यमसन्ध्या-तत्समीपकालयोस्तु कुतपत्वान्न कश्चिन्निषेधः।

स्कन्दपुराणे।

उपसन्ध्यं न कुर्वीत पितृपूजां कथञ्चन।
स काल आसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेत् ॥

अनेन सन्ध्यासामीप्यनिषेधे सायङ्कालात्पूर्व्वं श्राद्धरम्भसमाप्त्योरसमर्थं प्रति-सन्ध्यासमीपव्यतिरिक्तः सायङ्कालः सोऽनुज्ञातो भवति।

यत्तु—
"सायाह्ने त्रिमुहूर्त्तस्तु सर्व्वकर्म्मबहिष्कृतः" इतिप्रभासखण्डवचनं—
चतुर्थे प्रहरे प्राप्ते श्राद्धं यः कुरुते नरः।
आसुरं तद्भवेच्छ्राद्धं दाता च नरकं व्रजेत् ॥इति च

बौधायनवचनम्।

दिवसस्यान्तिमे भागे मन्दीभूते दिवाकरे।
आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते ॥इति ॥

याज्ञवल्क्यः।

प्रायः प्रान्त उपोष्यः स्यात्तिथिर्दैवफलेप्सुभिः।
मूलं हि पितृतृप्त्यर्थं पैत्रं चोक्तं महर्षिभिः ॥

---

[1] सन्ध्ययोरुभयोर्व्वापीति।

'मूलं' आरम्भः ।

नारदीयपुराणे ।

तिथिप्रान्तं सुराख्यं हि उपोष्यं कवयो विदुः ।
पैत्र्यं मूलं तिथेः प्रोक्तं शास्त्रज्ञैः कालकोविदैः ॥

निगमः ।

"पूर्वाह्णिकासु चेच्छ्राद्धं दाता च नरकं व्रजेत्" इति हारीतवचनं, तत् सायङ्कालात्पूर्व्वमेव श्राद्धारम्भसमाप्तिसमर्थं प्रत्येव ।

आह व्याघ्रपात् ।

विधिज्ञः श्रद्धयोपेतः सम्यक् पात्रे नियोजकः[१] ।
रात्रेरन्यत्र कुर्व्वाणः श्रेयः प्राप्नोत्यनुत्तमम् ॥इति ॥

'रात्रिः' सन्ध्या । सन्ध्यातत्समीपकालनिषेधस्यापवादमाह विष्णुः ।

सन्ध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः ।
तयोरपि च कर्त्तव्यं यदि स्याद्राहुदर्शनम् ॥इति ॥

'राहुदर्शनं' चन्द्रोपरागः ।

इति निषिद्धकालाः ।

अथ प्रेतक्रियासु निषिद्धकालाः ।

तत्राह गार्ग्यः

प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेत् ।
आशौचमध्ये क्रियते पुनः संस्कारकर्म्म चेत् ॥
शोधनीयं दिनं तत्र यथासम्भवमेव तु ।
आशौचविनिवृत्तौ चेत् पुनः संस्क्रियते मृतः ॥
संशोध्यैव दिनं ग्राह्यमूर्द्ध्वं संवत्सराद्यदि ।
प्रेतकार्य्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणम् ॥
कृष्णपक्षश्च तत्रापि वर्जयेत्तु दिनक्षयम् ॥

इह द्विविधः प्रेतसंस्कारः । एकः प्रत्यक्षशरीरस्य । प्रतिकृतेरपरः । तत्र प्रत्यक्षशरीरसंस्कारे शुभाशुभदिनपरीक्षानवकाशः । प्रतिकृतिसंस्कारस्य तु त्रयः कालाः ।

आशौचमध्ये, संवत्सरान्तः, संवत्सराद्बहिश्चेति ।

तत्राशौचमध्ये प्रतिकृतिसंस्कारः सति सम्भवे वक्ष्यमाणतिथिनक्षत्रादिवर्जितकाले विधेयः । यदा त्वशौचाद्बहिः संवत्सरमध्ये प्रतिकृतिसंस्कारस्तदानीं वक्ष्यमाणप्रकारेणारम्भकालशोधनमवश्यं कार्य्यम् । संवत्सराद्बहिरपि क्रियमाणे तस्मिन् शोधनीय एव कालः । किन्तु तत्रोत्तरायणकृष्णपक्षौ सम्पाद्यमानौ गुणोत्तरौ भवतः । दिनक्षयदिनन्तु सर्व्वत्र वर्जनीयम् ।

१. सम्यक् पात्रेऽभियोजक इति ।

मरीचिः—

नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे।
तत्र श्राद्धं न कुर्व्वीत गृही पुत्रधनक्षयात्॥

प्रतिपत्षष्ठ्येकादशी नन्दा। 'भार्गवदिनं' शुक्रवारः। कृत्तिका-पुनर्व्वसूत्तराफाल्गुनी—विशाखोत्तराषाढा-पूर्व्वभाद्रपदाख्यानि नक्षत्राणि 'त्रिपुष्कराणि'। श्राद्धशब्देनात्र प्रेतक्रिया विवक्षिता। नन्दादिष्वेव मध्ये दुष्टतमान्याह स एव।

एकादश्यान्तु नन्दायां सिनीवाल्यां भृगोर्दिने।
नभस्यस्य चतुर्दश्यां कृत्तिकासु त्रिपुष्करे॥

अत्र श्राद्धं न कुर्व्वीतेत्यनुषङ्गः। सिनीवाल्यां भृगोर्दिन इति सम्बन्धः।

महाभारते:—

नक्षत्रेण न कुर्व्वीत यस्मिन् जातो भवेन्नरः।
न प्रौष्ठपदयोः कार्य्यं तथाग्नेये च भारत।
दारुणेषु च सर्व्वेषु प्रत्यरे च विवर्जयेत्॥

जन्मनक्षत्रमत्र श्राद्धकर्त्तुः। 'प्रौष्ठपदयोः' भाद्रपदाद्वये। 'आग्नेयं' कृत्तिका। 'दारुणानि' आर्द्रा-श्लेषा-ज्येष्ठा-मूलानि। जन्मनक्षत्रात्पञ्चमं चतुर्दशं त्रयोविंशञ्च 'प्रत्यरम्'।

ज्योतिः पराशरः —

साधारणध्रुवोग्रमैत्रेषु न शस्यते मनुष्याणां प्रेतक्रिया कथञ्चित्।

पुष्करे यमलाधिष्ठे च।

'साधारणे' कृत्तिकाविशाखे। 'ध्रुवाणि' उत्तरात्रयं रोहिण्यश्च। 'उग्राणि' पूर्व्वात्रयं भरणी मघा च। 'मैत्राणि' मृग-चित्रानुराध-रेवत्यः। त्रिपुष्कराण्युक्तानि। 'यमलाधिष्ठं' धनिष्ठा। मृग-चित्रयोर्मैत्रेषु उक्तत्वात्।

वाराहपुराणे—

चतुर्थाष्टमगे चन्द्रे द्वादशे च विवर्जयेत्।
प्रेतकृत्यं व्यतीपाते वैधृते परिघे तथा॥
करणे विष्टिसंज्ञे च शनैश्चरदिनेषु च।
त्रयोदश्यां विशेषेण जन्मतारात्रये तथा॥

उत्पत्तिनक्षत्रं दशमेकोनविंशञ्चेति जन्मतारात्रयम्।

आह काश्यपः:—

भरण्यार्द्रा मघाश्लेषा मूलं त्रिचरणानि च।
प्रेतकृत्येऽतिदुष्टानि धनिष्ठाद्यञ्च पञ्चकम्॥

फाल्गुनीद्वितयं रोहिण्यनुराधा पुनर्व्वसुः।
द्वे आषाढे विशाखा च भानि द्विचरणानि च।
एतानि किञ्चिद्दुष्टानि वर्जयेत् सति सम्भवे॥

तदेवमेषु प्रेतकृत्यमात्रस्य प्रतिषेधे प्राप्ते कचिदपवादमाह—

गोभिलः—

नन्दायां शुक्रवारे च चतुर्दश्यां त्रिजन्मसु।
एकादशप्रभृतिषु नैकोद्दिष्टं निषिध्यते॥

'त्रिजन्मानि' जन्मतारात्रयम्।

वैजवापः—

प्रेतस्य साक्षाद्दग्धस्य प्राप्ते त्वेकादशेऽहनि।
नक्षत्रतिथिवारादि शोधनीयं न किञ्चन॥
युगमन्वादिसंक्रान्तिदर्शे प्रेतक्रिया यदि।
दैवादापतिता तत्र न नक्षत्रादिशोधनम्॥

इति प्रेतक्रियासु निषिद्धकालाः।

अथ पिण्डदाने निषिद्धकालः।

तत्राह पुलस्त्य :—

अयनद्वितये श्राद्धं विषुवद्द्वितये तथा।
युगादिषु च सर्व्वासु पिण्डनिर्व्वपणादृते॥इति॥

एतेषु कालेषु श्राद्धं 'पिण्डनिर्व्वपणादृते' पिण्डदानं विना कर्त्तव्यमिति।

मत्स्यपुराणे—

वैशाखस्य तृतीयायां नवम्यां कार्त्तिकस्य च।
श्राद्धं कार्य्यन्तु शुक्लायां सङ्क्रान्तिविधिना नरैः॥

अत्र सङ्क्रान्तिष्वित्यनेनैवायनादीनामपि लाभे पुनस्तदभिधानं तत्कालकृतस्य पिण्डदानस्यातिनिन्दितत्वद्योतनार्थम्।

सङ्क्रान्तिविधिनेत्यनेन पिण्डदानराहित्यमुक्तम्। वैशाखस्य तृतीयाया-मित्यादिकं सर्व्वयुगाद्युपलक्षणम्। युगादिषु च सर्व्वास्विति पुलस्त्यवचनात्।

ब्रह्मपुराणे—

अयनद्वितये श्राद्धं विषुवद्द्वितये तथा।
सङ्क्रान्तिषु च कर्त्तव्यं पिण्डनिर्व्वपणादृते॥
वैशाखस्य तृतीयायां नवम्यां कार्त्तिकस्य तु।
श्राद्धं कार्य्यन्तु शुक्लायां सङ्क्रान्तिविधिना नरैः॥
त्रयोदश्यां भाद्रपदे माघे चन्द्रक्षयेऽहनि।
श्राद्धं कार्य्यं पायसेन दक्षिणायनवच्च तत्॥
यदा च श्रोत्रियोऽभ्येति गेहं वेदविदग्निवित्।
तेनैकेन तु कर्त्तव्यं श्राद्धं विषुवदुत्तमम्॥

'विषुवतो विषुवच्छ्राद्धात् उत्तमं' श्रेष्ठम्। श्रोत्रियागमननिमित्तकमपि श्राद्धं प्रायः पाठादपिण्डमेव भवितुमर्हति।

वृद्धपराशरः—

युगादिषु मघायाञ्च विषुवत्ययने तथा।
भरणीषु च कुर्व्वीत पिण्डनिर्व्वपणं न हि॥

मघायुक्तां भाद्रपदापरपक्षत्रयोदशीमधिकृत्य—

देवीपुराणे :—

तत्रापि महती पूजा कर्त्तव्या पितृदैवते।
ऋक्षे पिण्डप्रदानन्तु ज्येष्ठपुत्री विवर्जयेत्॥

'तत्रापि' भाद्रपदापरपक्षत्रयोदश्यामपि, 'पितृदैवते ऋक्षे' मघानक्षत्रे जाते सति, 'महती' श्राद्धलक्षणा पूजा कर्त्तव्या। स तु कर्त्ता 'ज्येष्ठपुत्रवान्' जीवत्प्रथमपुत्रश्चेद्भवेत् तर्हि तत्र श्राद्धं कुर्व्वन् पिण्डप्रदानं वर्जयेत्। पिण्डरहितं श्राद्धं कुर्य्यादित्यर्थः। ज्येष्ठ-पुत्रीत्यनेन मघाकालिकस्य त्रयोदशीकालिकस्य उभयसमवायकालिकस्य च पिण्डदानस्य ज्येष्ठपुत्रविनाशकत्वलक्षणो दोषः सूचितः।

तथा च महाभारते—

सङ्क्रान्तावुपवासेन[१] पारणेन च भारत।
मघायां पिण्डदानेन ज्येष्ठः पुत्रो विनश्यति॥इति॥

ज्योतिः पाराशरः—

विवाहे विहिते मासांस्त्यजेयुर्द्वादशैव हि।
सपिण्डाः पिण्डनिर्व्वापं मौञ्जीबन्धे षडेव हि॥

अस्यापवादः—

महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि।
यस्यकस्यापि मर्त्यस्य सपिण्डीकरणे तथा॥
कृतोद्वाहोऽपि कुर्व्वीत पिण्डनिर्व्वपणं सदा[२]॥इति॥

वृद्धशातातपः—

पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते॥
अक्षय्य-दक्षिणा-स्वस्ति-सौमनस्यं यथास्थितम्।

इति पिण्डदाने निषिद्धकालाः॥

अत्रेदं विचार्य्यते।

सपिण्डीकरणोत्तरकालिकानि मृताहापरपक्षामावास्याष्टका-व्यतीपात सङ्क्रा-

---

१. संक्रान्तावुपरागेणेति। २. सुत इति।

न्युपराग-युगमनुकल्पादि-गजच्छायादियुक्तानि श्राद्धानि प्रतिकालं भिद्यन्ते न वेति। तदर्थमिदं विचार्य्यते।

किं कालयुक्तानि वाक्यानि कर्म्मोत्पत्तिविधय उतोत्पन्ने कर्म्मणि कालस्य विधय इति।

तत्र यद्यपि गुणविधाने भावार्थे विधिः वाक्यार्थविधिश्चापाद्यते तथापि विशेषणे विधिशक्तिसंक्रमात् लाघवाच्च गुणविधय एवेति न कर्म्मभेदमापादयन्ति।

अतः कर्म्मैक्याद् युगपद्भाविष्वपि वैकल्पिकेषु क्वचिदेकस्मिन् कालेऽनुष्ठानं न सर्व्वस्मिन्। कुतस्तु युगपद्भाविषु पृथगनुष्ठानमिति कालसमवाये सकृदेकमेव श्राद्धं कर्त्तव्यमिति। नहि कस्यचित् कालरूपगुणानुरोधेन प्रधानावृत्तिः सम्मता। या तु सायंप्रातरादिकालानुरोधेन होमावृत्तिः सा तत्कालावच्छिन्नजीवनरूपनिमित्तावृत्त्येति।

अत्रोच्यते।

यत्र शुद्धोत्पत्तिः सन्निधावस्ति तत्र गुणयुक्तेषु वाक्येषु तत्प्रत्यभिज्ञानाद्गुणमात्रविधिर्भवति।

अत्र तु शुद्धोत्पत्त्यभावादगत्या विशिष्टविधौ गौरवाद्यदोषः। शुद्धोत्पत्तिकल्पनायान्तु सर्व्वत्र विशिष्टविधिलोपेन क्वचिद् गुणाद्भेदः स्यात्। अतो विशिष्टविधित्वात् प्रतिकालं श्राद्धभेदः। निमित्तत्त्वाच्चोपरागादीनान्तद्भेदे स्पष्टो भेदः। अतस्तत्कालागमने तत्तच्छ्राद्धमनुष्ठेयमिति स्थितम्।

अथेदानीं कालसमवाये निमित्तसमवाये च सन्दिह्यते। किं तदा तत्तत्कालिकानां तत्तन्निमित्तकानां श्राद्धानां मध्ये किञ्चिदेकमेवानुष्ठेयमुत सर्वाणि पृथक् पृथक्। अथ तन्त्रेणेति। तत्रैकदिनेऽनेक श्राद्धनिषेधात् किञ्चिदेकमेवेतिप्राप्त उच्यते।

> एककाले गतासूनां बहूनामथवा द्वयोः।
> तन्त्रेण श्रपणं कृत्वा कुर्य्याच्छ्राद्धं पृथक् पृथक्॥
> पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः।
> तृतीयस्य ततः कुर्य्यात् सन्निपातेष्वयं क्रमः॥

इति भृगुणा समानेऽप्यहनि नानानिमित्तानामनेकेषां[१] श्राद्धानामनुष्ठानस्योक्तत्वात् "द्वादशाहः प्रशस्यते" इत्यादौ नानानिमित्तकानां प्रेतश्राद्धानामेकस्मिन्नेवाहन्यनुष्ठानस्य व्युत्पादितत्वात् "नैकः श्राद्धद्वयं कुर्य्यात् समानेऽहनि कुत्रचित्" इति अस्य निषेधस्य श्रद्धाजडारभ्यमाणैकनिमित्तश्राद्धवृद्धिविषयत्वे स्थिते सर्व्वाण्यपि पृथगनुष्ठेयानीति पक्षो गृह्यते।

यत्तु देशकालकर्त्रैक्याद्विशेषग्रहणाभावेनाग्नेयादियागाङ्गानां प्रयाजादीनां तन्त्रमनुष्ठानमुक्तं, तदेकप्रयोगविधिगृहीतेष्वङ्गेष्वेवोचितं न तु स्वतन्त्रेषु प्रधानेष्वपि।

---

१. भिन्ननिमित्तानामनेकेषामिति।

यस्तु काम्यापूर्व्वार्थमनुष्ठितयोर्दर्शपूर्णमासयोर्नित्यापूर्वप्रसङ्ग उक्तः सोऽपि कर्म्मैक्ये वक्तुमुचितः।

यावेव ह्याग्नेयादिसमुदायौ काम्यापूर्वार्थौ तावेव नित्यापूर्वार्थौ उत्पत्तिवाक्यैक्यादवगमात्।

यस्तु तत्र भेदव्यवहारः स कामरूप-निमित्तरूपोपाधिसम्बन्धनिबन्धनप्रतीतिकालव्यवस्थाभेदाश्रयो न वस्तुभेदाश्रयः। अपूर्वभेदस्तु वास्तवोऽधिकारभेदात्।

अतश्चायमौपाधिकोऽप्यपूर्व्वभेदानुनिष्पादीति कृत्वा भेदलक्षणो विचारितः। ननु तत्तत्प्रकृत्यर्थरूपोपाधिभेदोपरागप्रतीतिभेदनिबन्धनो वास्तवोऽपि यागदानहोमभावनानां भेदः प्रतिपादितः। सत्यम्। किन्तु प्रकृत्यर्थोपरागप्रत्यायितोभेदस्तत्र बाधकाभावाद्वास्तवोऽङ्गीकृतः। प्रकृतेतूत्पत्तिशास्त्रैकत्वापादितकर्म्मैक्यप्रतिरूपबाधकसद्भावादवास्तवः।

अतोऽत्र कर्म्मैक्यात्काम्यापूर्वार्थमनुष्ठिताभ्यामेव दर्शपूर्णमासाभ्यां नित्यानुष्ठानसिद्धौ न पृथक् अनुष्ठानं क्रियते।

भिन्ने तु कर्म्मण्यन्यापूर्वस्यान्येनासिद्धेस्तदर्थमन्यस्याप्यनुष्ठानमिति। अस्तु-वाऽत्र कश्चिद्वास्तवोऽपि सूक्ष्मः कर्म्मभेद। स तु भेदान्तरेभ्यो विलक्षणः। न-स्वसामान्याभ्यगतं किमप्यन्यत्रार्थयितुमर्हतीति।

अत्रोच्यते—

कर्म्मभेदेऽपि देशकालकर्त्राद्येकत्वे सकृदनुष्ठानेन सर्वकर्म्मसिद्धिर्युगपदेव सर्वापूर्वनिष्पत्तिर्जायते। न गृह्यते हि तदा विशेषः, इदं निष्पन्नं नेदमिति। अभ्युपगतञ्च यागभेदेऽपि देवतैक्ये तन्त्रमनुष्ठानम्।

सान्नाय्ये स्वप्ननदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषुचैवमित्यत्र युगपदनेकामेध्यदर्शनरूपनिमित्तसमवाये प्रतिनिमित्तं आरब्धं मनो दरिद्रं चक्षुरित्येतन्मन्त्रजपरूपनैमित्तिकावृत्तौ प्राप्तायां विशेषग्रहणाभावात् सकृन्नैमित्तिकानुष्ठानमितिचैकदेशे स्थितम्।

अतः श्राद्धनिमित्तसमवाये कालसमवाये च देशैक्ये च कर्त्रैक्ये देवतैक्ये च विशेषग्रहणाभावात्तन्त्रेण सर्व्वश्राद्धानुष्ठानं कर्त्तव्यमिति। एवञ्च सति संक्रान्तिनिमित्तकममावास्यानिमित्तकं व्यतीपातनिमित्तकान्येतानि तन्त्रेण करिष्य इति सङ्कल्पं कुर्य्यात्।

इति कालसमवायनिर्णयः।

इति श्रीमहाराजाधिराज श्री महादेवीयसमस्तकरणाधीश्वरसकलविद्याविशारद सकलश्रीकरणाधिपति पण्डित श्री हेमाद्रिविरचिते चतुर्व्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे श्राद्धकालनिरूपणं नाम पञ्चमोऽध्यायः समाप्तः ॥ ॥

अथ षष्ठोऽध्यायः

ब्राह्मणनिरूपणप्रकरणम् ।

यत्सारस्वतनिर्झरव्यतिकरप्रारब्धपूरोर्म्मिषु ।
श्लाघ्यन्ते घनमीनकच्छपकुलस्पर्द्धानिबद्धादराः ॥
आम्नाय-स्मृति-नीति-शास्त्रनिकराः सोऽयं विधत्तेऽधुना ।
श्राद्धे योग्य-तदन्यविप्रकथनं हेमाद्रिमन्त्रीश्वरः ॥

अथ ब्राह्मणा निरूप्यन्ते ।

अत्र देशकालानन्तरं श्राद्धप्रयोगे निरूपणीये हविः प्रक्षेपाधिकरणभूताहवनीयस्थानीयानां प्रथमसम्पाद्यत्वात् द्रव्यादिभ्यः पूर्व्वं निरूपणं क्रियते । तत्र चतुर्भिरपि वर्णैः क्रियमाणेषु श्राद्धेषु ब्राह्मणानामेवामन्त्रणीयत्वेन विहितत्वात् त एव नियोज्याः ।

तत्र ब्राह्मणप्रशंसा ।

तत्र तैत्तिरीयश्रुतिः —

यावतीर्वै देवतास्ताः सर्व्वा वेदविदि ब्राह्मणे वसन्ति ।

तस्माद् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्य्यान्नाश्लीलं कीर्त्तयेत् ।

एता एव देवता एव प्रीणातीति ।

नमस्कारोऽत्र पूजोपलक्षणार्थः ।

शतपथश्रुतिरपि —

द्वया वै देवाः । देवा अहैव देवा अथ ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते-मनुष्यदेवास्तेषां द्वेधा विभक्त एव यज्ञ आहुतय एव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानां शुश्रुवुषामनूचानानामेवाहुतिभिरेव देवान् प्रीणाति दक्षिणाभिर्मनुष्यदेवान् ब्राह्मणांच्छुश्रुवुषोऽनूचानांस्त एनमुभये देवाः प्रीताः सुधायां दधातीति[१] ।

भविष्यत्पुराणे—

ब्राह्मणा दैवतं भूमौ ब्राह्मणा दिवि दैवतम् ।
ब्राह्मणेभ्यः परं नास्ति भूतं किञ्चिज्जगत्रये ॥
अदैवं दैवतं कुर्य्युः कुर्य्युर्दैवमदैवतम् ।
ब्राह्मणा हि महाभागाः पूज्यन्ते सततं द्विजाः ॥
ब्राह्मणेभ्यः समुत्पन्ना देवाः पूर्व्वमिति श्रुतिः ।
ब्राह्मणेभ्यो जगत्सर्व्वं तस्मात् पूज्यतमा द्विजाः ॥

---

१. शतपथब्राह्मणे—काण्ड २, प्रपा० १, अ० २ सू० ९ ।

एषामश्नन्ति[१] वक्त्रेण देवताः पितरस्तथा ।
ऋषयश्च तथा नागा किम्भूतमधिकं ततः ॥

याज्ञवल्क्यः—

तपस्तप्त्वा सृजद् ब्रह्मा ब्राह्मणान् वेदगुप्तये ।
तृप्त्यर्थं पितृदेवानां धर्म्मसंरक्षणाय च ॥

मत्स्यपुराणे—

नास्ति विप्रसमो देवो नास्ति विप्रसमो गुरुः ।
नास्ति विप्रात्परः शत्रुर्नास्ति विप्रात्परो विधिः ॥

विष्णुधर्म्मोत्तरे भगवद्वाक्यम्—

ब्राह्मणैः पूजितैर्नित्यं पूजितोऽहं न संशयः ।
निर्भर्त्सितैश्च निर्भर्त्स्यस्तैरहं सर्व्वकर्म्मसु ॥
विप्राः परागतिर्मह्यं यस्तान् पूजयते नृप ।
तमहं स्वेन रूपेण प्रपश्यामि युधिष्ठिर ॥

स्कन्दपुराणे देवीं प्रति ईश्वरवचनम्—

श्रुतीनामाकरा ह्येते रत्नानामिव सागराः ।
विप्रा विप्राधिपमुखि पूजनीयाः प्रयत्नतः ॥

"विप्राधिपमुखि" चन्द्रमुखीति देव्याः सम्बोधनम् ।

यत्र वेदविदो विप्रा न प्राश्नन्त्युत्तमं हविः ।
न तत्र देवा देवेशि हविरश्नन्ति[१] कर्हिचित् ॥
अपि नारायणोऽनन्तो ब्रह्मा स्कन्दोऽनलः शिखी ।
तत्कर्म्म नाभिनन्दन्ति यत्र विप्रा न पूजिताः ॥
येषां प्रसादात् सुलभमायुर्धर्म्मः सुखं धनम् ।
श्रीर्यशः स्वर्गवासश्च तान् विप्रानर्चयेद्बुधः ॥

॥ इति ब्राह्मणप्रशंसा ॥

अथ ब्राह्मणलक्षणम् ।

अत्राहुराचार्य्याः । ब्राह्मणत्वजात्याश्रयो ब्राह्मण इति ।

अत्र यद्यप्युपदेशानपेक्षाक्षिसन्निपातमात्रानुभवनीय—क्षत्रियवैश्यादिव्यावृत्त-ब्राह्मणत्वाभिमत-व्यक्तिमात्रानुवृत्त-द्रव्यगुणकर्म्मसंस्थानादिकृतवैलक्षण्याभावान्मनुष्यत्वावान्तरसामान्याभिव्यञ्जक-स्थूलतरकारणासम्भवः, तथापि विशुद्धमातापितृसन्ततिजत्वोपदेशसापेक्ष - बुद्धिविशेषसमुद्भासित - सूक्ष्मतरसौशील्याद्यात्मक-ब्राह्मणत्वाभिव्यञ्जकसम्भवः परीक्षकापरीक्षकसाक्षिकोऽस्त्येव । अभ्युपगतश्च रत्नादावुपदेशसापेक्षोऽपि सामान्याभिव्यञ्जकावभासः सर्व्वैः ।

---

१. येषामश्नन्तीति ।

ननु विशुद्धमातापितृसन्ततिजत्वं नाम ब्राह्मणजातीयमातापितृजत्वमेव तथा चोपदेशे ज्ञप्तिप्रतिबन्धकमन्योन्याश्रयत्वमापद्यते—उपदेशार्थज्ञानाधीनं ब्राह्मणत्वज्ञानं ब्राह्मणत्वज्ञानाधीनमुपदेशार्थज्ञानमिति। मैवम्।

अयमत्रोपदेशार्थः। ब्राह्मणत्वसामान्यवान् ब्राह्मणः।

ब्राह्मणत्वव्यवस्थापकन्तु तज्जन्यत्वमिति।

ननु तर्हि यत्र ब्राह्मणैकजन्यत्वं व्यवतिष्ठत इत्येवंविधे व्यवस्थापकोपदेशे व्यवस्थापकधर्म्मगर्भीकृतस्य ब्राह्मणत्वस्य व्यवस्थाज्ञानाभावात्तथाभूतस्य व्यवस्थाज्ञानसाधनत्वासम्भवादन्योन्यात्माश्रयानवस्थाद्यापातः। मैवम्।

अस्तु नाम व्यवस्थाज्ञापकत्वेऽन्योन्याश्रयादिकं, कारकहेतुत्वे तु न तस्य प्रसङ्गः। सत्तामात्रेण कारकत्वात्। कारकस्यचायमुपदेशः, न ज्ञापकस्य।

तदेवं व्यवस्थाकारकोपदेशानन्तरं ब्राह्मणत्वाभिव्यञ्जकपूर्व्वोक्तधर्म्मविशेषावभासकृतो ब्राह्मणत्वसामान्यावगमोऽस्त्येव। नन्वेवं सतीदृग्विधोपदेशश्रवणवतो नरस्यादृष्टचरमविज्ञातकुलनामानमुपलक्षिताचारवेषविशेषं ब्राह्मणपुरुषमुपलभ्याक्षिसन्निपातमात्रेण निर्व्विचिकित्सा ब्राह्मणत्वबुद्धिरुत्पद्येत। तथा च प्रश्नपरीक्षे न स्याताम्।

अथ ब्राह्मणत्वव्यवस्थापकस्य विशुद्धमातापितृसन्ततिजत्वलक्षणस्योपाधेः तद्व्यक्तिनिष्ठतयाऽनवगमात्तद्गत सामान्यानभिव्यक्तिः, तर्हि व्यवस्थापकस्योपाधेः ज्ञापकत्वापाते सति इतरेतराश्रयादिकमापतितमेव। मैवम्।

उपदेशदशातिक्रान्तमिदं लिङ्गत्वेन कारकस्य ज्ञापकत्वमदुष्टमेव।

अथोच्यते।

"अनादाविह संसारे दुर्व्वारे मकरध्वजे।
कुले च कामिनीमूले का जातिपरिकल्पना" ॥इति॥

तन्न। प्रतिकुलं कुलाभिमानिभिः पुरुषैस्तादृग्विधाभिः स्त्रीभिश्च रक्ष्यमाणानि कुलान्युपप्लुतान्येवानुवर्त्तमानानि दृश्यन्ते। प्रपञ्चितश्चायमर्थस्तेषु तेषु शास्त्रेष्वित्युपरम्यते।

न च यजन-याजनाध्ययनाध्यापन-दान-प्रतिग्रहाचारसम्पदहिंसा-सत्य-शौचादिसम्पन्नत्वं ब्राह्मणलक्षणम्। अस्य हि याजनाध्यापनप्रतिग्रहादीनामन्यतमवैकल्येऽपि-अध्ययनयजनदानादिमात्रसद्भावे ब्राह्मणजातीये ब्राह्मणव्यवहारस्यानुपप्लवान्न समुच्चितस्य लक्षणत्वम्। न चासमुच्चितस्य, क्षत्रियादिषु सत्त्वात्। न च याजनाध्यापनप्रतिग्रहसमुच्चयस्य ब्राह्मणलक्षणत्वम्। प्रतिग्रहवर्जनव्रतवतोऽप्रतिषिद्धव्रते ब्राह्मणत्वं न स्यात्। एतत्त्रयवतः क्षत्रियत्वेनाभिमतस्य च ब्राह्मणत्वं स्यात्।

किञ्च वृत्त्यर्थं ब्राह्मणः प्रतिगृह्णीयाद्याजयेदध्यापयेद्वेति ब्राह्मणस्य सतः प्रतिग्रहादयो विहिताः। पश्चाद्भाविनो न पूर्व्वसिद्धब्राह्मणसंज्ञाप्रवृत्तिनिमित्तं भवितुमर्हन्ति, यूपवदिति चेन्न। अनन्यगतिन्यायलभ्यानामर्थानामन्यगतिमदर्थविषयत्वाभावात्।

यत्तु-वह्निपुराणे वृत्तान्येव ब्राह्मणलक्षणमित्युक्तम्।

न जातिर्न कुलं राजन् न स्वाध्यायः श्रुतं न वा।
कारणानि द्विजत्वस्य वृत्तमेव हि कारणम्॥
किं कुलं वृत्तहीनस्य करिष्यति दुरात्मनः।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु॥
नैकमेकान्ततो ग्राह्यं पावनं हि विशाम्पते।
वृत्तमन्विष्यतां तात रक्षोभिः किं न पद्यते॥
बहुना किमधीतेन नटस्येव दुरात्मनः।
तेनाधीतं श्रुतं वापि यः क्रियामनुतिष्ठति॥
कपालस्थं यथा तोयश्वन्दने च यथा पयः।
दूष्यं स्यात् स्थानदोषेण वृत्तहीनं तथा श्रुतम्॥
चतुर्व्वेदोऽपि दुर्वृत्तः शूद्रादल्पतरः स्मृतः।
तस्माद्विद्धि महाराज वृत्तं ब्राह्मणलक्षणम्॥
सत्यं दमस्तपोदानमहिंसेन्द्रियनिग्रहः।
दृश्यन्ते यत्र राजेन्द्र स ब्राह्मण इति स्मृतः॥

यच्च ब्रह्माण्डपुराणे उक्तम्—

जातकर्म्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः।
वेदाध्ययनसम्पन्नः षट्सु कर्म्मस्ववस्थितः॥
सत्यवाक् विघसाशी तु शीलवांश्च गुरुप्रियः[1]।
सत्यव्रती सत्यपरः स वै ब्राह्मण उच्यते॥
तपःश्रुते च योनिश्चाप्येतत् ब्राह्मणकारणम्।
सत्यं दानं तपो होम आनृशंस्यं क्षमा नृणाम्॥
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः।

षट्सु कर्म्मसु-यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहेषु। विघसाशी अवश्य-भोजनीयातिथिप्रभृतिभुक्तावशिष्टभोजी।

तथा च व्यासः—

देवेभ्यश्च पितृभ्यश्च भृत्येभ्योऽतिथिभिः सह।
दत्वा शिष्टन्तु यो भुंक्ते तमाहुर्विघसाशिनम्॥इति॥

यच्च यम-शातातपाभ्यामुक्तम्—

तपो धर्म्मो दया दानं सत्यं ज्ञानं श्रुतिर्घृणा।
विद्याविनयमस्तेयमेतद् ब्राह्मणलक्षणम्॥

---

[1]. शौचाचारे स्थितः सम्यक् विघसाशी गुरुप्रिय इति।

यच्च वशिष्ठेनोक्तम् ।

योगस्तपो दया दानं सत्यं शौचं श्रुतं घृणा ।
विद्या विज्ञानमास्तिक्यमेतद् ब्राह्मणलक्षणम् ॥
यन्न सन्तं न वा सन्तं नाश्रुतं न बहुश्रुतम् ।
न सुव्रतं न दुर्वृत्तं वेद कश्चित् स ब्राह्मणः ॥

यच्च-यमेनोक्तम् —

अहिंसानिरतो नित्यं जुह्वानो जातवेदसम् ।
स्वदारनिरतो दाता स वै ब्राह्मण उच्यते ॥
श्रुतं प्रज्ञानुगं यस्य प्रज्ञाचैव[1] श्रुतानुगा ।
असम्भिन्नार्य्यमर्य्यादः स वै ब्राह्मण उच्यते ॥
आशिषोर्थार्थं[2] पूजाञ्च प्रसङ्गांस्तु करोति यः ।
निवृत्तो लोभमोहाभ्यां तं देवा ब्राह्मणं विदुः ॥

आशिषः-आशीर्व्वादान् । अर्थार्थं धनलाभाय । पूजां-सत्क्रियाम्, देवतापूजां वा । प्रसङ्गाः तास्ताः प्रस्तावनाः, तेषु तेषु विषयेषु आसक्तीर्व्वा ।

सत्यं दानं क्षमा शीलमानृशंस्यं दया घृणा ।
दृश्यन्ते यत्र लोकेऽस्मिन् तं देवा ब्राह्मणं विदुः ॥

घृणा-कुत्सितविषये विवादः । तदेतत् सर्व्वं न ब्राह्मणत्वजातिनिराकरणेन शीलवृत्तादेरेव ब्राह्मणशब्दप्रवृत्तिनिमित्तत्वप्रतिपादनपरम्, किन्तु हव्यकव्यभोक्तृत्वार्ह-तापादकब्राह्मणगतप्राशस्त्यप्रतिपादनपरम् । अपशवोऽन्ये गोऽश्वेभ्यः, पशवो गो अश्वाः इत्येतद्यथा गोऽश्वेभ्यः प्राशस्त्यप्रतिपादनपरम् ।

अतएवाह बौधायनः—

विद्या तपश्च योनिश्च एतद् ब्राह्मणलक्षणम् ।
विद्यातपोभ्यां यो हीनो जातिब्राह्मण एव सः ॥

इति विद्यादियुक्तत्वं हव्यकव्यार्हप्रशस्तब्राह्मणलक्षणम् । विद्यादिरहिते तु यद् ब्राह्मणत्वं तद् ब्राह्मणत्वरूपजातियोगमात्रमित्यर्थः । 'जातिब्राह्मण एव' इत्यत्र जात्यैव स ब्राह्मण इत्यन्वयविग्रहौ । अतएव विद्यादियोगो ब्राह्मणानां पात्रत्व एव स्मृतिपुराणेषु हेतुरुक्तो न ब्राह्मणशब्दप्रवृत्ताविति ।

॥ इति ब्राह्मणलक्षणम् ॥

अथ पात्रीभूतब्राह्मणलक्षणम् ।

याज्ञवल्क्यः—

न विद्यया केवलया तपसा वापि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम् ॥

---

१. यस्येति ।

२. आशिषोर्थांश्चेति ।

अङ्ग-स्मृति-पुराण-न्याय-मीमांसा सहिता वेदाः विद्या।

तपोलक्षणमाह देवलः। अथ तपोविधिं व्याख्यास्यामः। तद्यथा—

व्रतोपवास-नियमैः शरीरोत्तापनं तप इति।

व्रतादीन्यपि तेनैव दर्शितानि।

तत्र ब्रह्मचर्य्यं सत्यवचनं मधुमांसवर्जनं मौनमयाचनमृतुकालाभिगमनमित्येव-मादीनि व्रतानि।

अनशनम्-उपवासः। स्वाध्यायशीलत्वं, मातापितृ-गोब्राह्मणशुश्रूषा, पुण्यक्षेत्रा-भिगमनं, तीर्थावगाहनं, शीतोष्णवर्षातपावश्यायानामप्रतीकारः, कण्टक-शर्करा-दर्भ-दारुफलक-वल्वज-सिकता-भूमिशयनं, हेमन्तशिशिरयोरार्द्रपटप्रावरणं, वर्षासु जल-शय्या, ग्रीष्मवसन्तयोः पञ्चाग्निमध्याधिष्ठानेन दिवसावस्थानं, गुड-लवण-गोरस-स्नेह धान्यादीनां स्वादूनामनुपभोजनं, फल-मूल-शाकपुष्पकपिण्याकभोजनमिति नियमाः।

निजवर्णाश्रमविहितधर्म्मानुष्ठानन्तपः।

वृद्धशातातपः—

स्वाध्यायवान् नियमवांस्तपस्वी ज्ञानविच्च यः।
क्षान्तो दान्तः सत्यवादी विप्रः पात्रमिहोच्यते॥

स्वाध्यायः-वेदः, तस्याध्यापनार्थावबोध-व्याख्यानादिभिर्युक्तः 'स्वाध्यायवान्'। 'नियमवान्' यम-नियमसम्पन्नः। ते च—

ब्रह्मचर्य्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता।
अहिंसाऽस्तेयमाधुर्य्ये दमश्चेति यमाः स्मृताः॥
स्नान-मौनोपवासेज्या-स्वाध्यायोपस्थनिग्रहाः।
नियमा गुरुशुश्रूषा-शौचाक्रोधाप्रमादता॥

इति याज्ञवल्क्योक्ता विज्ञेया।

तत्र निषिद्धस्त्रीसङ्गवर्जनं 'ब्रह्मचर्य्यम्'। प्राणिमात्रविपत्प्रतीकारेच्छा 'दया' द्वन्द्वदुःखसहिष्णुता 'क्षान्तिः'। अभिमतदेवानुचिन्तनं 'ध्यानम्'। भूतहिताय यथार्थवचनं 'सत्यम्'। दम्भराहित्यं 'अकल्कता'। अविहितवधवर्जनं 'अहिंसा'। अहार्य्यपरस्वानपहारः 'अस्तेयम्'। परप्रीतिकरवेष-भाषणचेष्टावत्त्वं 'माधुर्य्यम्'। स्वैरवृत्तिनिवृत्तिप्रयोजनकं परिमितग्रासभोजनादिभिरुपायैरिन्द्रियमदापहरणं 'दमः'। नित्यनैमित्तिकंजलनिमज्जनादिरूपं 'स्नानम्'। निषिद्धवाक्प्रवृत्तिवर्जनं 'मौनम्'। नित्यनैमित्तिकमहोरात्रानशनं 'उपवासः'। आवश्यकं देवतामुद्दिश्य स्वकीय-द्रव्यत्यागः 'इज्या'। वेदाध्ययनं 'स्वाध्यायः'। अविहितप्रकारकशुक्रविमोचन-व्यापारवैमुख्यं 'उपस्थनिग्रहः'। गुरोरनुकूलाचरणं 'गुरुशुश्रूषा'। बाह्याभ्यन्त-रमलापहरणं 'शौचम्'। हनन-भर्त्सन-शपनादिक्रूरकर्म्मारम्भनिदानीभूतान्तर्विकार-

विशेषवर्जनं 'अक्रोधः'। विहिते निषिद्धार्थाननुष्ठाने च सावधानत्वं अप्रमादता—इति।

ज्ञानस्यात्मतत्वज्ञानस्य वेदेन लाभात् 'ज्ञानवित्'।

महाभारते—

साङ्गांस्तु चतुरो वेदान् योऽधीते वै द्विजर्षभ।
षड्भ्यो निवृत्तः कर्म्मभ्यस्तं पात्रमृषयो विदुः॥

वशिष्ठः—

किञ्चिद् वेदमयं पात्रं शूद्रान्नं यस्य नोदरे।

शूद्रद्रव्यप्रतिग्रहसम्पादितमन्नं 'शूद्रान्नम्'। साक्षाच्छूद्रान्नस्य वर्जने हि का नामातिपात्रता।

बृहस्पतिः—

ब्रह्मचारी भवेत्पात्रं पात्रं वेदस्य पारगः।
पात्राणामुत्तमं पात्रं शूद्रान्नं यस्य नोदरे॥

व्यासः—

किञ्चिद् वेदमयं पात्रं किञ्चित्पात्रं तपोमयम्।
असङ्कीर्णं तु यत्पात्रं तत्पात्रं परमं स्मृतम्॥

योनिसङ्कर-वृत्तिसङ्कर-पतितादिसंसर्गरहितं 'असङ्कीर्णम्'।

ऋष्यशृङ्गः—

किञ्चिद् वेदमयं पात्रं किञ्चित्पात्रं तपोमयम्।
अतिथिपरं यत्पात्रं तत्पात्रं परमं विदुः॥

अतिथिलक्षणं वक्ष्यते।

भविष्यत्पुराणे—

क्षान्त्यस्पृहा दमः सत्यं दानं शीलं तपः श्रुतम्।
एतदष्टाङ्गमुद्दिष्टं परमं पात्रलक्षणम्॥

शीललक्षणमुपरिष्टाद्वक्ष्यते।

देवलः—

त्रिशुक्लः कृशवृत्तिश्च घृणालुः सकलेन्द्रियः।
विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते॥

त्रीणि-कुल-विद्या-वृत्तानि 'शुक्लानि' विशुद्धानि यस्यासौ 'त्रिशुक्लः'। 'घृणालुः' दयालुः। 'सकलेन्द्रियः' अहीनाधिकाङ्गः। 'योनिदोषैर्विमुक्तः' योनिसङ्करकारणानामकर्त्ता।

वृद्धवशिष्ठोऽप्याह ।

स्वाध्यायाढ्यं योनिमन्तं प्रशान्तं
वैतानज्ञं पापभीरुं बहुज्ञम् ।
स्त्रीषु क्षान्तं धार्म्मिकं गोशरण्यं
व्रतैः क्लान्तं ब्राह्मणं पात्रमाहुः ॥

स्त्रीषु क्षान्तः स्त्रीविषये सहिष्णुरलोलुप इत्यर्थः । गोशरण्यः—गो शुश्रूषापरः । 'व्रतैः क्लान्तः' व्रतानुष्ठानेन संशोषितशरीरेन्द्रियः ।

यमोऽप्याह—

विद्यायुक्तो धर्म्मशीलः प्रशान्तः
क्षान्तो दान्तः सत्यवादी कृतज्ञः ।
वृत्तिग्लानो गोहितो गोशरण्यो
दाता यज्वा ब्राह्मणः पात्ररूपः ॥

'वृत्तिग्लानः' शिलोञ्छादिभिः क्षामशरीरः । 'यज्वा' यागानुष्ठानवान् ।

इति पात्रीभूत ब्राह्मणलक्षणम् ।

अथ पात्रसंज्ञाभिधानप्रसङ्गादुत्तम-मध्यमाधमविभागज्ञानोपयोगिन्यः कुल-शील-वृत्तादियोग-वियोगनिबन्धना अन्या अपि ब्राह्मणानां संज्ञाः कथ्यन्ते ।

तत्राह देवलः—

मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च तपः परः ।
अनूचानस्तथा भ्रूण ऋषिकल्पो ऋषिर्मुनिः ॥
इत्येतेऽष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ ।
तेषान्तपः परः श्रेष्ठो विद्यावृत्तविशेषतः ॥

विद्यावृत्तातिशयकृताद्वैशिष्ट्याद्धेतोरित्यर्थः ।

उद्देशक्रमेणैवैतेषां लक्षणान्याह स एव—

ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत् ।
अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते ॥

'अनुपेतः' उपनयनरहितः ।

एकादशमतिक्रम्य वेदस्याचारवान् द्विजः ।
स ब्राह्मण इति प्रोक्तो निवृत्तः सत्यवान् घृणी ॥

'एकादशातिक्रमः' वेदस्य किञ्चिन्न्यूनस्याध्ययनम् । 'निवृत्तः' शान्तः।

एकां शाखां सकलां वा षड्भिरङ्गैरधीत्य वा ।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित् ॥

यमोऽपि—

ऊँकारपूर्व्विकास्तिस्रः सावित्रीं यश्च विन्दति ।
चरितब्रह्मचर्य्यश्च स वै श्रोत्रिय उच्यते ॥

'ऊँकारपूर्व्विकाः' महाव्याहृतीरिति शेषः ।

ब्रह्मवैवर्त्तेऽपि श्रोत्रियलक्षणमुक्तम्—

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया चापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥

देवलः—

वेदवेदाङ्गतत्वज्ञः शुद्धात्मा पापवर्जितः ।
शिष्टः श्रोत्रियतां प्राप्तः सोऽनूचान इति स्मृतः ॥
अनूचानगुणोपेतो यज्ञस्वाध्याययन्त्रितः ।
भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेन्द्रियः ॥
वैदिकं लौकिकञ्चैव सर्व्वं ज्ञानमवाप्य यः ।
आश्रमस्थो वनी नित्यमृषिकल्प इति स्मृतः ॥

'लौकिकं' अर्थार्जनादिज्ञानम् ।

ऊर्द्ध्वरेतास्तपस्युग्रो नियताशी न संशयम् ।
शापानुग्रहयोः शक्तः सत्यसन्धो भवेदृषिः ॥

सत्या सन्ध्या अभिसन्धिरभिप्रायो यस्य असौ 'सत्यसन्धः' सत्यसङ्कल्प इत्यर्थः ।

निवृत्तः सर्व्वतत्वज्ञः कामक्रोधविवर्जितः ।
ध्यानस्थो निःक्रियो दाता त्रिशुक्लश्च स्मृतो मुनिः ॥

'निवृत्तः' निषिद्ध-काम्यकर्म्मभ्यः । 'निःक्रियः' अर्थार्जनादिक्रियारहितः ।

एवमन्वयविद्याभ्यां वृत्तेन च समुच्छ्रिताः ।
त्रिशुक्ला नाम विप्रेन्द्राः पूज्यन्ते सवनादिषु ॥

सम्बर्त्तः—

उत्पत्तिं प्रलयञ्चैव भूतानामगतिङ्गतिम् ।
वेत्ति विद्यामविद्याञ्च स भवेद्वेदपारगः ॥

महाभारते—

अध्यापयेत्तु यः शिष्यं कृतोपनयनं द्विजः ।
सरहस्यञ्च सकलं वेदं भरतसत्तम ॥
तमाचार्य्यं महाबाहो प्रवदन्ति मनीषिणः ॥

आह बृहस्पतिः—

आचिनोति च शास्त्राणि आचारे स्थापयत्यपि ।
स्वयमाचरते यस्तु तमाचार्य्यं प्रचक्षते ॥

मनुः—

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।
तमपीह गुरुं विद्यात् श्रुतोपक्रियया तया॥
सर्व्वं वा यदि वाप्यर्द्धं पादं वा यदि वाक्षरम्।
सकाशाद्यस्य गृह्णीयान्नियतं तस्य गौरवम्॥इति॥

शिवधर्म्मे —

संस्कृतैः प्राकृतैर्वाक्यैः यः शिष्यमनुरूपतः।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः॥

महाभारते—

एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा गुरुः।
योऽध्यापयेत् स्ववृत्यर्थं[१] उपाध्यायः स उच्यते॥

व्यासः—

अग्न्याधेयं पाकयज्ञमग्निष्टोमादिकं तथा।
यः करोति वृतो नूनमृत्विजं तं प्रचक्षते॥

शिवधर्म्मोत्तरे—

चराचरस्य कर्त्तारमनन्तविभवं विभुम्।
आत्मानमेव यो वेत्ति स चात्मज्ञ इति स्मृतः॥
शिवधर्म्मरताः शान्ताः शिवज्ञानपरायणाः।
शिवधर्म्मप्रवक्तारो विप्राः स्युः शिवयोगिनः॥

मनुः—

सान्तानिकं यक्ष्यमाणमध्वगं सार्व्ववेदसम्।
गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनम्॥
नवैतान् स्नातकान् विद्यात् ब्राह्मणान् धर्म्मभिक्षुकान्।

'सान्तानिकः' सन्तानप्रयोजनः विवाहार्थीत्यर्थः। 'अध्वगः' अत्र धर्म्मार्थे प्रचलितः। 'सार्व्वत्रेदसः' सर्व्वस्वदक्षिणयज्ञकृत्। 'उपतापी' व्याधिपीडितः।

आदित्यपुराणे—

अक्रोधनाः धर्म्मपराः शान्ताः शमदमे रताः।
निस्पृहाश्च महाराज ते विप्राः साधवः स्मृताः॥

सौरपुराणे—

गङ्गायमुनयोर्म्मध्ये मध्यदेशः प्रकीर्त्तितः।
तत्रोत्पन्ना द्विजा ये वै साधवस्ते प्रकीर्त्तिताः॥

ब्रह्माण्डपुराणे—

अष्टवर्षा तु या दत्ता श्रुतशीलसमन्विता।
सा गौरी तत्सुतो यस्तु स गौरः परिकीर्त्तितः॥

---

[१] योऽध्यापयति वृत्यर्थमिति।

हारीतः—

काण्डमेषाङ्गुलव्याख्या पर्व्वाण्याहुर्युगानि तु।
यस्तु तन्मापयेत् रक्षेत् स कुलीन इति श्रुतिः॥

देवलः—

धर्म्माधर्म्मविभागज्ञो निविष्टो वेदशासने।
क्रिया लज्जाक्षमाधीमानार्य्यो म्लेच्छो विपर्य्यये॥

यमः—

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥
न पाणिपादचपलो न नेत्रचपलो द्विजः।
न च वाक्चपलश्चैव इति शिष्टस्य लक्षणम्॥

॥ इति प्रशस्तब्राह्मणसंज्ञाः॥

अथाब्राह्मणाः।

आह शातातपः—

अब्राह्मणास्तु षट् प्रोक्ता ऋषिः शातातपोऽब्रवीत्।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः[१]।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनागतान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥

व्यासः—

ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः।
जातिमात्रोपजीवी च भवेदब्राह्मणस्तु सः॥

मनुः—

नानृग् ब्राह्मणो भवति न वणिक् न कुशीलवः।
न शूद्रवेषणं कुर्वन्न स्तेनो न चिकित्सकः॥

'अनृक्' ऋग्वर्जितः वेदशून्य इत्यर्थः। 'कुशीलवः' गीतनृत्यवृत्तिः।

देवलः—

कूपमात्रोदकग्रामे विप्रः संवत्सरं वसन्।
शौचाचारपरिभ्रंशाद् ब्राह्मण्याद्धि प्रमुच्यते॥

अथ दुर्ब्राह्मणाः।

अत्राह हारीतः—

पक्षिमीनमृगघ्ना ये सर्पकच्छपघातिनः।
नानाजन्तुबधासक्ताः प्रोक्ता दुर्ब्राह्मणा हि ते॥

---

१. ग्रामयाचक इति।

तथा—

अथ वेदश्च वेदी च त्रियुगं यस्य सीदति।
स वै दुर्ब्राह्मणः प्रोक्तो ब्रह्मवादिषु गर्हितः॥

'वेदः' वेदाध्ययनम्। 'वेदी' वेदसाधनका दर्शपूर्णमासादयो यागाः। 'त्रियुगं' प्रपितामहप्रभृतिपितृपर्य्यन्तं मिथुनत्रयं यावत्, 'सीदति' अवसीदति उच्छिद्यत इत्यर्थः।

आह यमः—

यस्य वेदश्च वेदी च विच्छिद्येते त्रिपौरुषम्।
स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः॥

अथ वृषलीपतिप्रभृतयः।

अत्र वृषलीपतिशब्देन शूद्रापतिरेव योगसामर्थ्याल्लभ्यते। तस्य च निन्दा त्रयोदशविधपुत्रप्रकरणे विस्तरेण विवृता।

पारिभाषिकन्तु वृषलीपतिमाहोशनाः।

बन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा।
अपरा वृषली ज्ञेया कुमारी या रजस्वला॥
यस्त्वेतामुद्वहेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः।
अश्रद्धेयमपाङ्क्तेयं तं विद्याद् वृषलीपतिम्॥

चमत्कारखण्डे—

वृषो हि भगवान् धर्म्मस्तस्य यः कुरुतेत्वलम्।
वृषलं तं विदुर्देवाः सर्व्वधर्म्मबहिष्कृतम्॥

तथैव स्त्री वृषली तत्पतिः वृषलीपतिः। 'अलं' वारणं यः कुरुते सः 'वृषलः' धर्म्मोपघातीत्यर्थः।

प्रभासखण्डे—

वृषलीत्युच्यते शूद्री तस्या यश्च पतिर्भवेत्।
लालोच्छिष्टस्य संयोगात् पतितो वृषलीपतिः॥
स्वं वृषन्तु परित्यज्य परेण तु वृषायते।
वृषली सा तु विज्ञेया न शूद्री वृषली भवेत्॥
चाण्डाली बन्धकी वेश्या रजस्था या च कन्यका।
ऊढ़ा या च स्वगोत्रा स्यात् वृषल्यः संप्रकीर्त्तिताः॥
पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता[१]।
पतन्ति पितरस्तस्याः सा कन्या वृषली भवेत्॥
यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः।
अश्रद्धेयमपाङ्क्तेयं तं विद्याद् वृषलीपतिम्॥

१. रजः प्राप्नोत्यसंस्कृतेति।

परदाराभिगो मोहात् पुरुषोऽज्ञान उच्यते।
स एव पतितो ज्ञेयो यः सदा सेवते गृहे॥

यमः—

पुनर्भुवः पतिर्य्यस्तु स भवेद्दिधिषूपतिः।

मनुः—

परपूर्व्वापतिं धीरा वदन्ति दिधिषूपतिम्।
द्विजोऽग्रे दिधिषूश्चैव यस्य सैव कुटुम्बिनी॥

देवलस्तु—

ज्येष्ठस्य भार्य्यां सम्प्राप्तां सकामान्दिधिषूपतिः।
द्विजोऽग्रे दिधिषूश्चैव यस्य सैव कुटुम्बिनी॥

वृद्धमनुः—

भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः।
धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः॥

देवलः—

गूढलिङ्गश्चवकीर्णी स्यात् यश्च भग्नव्रतस्तथा।

'गूढ़लिङ्गी' ब्रह्मचर्य्याश्रमोपदिष्टदण्डादिलिङ्गरहितः। 'भग्नव्रतः' विप्लुत-ब्रह्मचर्य्यः।

यमः—

व्रती यः स्त्रियमभ्येति सोऽवकीर्णी निरुच्यते।

'व्रती' ब्रह्मचारी—

अथ शूद्रतुल्याः।

तत्र देवलः—

अनुपासितसन्ध्या ये नित्यमस्नानभोजनाः।
नष्टशौचाः पतन्त्येते शूद्रतुल्याश्च धर्म्मतः।

वशिष्ठः—

उदक्यान्वासते येषां ये च केचिदनग्नयः।
कुलञ्चाश्रोत्रियं येषां सर्व्वे ते शूद्रधर्म्मिणः॥

'उदक्या' रजस्वला, सा येषां स्नानभोजनदेवपूजादि काले समीपे तिष्ठति।

बौधायनः—

गोरक्षकान् वाणिजिकांस्तथा कारुकुशीलवान्।
विप्रान् वादूर्धुषिकांश्चैव राजन् शूद्रवदाचरेत्॥

'कारवः' वर्द्धक्यादिकर्म्मकरवृत्त्युपजीविनः। 'वादूर्धुषिकाः' वक्ष्यमाणलक्षणाः।

मनुः—

गोरक्षकान् वाणिजिकांस्तथा कारुकुशीलवान्।
विप्रान् प्रैष्यान् हीनवर्णैः राजन्[1] शूद्रवदाचरेत्॥

'प्रैष्यान् हीनवर्णैः' शूद्रादिभिः प्रैष्यान्।

ये व्यपेत्य स्वकर्म्मभ्यः परपिण्डोपजीविनः।
द्विजत्वमभिकाङ्क्षन्ति तांश्च शूद्रवदाचरेत्॥

भविष्यपुराणे—

न यस्य वेदो न जपो न विद्या च विशाम्पते।
स शूद्र इव मन्तव्य इत्याह भगवान् मनुः॥
वैश्वदेवेन ये हीना आतिथ्येन बहिष्कृताः।
सर्व्वे ते वृषला ज्ञेयाः श्रुतवन्तोऽपि हि द्विजाः॥

वैश्वदेवग्रहणं पञ्चयज्ञोपलक्षणार्थम्।

चमत्कारखण्डे—

वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते त्वलम्।
वृषलं तं विदुर्देवाः सर्व्वधर्म्मवहिष्कृतम्॥

आह देवलः—

द्वितीयस्य पितुर्योऽन्नं भुक्त्वा परिणतो द्विजः।
अवरेढ़ इति ज्ञेयः शूद्रधर्म्मा स जातितः॥

'द्वितीयस्य' प्रतिग्रहीतुः। क्रेतुर्वा पितुरन्नादिना यः संवृद्धः सः 'अवरेढ़ः' दत्तकक्रीतकादिरित्यर्थः।

अन्यमप्यवरेढ़माह मनुः।

द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते।
अवरेढ़ इति ज्ञेयः शूद्रधर्म्मा स जातितः॥

—o—

अथ ब्राह्मणब्रुवादयः।

व्यासः—

गर्भाधानादिभिर्युक्तस्तथोपनयनेन च।
न कर्म्मवान्[2] न चाधीते स भवेद् ब्राह्मणब्रुवः॥

सम्बर्त्तः—

अव्रतौ वैश्यराजन्यौ शूद्रश्चाब्राह्मणास्त्रयः।
वेदव्रतविहीनश्च ब्राह्मणो ब्राह्मणब्रुवः॥

---

१. प्रैष्यान् वार्द्धुषिकांश्चैव विप्रानिति। २. कर्म्मकृदिति।

वशिष्ठः--

यश्च काष्ठमयो हस्ती यश्च चर्म्ममयो मृगः।
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः॥
गर्भाधानादिभिर्युक्तस्तथोपनयनादिमान्।
न कर्म्मवान्नवाधीते स भवेद् ब्राह्मणब्रुवः॥

हारीतः—

शूद्रप्रेष्यो भृतो राज्ञा वृषलो ग्रामयाजकः।
वधबन्धोपजीवी च षडेते ब्रह्मबान्धवाः॥

ब्रह्माण्डपुराणे—

आत्मार्थं यः पचेदन्नं न देवातिथिकारणात्।
नार्हत्यसावपि श्राद्धं स चोक्तो ब्रह्मराक्षसः॥

हारीतः--

अपि विद्याकुलैर्युक्ता हीनवृत्ता नराधमाः।
क्षौद्रेषु निरता नित्यं यातुधानाः प्रकीर्त्तिताः॥

विष्णुः—

देशं गोत्रं कुलं विद्यामन्नार्थं यो निवेदयेत्।
वैवस्वतेषु धर्म्मेषु वान्ताशी सः प्रकीर्त्तितः॥
सर्व्वज्ञा वयमित्येवमभिमानरता नराः।
वान्ताशिनः परित्याज्याः श्राद्धे दाने च लम्पटाः॥

अथ कुण्डगोलकादयः।

मनुशातातपौ—

परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ।
पत्यौ जीवति कुण्डस्तु मृते भर्त्तरि गोलकः॥
तौ तु जातौ परक्षेत्रे प्राणिनां प्रेत्य चेह वै।
नियुक्तौ हव्यकव्यानि नाशयेतां प्रदायिनाम्॥

वृहस्पतिः—

पारदार्य्यमधर्म्मन्तु तज्जातौ कुण्डगोलकौ।
अश्राद्धेयावभोज्यानौ क्षेत्रजाद्यास्ततोऽशुभाः॥

आह यमः--

जीवत्पितरि योऽन्येन जातः कुण्डः स उच्यते।
तस्य यो ब्राह्मणो भुंक्ते स कुण्डाशी निगद्यते[1]॥

---

[1] कुण्डाशी निरुच्यते इति।

पराशरः—

जीवतो जारजः कुण्डो मृते भर्त्तरि गोलकः।
यस्तयोरन्नमश्नाति स कुण्डाशीति कथ्यते॥

कुण्डगोलकावभिधायाह मनुः।

यस्तयोरन्नमश्नाति स कुण्डाशीत्युच्यते द्विजः।

ब्रह्मपुराणे—

चतुःषष्ठिपलैः शुद्धैः कुण्डं प्रस्थचतुष्टयम्।
भवेत्तद्यस्तु निगिरेत् स कुण्डाशी पतत्यधः॥

एकस्मिन्नेव भोजने यः प्रस्थचतुष्टयपरिमाणमन्नं निगिरेत् भक्षयति स कुण्डाशी।

—o—

अथ काण्डपृष्ठाः।

तत्र हारीतः—

शूद्रापुत्राश्च दत्ता ये ये च वै क्रीतकाः स्मृताः।
सर्व्वे ते मैत्रिणा प्रोक्ताः काण्डपृष्ठा न संशयः॥
स्वकुलं पृष्ठतः कृत्वा यो वै परकुलं व्रजेत्।
तेन दुश्चरितेनासौ काण्डपृष्ठो न संशयः॥
स्वकुलं काण्डमित्युक्तं तत् कृत्वा पृष्ठतस्तु यः।
कुलान्तरं व्रजेद् यस्मात् काण्डपृष्ठस्ततः स्मृतः॥

यमोऽप्याह—

आपद्गतो ह्यपहुतो यश्च स्याद् वैष्णवीसुतः।
इत्येते मनुना प्रोक्ताः काण्डपृष्ठास्त्रयस्तथा॥

मासोपवासादिव्रतैर्विष्णोराराधनपरा विधवा 'वैष्णवी', तस्यां तदवस्थायां सवर्णादुत्पन्नः 'वैष्णवीसुतः'। निस्तीर्णापदो ब्राह्मणस्य क्षत्रियवैश्यवृत्तित्यागोपदेशानन्तरमाह नारदः।

तस्यामेव तु यो वृत्तो ब्राह्मणो रमते रसात्।
काण्डपृष्ठश्च्युतो मार्गात् सोऽपाङ्क्तेयः प्रकीर्त्तितः॥

देवलः—

वैश्यापतिः कृष्णपृष्ठः काण्डपृष्ठो भटो भवेत्।

अथ वैडालव्रतिकादयः।

मनु-विष्णू—

धर्म्मध्वजी सदा लुब्धः छाद्मिको लोकदम्भकः।
वैडालव्रतिको ज्ञेयः हिंस्रः सर्व्वाभिसन्धकः॥
यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः।
प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम्॥

यमः—

यः कारणं पुरस्कृत्य व्रतचर्य्यां निषेवते।
पापं व्रतेन प्रच्छाद्य वैडालं नाम तद्व्रतम्॥
अर्थञ्च विपुलं गृह्य हित्वा लिङ्गं निवर्त्तयेत्।
आश्रमान्तरितं रक्षेत् वैडालं नाम तद्व्रतम्॥

यो ह्यन्यायेन विपुलमर्थं संगृह्य राजादिभिस्तदपहारमाशङ्कमानः पूर्व्वाश्रम-लिङ्गानि परिवर्त्त्य अतिमाननीययत्याद्याश्रमस्वीकारेण तद्द्रव्यं रक्षति तस्य तद्व्रतं वैडालसंज्ञं भवति।

प्रतिगृह्याश्रमं यस्तु स्थित्वा तत्र न तिष्ठति।
आश्रमस्य तु लोपेन वैडालं नाम तद्व्रतम्॥
दत्त्वोदकेन कन्यान्तु कृत्वा चैव प्रतिग्रहम्।
कृतार्थो नार्थवान् यश्च वैडालं नाम तद्व्रतम्॥

यो जलपूर्व्वं योग्याय कन्यां प्रदाय कृतार्थः सन्नपि तामेव भूयोऽप्यन्यस्मै दातु-मिच्छन्नार्थवान् अकृतार्थ इव भवति तस्य तच्चरितं वैडालं व्रतम्।

यश्च नियतकृत्यपर्य्याप्तं प्रतिगृह्याप्यसन्तोषादकृतार्थमिवात्मानं मन्यते तस्यापि तच्चरितं वैडालम्।

यतीनामाश्रमं गत्वा प्रत्यवास्य तु यः पुनः।
यतिधर्म्मविलोपेन वैडालं नाम तद्व्रतम्॥
अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः।
शठो मिथ्याविनीतश्च वकव्रतचरो द्विजः[१]॥

कूर्म्मपुराणे—

बौद्ध-श्रावक-निर्ग्रन्थाः पञ्चरात्रविदोजनाः।
कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः॥
अनाश्रमी द्विजो यः स्यादाश्रमी वा निरर्थकः।
मिथ्याश्रमास्तु ये विप्रा विज्ञेयाः श्राद्धदूषणे॥

देवलः—

देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम्।
असौ देवलको नाम हव्यकव्येषु गर्हितः॥

तथा—

देवतांशोपजीवी च नाम्ना देवलको भवेत्।
भवेत् करणसंज्ञश्च संघेषु व्यवहारवान्[२]॥
अगारदाही स ज्ञेयः प्रेतदग्धा ह्यनेकशः[३]।

---

१. वकवृत्तधरो द्विज इति।

२. स कव्यव्यवहारवानिति।

३. प्रेतदग्धाधमेन य इति।

'प्रेतदग्धा' प्रेतदाहकः ।

स चाप्यगारदाही स्याद्यो द्वेषाद्वेश्मदाहकः ।
क्षेत्र-सस्यावनीनाञ्च दग्धारोऽरण्यदाहिनः ॥
महिषीत्युच्यते भार्य्या सा चैव व्यभिचारिणी ।
तस्यां यो जायते गर्भः स वै माहिषिकः स्मृतः ॥

ब्रह्मपुराणे—

महिषीत्युच्यते भार्य्या सा चैव व्यभिचारिणी ।
तस्यां यः क्षमते दोषं स वै माहिषकः स्मृतः ॥

देवलः—

गोरसानाञ्च विक्रेता गोविक्रेता च वै द्विजः ।
गुड़-लवण-तिलानां विक्रेता दुष्टविक्रयी ॥
निकृष्टोत्कृष्टमध्ये यो वर्णेषु अनवग्रहः ।
आचरत्यपराचारं वर्णसम्भेदकस्तु यः ॥
एकाकी व्यसनाक्रान्तो धन्य इत्युच्यते बुधैः ।
विप्रं वार्द्धुषिकं विन्यात्तृणवृद्ध्युपजीविनम् ॥

विष्णुः—

यस्तु निन्देत् परं जीवं प्रशंसत्यात्मनो गुणान् ।
स वै वार्द्धुषिको नाम सर्व्वकर्म्मसु गर्हितः ॥

वशिष्ठः—

समर्घं धान्यमादाय महार्घं यः प्रयच्छति ।
स वै वार्द्धुषिको नाम ब्रह्मवादिषु गर्हितः ॥
यः सगोत्रां समारूढ़ः स विप्रो गोत्रवाड् भवेत् ।
राजप्रैषकरो नित्यं ब्राह्मणोऽधिकृतः स्मृतः ॥

नारदः—

पुत्राचार्य्यः स विज्ञेयो ग्रामे यो बालपाठकः ।
पुत्रादवाप्तविद्यो वा पुत्राचार्य्यो निगद्यते ॥
यो भ्राम्यति भ्रमरवद्विभवार्थं गृहे गृहे ।
अतिलुब्धतया विप्रो स मूढ़ो नाम संज्ञया ॥

छन्दोगपरिशिष्टे कात्यायनः—

यः स्वाध्यायाग्निमालस्याद्देवादीन्नैभिरिष्टवान् ।
निराकर्त्तामरादीनां स विज्ञेयो निराकृतिः ॥

गौतमः—

अधीत्य विस्मृतो वेदं भवेद्विप्रो निराकृतिः ।

देवलः—

आत्मानं धर्म्मकृत्यञ्च पुत्रदारांश्च पीडयेत् ।
लोभाद् यः प्रचिनोत्यर्थं स कदर्य्य इति स्मृतः ॥

उशनाः--

राज्ञः प्रबोधसमये घण्टाशिल्पस्तु घाण्टिकः ।

वृद्धगौतमः—

आत्मानं धर्म्मकृत्यञ्च पुत्रदारांश्च पीडयेत् ।
मोहाद् यः पितरौ भृत्यान् स कदर्य्य इति स्मृतः ॥

हारीतः —

ये दिवं बहुभिः पापैः छादयन्ति नराधमाः ।
दुष्प्रापणात्तु देहस्य दुरात्माना हि ते स्मृताः ॥

'दिवं' परलोकं, 'छादयन्ति' तिरस्कुर्व्वन्ति ।
'देहस्य दुष्प्रापणात्' दुष्टेन कर्म्मणा निर्व्वहणात् ।

यमः—

परद्रव्योपहर्त्तारस्तेनाः स्युर्ब्राह्मणाधमाः ।
दुष्प्रापणात्तु देहस्य दुरात्माना हि ते स्मृताः ॥
ये व्यपेताः स्वकर्म्मभ्यः ते नास्तिकाः प्रकीर्त्तिताः ।

कात्यायनः—

हुङ्कारं कासनञ्चैव लोके यच्च विगर्हितम् ।
अनुकुर्य्यादनुब्रूयाद् वाग्दुष्टं तं विवर्जयेत् ॥ इति ।

अथ पतिताः ।

उशनाः—

असमान-याजकाश्च श्रुतिविक्रयिकाश्च ये ।
अन्यपूर्व्वाप्रजाताश्च पतितान् मनुरब्रवीत् ॥

'अन्यपूर्व्वाः' पुनर्भूप्रभृतयः ।

यमः—

शूद्रस्याध्यापनाद्विप्रः पतत्यत्र न संशयः ।

देवलः—

भृतकाध्यापको यश्च भृतकाध्यापितश्च यः ।
तावुभौ पतितौ विप्रौ स्वाध्यायक्रयविक्रयात् ॥

उक्तञ्च गार्ग्येण—

सोदर्य्ये तिष्ठति ज्येष्ठे कुर्य्याद्यो दारसंग्रहम् ।
आवसथ्यं तथाधानं पतितस्तु तथा भवेत् ॥

वायुपुराणे—

आत्मार्थं यः पचेदन्नं न देवातिथिकारणात् ।
नार्हत्यसावपि श्राद्धं पतितो ब्रह्मराक्षसः ॥

अथ षण्डाः ।

देवलः—

षण्डको वातजः षण्डः षण्डः क्लीबो नपुंसकः ।
कीलकश्चेति षण्डोऽयं षण्डभेदो विभाषितः ॥
तेषां स्त्रीतुल्यवाक्शिष्टः स्त्रीधर्म्मात् षण्डको भवेत् ।
पुमान् भूत्वा स्वलिङ्गानि पश्चाच्छिन्द्यात्तथैव च ॥
स्त्री च पुंभावमास्थाय पुरुषाचारवद्गुणा ।
वातजो नाम षण्डः स्यात् स्त्रीषण्डो वापि नामतः ॥
अस्त्रीलिङ्गोऽपि षण्डः स्यात् षण्डस्तु म्लानमेहनः ।
स कीलक इति ज्ञेयो यः क्लैब्यादात्मनः स्त्रियम् ॥
अन्येन सह संयोज्य पश्चात्तामेव सेवते ।

—०—

अथ नग्नाः ।

तत्राह पराशरः—

नग्नः काषायवस्त्रः स्यान्नग्नः कौपीनमात्रधृक् ।
नग्नः स्यान्मलवद्वासा नग्नश्चार्द्धपटावृतः ॥

रञ्जकद्रव्यनिर्यासः कषायस्तेन रक्तं वस्त्रं काषायं तद्वसानो नग्न इत्युच्यते ।

गुह्यप्रदेशमात्राच्छादनपर्य्याप्ता पुरतः पृष्ठतः कटिसूत्रग्रथनोपायेन वसनीया वस्त्रचीरिका कौपीनं तत्परिधानाधिकारित्वेनानुक्तो गृहस्थादिस्तन्मात्रधृङ् नग्नः । अधौतवस्त्रो रजकादिधौतवस्त्रयुक्तो वा मलवद्वासाः । एकस्यैवानवच्छिन्नस्य पटस्यार्द्धं वसानोऽर्द्धं प्रावृण्वानोऽर्द्धपटावृत इत्युच्यते खण्डपटवसनो वा ।

भृगुस्मृति-प्रभासखण्डयोः—

नग्नः स्यान्मलवद्वासा नग्नः कौपीनकेवलः ।
विकच्छोऽनुत्तरीयश्च द्विकच्छोऽवस्त्र एव च ॥
नग्नः काषायवस्त्रः स्यान्नग्नश्चार्द्धपटः स्मृतः ।

'कौपीनकेवलः' कौपीनमात्रधृक् । परिहितवाससो गुह्यप्रदेशाच्छादनोपयोगी-प्रान्तः कच्छः स यस्य विमुक्तस्त्रिकच्छनिषङ्गरहितः । 'अनुत्तरीयः' उत्तरीयरहितः ।

कटिबन्धनवस्त्रं कक्षा । परिहितवस्त्रो परिहिततदुत्तरार्द्धेन वस्त्रान्तरेण वा तिर्यक्सम्मिलनसंकुचितविस्तरेण कटिबन्धनं द्वितोया कक्षा । तद्वान् 'द्विकक्षः' । इमाञ्च द्वितीयां कक्षामासुरीशब्देनाह-याज्ञवल्क्यः—

परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी भवेत् ॥इति॥

ब्रह्मवैवर्त्ते—

सर्व्वेषामेव भूतानां त्रयी संवरणं यतः।
ये वै त्यजन्ति तां मोहात्ते तु नग्नाः प्रकीर्त्तिताः ॥

—०—

अथ परिवित्त्यादयः।

आह देवलः—

ज्येष्ठे चाप्यनिविष्टे च ज्येष्ठमुत्क्रम्य यः पुनः।
विन्देत परिवित्तिश्च परिवेत्ता च तावुभौ ॥

'ज्येष्ठे' भ्रातरि, 'अनिविष्टे' अकृतविवाहे, यदा कनीयान् 'विन्देत' दारसंग्रहं कुर्य्यात्, तदा ज्येष्ठः 'परिवित्तिः' इतरः 'परिवेत्तेति' वचनार्थः।

मनुः—

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः ॥

'स्थिते', दाराग्निहोत्रसंयोगं विनेति शेषः। अग्निहोत्राद्युत्तरक्रियाप्रयोज्यमाधानं विवक्षितम् ॥

उक्तञ्च गार्ग्येण—

सोदर्य्ये तिष्ठति ज्येष्ठे न कुर्य्याद्दारसंग्रहम्।
आवसथ्यं तथाधानं पतितस्त्वन्यथा भवेत् ॥

'आवसथ्यं' आवसथ्याधानम्, दायविभागकाले क्रियमाणमौपासनाधानमिति यावत्। विवाहकाले क्रियमाणस्यौपासनाधानस्य न कुर्य्याद्दारसंग्रहमित्यनेनैवार्थान्निरस्तत्वात्।

अतएवौपासनं समादध्यात् स्वकाले परिवेदयन्निति ब्रह्मगर्भवचनेऽपि स्वकालशब्देन दायविभागकाल एवोक्तः, न तु विवाहकालोऽपीत्यवगम्यते।

'आधानं' गार्हपत्याद्याधानम्। 'पतितोभवेत्' उपपातकी भवेदित्यर्थः। उपपातकपरिगणनावचने परिवेतृ-परिवित्योः कीर्त्तनात्।

लौगाक्षिः—

सोदर्य्ये तिष्ठति ज्येष्ठे योऽग्न्याधेयं करोति हि।
तयोः पर्य्याहितो ज्येष्ठः पर्य्याधाता कनिष्ठकः ॥

सोदर्य्यग्रहणादसोदर्ये ज्येष्ठे तिष्ठति कनिष्ठस्य दारसंग्रहादौ जातेऽपि न पातित्यदोष इत्यवगम्यते। शातातपेन त्वसोदर्य्यविषये दोषाभावः साक्षादेवोक्तः।

पितृव्यपुत्रसापत्न   परनारीसुतेषु   च ।
ज्येष्ठेष्वपि च तिष्ठत्सु भ्रातॄणान्तु कनीयसाम् ॥
दाराग्निहोत्रसंयोगे न दोषः परिवेदने ।

'पितृव्यपुत्राः' पितृभ्रातृसुताः । 'सापत्नाः' भिन्नमातृजाः । 'परनारीसुताः' द्वामुष्यायणपरिभाषया स्वजनकेन परक्षेत्रोत्पादिता भ्रातरः । सत्स्वप्येतेषु ज्येष्ठेषु-भ्रातृषु कनिष्ठानां पूर्व्वमपि दाराग्निसंयोगं कुर्वतां परिवेत्तृत्वसंज्ञको दोषो नास्तीत्यर्थः । परनारीसुतग्रहणं दत्तकादेरप्युपलक्षणार्थम् ।

अतएवाह यमः--

पितृव्यपुत्रान् सापत्नान् परपुत्रांस्तथैव च ।
दाराग्निहोत्रधर्म्मेषु   नाधर्म्मः   परिविन्दने ॥

परपुत्रान् दानक्रयादिना स्वपितुः पुत्रत्वमापन्नान् ज्येष्ठान् भ्रातॄन् परिविन्दतो नाधर्म्मोऽस्ति । सोदरेऽपि ज्येष्ठे सति कदाचित् परिवेदने कनिष्ठस्य दोषो नास्तीत्याह शातातपः ।

क्लीबे देशान्तरस्थे च पतिते भिक्षुकेऽपि वा ।
योगशास्त्राभियुक्ते च न दोषः परिवेदने ॥

'भिक्षुकः' प्रव्रजितः । 'योगशास्त्राभियुक्तः' विरक्तः ।

कात्यायनोऽप्याह—

देशान्तरस्थक्लीबैकवृषणानसहोदरान् ।
वेश्याभिसक्त पतित शूद्रतुल्यातिरोगिणः ॥
जडमूकान्धवधिर   कुब्जवामनखोडकान् ।
अतिवृद्धानभार्य्यांश्च   कृषिसक्तान्नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च   कामतोऽकारिणस्तथा ।
कुहकांस्तस्करांश्चापि   परिविन्दन्न दुष्यति ॥

'एकवृषणः' रोगप्रवृद्धवृषणः । 'रोगी' अचिकित्स्यरोगः । 'खोडकः' भग्नचरण-द्वयः । 'अभार्य्यान्' नैष्ठिकब्रह्मचारिणः । 'कामतोऽकारिणः' स्वेच्छयैव नित्यं विवाह-मकुर्व्वाणाः । 'कुहकाः' परवञ्चनाय वृथोद्योगपराः ।

अत्र ये सर्व्वात्मना विवाहानधिकारिणः क्लीबादयः तेषु सत्सु कालविशेषमन्तरे-णापि परिवेदने न दोषः । ये तु कालान्तरे सम्भावितविवाहाधिकाराः देशान्तरस्थ-विरक्त-वेश्यातिसक्त-शूद्रतुल्य-कृषिसक्त-राजपरतन्त्र-धनवृद्धिप्रसक्त-कामतोऽकारि-कुहक-तस्कराः तेषु सत्सु वक्ष्यमाणकालप्रतीक्षां कृत्वा परिवेदनं कुर्व्वतां न दोषोऽस्ति ।

तत्र देशान्तरस्थे ज्येष्ठे वशिष्ठ आह —

अष्टौ दश द्वादशवर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भव-तीति । देशान्तरादागतस्य विवाहादावधिकारसम्भवादित्यभिप्रायः ।

अत्र धर्म्मार्थमर्थार्थं वा देशान्तरादागतस्य ज्येष्ठस्य द्वादशवर्षं प्रतीक्षा।
तथा च स्मृतिः।

द्वादशैव तु वर्षाणि ज्यायान् धर्म्मार्थयोर्गतः।
न्याय्यः प्रतीक्षितुं भ्राता श्रूयमाणः पुनः पुनः॥

धर्म्मार्थयोरिति विद्याया अप्युपलक्षणार्थम्।

अतएव गौतमेन नष्टे भर्त्तरीति प्रक्रम्य द्वादशवर्षाणि ब्राह्मणस्य विद्यासम्बन्धेनेति-भार्य्याया भर्तृप्रतीक्षाकालमुक्त्वाभिहितं भ्रातरि चैवं ज्यायसि यवीयान् कन्याग्न्या-धेयेष्विति। 'नष्टे भर्त्तरि' कुत्र गत इत्यज्ञाते भर्त्तरि अत्यन्तदूरदेशान्तरगत इति यावत्।

'विद्यासम्बन्धेन' विद्याग्रहणार्थं देशान्तरगते भर्त्तरि, ब्राह्मणभार्य्यया द्वादश-वर्षाणि प्रतीक्ष्य तत् क्रियादिकं कार्य्यम्।

एवं ब्राह्मणः कनिष्ठो ज्येष्ठे भ्रातरि विद्याग्रहणार्थं देशान्तरगते द्वादशवर्षाणि-प्रतीक्ष्य विवाहाग्न्याधाने कुर्य्यात्। कार्य्यान्तरार्थं देशान्तरगमने तु अष्टौ दश वेति पक्षद्वयम्।

अत्रेदं विवक्षितम्—

देशान्तरगतस्य स्वाभिमतं कार्य्यं निर्वर्त्य प्रत्यागमनयोग्ये कार्य्येऽप्यनागतस्य जीवितसन्देहे सति विवाहसम्भावनानिवृत्तौ तदुत्तरकालं कनिष्ठेन दाराग्निहोत्रसंयोगे क्रियमाणे न परिवेत्तृत्वरूपो दोषो भवतीति।

एवमेवं विरक्त-वेश्यातिसक्तादिष्वपि च कियन्तमपि कालं तथैवावस्थितेषु तत् स्वभावत्वावधारणेन विवाहसम्भावनानिवृत्तौ तदुत्तरकालं कनिष्ठेन विवाहादौ क्रिय-माणे न दोषः।

अनेनैवाभिप्रायेण सुमन्तुनाप्युक्तम्—

व्यसनासक्तचित्तो वा नास्तिको[1] वाथवाग्रजः।
कनीयान् धर्म्मकामस्तु आधानमथ कारयेत्॥

आधानग्रहणं विवाहस्याप्युपलक्षणार्थम्।

क्लीबादयस्तु स्वभावतः सर्व्वथा विवाहानर्हत्वात् कियन्तमपिकालं न प्रती-क्षणीयाः।

तथा च स्मृतिः—

उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव वा।
राजयक्ष्मामयावी च न न्याय्यः स्यात् प्रतीक्षितुम्॥
खञ्ज-वामन-कुब्जेषु गद्गदेषु जडेषु च।
जात्यन्धे बधिरे मूके न दोषः परिवेदने॥

---

१. कामुक इति।

एवंविधे ज्येष्ठे सति कनिष्ठस्य परिवेदने दोषो नास्तीत्यर्थः। एवमाधानाधिकारिंण्यप्यकृताधाने ज्येष्ठे विद्यमाने तदनुज्ञातस्य कनिष्ठस्य नाग्न्याधाने परिवेत्तृत्वदोषः।

तथा च वृद्धवशिष्ठः—

अग्रजस्य यदानग्निरादध्यादनुजः कथम्।
अग्रजानुमतः कुर्य्यादग्निहोत्रं यथाविधि॥

आधानेऽधिकार्य्यप्यग्रजो यदाधानविधिमतिक्रम्याग्न्याधेयं नाद्रियते तदा तदनुमतिं गृहीत्वा अनुज आधानं कुर्य्यादित्यर्थः।

अयमेवार्थः सुमन्तुनाप्युक्तः—

ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत्।
अनुज्ञातस्तु कुर्व्वीत शङ्खस्य वचनं यथा॥

ज्येष्ठभ्रातृग्रहणं पितुरपि प्रदर्शनार्थम्।

तथा च स एव—

पितुर्यस्य तु नाधानं कथं पुत्रस्तु कारयेत्।
अग्निहोत्राधिकारोस्ति शङ्खस्य वचनं यथा॥

तथा—

अनुज्ञातस्य पित्रा तु आधानं सर्वदा भवेत्।

पित्रानुज्ञातस्य पुत्रस्येति शेषः। पितृग्रहणं पितामहस्यापि प्रदर्शनार्थम्।

अतएवोशनाः—

पिता पितामहो यस्य अग्रजो वाप्यनग्निमान्।
तपोऽग्निहोत्रमन्त्रेषु[1] न दोषः परिवेदने॥

अत्रापि पित्राद्यनुज्ञातस्येति शेषः। मन्त्रशब्दो वेदोपलक्षणार्थः।
तथा च शातातपः—

नाग्नयः परिविन्दन्ति न वेदा न तपांसि च।
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका॥

यथा वेदाध्ययनतपःश्राद्धराहित्येन स्थितेऽपि ज्येष्ठे तानि तदनुज्ञामन्तरेणापि-कनिष्ठेनानुष्ठितानि परिवेदनहेतवो न भवन्ति। तथा ज्येष्ठानुज्ञयाऽग्नयोऽप्याधीयमाना परिवेदनहेतवो न भवन्तीत्यर्थः।

या च कन्या विरूपिकेत्यस्यायमर्थः।

विवाहाधिकारिण्यां ज्येष्ठायां कन्यायां विकृतरूपायामनूढायां स्थितायां तदनुज्ञया विनापि कनिष्ठाया विवाहकालातिक्रमभीत्या कृतो विवाहो न दोषायेति।

---

[1]. यथाग्निहोत्रमन्त्रेष्विति।

एवं चैवंविधविषयव्यतिरिक्तविषये कन्यास्वपि परिवेदने वरपरिवेदनोक्तं सर्व्वमनुसन्धेयम्।

अनुजस्य ज्येष्ठविवाहात्पूर्व्वं विवाहे तु ज्येष्ठानुज्ञायामपि दोषो भवतीत्याह[1] हारीतः।

सोदराणां तु सर्व्वेषां परिवेत्ता कथं भवेत्।
दारैस्तु परिविन्दन्ते नाग्निहोत्रेण नेज्यया[2] ॥

अग्निहोत्रादिष्वनुज्ञाता न परिविन्दन्त इति स्थितम्। दारैः पुनरनुज्ञाता अपि परिविन्दन्त इति वचनार्थः।

वृद्धयाज्ञवल्क्यः—

आवसथ्यमनादृत्य त्रेतायां यः प्रवर्त्तते।
सोऽनाहिताग्निर्भवति परिवेत्ता तथोच्यते ॥इति॥

अस्यार्थः—

'आवसथ्यं' औपासनाग्निं, 'अनादृत्य' अनाधाय, 'त्रेतायां' गार्हपत्याद्यग्नित्रयाधाने, 'यः', प्रवर्त्तते 'सोऽनाहिताग्निः' एव भवति। तथा प्रथममौपासनाग्निमनाधाय गार्हपत्याद्याधानकारणात् परिवेत्तेति गीयते।

॥ इति परिवित्त्यादयः ॥

इत्यप्रशस्तब्राह्मणसंज्ञाः।

॥ इति ब्राह्मणसंज्ञाप्रकरणम् ॥

अथ श्राद्धे प्रशस्ता ब्राह्मणा निरूप्यन्ते।

तत्र मनुशातातपौ—

तत्र ये भोजनीयाः स्युर्ये च वर्ज्या द्विजोत्तमाः।
यावन्तश्चैव यैश्चान्यैस्तावद्वक्षाम्यशेषतः ॥
श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥

यः स्वकीयां कृत्स्नां मन्त्रब्राह्मणात्मिकां शाखामधीते सः 'श्रोत्रियः'। श्राद्धे विश्वेदेवानुद्दिश्य विहितानि हवींषि 'हव्यानि' पितॄनुद्दिश्य विहितानि 'कव्यानि'। 'अर्हत्तमाय' कुलशीलविद्याधारायेत्यर्थः 'तस्मै' श्राद्धादन्यमपि 'दत्तं महाफलं' भवतीति।

वशिष्ठः—

श्रोत्रियायैव देयानि हव्यकव्यानि नित्यशः।
अश्रोत्रियाय यद्दत्तं तृप्तिं नार्हन्ति देवताः ॥

---

१ ज्येष्ठानुज्ञयापि दोषो नापैतीत्याहेति।

२ नाधानेन न चेज्ययेति।

आह मनुः—

सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते।
एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः॥

'अनृचां' अवेदार्थविदामिति ज्ञेयम्। यतः श्रोत्रियायैव देयानीत्युक्तेरनधीयानानां प्राप्तिरेव नास्ति।

मेधातिथिस्तु—

अनृचा इति प्रथमा बहुवचनान्तं पाठान्तरं दर्शितवान्। तस्मिन् पक्षे अनृचाः सहस्रं यत्र भुञ्जत इति सम्बन्धः। 'मन्त्रवित्' वेदार्थवेत्ता। 'प्रीतः' तर्पितो भोजित इति यावत्। 'सर्वान्' 'तान्' 'अनृचान्' 'अर्हति' स्वीकरोतीति अभेदमापद्यते। अभेदे च यत्तेषु सहस्रसंख्येषु भोजितेषु फलन्तदेकस्मिन्नवाप्यत इत्यर्थः।

ज्ञानोत्कृष्टेषु देयानि कव्यानि च हवींषि च।
न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः॥

ज्ञानेन विद्यया उत्कृष्टा अधिका 'ज्ञानोत्कृष्टाः', तेभ्यः हव्यकव्यानि देयानि नेतरेभ्य इति। यथा 'असृजा' रुधिरेण 'दिग्धौ' लिप्तौ, 'हस्तौ' 'रुधिरेण' प्रक्षाल्यमानौ न निर्म्मलौ भवतः। एवमविद्वद्ब्राह्मणभोजनेनोपक्रियमाणाः पितरो न तत्फलं लभन्त इत्यर्थः।

तथा—

दातॄन् प्रतिग्रहीतॄंश्च कुरुते फलभागिनः।
विदुषे दक्षिणा दत्ता विधिवत् प्रेत्य चेह च॥

'विदुषे' या 'दक्षिणा' दीयते सा 'दातॄन् प्रतिग्रहीतॄन्' अपि 'फलभागिनः' कुरुते। प्रशंसैषा ईदृशमेतद्विदुषे दानं यत्प्रतिग्रहीतारमप्यदृष्टफलेन योजयति किं पुनर्दातारमिति। 'प्रेत्य' स्वर्गः फलम्, 'इह' कीर्त्तिः।

भोजयेदित्यनुवृत्तौ गौतमः—

श्रोत्रीया वाग्रूपवयःशीलसम्पन्नयुवभ्यो दानं प्रथममेके पितृवत्। 'वाक्सम्पन्नाः' संस्कृतभाषिणः। 'रूपसम्पन्नाः' मनोज्ञशरीराः। 'वयः सम्पन्नाः' परिणतवयसः। ते हि प्रायेण प्रशान्तविषयानुरागतया विशुद्धमतयो भवन्ति 'शीलसम्पन्नाः' मनोवाक्कायैः सकलप्राणिहितकारिणः।

वयः सम्पन्नत्वस्यापवादमाह—

'युवभ्य' तरुणेभ्यः, 'प्रथमं', दानं, प्रथमश्राद्धानि नवश्राद्धानीत्यर्थः। प्रथमं प्रधानं वा, यूनां सकलश्राद्धनियमसम्पादनसमर्थत्वात्।

'एके पितृवत्' इति पितृतुल्यान् ब्राह्मणान् भोजयेदित्येके मन्यन्ते। पितरमुद्दिश्य—तरुणं, पितामहमुद्दिश्य स्थविरं, प्रपितामहमुद्दिश्य स्थविरतरमिति।

वशिष्ठः—

पितृभ्यो दद्यात् पूर्व्वेद्युः ब्राह्मणान् सन्निपात्य यतीन् गृहस्थान्। साधूनपरिणत-वयसोऽविकर्मस्थान् श्रोत्रियान् शिष्यानन्तेवासिनः।

'पूर्व्वेद्युः। श्राद्धदिनात् पूर्व्वस्मिन्नहनि, 'ब्राह्मणान्', 'सन्निपात्य' आमन्त्र्य, 'यतयः' प्रव्रजिताः। तदसम्भवे 'गृहस्थान्'।

साधुलक्षणमुक्तम्। 'अपरिणतवयसः' नातिस्थविरान्। 'अविकर्म्मस्थान्' प्रतिषिद्धवर्ज्जकान्। ये च न शिष्या चान्तेवासिनः न सेवका इत्यर्थः।

कात्यायनः—

स्नातकानेके यतीन् गृहस्थसाधून् वा श्रोत्रियान् वृद्धाननवद्यान् स्वकर्म्मस्थान-भावेऽपि शिष्यान् सदाचारान्।

कृतसमावर्तनोऽकृतविवाहः 'स्नातकः'। 'वृद्धः' विद्यातपोभ्यां श्रेष्ठः। येषां मातृतः पितृतश्चावद्यं दोषो नास्ति ते 'अनवद्याः'। 'स्वकर्म्मस्थाः' स्वाश्रमविहित-श्रौत-स्मार्त्तकर्मनिरताः, उक्तलक्षणब्राह्मणाभावे 'सदाचारान् शिष्यान्' अपि निमन्त्रयेत्।

आपस्तम्बः—

तुल्यगुणेषु वयोवृद्धः श्रेयान् द्रव्यकृशश्च, शम—तपः-श्रुत-शीलादिभिस्तुल्यत्वे वयोवृद्धः श्रेष्ठः। वयसापि तुल्यत्वे द्रव्यकृशः क्षीणवृत्तिः श्रेयान्। स च यदि निजेच्छया द्रव्यकृशो भवति न पुनरयोग्यत्वेनालब्धप्रतिग्रहतया।

पैठीनसिः—

प्रयताय शुचये सर्वत्र देयं हव्यं कव्यं च तस्माच्छुचिरिति विज्ञायते।

'प्रयताय' संयताय। 'शुचये' वाह्याभ्यन्तरशौचयुक्ताय। 'सर्वत्र' जनने मरणे भोजनादौ च। अयमर्थः श्रुतौ विज्ञायते। श्रुतिप्रतीकं पठति।

'तस्माच्छुचिः' इति।

आपस्तम्बः—

शुचीन् मन्त्रवतः सर्व्वकृत्येषु भोजयेत्।

'मन्त्रवन्तः' अधीतवेदाः। 'सर्व्वकृत्येषु' विहितब्राह्मणभोजनेषु श्रौतस्मार्त्तेषु-कर्म्मसु।

अत्र केचिद्यथा कन्या तथा हविरिति कन्यासाधर्म्येण हविषां स्वशाखीयप्रति-पाद्यत्वं मन्यमानाः स्वशाखीयमेव श्रोत्रियत्वादिगुणविशिष्टं श्राद्धे नियोजयन्ति।

तदसत्।

स्मृतीतिहास-पुराण-गृह्य-कल्पसूत्रेषु क्वचिदपि स्वशाखीयनियमाश्रवणात्। प्रत्युत स्मृत्यादिषु 'त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णो ज्येष्ठसामगः' इत्यादिभिर्नानाशाखीयानां नानावेदाध्यायिनामेव विधिदर्शनाच्च।

न चैतेषां शूद्रकर्तृकश्राद्धविषयत्वमिति मन्तव्यम्, व्यवस्थायां प्रमाणाभावात्। नापि कन्यासादृश्यदर्शनमात्रेण नियमाध्यवस्थानं युक्तम्। सादृश्यस्यान्यथाप्युपपत्तेः।

किञ्च कन्यायामेव तावदेकशाखाध्यायिनियमः कुतोऽवगतः, यद्बलेन हविष्यपि साध्यते। आचारादिति चेत्। कन्यादानप्रतिग्रहेषु स्वशाखीयैरेव सह व्यवहरन्तः परशाखीयांश्च प्रयत्नेन परिहरन्तः शिष्टा दृश्यन्ते। तेन ज्ञायते अस्त्यत्र नियम इति।

मैवम्। शिष्टव्यवहारस्य कुलादिज्ञानाज्ञानमूलत्वात्। तयोश्च सन्निधान-व्यवधानाधीनत्वात्।

प्रायेण हि तुल्यशाखिनः स्वाध्यायाध्ययन-वेदव्रत-गृह्यकर्म-सन्ध्योपासनादि-क्रियाकलाप-विचारणार्थमन्योन्यसङ्गमभिलषन्तः समानदेशवासिनो भवन्ति। सन्नि-धानाच्च विज्ञातकुलशीलाचाराः परस्परं यौनसम्बन्धविधिमाद्रियन्ते। अन्यशाखीयांस्तु देशान्तरनिवासादविज्ञातस्वरूपतयैव न श्रद्दधते।

आर्य्यावर्त्तेषु च समानदेशवासिनां नानाशाखाध्यायिनामप्युपलभ्यन्त एव परस्पर-मनवगीयमानाः सर्वतो विवाहसम्बन्धाः। अविज्ञातपरस्पराणामेकशाखाध्यायिनामपि नोपलभ्यन्ते। अतः समानदेशवासादिसमुत्थं कुलादिज्ञानमेव परिणयनसम्बन्धप्रवर्त्तक-मिति। या तु केषाञ्चित् सत्यपि सादृश्ये न दृश्यते सम्बन्धप्रवृत्तिः, तत्रैतन्निदानम्—

येषां पूर्वपुरुषैः पूर्वमतिविदूरानेकदेशवासिभिर्विगर्हितेतरेतरदेशाचारैः कालान्तरे कथञ्चन सह संवासमासादयद्भिरपि स्वस्वकुलश्रेण्यहङ्कारं समुद्वहद्भिरन्योन्यं न प्रवर्तते समुद्वाहविधिस्ततस्तत् सन्तानेषु सैवाप्रवृत्तिः कियन्तं कालमनुवर्तत इति।

अतो न कन्यादाने नापि हविर्दाने स्वशाखीयद्विजनियम इति सिद्धम्।

एवं च सति वक्ष्यमाणानि वचनानि समञ्जसार्थानि स्युः।

यमः—

वेद-विद्या-व्रतस्नाताः श्रोत्रिया वेदपारगाः।
स्वधर्म्मनिरताः क्षान्ताः क्रियावन्तस्तपस्विनः॥
तेभ्यो हव्यञ्च कव्यञ्च प्रशान्तेभ्यः प्रदीयते।

वेदान् वेदौ वेदञ्चाधीत्य समावृत्ताः 'वेदस्नातकाः'। विद्यां वेदार्थविचारं समाप्य निवृत्ताः 'विद्यास्नातकाः'। व्रतं ब्रह्मचर्य्यं समाप्य निवृत्ताः 'व्रतस्नातकाः'। सत्यपि वेदपारगत्वे नित्यं वेदाभ्यासनिरतत्वप्रदर्शनार्थं श्रोत्रियग्रहणम्। द्वन्द्वदुःख-सहिष्णवः 'क्षान्ताः। अक्रोधनाः 'शान्ताः'।

मनुः—

वेद-विद्या-व्रतस्नातान् श्रोत्रियान् गृहमेधिनः।
पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत्॥

गृहमेधिनः, गृहस्थाः।

तथा— यत्नेन भोजयेच्छ्राद्धे वह्वृचं वेदपारगम्।
शाखान्तगमथाध्वर्य्युं छन्दोगञ्चासमाप्तिकम्॥
एषामन्यतमो यस्य भुञ्जीत श्राद्धमच्चितः।
पितृणान्तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी॥

वेदपारगशाखान्तगासमाप्तिकशब्दैरेकार्थैः सकलशाखाध्येतार उच्यन्ते। ऋग्वेदाध्यायी 'वह्वृचः'। वेदस्य पारं पर्य्यवसानं गच्छतीति वेदपारगः।

नायमृत्विग्विशेषोऽध्वर्युः, किन्तु अध्वर्युवेदस्य यजुर्वेदस्याध्येता पुरुषः 'अध्वर्य्युः'। शाखाया मन्त्रब्राह्मणात्मिकाया अन्तं पारं गच्छतीति 'शाखान्तगः'। 'छन्दोगः' सामवेदाध्यायी। आसमाप्तिरस्यास्तीति 'आसमाप्तिकः'। एषां त्रिविधानां 'अन्यतमः' एकोऽपि, यस्य श्राद्धं भुञ्जीत तस्य पितृणां साप्तपौरुषी तृप्तिः स्यात्। 'अर्चितः' 'साप्तपौरुषी'। कालमहत्त्वोपलक्षणार्थञ्चैतत्। यावत् सप्तपुरुषा आगामिनः पुत्रपौत्रादयो जाताः जनिष्यन्ते च तावत्कालमिति मेधातिथिः। 'शाश्वती अनवच्छिन्ना।

ननु वह्वृचादिशब्दैरेव तत्तद्वेदाध्यायिनः प्रत्येकं विहिताः। अत एषामन्यतम इति किमर्थम्।

केचिदाहुः। आथर्व्वणिकनिवृत्त्यर्थमेतत्। एषां वह्वृचाध्वर्य्युछन्दोगानामेवान्यतमः श्राद्धे भोजनीयो न तु तद्व्यतिरिक्तः कश्चित्। त्रयी वै विद्या ऋचो यजूंषि सामानीति शतपथेऽथर्व्वाङ्गिरसां विद्यात्वेनानभिधानात्। तदयुक्तम्।

आथर्व्वणिकं विदधद्भिः तदतिक्रमे दोषञ्चाभिदधद्भिर्बहुभिर्य्यमशातातपादिवचनैः सह विरोधात्।

शतपथश्रुतेश्चायमर्थः। ऋग्यजुःसामसंज्ञका त्रय्येव विद्या वैतानिककर्म्मोपयोगिनी नान्येति न पुनरेतदतिरिक्ता विद्यैव न भवतीति। श्रूयते च शतपथब्राह्मणएव।

ब्राह्मणस्वाध्यायसंशब्देनपूर्विकाथर्व्वाङ्गिरसां प्रशंसा स एव विद्वानथर्व्वाङ्गिरसोऽहरहः स्वाध्यायमधीते मेद आहुतिभिरेव तद्देवाँस्तर्पयति त एनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्व्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्या मधुकुल्याः पितृन् स्वधा अभिवहन्तीति शतपथः।

आश्वमेधिककाण्डे पारिप्लवब्राह्मणे तेषां वेदसंज्ञाशब्दतापि दृश्यते। अथर्व्वाणो वेदः सोऽयमित्यथर्व्वाणामेकं पर्व्व व्याचक्षाण इवानुद्रवेत्। अङ्गिरसो वेदः सोयमित्यङ्गिरसामेकं पर्व्व व्याचक्षाण इवानुद्रवेदिति। अङ्गानि वेदाश्चत्वार इति स्मृतिपुराणादिष्वपि अथर्व्वाङ्गिरसामेव चतुर्थवेदत्वेनाभिधानमभिमतम्।

अतो नाथर्व्वणिकनिवृत्त्यर्थमिदं, किन्तु पितृकृत्ये त्रयस्तावन्निमन्त्रणीयाः। ते च छन्दोगञ्चेति च शब्देन वह्वृचोऽध्वर्युः, छन्दोग इत्येवं त्रयः सर्व्वदा गृह्येरन्।

नन्वन्यतरवेदाध्यायिनोऽपीति शङ्कानिवृत्त्यर्थमुक्तमेषामन्यतम इत्यादि ।

यमः—

वह्वृचो यस्त्रिसौपर्णश्छन्दोगो ज्येष्ठसामगः ।
पञ्चाग्निर्व्वा यजुर्व्वेदी अथर्व्वा ब्रह्मशीर्षकः ॥
आत्मविच्चाङ्गविच्चैव ब्रह्मदेयासुतस्तथा ।
एते सर्व्वे यथावत्स्युरेकदेशोऽपि वा भवेत् ॥
त्रयः परेवराश्चैव आत्मा तत्रैव सप्तमः ।
ते सप्तपुरुषाः सर्व्वे तदन्नमुपभुञ्जते ॥

त्रिसुपर्णः । ऋग्यजुषोः एकदेशः तदध्ययनाङ्गं व्रतञ्च तदस्यास्ति असौ "त्रिसौपर्णः" । "ज्येष्ठसाम" सामविशेषः, पञ्चाग्निर्नाम यजुर्वेदविद्या तदध्ययनाङ्गं-व्रतञ्च तत्सम्बन्धात् पुरुषः "पञ्चाग्निः" । अथवा गार्हपत्याहवनीय दक्षिणाग्निसभ्या-वसथ्याः, अग्नयो यस्य स 'पञ्चाग्निः' । ब्रह्मशीर्षमथर्व्वोपनिषदेकदेशः तद्वेत्ता "ब्रह्मशीर्षकः" । "आत्मवित्" आत्मतत्ववेत्ता ।

'ब्रह्मदेया' ब्राह्मविवाहोढ़ा तस्यामुत्पन्नः "ब्रह्मदेयासुतः" "एते सर्व्वे" वह्वृ-चाद्याः । 'एकदेशोऽपि' इति उक्तानां सर्व्वेषां असम्भवे यावन्तो लभ्यन्ते तावन्तो-ग्राह्याः । "परे" चतुर्थात् पुरुषात् प्रभृतयः, "अवरे" चतुर्थात् पूर्वे त्रयः पितृपिता-महप्रपितामहाः । "आत्मा" यजमानः, एते सप्तपुरुषाः विशिष्टपात्रे दत्तं अन्नं भुञ्जते । यथा पित्रादीनां षण्णां पुरुषाणां श्राद्धमुपकारकं भवति एवं यजमानस्यापि परलोके विशिष्टफलोत्पादकं भवति ।

आह वृहस्पतिः—

यद्येकं भोजयेच्छ्राद्धे छन्दोगं तत्र भोजयेत् ।
ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते ॥
अटेत पृथिवीं सर्व्वां सशैलवनकाननाम् ।
यदि लभ्येत पित्रर्थे साम्नामक्षरचिन्तकः ॥
ऋचा तु तृप्यति पिता यजुषा च पितामहः ।
पितुः पितामहः साम्ना छन्दोगोऽभ्यधिकस्ततः ॥

यम-शातातपौ—

छन्दोगं भोजयेच्छ्राद्धे वैश्वदेवे च बह्वृचम् ।
पुष्टिकर्म्मणि चाध्वर्य्युं शान्तिकर्मण्यथर्व्वणम् ॥

पुष्ट्यर्थं कर्म्म पुष्टिकर्म । अरिष्टोपशमनार्थं यत् क्रियते तच्छान्तिकर्म्म ।

शातातपः—

भोजयेद् यद्यथर्व्वाणं दैवे पित्र्ये च कर्म्मणि ।
अनन्तमक्षयञ्चैव फलन्तस्येति वै श्रुतिः ॥

"अनन्तं" अपर्य्यवसानम्। "अक्षयम्" अक्कशम्।

यस्त्वन्यं भोजयेच्छ्राद्धे विद्यमानेष्वथर्व्वसु।
निराशास्तस्य गच्छन्ति देवताः पितृभिः सह॥
तस्मात्सर्व्वप्रयत्नेन श्राद्धकाले त्वथर्व्वणम्।
भोजयेत् हव्यकव्येषु पितृणाञ्च तदक्षयम्॥

याज्ञवल्क्यः— अग्र्यः सर्व्वेषु वेदेषु श्रोत्रियो ब्रह्मविद् युवा।
वेदार्थवित् ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णिकः॥
कर्म्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निर्ब्रह्मचारिणः।
पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदे॥

'अग्र्यः' मुख्यः अध्येतॄणाम्। 'सर्वेषु' चतुर्षु वेदेषु। 'श्रोत्रियः' यथाविधि स्वशाखाध्यायी। 'ब्रह्मवित्' उपनिषत्पुरुषवित्। 'युवा' मध्यमवयस्कः। 'वेदार्थवित्' मन्त्रब्राह्मणार्थवेत्ता। त्रिमध्वाख्यं व्रतं कृत्वा यस्तदाख्यमृग्वेदैकदेशमधीते सः 'त्रिमधुः'। त्रिसुपर्णव्रतपूर्व्वकं तदाख्ययजुर्वेदभागाध्येता "त्रिसुपर्णिकः"। 'कर्म्मनिष्ठाः' विहितानुष्ठानपराः। 'श्राद्धसम्पदे' श्राद्धसमृद्धये।

ब्रह्माण्डपुराणे—

ये च भाष्यविदः केचिद् ये च व्याकरणे रताः।
अधीयानाः पुराणं ये धर्म्मशास्त्रमथापि वा॥
ये च पुण्येषु तीर्थेषु कृतस्नाताः कृतश्रमाः।
मखेषु ये च सर्वेषु भवन्त्यवभृथप्लुताः॥
ये च सत्यव्रता नित्यं स्वधर्म्मनिरताश्च ये।
अक्रोधनाः क्षान्तिपरास्तान् श्राद्धेषु नियोजयेत्॥

मत्स्यपुराणे—

आथर्व्वणः[१] वेदविच्च ज्ञातवंशः कुलान्वितः।
पुराणवेत्ता ब्रह्मण्यः स्वाध्यायजपतत्परः॥
शिवभक्तः पितृपरः सूर्य्यभक्तोऽथ वैष्णवः।
ब्रह्मण्यो योगविच्छान्तो विजितात्मा सुशीलवान्॥
एतांस्तु भोजयेन्नित्यं दैवे पित्र्ये च कर्म्मणि।
मण्डलब्राह्मणज्ञा ये ये सूक्तं पुरुषं विदुः॥
ताँस्तु दृष्ट्वा नरः क्षिप्रं सर्व्वपापैः प्रमुच्यते।
शतरुद्रीयजाप्येषु निरता ये द्विजोत्तमाः॥
पितॄन् सन्तारयन्त्येते श्राद्धे यत्नेन भोजिताः।

तथा — गायत्रीजाप्यनिरतं हव्यकव्येषु योजयेत्।
पापं तिष्ठति नो तस्मिन्नब्विन्दुरिव पुष्करे॥

---

१ अथर्व्वज्ञ इति।

अपां विन्दुः 'अब्विन्दुः'। 'पुष्करम्' पद्मपत्रम्।

ह्मपुराणे—

षडङ्गविद्याज्ञो योगी[१] यज्ञतत्वज्ञ एव च।
अयाचिताशी विप्रो यः श्राद्धकल्पविदेव च।
अष्टादशानां विद्यानामेकस्या अपि पारगः॥
त्रिमधुश्च त्रिसौपर्णः पञ्चाग्निर्ज्येष्ठसामगः।

चत्वारो वेदाश्चत्वार उपवेदाः, षडङ्गानि, स्मृतयः, पुराणानि, मीमांसा न्याय-इत्यष्टादशविद्याः।

चान्द्रायणैः पराकैर्वा नियमैर्यश्च संस्कृतः।
वार्हस्पत्यं नीतिशास्त्रं शब्दविद्याञ्च वेत्ति यः॥
इतिहासपुराणैश्च यः पवित्रीकृतः सदा।
अकृत्यमपि कुर्व्वाणः स पवित्रशताद्वरः॥
बहुनात्र किमुक्तेन इतिहासपुराणवित्।
अथर्व्वशिरसोऽध्येता तावुभौ पितृभिः पुरा॥
तपः कृत्वा नियोगार्थं प्रार्थितौ पितृकर्म्मणि।

महाभारते—

ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः।
मखेषु च ससत्रेषु भवन्त्यवभृथप्लुताः॥
अबाधना अचपलाः क्षान्ता दान्ता जितेद्रियाः।
सर्व्वधर्म्मरता ये च श्राद्धेष्वेतान्नियोजयेत्॥
अक्रोधनाः कर्म्मपराः सन्तो नित्यं दमे रताः।
तादृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम्॥
अमानिनः सर्व्वसहाः सुहृष्टा विजितेन्द्रियाः।
सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महाफलम्॥
अलुब्धाः शुचयो वैद्या ह्रीमन्तः सत्यवादिनः।
स्वकर्म्मनिरता ये च तेभ्यो दत्तं महाफलम्॥
प्रज्ञाश्रुताभ्यां शीलेन कुलेन च समुच्छ्रिताः।
तारयेत्तत्कुलं कृत्स्नमेकोपीह द्विजर्षभः॥

ब्रह्मवैवर्त्ते—

अक्लृप्तान्नं घृणिक्लान्तं कृशवृत्तिमयाचकम्।
एकान्तशीलं ह्रीमन्तं सदा श्राद्धेषु भोजयेत्॥

न विद्यते क्लृप्तमन्नं यस्यासौ 'अक्लृप्तान्नः'। "घृणा" दया सा विद्यते यस्यासौ-'घृणी'। 'क्लान्तः' व्रतश्रान्तः; घृणीचासौ क्लान्तश्च 'घृणिक्लान्तः'। तीर्थयात्रा-

[१] षडङ्गवित् ज्ञानायोगीति।

शीलतया वा घृणिभिः सूर्य्यरश्मिभिः क्लान्तो 'घृणिक्लान्तः' प्रतिग्रहादिसङ्कुचिततया कृशावृत्तिर्वर्त्तनं यस्यासौ 'कृशवृत्तिः'। 'ह्रीमान्' लज्जावान्। तथाविधान् विप्रान् गृहस्थान् वेदार्थविदो निरभिमानिनः।

पत्नीपुत्रसमायुक्तान् श्राद्धकर्म्मणि योजयेत्।
देहस्यार्द्धं स्मृता पत्नी न समग्रो विना तथा॥
न वाऽपुत्रस्य लोकोऽस्ति श्रुतिरेषा सनातनी।

स्कान्दे प्रभासखण्डे—

अथ विप्रान् प्रवक्ष्यामः श्राद्धे वै केतनक्षमान्।
विशिष्टः श्रोत्रियो योगी वेदवित् ज्येष्ठसामगः॥
पञ्चाग्निः कर्म्मनिष्ठश्च तपोनिष्ठो जितेन्द्रियः।

नन्दिपुराणे—

यतीन् वा वालखिल्यान् वा भोजयेच्छ्राद्धकर्म्मणि।
वानप्रस्थोपकुर्व्वाणौ पूजयेत्परितोषयेत्॥
गृहस्थं भोजयेद् यस्तु विश्वेदेवास्तु पूजिताः।
वानप्रस्थेन ऋषयो वालखिल्यैः पुरन्दरः॥
यतीनां पूजनाद्वापि[१] साक्षाद् ब्रह्मा सुपूजितः।
आश्रमाः पावनाः पञ्च उपधाभिरताश्रमाः॥
चत्वार आश्रमाः पुण्याः श्राद्धे दैवे तथैव च।

तथा—

श्राद्धं देयन्तु विप्रेषु संयतेष्वग्निहोत्रिषु।
अवदातेषु विद्वत्सु श्रोत्रियेषु विशेषतः॥
मण्डलब्राह्मणज्ञश्च पुराणार्थविशारदः।
अकल्कः स्वल्पसन्तुष्टः प्रतिग्रहविवर्जितः॥
एते श्राद्धे नियोक्तव्या ब्राह्मणाः पङ्क्तिमूर्द्धनि।

नागरखण्डे—

त्रिणाचिकेतः सौपर्णी धर्म्मद्रोणस्य पाठकः।
सद्यः प्रक्षालको यश्च परोपकरणे रतः॥
मृष्टान्नदो मृष्टवाँश्च सदा जपपरायणः।
एते वै ब्राह्मणा ज्ञेया विशेषाः श्राद्धसिद्धये॥

वार्हस्पत्यसंहितायाम्—

अङ्गिरोनारदभृगुबृहस्पत्युदिताः स्मृतीः।
पठन्ति ये श्रद्धानास्तेऽभियोज्याः प्रयत्नतः॥
वेदान्तनिष्ठाः श्राद्धेषु व्याख्यातारो विशेषतः।

---

[१] पूजया वापीति।

प्रचेताः—

त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित्।
ज्ञाननिष्ठस्तपोनिष्ठः कर्म्मनिष्ठस्तथापरः॥
दान्तश्च मातृभक्तश्च श्रद्धया देवपूजकः।
शिलोञ्छनादिवृत्तिश्च श्रोत्रियस्य सुतस्तथा॥
एते विप्रा महापुण्या हव्यकव्येषु चाश्रिताः।

यमः—

नक्षत्रतिथिपुण्याहान्[१] मुहूर्त्तान्मङ्गलानि च।
न निर्दिशन्ति ये विप्रास्तैर्भुक्तं ह्यक्षयं भवेत्॥
प्रयत्नाद्धव्यकव्यानि पात्रीभूते द्विजन्मनि।
प्रतिष्ठाप्यानि विद्वद्भिः फलानन्तमभीप्सुभिः॥

याज्ञवल्क्य—

गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम्।
नापात्रे विदुषा किञ्चिदात्मनः श्रेय इच्छता॥

कूर्म्मपुराणे—

असमानप्रवरको ह्यसगोत्रस्तथैव च।
असम्बन्धी च विज्ञेया ब्राह्मणाः श्राद्धसिद्धये॥

गरुड़पुराणे –

श्राद्धेषु विनियोज्याः स्युर्ब्राह्मणा ब्रह्मवित्तमाः।
ये योनिगोत्रमन्त्रान्तेवासिसम्बन्धवर्ज्जिताः॥

'योनिसम्बन्धाः' मातुलादयः। 'गोत्रसम्बन्धाः' सपिण्डादयः। 'मन्त्रसम्बन्धाः' अध्यापकादयः। 'अन्तेवासिसम्बन्धाः' शिल्पशास्त्रोपाध्यायाः।

इति प्रशस्ता ब्राह्मणाः।

अथ पाङ्क्तेयाः

तत्र शंखलिखितौ—

अथ पाङ्क्तेया वेदवेदाङ्गवित्पञ्चाग्निरनूचानः सांख्ययोगोपनिषद्धर्म्मशास्त्रविच्छ्रोत्रियस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णी ज्येष्ठसामगः। साङ्ख्ययोगोपनिषद्धर्म्मशास्त्राध्यायी वेदपरः सदाग्निको मातृपितृशुश्रूषुर्धर्म्मशास्त्ररतिरिति।

'सांख्यशास्त्रम्' कापिलम्, 'योगशास्त्रम्' पातञ्जलम्। 'उपनिषच्छास्त्रम्' वेदान्ताः। 'सदाग्निकः' नित्यमग्निहोता।

पाङ्क्तेयनिरूपणार्थं कुलश्रुतशीलवृत्तरूपगुणानाह हारीतः।

स्थितिरविच्छिन्नवेदवेदिता, अयोनिसङ्करित्वमार्षेयत्वञ्चेति कुलगुणाः। वेदो-वेदाङ्गनि धर्म्मोऽध्यात्मं विज्ञानं स्थितिरिति षड्विधं श्रुतम्। ब्रह्मण्यता, देवपितृ-

[१] नक्षत्रतिथिपुण्यादीनिति।

भक्तता, समता, सौम्यतापरोपतापिताऽनसूयता मृदुता पारुष्यं मैत्रता प्रियवादित्वं कृतज्ञता शरण्यता प्रशान्तिश्चेति त्रयोदशविधं शीलम्।

क्षमा दमोदया दानमहिंसा गुरुपूजनं शौचं स्नानं जपोहोमस्तपः स्वाध्यायः सत्यवचनं सन्तोषो दृढ़व्रतत्वं उपव्रतित्वञ्चेति षोडशगुणं वृत्तम्। तस्मात्कुलीनाः श्रुतवन्तः शीलवन्तो वृत्तस्थाः सत्यवादिनोऽव्यङ्गाः पाङ्क्तेया इति।

अस्यार्थः—

सन्ततिरूपेण चिरकालावस्थानं स्थितिरिति स्मृतिचन्द्रिकाकारः। हरिहरस्त्वाह–शास्त्रोक्तवर्णाश्रमादिधर्म्मेष्ववस्थानमापद्यपि ततोऽप्रच्यवनं स्थितिः।

यदाहुः – अयाच्याप्रचलनममार्गे चाप्रवर्त्तनम्।
आपद्यपि यतो धैर्य्यं स गुणः स्थितिरुच्यते ॥इति॥

ब्राह्मण्यादिवत् पितृपितामहादिप्रबन्धेन तोरणायणीयादिचरणाख्यातृत्वेनाविच्छिन्नस्य वेदस्य वेत्तृत्वं अविच्छिन्नवेदवित्त्वम्।

यथाहुः—

जातिवद्धिप्रवन्धेन स्मर्य्यते चरणं कुले।
तद्वेदनमविच्छिन्नवेदवित्ता प्रकीर्त्तिता ॥

अपरे तु वेदवेद्योरविच्छिन्नत्वेन पूर्व्वपुरुषेष्वपि वेदाध्ययनयागानुष्ठानयोरव्यवच्छेदं कुलगुणमाहुः। विजातीयायामपत्यानुत्पादनेन दत्तक्रीतादिरूपपरकुलसंसर्गराहित्येन चासङ्कीर्णयोनित्वमयोनिसाङ्कर्य्यं, स्वीयप्रवरगतर्षिज्ञातृत्वमार्षेयत्वम्, "अनूचानपुत्रत्वपरो यो वै ज्ञातोऽनूचानः स ऋषिः आर्षेय" इति शतपथश्रुतिदर्शनात्।

एते तावत्कुलगुणाः शुद्धिहेतवः। ऋगादिभेदेन चतुर्व्विधो वेदः। वेदाङ्गानि-शिक्षादीनि, तदुक्तम्।

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषाङ्गतिः।
छन्दोविचितिरित्येवं वेदाङ्गानि षडूचिरे ॥

'धर्म्मः' मन्वादिधर्म्मशास्त्रम्। 'अध्यात्मम्' आत्मविवेकशास्त्रम्। 'विज्ञानं' प्रमाणप्रमेयादिपदार्थविशेषज्ञानहेतुर्न्यायदर्शनादि। स्थितिहेतुवार्त्तादिशास्त्रं 'स्थितिः'। अधीताविस्मरणं वा 'स्थितिः'। धर्म्मादिक्रमावस्थितं वा यत्रेतिहासादौ कथ्यते सा 'स्थितिः'। एवं च वेदप्रभृति चतुर्दशविद्यास्थानान्युक्तानि भवन्ति।

एतेषां षण्णां श्रवणं 'श्रुतम्'। ब्रह्मणि साधुत्वं 'ब्रह्मण्यता'। अमायया देवपितृकर्म्मानुष्ठानं 'देवपितृभक्तता'। जीवतोर्व्वा पित्रोरशाठ्येन शुश्रूषणं 'पितृभक्तता' विगलितरागद्वेषता 'समता'। सर्व्वजनहृद्यचरित्रत्वं 'सौम्यता'। वागादिभिः परपीडाराहित्यम् 'अपरोपतापिता'। परदोषानाविष्करणम् 'अनसूयता'। अकठिनहृदयत्वं 'मृदुता'।

कलहविरहितत्वम् 'अपारुष्यम्'। प्रसन्नमनस्कता 'मैत्रता'। साधुकारिणा-मनुमोदनं 'प्रियवादिता'। उपकारसम्प्रतिपत्तिः कृतज्ञता। शरणं गृहरक्षित्रोरित्यभि-धानकोशस्मरणात् शरणमाश्रयो रक्षिता वा, शरणमेव 'शरण्यः'। स्वार्थिकोऽत्र तद्धितः। अथवा शरणे आश्रयत्वे रक्षितृत्वे वा साधुः शरण्यः तस्य भावः 'शरण्यता'। विद्या-द्यनुत्सेकः 'प्रशान्तिः'। क्षमादि तु व्याख्यातानि न व्याख्यायन्ते। यथाविधि स्वस्य स्वत्वनिवृत्तिपूर्व्वकं परस्वत्वापादानं 'दानम्'। विशिष्टमन्त्रावृत्तिः' 'जपः'। देवतो-द्देशेन प्रक्षेपान्तः स्वस्वत्यागो 'होमः'। 'सन्तोषः' वितृष्णता। स्वीकृतव्रता-परित्यागः 'दृढ़व्रतत्वम्'। 'उपव्रतित्वम्' दशम्यादावेकभक्तता, व्रतान्युपव्रतानि-चाह--

व्यासः—

अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता।
अस्तेयमिति पञ्चैते यमाश्चैव व्रतानि च॥
अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम्।
अप्रमादश्च नियमाः पञ्चैवोपव्रतानि च॥

आह यमः—

पाङ्क्तेयान् ब्राह्मणान् वक्ष्ये येभ्यो दत्तमथाक्षयम्।
यं दृष्ट्वा सर्व्वभूतानां मनसो निर्वृत्तिर्भवेत्॥
येषाञ्चैवोपविष्टस्तु पङ्क्तिमेकोऽपि पावयेत्।
शतं शतसहस्रञ्च पश्यन्नपि समन्ततः॥
नमस्कृत्य द्विजातिभ्यः प्रवक्ष्याम्यहमग्रतः।
वेदश्रुतोनसङ्कीर्णांस्तान् मे निगदतः शृणु॥
ये सोमपा विरजसो धर्म्मज्ञाः शान्तबुद्धयः।
व्रतिनो नियमस्थाश्च ऋतुकालाभिगामिनः॥
पञ्चाग्निरप्यधीयानो यजुर्वेदविदेव च।
बह्वृचश्च त्रिसौपर्णस्त्रिमधुर्व्वाथ यो भवेत्॥

'त्रिमधुः' ऋग्वेदैकदेशः तद्व्रतश्च।

त्रिणाचिकेतो विरजाः छन्दोगो ज्येष्ठसामगः।
अथर्व्वशिरसोऽध्येता सर्व्वे ते पङ्क्तिपावनाः॥

विरजा नाम मन्त्रविशेषस्तदध्ययनात् पुरुषोऽपि 'विरजाः'। अथर्व्वशिरो नाम अथर्व्ववेदैकदेशः।

शिशुरप्यग्निहोत्री च न्यायविद् यः षडङ्गवित्।
मन्त्रब्राह्मणविच्चैव यश्च स्याद्धर्मपाठकः॥
ऋषिव्रती ऋषीकश्च तथा द्वादशवार्षिकः।
ब्रह्मदेयासुतश्चैव गर्भशुद्धः सहस्रदः॥

चान्द्रायणव्रतचरः सत्यवादी पुराणवित्।
निष्णातः सर्व्वविद्यासु शान्तो विगतकल्मषः॥
गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः।
विमुक्तः सर्व्वतो धीरो ब्रह्मभूतो द्विजोत्तमः॥
अनमित्रो नचामित्रो मैत्रश्चात्मविदेव च।
स्नातको जाप्यनिरतः सदा पुष्पबलिप्रियः[१]॥
ऋजुर्मृदुः क्षमी दान्तः सत्यव्रतपरः शुचिः।
वेदज्ञः सर्व्वशास्त्रज्ञ उपवासपरायणः॥
गृहस्थो ब्रह्मचारी च चतुर्व्वेदविदेव च।
एते द्विजातयः पुण्याः पाङ्क्तेयाः संप्रकीर्त्तिताः॥
नियतं तारयन्त्येव हव्यकव्ये च योजिताः॥

"ऋषीक" ऋषेः किञ्चिदूनगुणः। "ऋषेः किञ्चिद्गुणैर्न्यून ऋषीक इति कीर्त्तितः"इति सुमन्तुस्मरणात्। 'द्वादशवार्षिकः' द्वादशवार्षिकवेदव्रतचारी। 'सहस्रदः' गोसहस्रद इति मेधातिथिः। 'विमुक्तः सर्व्वतः' इत्यत्र ऋणादितिशेषः। 'अनमित्रः' शत्रुरहितः। न चामित्रः' न कस्यापि शत्रुः। 'मैत्रः' मैत्रीरतः। घृणी दयालुः।

इति पाङ्क्तेयाः।

अथ पङ्क्तिपावनाः।

आपस्तम्बः।

अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः।
तान्निबोधत कार्त्स्नेन द्विजाग्र्यान् पङ्क्तिपावनान्॥

'अपाङ्क्त्यः वक्ष्यमाणलक्षणैरपाङ्क्तेयैः' 'उपहता' दूषिता, पङ्क्तिः' परिषत्' 'यैः' ब्राह्मणैः 'पाव्यते' निर्दोषा क्रियते, तान् 'कार्त्स्नेन' वक्ष्यमाणान् 'निबोधत' शृणुत। अर्थवादरूपाण्येतानि पदानि। यथा ह्येकपङ्क्तयां भुञ्जानो दुष्टोऽन्यानदुष्टानपि दूषयति एवं पङ्क्तिपावनः स्वगुणातिशयादन्यकृतमपि दोषमपनुदतीत्यस्यार्थः। न चानेनापाङ्क्तेयानां भोजनमनुज्ञायते। किं तर्हि पङ्क्तिपावनस्तावदवश्यमन्वेषितव्यः।

अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च।
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः॥

'अग्र्याः' उत्तमाः। 'सर्व्वेषु' चतुर्ष्वपि, 'वेदेषु' सर्व्वसंशयव्युदासेन सम्प्रदायतः स्वीकृतसर्व्ववेदा इत्यर्थः, प्रोच्यते व्याख्यायते वेदार्थो यस्तानि 'प्रवचनान्यङ्गानि षडङ्गो वेदो यैरभ्यस्तोऽभ्यस्यते वा त इत्यर्थः 'श्रोत्रियान्वयजाः' पितृपितामहादया येषां तादृशा एवेत्यर्थः।

ननु विद्वद्भ्यो दानमुक्तं न चेह विद्वत्तोपात्ता न च तया विना पङ्क्तिपावनत्वोपपत्तिः। गुणविशेषापेक्षं हि पङ्क्तिपावनत्वं न गुणापचये युक्तम्।

---

[१] पुस्पफलप्रिय इति।

उच्यते ।

विद्वदभावे केवलाय श्रोत्रियाय दानार्थमेतत् । असति विदुषि श्रोत्रियाय दानं गौणमपि मुख्यमेवेत्युक्तं भवति ।

त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ।
ब्रह्मदेयानुसन्तानो ज्येष्ठसामग एव च ॥

तृणाचिकेताख्यो वेदभागोऽध्वर्यूणां पीतोदका जग्धतृणा इत्यादिः, तदध्ययन-सम्बन्धात् पुरुषोऽप्यत्र "त्रिणाचिकेतः" उच्यते । अन्ये तु त्रिणाचिकेतमधीयानानां व्रतमाम्नातं तद्येन चीर्णं सः 'त्रिणाचिकेतः' ।

अत्रापि लक्षणयैव पुरुष उच्यते । न चैवं मन्तव्यं तावन्मात्रेण पंक्तिपावनत्वम् । किं तर्हि, सति श्रोत्रियत्वादिगुणयोगे अधिकोऽयं गुणो द्रष्टव्यः । पञ्चाग्निविद्या नाम च्छान्दोग्योपनिषदिति तद्वेदनसम्बन्धात् पुरुषोऽपि "पञ्चाग्निः ।"

अन्ये तु यस्य त्रयः त्रेताग्नयः सभ्यावसथ्यावपि द्वौ स पञ्चाग्निरित्याहुः । 'त्रिसुपर्णः' मन्त्रः, तैत्तिरीयके वाह्वृच्ये वा ये ब्राह्मणास्त्रिसुपर्णं पठन्तीत्यादि पठ्यते त्रिसुपर्णाख्यं व्रतञ्च । षडङ्गं वेदं वेत्तीति 'षडङ्गवित्' । 'ब्रह्मदेयानुसन्तानः' ब्राह्मणाय दानेन या दत्ता तस्या अनुसन्तानस्तया जातः । 'ज्येष्ठसामगः' आज्यदोहानि आरण्यकसामानि सन्ति ज्येष्ठसामाख्यं व्रतञ्च । यद्व्रताचरणेन यस्तदधीते स एवमुच्यते ।

वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः ।
शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपावनाः ॥

षडङ्गविस्त्वस्योक्तत्वात्तदङ्गैर्विना स्वयमेवातिप्राज्ञतया यो वेदार्थं वेत्ति सोऽत्र 'वेदार्थवित्' अभिप्रेतः । 'प्रवक्ता' वेदस्याध्यापको व्याख्याता वा । 'ब्रह्मचारी' ब्रह्मचर्य्याश्रमवान् । ब्रह्मचारिग्रहणं यौवनोपलक्षणार्थमित्यन्ये । अतएव श्रोत्रियो ब्रह्मविद्युवेति याज्ञवल्क्येनोक्तम् । युवभ्यो दानं प्रथमं पितृवयस इत्येके इति गौतमी-येप्युक्तम् ।

पितृवयस इति । पितृपितामहप्रपितामहैस्तुल्यवयस्कान् तत्तत् स्थानीयान् ब्राह्मणान्निमन्त्रयेदित्यर्थः । सहस्रशब्दस्य बह्वर्थवाचित्वात् 'सहस्रदः' बहुप्रदः । 'शतायुः' वृद्धवयाः, स हि परिपक्वकपोलतया पात्रतामश्नुते । शतमित्यत्र प्रसिद्धिवशा-द्वर्षाणि संख्येयतयावगम्यन्ते ।

आह यमः—

वेदविद्याव्रतस्नाता ब्राह्मणाः पंक्तिपावनाः ।
व्रतचर्य्यासु निरता ये कृशाः कृशवृत्तयः ॥
अत्युत्क्रान्तास्त्वधर्मेभ्यस्ते द्विजाः पंक्तिपावनाः ।
सत्रिणो नियमस्थाश्च ये विप्राः श्रुतिसम्मताः ॥

अत्र मन्त्रिण इति वा पाठः। तस्मिन् पक्षे मन्त्रिणो गायत्र्यादिमन्त्रजपनिरताः।

प्राणिहिंसानिवृताश्च ते द्विजाः पङ्क्तिपावनाः।
अग्निहोत्ररताः शान्ताः क्षमावन्तोऽनसूयकाः॥
ये प्रतिग्रहनिःस्नेहास्ते द्विजाः पंक्तिपावनाः।
सत्रिणो नियमस्थाश्च ते विप्राः श्रुतिसम्मताः॥
माङ्गल्याचारयुक्ताश्च ते विप्राः पंक्तिपावनाः।
एते वै भूतले देवाः पूर्वं देवैर्विनिर्मिताः॥
यत् किञ्चित् पितृदेवत्वमेभ्यो दत्तं तदक्षयम्॥

तथा—

विद्वांसः सुव्रताः शान्ता ब्राह्मणाः पंक्तिपावनाः।
तैर्भुक्तं व्रजते देवाँस्तैर्भुक्तं व्रजते पितॄन्॥

आह शङ्खः—

षडङ्गवित् त्रिसौपर्णो बह्वृचो ज्येष्ठसामगः।
त्रिणाचिकेतः पञ्चाग्निर्ब्राह्मणाः पङ्क्तिपावनाः॥
ब्रह्मदेयानुसन्तानो ब्रह्मदेयाप्रदायकः।
ब्रह्मदेयापतिर्यश्च ब्राह्मणाः पङ्क्तिपावनाः॥
यजुषां पारगो यश्च साम्नां यश्चातिपारगः।
अथर्वशिरसोऽध्येता ब्राह्मणाः पङ्क्तिपावनाः॥
नित्यं योगपरो विद्वान् समलोष्टाश्मकाञ्चनः।
ध्यानशीलो यतिर्विद्वान् ब्राह्मणाः पङ्क्तिपावनाः॥

देवलः—

अथान्यांश्च प्रवक्ष्यामि[१] ब्राह्मणान् पङ्क्तिपावनान्।
समर्थान् हव्यकव्येषु स्वगुणैरभिपूजितान्॥
वेदवेदाङ्गनिष्णाता विशुद्धान्वययोनयः।
स्वकर्म्मादुःस्थिता विप्राः स्वपङ्क्तिं पावयन्ति हि॥
त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्।
छन्दोगः सोमयाजी च ब्राह्मणाः पङ्क्तिपावनाः॥
ज्येष्ठाश्रमनिविष्टश्च शतायुर्ज्येष्ठसामगः।
अग्निवित् सोमपाश्चैते ब्राह्मणाः पङ्क्तिपावना॥
ऋग्यजुःसामधर्म्मज्ञाः स्नातकाश्चाग्निहोत्रिणः।
ब्रह्मदेयानुसन्ताना विज्ञेयाः पङ्क्तिपावनाः॥

हारीतः।

दशोभयतः श्रोत्रियास्त्रिणाचिकेतस्त्रिमधुस्त्रिसौपर्णस्त्रिशीर्षा ज्येष्ठसामगः पञ्चाग्निः षडङ्गवित् रुद्रजाप्यूर्द्ध्वरेता ऋतुकालाभिगामी तत्वविच्चेति पङ्क्तिपावना भवन्ति।

[१] अथान्यान् संप्रवक्ष्यामीति।

अथाप्यत्रोदाहरन्ति ।

पचनः पाचनस्त्रेता यस्य पञ्चाग्नयो गृहे ।
सायं प्रातः प्रदीप्यन्ते स विप्रः पङ्क्तिपावनः ॥
सहस्रसम्मितं प्राहुः स्नातकं पूर्व्ववद् गुणैः ।
पञ्चाग्न्यादिगुणैर्युक्तः शतसाहस्र उच्यते ॥
अनृचां यदि वा कृत्स्नां पङ्क्तिं योजनमायताम् ।
पुनाति वेदविद्विप्रो नियुक्तः पङ्क्तिमूर्द्धनि ॥

'दशोभयतः श्रोत्रियाः' इत्यनेन याज्ञवल्क्याद्युक्ता मातृतः पितृतोऽपि दशपुरुष-शुद्धिरभिहिता । रुद्रशिरो वैश्वानरशिरोऽथर्व्वशिरश्चेति त्रयाणां शीर्ष्णामध्येता 'त्रिशीर्षा' । 'रुद्रजापी' नमस्ते रुद्रमन्यव इत्यादि रुद्राध्यानजपपरः । ऊद्र्ध्वमेव रेतो यस्य स "ऊद्र्ध्वरेताः । स च नैष्ठिकब्रह्मचारी । गृहस्थे तु नित्यमूद्र्ध्वरेतस्त्वस्या-युक्तत्वात् । ऋतुकाल एव गच्छतीति 'ऋतुकालाभिगामी' । स च धर्म्मपत्नीषु, यः सदेति व्यासवचनात् । 'तत्त्ववित्' आत्मतत्वज्ञः, स च विनापि त्रिदण्डग्रहणात्, गृहस्थाश्रमादावप्यात्मज्ञानाभ्यासस्योक्तत्वात् । पञ्चयज्ञाद्यर्थमन्नं पचतीति 'पचनः' आवसथ्यः । पाचयतीति 'पाचनः' सभ्यः । नियतपक्तृप्रत्यासत्तिलक्षणधर्म्मयोगा-दौपचारिकं प्रयोजकत्वम् । गार्हपत्य आहवनीयो दक्षिणाग्निरित्यग्नित्रयं 'त्रेता' । एते पञ्चाग्नयो यस्य गृहे दीप्यन्ते । वेदव्रताचरणपूर्वकमर्थज्ञानपर्य्यन्तं गृहीतवेदः 'स्नातकः' । तमेतं शमदमादिभिर्गुणैरुपेतं सहस्रसंख्यकभोक्तृद्विजपरिकल्पितपङ्क्ति-पावनत्वात् सहस्रसम्मितमित्याहुः । भ्रूणहत्यां वा एते घ्नन्ति ये ब्राह्मणास्त्रिसुपर्णं पठन्ति आसहस्रात् पङ्क्तिं पुनन्तीति । स एव पञ्चाग्नित्वादिगुणैरुपेतः 'शतसाहस्रः', लक्षपरिमितपङ्क्तिपावन इत्यर्थः । "अनृचां' वेदरहितानां, समन्ताद्योजनपरिमित-देशव्यापिनीं पङ्क्तिं वेदरहस्यवित् ब्रह्मवित् पुनाति ।

आह गौतमः ।

पङ्क्तिपावनाः । षडङ्गवित् ज्येष्टसामगः त्रिणाचिकेतस्त्रिसुपर्णः पञ्चाग्निः स्नातकोमन्त्रविद् ब्राह्मणविद्धर्म्मज्ञो ब्रह्मदेयानुसन्तान इति ।

आह विष्णुश्चैवम्—

यथा पित्र्येषु कर्म्मस्विति पङ्क्तिपावना एवं दैवेष्वपि ।

वसिष्ठः ।

त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णश्चतुर्म्मेधी वाजसनेयी षडङ्गवित् ब्रह्मदेयानु-सन्तानः छन्दोगो ज्येष्ठसामगो मन्त्रब्राह्मणविद् यश्च धर्म्ममधीते यस्य च दशपुरुषं मातृपितृवंशः श्रोत्रियो विज्ञायते विद्वांसः स्नातकाश्चैते पङ्क्तिपावना भवन्ति ।

'चतुर्म्मेधी' चातुर्म्मास्ययाजी। तत्र हि चत्वारो मेधा भवन्ति। ज्योतिष्टोमयाजी वा। एवंरूपो वाजसनेयीति सम्बन्धः। विद्वांस इति बहुवचनं वैदुष्यस्यानेकरूपत्वार्थम्।

आपस्तम्बः।

त्रिमधुस्त्रिसुपर्णस्त्रिणाचिकेतः पञ्चाग्निः छन्दोगो ज्येष्ठसामगो वेदाध्याय्यनूचानपुत्र इत्येते श्राद्धे भुञ्जानाः पङ्क्तिपावना भवन्ति।

बौधायनः।

त्रिमधुस्तृणाचिकेतस्त्रिसुपर्णः पञ्चाग्निः षडङ्गवित् त्रिशीर्षको ज्येष्ठसामग इति पङ्क्तिपावनाः।

पैठीनसिः।

अथातः पङ्क्तिपावना भवन्ति त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णश्चीर्णव्रतच्छन्दोगो ज्येष्ठसामगो वेदाध्याय्यनूचानपुत्रो ब्रह्मदेयानुसन्तानः सहस्रदो रुद्राध्यायी चतुर्वेदषडङ्गविदथर्व्वशिरोऽध्यायी पञ्चाग्निर्वेदजापी चेति पङ्क्तिपावनाः। तेषामेकेकः पुनाति पङ्क्तिं नियुक्तो मूर्द्धनि सहस्रैरथाह्वयताम्। 'रुद्राध्यायी' शतरुद्रीयजपशीलः।

उशनाः।

तत्र ब्राह्मणो वेदविद्याव्रतस्नातकः पञ्चपुरुषपारम्पर्य्यविखण्डितचारित्रमर्य्यादस्त्रिसुपर्णोऽङ्गविज्जेष्ठसामगः शतवर्षालुप्तधर्म्माध्ययनः मन्त्रप्रभृतिजाप्यप्रवचनपाद्यपारगो ऋतुकालाभिगामी छन्दसा शुद्धदशपुरुषः स्नातक इति पङ्क्तिपावनाः।

अत्र विष्णुः।

अथ पङ्क्तिपावनाः त्रिणाचिकेतः पञ्चाग्निर्ज्येष्ठसामगो वेदपारगो वेदाङ्गस्याप्येकस्य पारगः पुराणेतिहासव्याकरणपारगः धर्म्मशास्त्रैकस्यापि पारगः तीर्थपूतो यज्ञपूतस्तपः पूतः सत्यपूतो दानपूतो मन्त्रपूतो गायत्रीजपनिरतो ब्रह्मदेयानुसन्तानस्त्रिसुपर्णो जामाता दौहित्रश्चेति पात्रं विशेषेण वयोन इति।

ब्रह्मदेया ब्राह्मविवाहोढ़ा एव सन्तानो यस्य असौ 'ब्रह्मदेयानुसन्तानः'।

ब्रह्मदेयानुसन्तानो ब्रह्मदेयाप्रदायकः।
ब्रह्मदेयापतिश्चैव ब्राह्मणाः पङ्क्तिपावनाः॥

ब्रह्माण्डपुराणे।

षडङ्गवित् ज्ञानयोगी सर्व्वतन्त्रस्तथैव च।
यायावरश्च पञ्चैते विज्ञेयाः पङ्क्तिपावनाः॥

सर्व्वतन्त्रशालीनाख्यो गृहस्थविशेषः। यायावरोऽपि गृहस्थविशेषः।

ये भाष्ये वैदिके केचिद् ये च व्याकरणे रताः।
अधीयानाः पुराणञ्च धर्म्मशास्त्राण्यथापि वा॥

चतुर्दशानां विद्यानामेकस्या अपि पारगः।
श्राद्धकल्पं पठेद् यश्च सर्व्वे ते पङ्क्तिपावनाः॥

गार्ग्यः।

दातुं भोक्तुञ्च जानन्ति ये विप्राः शंसितव्रताः।
संस्कारकर्म्मविज्ञानसम्पन्नाः पङ्क्तिपावनाः॥

कूर्म्मपुराणे।

महादेवार्च्चनरतो महादेवपरायणः।
वैष्णवो वाथ यो नित्यं स विप्रः पङ्क्तिपावनः॥

आह वसिष्ठः।

अथाप्युदाहरन्ति।

अथचेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः।
अदूष्यन्तं यमः प्राह पङ्क्तिपावन एव सः॥

मन्त्रविद्ग्रहणं गुणप्रकर्षोपलक्षणार्थम्। तस्मिन् सति शरीरगतैर्दोषैर्युक्तोऽपि न दूषयितव्यः। जन्मान्तरीयदुःखानुभवेन क्षीणप्रायदोषचिन्हसम्बन्धित्वात्। यमग्रहणं स्तुत्यर्थम्। स हि कर्म्मविपाकाभिज्ञ इति। पङ्क्तिपावन एवासौ सम्प्रत्यनपराधित्वादिति।

इति पङ्क्तिपावनाः

———

अथ पङ्क्तिपावनपावनाः ।

वृद्धमनुः—

यश्च व्याकुरुतेवाथ यश्च मीमांसतेऽध्वरम् ।
यश्च वेत्त्यात्मकैवल्यं पङ्क्तिपावनपावनाः ॥

यः पाणिनिप्रभृतिप्रणीतशब्दानुशासनानुसारेण प्रकृतिप्रत्ययविभागेन शब्दान् व्युत्पादयति, यश्च मीमांसाशास्त्रविचारपरिणततया अध्वरं यज्ञकर्म्म मीमांसते विविच्य प्रतिपादयति, यश्च आत्मकैवल्यं ब्रह्माद्वैतं वेत्ति साक्षात्कुरुते, एते पंक्तिपावनेभ्योऽपि पावनाः अतिशयेन पुण्यतमा इत्यर्थः ।

अतः सर्व्वेभ्योऽपि पूर्व्वप्रतिपादितेभ्यः प्रथमं प्रयत्नादेते गवेषणीया इत्यवगन्तव्यम् ।

मत्स्यपुराणे—

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् ।
सामस्वर विधिज्ञश्च पङ्क्तिपावनपावनाः ॥

ब्रह्मवैवर्त्ते—

वेदवेदाङ्गविद् यज्वा शान्तो दान्तः क्षमान्वितः ।
वीतस्पृहस्तपस्वी च पङ्क्तिपावनपावनाः ॥
धीमानलोलुपः शान्तः सन्तुष्टो येनकेनचित् ।
समदृष्टिः सत्वादी पङ्क्तिपावनपावनाः ॥
समः शत्रौ च मित्रे च समलोष्टाश्मकाञ्चनः ।
न रज्यते न च द्वेष्टि पङ्क्तिपावनपावनाः ॥

गरुड़पुराणे—

शांख्यशास्त्रार्थनिपुणः[1] योगशास्त्रार्थतत्त्ववित् ।
वेदान्तनिष्ठबुद्धिश्च पङ्क्तिपावनपावनाः ॥
प्रियवादी शुचिर्मौनी सर्व्वभूतहितेरतः ।
एकान्तशीलोध्यानी च पङ्क्तिपावनपावनाः ॥
यमैश्च नियमैः पूतः प्रत्याहारपरायणः ।
प्रियाप्रियाभ्यामस्पृष्टः पङ्क्तिपावनपावनाः ॥
प्राणायामपरो धीरो मैत्रः करुण एव च ।
अध्यात्मज्ञानपूतात्मा पङ्क्तिपावनपावनाः ॥

सौरपुराणे—

यो न निन्दति न द्वेष्टि न शोचति न कांक्षति ।
आत्मारामः पूर्णकामः पङ्क्तिपावनपावनाः ॥

---

[1] शांख्यशास्त्रेऽतिनिपुण इति ।

यस्तु सर्व्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्व्वभूतेषु चात्मानं स च पावनपावनः ॥
अशनायापिपासाभ्यां शीतोष्णादिभिरेव च ।
अस्पृष्टः शोकमोहाभ्यां पङ्क्तिपावनपावनः ॥
ओमित्येकाक्षरं ब्रह्म व्याहरत्यनिशं शुचिः ।
आत्मैकतानधीर्य्योऽसौ पङ्क्तिपावनपावनः ॥
यतेन्द्रियस्तपोनिष्ठो निराशीरपरिग्रहः ।
ज्ञानविज्ञानचित्तात्मा पङ्क्तिपावनपावनः ॥
॥ इति पङ्क्तिपावनपावनः ॥

अथ योगिनां श्राद्धे नियोग उच्यते ।

तत्राह वृद्धशातातपः—

योगिनो भोजयेन्नित्यं दृष्टतत्त्वान् मनीषिणः ।
तेषां तु दत्तमक्षय्यं भवतीति न संशयः ॥

'योगिनः' अष्टाङ्गयोगयुक्तान् । 'तत्त्वानि' महदादीनि, देशकालकरणावस्था-सत्तास्वरूपेण विशिष्टानि शास्त्रतः प्रत्यक्षतश्च यैर्दृष्टानि तान् ।

अथवा—

'तत्त्वं' आरोपितसंशयानध्यवसतोऽस्य दृष्टात्मस्वभावः, स वेदान्तवाक्य-विचारसमुद्बोधैः उदर्कनिश्चयालोकनसमुत्पन्नजितान्तःकरणजन्यसाक्षात्कारगोचरीकृतो यैस्तान् । अतएव मनीषिणः हेयोपादेयविवेकपूर्वकं हेयाद्विषयपञ्चकादुपादेयात्मतत्त्व-लाभोपायनिपुणास्तान् । भोजयेदित्यविशेषतोऽभिधानाद्दैवपित्र्यमानुष्येषु कर्म्मस्विति लभ्यते, प्रकरणाद्वा पित्र्येष्विति । नित्यमिति नियमेन । नात्र जीवनवतोऽहरहर्य्यो-गित्वनिमित्तं भोजनं विधीयते । किन्तु निमित्तान्तरादेव प्राप्तेषु देवपित्र्यादिषु भोजनात्मकेषु कर्म्मसूपस्थितेषु भोजनीयानां योगिनां च लाभे सति योगिनोऽवश्यं भोजनीया यथेष्टमन्ये इत्येष नित्यमित्यस्यार्थः । आदरार्थो वा नित्यशब्दः । फलाधिक्यार्थश्चादरः । आधिक्यमाह , तेषान्तु दत्तमक्षय्यं भवतीति निश्चय एव न संशय इति ।

ब्रह्मवैवर्त्तेऽपि योगिप्रशंसापूर्व्वकं तद्भक्तस्य फलगौरवं दर्शितम् ।

ऋचो हि यो वेद स वेद वेदान्
यजूंषि यो वेद स वेद यज्ञान् ।
सामानि यो वेद स वेद ब्रह्म
योगान् हि यो वेद स वेद सर्व्वम् ॥

स खलु वेदान् वेद यो ऋचो वेद स एव भुङ्क्ते य एव घृतेन भुङ्क्ते इति च । एषा श्रुतिः । एवमुत्तरत्रापि । अथ ऋग्भिः श्राद्धोक्तानां यः ऋचां वेत्ता स सर्व्व-

वेदवेत्तैव भवतीति श्रुतिः। 'यजूंषि' सन्निपत्योपकारकारादुपकारकान्तरवर्गसहित-दर्शपूर्णमासादियज्ञविधायकवाक्यरूपाणि स्मारकाणि च मन्त्ररूपाणि, 'यो वेद स यज्ञान् वेद'। 'सामानि' ज्येष्ठसामादीनि ऋगाधारगीतिरूपाणि, तानि यो वेद असौ परब्रह्मज्ञानोपायभूतं शब्दब्रह्म वेद। विशुद्धमनोजन्यसाक्षात्कारत्वान्मानस आत्मा यस्तं 'वेद' स सर्व्वं 'वेद' नास्य किञ्चिद्वेदितव्यमवशिष्यत इत्यर्थः।

तथा—

सर्व्वं योगीश्वरैर्व्याप्तं त्रैलोक्यं हि निरन्तरम्।
यस्मात् पश्यन्ति ते सर्व्वं यत्किञ्चिज्जगति स्थितम्॥
व्यक्ताव्यक्तं वशीकृत्य सत्वञ्चापि ततः परम्।
सच्चासच्चोभयं सृष्टं सर्व्वं सत्त्वं महात्मना॥
सर्व्वज्ञज्ञानसृष्टानि मोक्षादीनि महात्मनाम्।
तस्मात् तेषां सदा भक्तः प्राप्नोत्युन्मेषवच्छुभम्॥

त्रयाणां लोकानां समाहारः 'त्रैलोक्यं' 'तत्सर्व्वं' योगीश्वरैः अविक्षतयोगतया योगिष्वैश्वर्य्यं महिमानं प्राप्तैः, 'निरन्तरं सर्व्वकालं' 'व्याप्तं' स्वेन रूपेण सह सम्बन्धं नीतम्। व्याप्त्यनुमापकं लिङ्गमाह—

'यस्मात् पश्यन्ति ते सर्व्वं' इति। 'सर्व्वं' वेदजातं 'पश्यन्ति' साक्षात्कुर्व्वन्ति। तथा च पातञ्जलं सूत्रम्। "भुवनज्ञानं सूर्य्यसंयमात्" इति। 'व्यक्तं' सर्व्वलोक-प्रतीतियोग्यं स्थूलं वस्तु, कार्य्यमित्यर्थः। 'अव्यक्तं' सूक्ष्मं, कारणमित्यर्थः। अथवा 'व्यक्तं' गुणकार्य्यं क्षित्यादिः, 'अव्यक्तं' प्रकृतिः। 'वशीकृत्य' सन्त इति शेषः। 'सत्त्वं' सत्त्वप्रधाना बुद्धिरन्तःकरणं वा। तस्मात् परं परमात्मानञ्च पश्यन्ति। "मनसस्तु पराबुद्धिर्य्यो बुद्धेः परतस्तु सः" इति भगवद्वचनात्। सत्प्रयोगगोचरं 'सत्'। तद्विपरीतं 'असत्'। 'उभयात्मकं' सदसत्। महता आत्मना भगवता ब्रह्मणेत्यर्थः। 'सर्व्वज्ञः' ईश्वरः, तद्विषयं ज्ञानं 'सर्व्वज्ञज्ञानम्'। यतस्तेषां महात्मनां सर्व्वज्ञज्ञानेन 'सृष्टानि मोक्षादीनि'। यत एवं शिष्टास्ते अतस्तेषां 'भक्तः' शुश्रूषादिकर्त्ता 'उन्मेषवत्' उत्तरोत्तरमुपचीयमानं, 'शुभं' बहुविधं फलं, 'प्राप्नोति'।

तथा—

क्रियया गुरुपूजाभिर्य्योगं कुर्व्वन्ति योगिनः।
तेन चाप्याययन्ते ते पितरो योगवर्द्धनात्॥
आप्यायिताः पुनः सोमं पितरो योगभूषिताः।
आप्याययन्ति योगेन त्रैलोक्यं येन जीवति॥
पितृणां हि बलं योगो योगात्सोमः प्रवर्त्तते।
तस्माच्छ्राद्धानि देयानि योगिनां यत्नतः सदा॥

'क्रियया' वर्णाश्रमाधिकारविहितेनाग्निहोत्रादिकर्म्मणा, 'गुरुपूजाभिः' परापर-गुरुभक्तिभिश्च, विशिष्टं योगिनो योगमष्टाङ्गं कुर्व्वन्ति। तद्योगजन्येन चापूर्व्वेण स्वपितृपितामहादीनग्निष्वात्तादींश्च 'आप्याययन्ते' प्रीणयन्ति। ते चाप्यायिताः

'सोमं' चन्द्रं आप्याययन्ति। येन ह्याप्यायितेन सता चन्द्रेण त्रैलोक्यमाप्याय्यमानं 'जीवति' चिरमनुवर्त्तते। अस्यामाप्यायनपरम्परायां हेतुरुक्तः पितॄणां हि बलमित्यादिना। अतो योगिनां विश्वजीवनोपयोगियोगानुष्ठानवत्त्वेन सर्वेभ्योऽपि वैशिष्ट्याद‌भ्यर्थनादिक्लेशमयेनातिप्रयत्नेनापि तानामन्त्र्य सत्कृत्य च तेभ्यः श्राद्धानि देयानि।

तथा—

अश्वमेधसहस्राच्च राजसूयशतादपि।
पुण्डरीकसहस्राच्च योगिभुक्तं विशिष्यते॥

अश्वमेधादयः पुण्डरीकान्ताः क्रतवः।

सोमाध्वरः पितृगणो योगाध्वरश्च चन्द्रमाः।
श्राद्धे योगिनियोगस्तु तस्मात्कार्य्यो विजानता॥
तस्मात्सर्व्वं परिच्छिन्नं विश्वमेतदियत्तया।
अविद्यान्तर्गतं योगे नचेयत्ताप्रमा मता॥
तस्मादनन्तफलदं प्रदत्तं योगिनां हविः।
कारणानुगतं कार्य्यमिति त्वं मान्यथा कृथाः॥
ज्ञानी यस्य गृहेऽश्नाति जलं पिबति वा क्वचित्।
कृतकृत्यो भवेदेष यजमानो न संशयः॥

'नियोगः' निमन्त्रणम्। अविद्यान्तर्गतमेतद्विश्वं सर्व्वमेव इयत्तया 'परिच्छिन्नं, कलितम्। योगे तु 'इयत्ताप्रमा' परिमाणपरिकलना नास्ति। अतोऽपरिमितयोगविशिष्टेभ्यः प्रदत्तं हविः 'अनन्तफलदं' अपरिमितफलदम्, एव भवति। अत्र हेतुः। कारणानुगतं कार्य्यमिति। कारणधर्म्मानुविधायिनो हि कार्य्यधर्म्मा दृष्टाः। अतोऽपरिमितात्कारणादपरिमितमेव कार्य्यं भवितुमुचितम्। इत्येतत् 'मान्यथा कृथाः' मान्यथा मंस्था इत्यर्थः।

छागलेयः।

मूर्त्तं ब्रह्म हरिः साक्षाद्दैत्यारिर्य्योगविन्मतः।
अतो योगविदो भोज्याः श्राद्धेषु पितृतृप्तये॥

वृद्धशातातपः—

ज्ञानी यस्य गृहेऽश्नाति उदकं वा पिबेद्यदि।
कृतन्तेनेह सत्कृत्यं तारितञ्च कुलत्रयम्॥

ब्रह्मपुराणे—

षडङ्गवित् ज्ञानयोगी योगतत्त्वज्ञ एव च।
अयाचिताशी विप्रो यः श्राद्धकर्म्मणि भोजयेत्॥

समाधिशब्दवाच्यशुद्धात्मपरामर्शरूपयोगभूमिकानिषण्णो ज्ञानयोगीत्युच्यते।

ब्रह्मवैवर्त्ते—

बहुच्छिद्रः पुरा प्रोक्तः पैत्रो यज्ञो महर्षिभिः ।
निष्प्रत्यूहश्च निश्छिद्रो जायते योगरक्षया ॥

'निष्प्रत्यूहः' यातुधानादिकृतोपघातरहितः । 'निश्छिद्रः' न्यूनातिरिक्ततादिदोष-जनितफलवैकल्यविवर्जितः ।

मार्कण्डेयपुराणे—

योगिनश्च तदा श्राद्धे भोजनीया विपश्चिता ।
योगाधारा हि पितरस्तस्मात्तान् पूजयेत् सदा ॥

तदेतदमावास्याष्टकाकुतपापराह्णादिकाले । सदेति सर्व्वेषु श्राद्धप्रयोगेषु ।

तथा—

ब्राह्मणानां सहस्रस्य योगी त्वग्रासनी यदि ।
यजमानञ्च भोक्तृंश्च नौरिवाम्भसि तारयेत् ॥

ब्राह्मणानां सहस्रस्य पङ्क्तावग्रे आरम्भे स्थितमासनं यस्यासौ 'अग्रासनी' । तारयेत् संसृतिमहार्णवादिति शेषः ।

तथा—

पितृगाथास्तथैवात्र गीयन्ते ब्रह्मवादिभिः ।
या गीताः पितृभिः पूर्व्वमैलस्यासन्महीपतेः ॥
कदा नः सन्ततावग्र्यः कस्यचिद् भविता सुतः ।
यो योगिभुक्तशेषान्नात् भुवि पिण्डान् प्रदास्यति ॥

'ऐलस्य महीपतेः' पुरूरवसः, पुरस्तात् पितृभिर्या 'गीताः' कीर्त्तिताः आसन् भुक्तशेषादन्नात् कियदप्युद्धृत्य 'नः' अस्मभ्यं, पिण्डान् प्रदास्यतीति ।

गाथान्तरमाह आपस्तम्बः ।

अपि स्यान्न कुले जातो भोजयेद् यस्तु योगिनम् ।
विप्रं श्राद्धे प्रयत्नेन तेन तृप्यामहे वयम् ॥

इति योगिनां श्राद्धे नियोगः ।

अथ योगिनां सर्व्वोत्कृष्टत्वमुच्यते ।

पद्मपुराणे—

साङ्गान् यश्चतुरो वेदान् योऽधीते स कृतार्थवत् ।
जन्मवान् कर्म्मसंशुद्धः स श्राद्धे प्रयतो मतः ॥
तादृशादयुताच्छ्रेयानेको योगसमाश्रयः ।

ब्रह्मवैवर्त्ते—

सहस्रशस्तु विप्रान् वै भोजयेद् यान् यथागतान् ।
एकस्तान् मन्त्रवित्प्रीतः सर्व्वानर्हति धर्म्मतः ॥

एतानेव च धर्म्मज्ञान् भोजयेद् यः सहस्रशः ।
एकस्तान् स्नातकः प्रीतः सर्व्वानर्हति श्रृण्वतः ॥
सङ्कल्पिनां सहस्रेण स्नातकानां शतेन च ।
योगाचार्य्येण यद् भुक्तं त्रायते महतो भयात् ॥
गृहस्थानां सहस्राच्च वानप्रस्थशतादपि ।
ब्रह्मचारिसहस्राच्च योगीत्वेको विशिष्यते ॥
नास्तिको वा विधर्म्मो वा सङ्कीर्णस्तस्करोऽपि वा ।
अत्यन्तं तारयेन्नूनं योगीत्याह प्रजापतिः ॥
यस्तिष्ठेदेकपादेन वायुभक्षः शतं समाः ।
ध्यानयोगी परस्तस्मादिति ब्रह्मानुशासनम् ॥

'यथागतान्' यथाप्राप्तान्, स्वाध्यायाध्ययनतदर्थज्ञानादिशून्यानिति यावत् । तानेतान् सहस्रशस्तु भोजितानेक एव स्वाध्यायतदर्थविद् ब्राह्मणो भोजितः सन्नर्हति । तावत्सङ्ख्यक ब्राह्मणभोजनोत्पाद्यं सुकृतं जनयितुं समर्थ इत्यर्थः, 'स्नातकः प्रीतः' भोजनेनेति शेषः । 'सङ्कल्पिनः' नानाव्रतानुष्ठानशीलाः । योगाचार्य्येण चैकेन तत्तुल्यतया महतः पापभयाद्भोजयितारं 'त्रायते' रक्षति ।

कूर्म्मपुराणे—

भोजयेद्योगिनं शान्तं तत्वज्ञानरतं यतिम् ।
अलाभे नैष्ठिकं दान्तमुपकुर्व्वाणकं तथा ॥
तस्मात् यत्नेन योगीन्द्रमीश्वरज्ञानतत्परम् ।
भोजयेद्धव्यकव्येषु अलाभादितरान् द्विजान् ॥

वायुपुराणे—

गृहस्थानां सहस्रेण वानप्रस्थशतेन च ।
ब्रह्मचारिसहस्रेण योगीत्वेको विशिष्यते ॥
नास्तिको वा विकर्म्मा वा सङ्कीर्णस्तस्करोऽपि वा ।
नान्यत्तु कारणं दाने योगिष्वाह प्रजापतिः ॥
पितरस्तस्य तुष्यन्ति सुवृष्टेनेव कर्षकाः ।
पुत्रो वाप्यथवा पौत्रो ध्यानिनं यस्तु भोजयेत् ॥

आहोशनाः—

यं कञ्चिदपि यो वेद योगधर्म्मसमाश्रितः ।
सम्यग् वर्णाश्रमास्तेभ्यस्तत्पात्रं परमं मतम् ॥

ये सम्यग्वर्णाश्रमाचाराः, 'तेभ्यः' 'तत्' पूर्वार्द्धेनोक्तं, परमं पात्रं मतम् इत्यर्थः । एतद्योगिनः प्रशंसा शातातपेन दृष्टतत्वानिति विशेषितत्वात् ।

ब्रह्मवैवर्त्ते च "ये तु वृत्ते स्थिता नित्यं ज्ञानिनो ध्यानिनस्तथा" इति वृत्तस्थानामेव ज्ञानिनां ध्यानिनां भोजनीयत्वाभिधानात्, आत्मादितत्त्वपरिस्थितिः "ज्ञानं" मूर्त्तामूर्त्तब्रह्मानुचिन्तनं 'ध्यानं' ।

महाभारते भगवद्गीतासु ।

तपस्विभ्योऽधिको योगी ज्ञानिभ्यश्चाधिको मतः ।
कर्म्मिभ्यश्चाधिको योगी तस्मात् योगी भवार्जुनेति ॥

इति योगिनां सर्व्वोत्कृष्टत्वनिरूपणम् ।

अथान्यत्र योगिनोऽतिक्रमदोषमाह ।

छागलेयः—

योगिनं समतिक्रम्य गृहस्थं यदि पूजयेत् ।
न तत्फलमवाप्नोति सर्व्वं गोत्रं प्रतापयेत् ॥

'गृहस्थं' अयोगिनम् । तस्य कर्म्मणः फलं न लभते । तथा "सर्व्वं गोत्रं" सर्व्वानपि स्वगोत्रोद्भवान् पूर्व्वपुरुषान्, 'प्रतापयेत्' योग्यतिक्रमजनितप्रत्यवायेन-दुःखिनः कुर्य्यादित्यर्थः ।

तथा—

योगिनं समतिक्रम्य भोजयन्ति परस्परम् ।
दाता भोक्ता च नरकं गच्छतः सह बान्धवैः ॥

अत्र दातृभोक्त्रोरुभयोरपि नरकगमनं, द्वयोरपि योग्यतिक्रमाभिप्राये सतीति वेदितव्यम् । अत आह परस्परं भोजयन्तीति । अयमिदानीं भोजितः सन् स्वगृहे मां भोजयिष्यति किं योगिनेत्यभिप्रायवान्, योगिनं दाता भोजयति । भोक्तापि तथैवानुसन्दधानो भुङ्क्ते इति । द्वयोरपि योग्यतिक्रमाभिप्रायः । यदा तु दातुरेवातिक्रमोऽभिप्रेतस्तदा न भोक्तुः प्रत्यवायः । अभिप्रायमन्तरेण प्रमादकृते व्यतिक्रमे श्राद्धवैकल्यमात्रं, न तदा कस्यापि निरयपात इति ।

वृद्धशातातपोऽपि ।

योगिनं समतिक्रम्य गृहस्थं यदि भोजयेत् ।
न तत्फलमवाप्नोति स्वर्गस्थमपि पातयेत् ॥

यो गृह एव तिष्ठति न योगेऽसौ अत्र 'गृहस्थः' । 'स्वर्गस्थं' स्वपितृवर्गमिति शेषः ।

योगिनन्तु व्यतिक्रम्य पूजयन्ति परस्परम् ।
भोक्तारस्तु सदातारो नरके स्युः सबान्धवा इति ॥

इति योगिनोऽतिक्रमे दोषनिरूपणम् ।

अथ गृहस्थादीनां योगित्वमुच्यते ।

तत्र योगो नाम मुख्यया वृत्या जीवपरमात्मनोरेकीभावलक्षणः सम्बन्धः । स यद्यपि नैसर्गिकत्वेन सर्व्वक्षेत्रज्ञसाधारणस्तथाप्यनाद्यविद्याकृतभेदाभासतिरस्कृतः सन्न संसृतिमताञ्जीवानां, किन्तु मुक्तानामेवास्ति । अस्य चोपाय आत्मतत्त्वज्ञानम् । तदुपायश्च यमादिसमाध्यन्तोऽष्टाङ्गोऽपि योगः । युज्यतेऽनेन जीवः परमात्मना सहेति करणव्युत्पत्तिमाश्रित्य मुख्यया वा वृत्या स योगः । तद्वन्तो-

गृहस्थादयोऽपि श्रुतिसामर्थ्यात् योगिनः। न चैतद्वक्तव्यम्। मोक्षोपायत्वात् योगस्य, मुमुक्षोरेव योगसम्बन्धो न गृहस्थस्येति। मैवं। यतो वहुतरदोषदूषितविषयरस-विरज्यमानमनसो गृहस्थस्यापि सर्व्वपुरुषार्थातिशायिनि मोक्षे कामनोपपद्यते। सत्याञ्च तस्यान्तदुपायानुष्ठानसमर्थस्य विदुषो निर्व्यूढाधिकारतया युक्तमेव योगानुष्ठानम्। सम्यगनुष्ठितयोगस्य च मोक्ष इति। न च स्वाश्रमकर्म्मानुष्ठानावरुद्धकालस्य गृहस्थस्य योगाभ्यासानवकाश इति वाच्यम्। भिक्षोरिव नियतकालकर्म्मानुष्ठानान्तरालेषु तस्याप्यवकाशसम्भवात्। न च तुरीयाश्रमसध्रीचीनस्यैव योगस्य मोक्षसाधनत्वात् गृहस्थस्यानर्थकं योगानुष्ठानम्। यतः स्मरन्ति।

न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते॥ इति॥

श्रूयते च गृहस्थानामेव जनक-जाबाल-वामदेव-प्रह्लादप्रभृतीनां योगाभ्यासान्मोक्ष-इति। अत्र च तत्वज्ञाननिष्ठ इत्यात्मतत्त्वज्ञाननिष्ठ इत्यवगन्तव्यम्। अनेन चार्थादा-त्मतत्त्वज्ञानोपायभूतो यमादिः समाध्यन्तोऽष्टाङ्गोऽपि गृहस्थस्योक्तो भवति।

तथा च कूर्म्मपुराणे।

गृहस्था नैष्ठिकाः शान्ता वनस्था यतयोऽपि वा।
योगिनः पर्य्युपासन्ते परमात्मानमात्मनीति॥

अतो गृहस्थादयोऽपि योगिनः। एवं च सति स्वाध्यायादिगुणसम्पदा तुल्येषु गृहस्थादिष्वपि मध्ये ये योगिनस्तत्पुरःसरेभ्यः श्राद्धानि देयानिति।

अथ यतेरत्यन्तविशिष्टतया श्राद्धनियोग उच्यते।

तत्र आह मनुः।

ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथापरे।
तपःस्वाध्यायनिष्ठाश्च कर्म्मनिष्ठास्तथैव च॥
ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः।
हव्यकव्यानि दैयानि[१] सर्व्वेष्वेव चतुर्ष्वपि॥

'ज्ञाननिष्ठः' परिव्राजकः। तस्य ह्यात्मतत्वज्ञाने निष्ठा प्रकर्षो भवति। 'तपोनिष्ठः' वानप्रस्थः। स हि तापस इत्याख्यायते। ग्रीष्मे पञ्चतपास्तु स्यादिति तपोविधानात्। 'तपः स्वाध्यायनिष्ठाः' ब्रह्मचारिणः। कर्म्मनिष्ठाः' गृहस्थाः। एषामपि 'कव्यानि' पितृनुद्दिश्य दीयमानान्यन्नानि, 'ज्ञाननिष्ठेषु प्रतिष्ठाप्यानि' तेभ्यो-देयानीत्यर्थः। प्रयत्नवचनात्तदभावे अन्येभ्योऽपि देयानि। हव्यानि चतुर्ष्वपि प्रतिष्ठाप्यानि। 'यथान्यायं' शास्त्रोक्तेन विधिना।

वार्हस्पत्यसंहितायां

ज्ञाननिष्ठा हि यतयस्तपोनिष्ठा वनाश्रयाः[२]।
कर्म्मनिष्ठा हि गृहिणः आद्याः स्वाध्यायनिष्ठिताः॥

---

[१] हव्यानि च यथान्यायं इति। [२] वनाश्रमा इति।

'आद्याः' ब्रह्मचारिणः ।

ज्ञाननिष्ठेसु कव्यानि प्रतिपाद्यानि यत्नतः ।
हव्यकव्यानि देयानि सर्व्वेष्वेव चतुर्ष्वपीति ॥

यमस्मृति—कूर्म्मपुराणयोः ।

प्रकृतेर्गुणतत्वज्ञो यस्याश्नाति यतिर्हविः ।
फलं वेदविदान्तस्य सहस्रादतिरिच्यते ॥
तस्मादग्रासने भोज्यो यजता संयतो यतिः ।
श्रोत्रियो ब्रह्मचारी वा यज्ञस्तेन न लुप्यते ॥

यतेरनग्रभोजने दोषमाह यमः ।

यस्य वै यजमानस्य नाग्रे भुङ्क्ते यतिस्तथा ।
अनिष्टमद्भूतं तस्य हरते रक्षसाङ्गणः ॥

'अद्भूतमनिष्ठं' पुत्रकलत्रादिनाशरूपं, तस्य सम्बन्धितया रक्षसाङ्गणः 'हरते' उपाहरतीत्यर्थः ।

ब्रह्मवैवर्त्ते—

यानि श्राद्धानि योगीन्द्रा यतयो ब्रह्मनिष्ठिताः ।
अलङ्कुर्व्वन्ति तान्येव पितृणां तृप्तये ध्रुवम् ॥
पञ्चविंशतितत्वज्ञान् पञ्चतन्त्राश्रमे रतान् ।
यतीनाहुः स्वधा-स्वाहायोग्यान् पात्रतया बुधाः ॥
रागद्वेषविनिर्मुक्तानाप्तान् ये योगिनो यतीन् ।
भोजयन्ति फलं तेषामनन्तं[1] तत्प्रदायिनाम् ॥
ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः ।
हव्यानि च यथान्यायं न मिथ्याहङ्कृतात्मसु ॥
योगाचार्य्यं यतिं सम्यग् यः पूजयति भक्तितः ।
स फलं समवाप्नोति कारणानुगतं बुधः ॥
मूर्त्तं ब्रह्म हरिः साक्षाद्दैत्यारिर्य्योगवित्ततः[2] ।
अहं नारायणो ब्रह्मा यतिदेहसमाश्रयः ॥
ध्यानेन सततं युक्तं सर्व्वसङ्गविवार्जितम् ।
दैवे कार्य्ये[3] च पित्र्ये च पूजयेद्धर्मरेतसम् ॥

छागलेयः—

गन्धमाल्यफलैश्चैव[4] भोजनैः क्षीरसंस्कृतैः ।
पूजयेच्च[5] यतिं श्राद्धे पितृणां तुष्टिकारकम् ॥

---

१ तेषामलभ्यमिति ।
२ दैत्यारिर्योगविन्मत इति ।
३ देवकार्य्ये इति ।
४ गन्धमाल्योपलेपैश्चेति ।
५ यः पूजयेदिति ।

ब्रह्मचारी यतिश्चैव पूजनीयौ हि नित्यशः।
तत्कृतं सुकृतं यत् स्यात् तस्मात् षड्भागमाप्नुयात् ॥
जाप्यं योगश्च यज्ञश्च यतस्तस्मिंस्त्रयं स्थितम्।
तस्य प्रणामः पूजा च दत्तं भवति चाक्षयम् ॥
गृहस्थस्याश्रमं गच्छेद् ब्रह्मचारी यतिस्तथा।
खाद्यं पानं फलं पुष्पमात्मानं परिवेदयेत् ॥
सततं योगयुक्तानां वीतरागतपस्विनाम्।
सर्व्वारम्भनिवृत्तानां यतीनां दत्तमक्षयम् ॥
यतये वीतरागाय दत्तमन्नं सुपूजितम्।
न क्षीयते श्रद्धया वै कल्पकोटिशतैरपि ॥

अत्र यतेः सर्व्वोत्तमाश्रमाश्रयत्वेन ज्ञानध्यानधुरीणत्वेन च भोजनीयेषु मुख्यतया सम्पादनं कर्त्तव्यम्।

तथा च वायुपुराणे।

यतिस्तु सर्व्वविप्राणां सर्व्वेषामग्रभुग् भवेत्।
इतिहासपञ्चमान् वेदान् यः पठेत द्विजोत्तमः ॥
अनन्तरं यतेः सोऽयं नियोक्तव्यो विजानता।
त्रिवेदोऽनन्तरस्तस्मात् द्विवेदस्तदनन्तरः ॥
एकवेदस्ततः पश्चात् नित्याध्यायी ततः परम्।

'सर्व्वविप्राणां' ब्रह्मचारिगृहस्थवानप्रस्थानां, 'सर्व्वेषां' त्रिमधुत्रिसुपर्णत्रिणाचिकेतादीनाम्। अग्र्यः मुख्यः भोक्ता यः तस्माद्धि 'अग्रभुक्' न तु पूर्वकालभोजी। यो द्विजसत्तमः सेतिहासांश्चतुरो वेदानधीते सोऽयं यतेरनन्तरं पश्चान्नियोजनीयः। एवं त्रिवेदादीनां पौर्व्वापर्य्यम्। 'नित्याध्यायी' अधीयमानवेदः।

नागरखण्डे—

आमन्त्रयेद्यतीन् पूर्व्वं स्नातकान् वा त्रिकर्म्मिणः।
तदभावे गृहस्थांश्च ब्रह्मज्ञानपरायणान् ॥

याजनाध्यापनदानानि त्रीण्येव कर्म्माणि येषां ते 'त्रिकर्म्मिणः'। 'स्नातकाः' वानप्रस्था इत्यर्थः।

आह वासिष्ठः।

पितृभ्यो दद्यात् पूर्व्वेद्युर्ब्राह्मणान् सन्निपात्य यतीन् गृहस्थान् साधून् परिणतवयस इति।

'सन्निपात्य' निमन्त्रणेन श्राद्धक्रियासम्बन्धमापाद्य।

नारदस्मृतौ—

यो वै यतीननादृत्य[1] भोजयेदितरान् द्विजान्।
विजानन् वसतो ग्रामे हव्यमाप्नोति राक्षसान् ॥

---

[1] यतीननामन्त्र्येति,।

यः स्वग्रामे वसतो यतीन् जानन्नपिताननादृत्यान्यान् गृहस्थादीनेव श्राद्धे भोजयेत् तस्य तत्सकलं श्राद्धभोजनीयमन्नं राक्षसानेव तर्पयति न पितॄन् इति। अनेन स्वग्रामे वसतो यतेः श्राद्धे निमन्त्रणीयत्वमुक्तम्। अनिमन्त्रितस्यापि श्राद्धकाले भिक्षार्थमागतस्य यतेर्भोजनीयत्वमुक्तम्।

ब्रह्म-मार्कण्डेयपुराणयोः।

भिक्षार्थमागताँश्चापि काले संयमिनो यतीन्।
भोजयेत् प्रणिपाताद्यैः प्रसाद्य यतमानसः॥

अत्र निमन्त्रितस्य यतेर्निमन्त्रणादेव द्वारदेशगतस्य चातिथित्वेनैव निमन्त्रित-ब्राह्मण-पङ्क्तिभोजनीयत्वे सिद्धे तद् ग्रामस्थस्यैव तु प्रमादादनिमन्त्रितस्य श्राद्धकालेऽप्युपस्थितस्य यतेः श्राद्धे भोजनीयत्वार्थमिदं वचनम्। बहुवचनन्तु बहूनामपि प्राप्त्यर्थं यतिभेदसंग्रहार्थं वा। यतेरुपवेशने स्थानविशेष उक्तः।

बार्हस्पत्यसंहितायाम्।

श्राद्धकाले यतिं प्राप्तं पितृस्थाने तु भोजयेत्।
परिवेषयेत् तत्प्रथमं यदि वा पार्श्वतः स्थितम्॥

'पितृस्थाने भोजयेत्' इति प्रमीतोद्देशेन त्याज्यमानान्नं भोजितं कुर्य्यादित्यर्थः।[1] 'परिवेषयेत् तत्प्रथमं' इति मुख्यं पित्र्यं कुर्य्यादित्यर्थः।

पक्षान्तरमाह 'यदि वा पार्श्वतः स्थितं' इति निमन्त्रितब्राह्मणपङ्क्तावतिथिवद्वा भोजयेत्।

अत्रेयं व्यवस्था। ब्राह्मणेषु पितृपितामहादिकल्पनातः पूर्व्वमागतं यतिं पितृ-स्थाने भोजयेत्। पश्चादागतं तु पूर्व्वानुष्ठितपदार्थक्रमसङ्कल्पाद्यविरोधाय श्राद्धीय-द्विजसन्निधावतिथिवत् भोजयेदिति। श्राद्धकालात् पूर्व्वमपि प्राप्तं सम्यक् सम्प्रार्थनेन श्राद्धकालं यावदवस्थाप्य भोजयेत्।

श्राद्धकालागतस्य यतेः ब्रह्मचारिणश्च श्राद्धीयत्वेनातिथित्वेन वा भोजनीयत्वमाह यमः।

भिक्षुको[2] ब्रह्मचारी वा भोजनार्थमुपस्थितः।
उपविष्टेष्वनुप्राप्तः कामन्तमपि भोजयेत्॥

भोजने फलविशेषं कारणञ्चाह छागलेयः।

भोजयेच्छ्राद्धकालेपि यतिं सब्रह्मचारिणम्।
विप्रानुद्धरते पापात् पितृमातृगणानपि॥
भुञ्जते यत्र तत्रापि यतयो ब्रह्मचारिणः।
गृह्णन्ति पितरो देवाः स याति परमाङ्गतिम॥

---

[1] सम्मानेनात्र भोजनं कुर्य्यादित्यर्थः इति। परन्त्वयं न समीचीनः।
[2] भिक्षुर्वा इति।

तारयन्ति च दातारं पुत्रान् दारान् पितॄंस्तथा ।
तस्मात्सर्व्वप्रयत्नेन अर्चयेदाश्रमागतम् ॥
ब्रह्मचारी यतिश्चैव पक्वान्नस्वामिनावुभौ ।
पचमानाः पचन्त्येते नापचः पचते पुनः ॥

ब्रह्मचार्य्यादिभ्यो यतेर्विशेषमाह स एव ।

ब्रह्मचारिसहस्रैस्तु वानप्रस्थशतैरपि ।
गृहस्थानां सहस्रैस्तु यतिरेको विशिष्यते ॥

तदेवं सति सम्भवे श्राद्धे यतयो भोजनीयाः । तेषामलाभे ब्रह्मचार्य्यादयः ।

तथा च ब्रह्मवैवर्त्ते ।

अलाभे यतिभिक्षूणां वनस्थमपि पूजयेत् ।
तदलाभेप्युदासीनं नैष्ठिकं संयतेन्द्रियम् ॥

'उदासीनः' दातुरसम्बन्धी ।

आह शातातपः । यतीन् भोजयेदिति । तत्र विशेष उक्तः ।

ब्रह्मवैवर्त्ते—

मुण्डान् जटिलकाषायान् श्राद्धकाले विवर्ज्जयेत् ।
शिखिभ्यो धातुरक्तेभ्यस्त्रिदण्डिभ्यः प्रदापयेत् ॥
ते हि व्रतस्थिता नित्यं ज्ञानिनो ध्यानिनस्तथा ।
देवभक्ता महात्मानः पुनीयुर्दर्शनादपि ॥

'मुण्डाः' शिखया सह मुण्डितमस्तकाः । 'जटिलाः' शैवपाशुपतकालमुखादयः । 'काषायाः' आश्वत्थादिकषायरक्तवसनाः ।

बौधायनः । एतान् श्राद्धकाले विशेषणे वर्ज्जयेत् । ये तु शिखावन्तो गैरिकरक्तवसनाः त्रिदण्डाश्च तेभ्यः प्रयत्नेन दद्यात् । एतेन सर्व्वाण्यपि योगिवचनान्येतल्लक्षणान्वितयतिविषयाण्येवेति विज्ञायते ।

ननु भैक्षेण वर्त्तते नित्यं नैकान्नाशी भवेद्व्रती । भैक्षेण व्रतिनां वृत्तिरुपवाससमा स्मृतेति मनुना ब्रह्मचारिणामेकप्रदत्तान्नभोजननिषेधात् अष्टौ भिक्षाः समादाय दश द्वादश वा यतिः । अखिलाः शोधयेत्तास्तु ततोऽश्नीयाद्द्विजोत्तम इति सम्वर्त्तेन यतेर्भिक्षाकदम्बकभोजनविधानात्तयोः कथं श्राद्धे भोजनम् ।

अत्रब्रूमः । भिक्षार्थभ्रमणाशक्तावनेकान्नलाभासम्भवे परानुग्रहार्थं च यतेरेकान्नभोजनाभ्यनुज्ञादर्शनात् ।

तदाह कार्ष्णाजिनिः ।

अशक्तोऽनुग्रहार्थं वा यतिरेकान्नभुग् भवेत् ।

वसिष्ठोऽपि ।

ब्राह्मणकुले वा यल्लभेत तद्भुञ्जीतेति। ब्रह्मचारिणस्त्वेकान्नभोजनमनुजज्ञे याज्ञवल्क्यः।

ब्रह्मचर्य्ये स्थितो नैकमन्नमद्यादनापदि।
ब्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीडयन्॥

ब्रह्मचार्य्यनापद्येकस्यान्नं नाश्नीयात्। ब्रह्मचारी ब्राह्मणश्चेत्तदार्थितः सन्नेकान्नमनापद्यपि श्राद्धे भुञ्जीत। तदा व्रतपीडाकरं मधुमांसादि वर्ज्जयित्वाश्नीयात्।

मनुरपि—

व्रतवद्देवदेवत्ये पित्र्ये कर्म्मण्यथर्षिवत्।
काममभ्यर्थितोऽश्नीयाद् व्रतन्तस्य न लुप्यते॥

'देवदेवत्ये' दैविके कर्म्मणि, अभ्यर्थितो ब्रह्मचारी भुङ्क्ते। भुञ्जीत कथं। 'व्रतवत्' व्रतयुक्तं, व्रताविरोधेन मधुमांसवर्जमित्यर्थः। 'पित्र्ये' पितृदेवत्येऽपिकर्म्मणि, भुञ्जीत। 'ऋषिवत्' मधुमांसवर्जमित्यर्थः। 'कामं' इच्छया। एवमस्य ब्रह्मचारिव्रतं न लुप्यते। अन्यथा लुप्यत इत्यर्थः। अतः सद्भिरभ्यर्थ्यमानस्य तदनुग्रहमिच्छतो यतेः श्राद्धे भुञ्जानस्य न प्रत्यवायो भवति। अथवैकान्नभोजनजनितं स्वल्पतमं प्रत्यवायं प्रायश्चित्तरूपेण वर्त्तमानैः प्राणायामादिभिर्य्योगाङ्गैर्नाशयति।

ननु तथापि श्राद्धे भोज्यत्वेन मुख्यतया मधुमांसविधानात् कथं यतेर्भोजनमुपपद्यते। उच्यते। मधुमांसनियमाभावात्। तन्नियमे हि तदन्तरेण मुन्यन्नादिमात्रेण श्राद्धं न सिद्ध्येत्। न चैतदिष्टम्। न चास्ति श्राद्धे यतिनियमः। तन्नियमे हि यतिमन्तरेण श्रोत्रियैस्त्रिणाचिकेतादिभिर्गृहस्थैः श्राद्धं न सिद्ध्येत्। न चैतदपीष्टम्। अतो मधुमांसवर्जिते श्राद्धप्रयोगे यतेर्भोजनं, यतिवर्जिते च प्रयोगे मधुमांसोपकल्पनमिति न किञ्चिदनुपपन्नम्। मधुमांसस्य यतेश्च नित्यवद्विधेरुभयावकाशार्थमगत्या पाक्षिकत्वमाश्रीयते। अथ कस्मान्मधुमांसवत्यपि श्राद्धप्रयोगे मध्वादिवर्जितं यतेर्भोजनं नाभ्युपगम्यते। निर्व्वाप-पाकयोः सर्व्वपित्रर्थत्वाविरोधायेति ब्रूमः।

अथ कस्माच्छ्राद्धे यतेर्न मधुमांसभोजनम्।

न यतिर्मधुमांसमश्नीयादिति निषेधादिति चेत्। तन्न। निषेधस्य पुरुषार्थत्वात् क्रत्वर्थभोजनबाधे सामर्थ्याभावात्। हिंसानिषेधस्येव यज्ञीयहिंसाबाधे। ननु पुरुषार्थस्यापि गोदोहनस्य क्रत्वर्थचमसबाधकत्वं दृष्टम्। सत्यम्। यत् क्रत्वर्थपदार्थसाध्यकार्य्यनिष्पादकं पुरुषार्थं तत्र तद् व्यवतिष्ठते। न चेह क्रत्वर्थमधुमांसभोजनकार्य्यं पुरुषार्थं भोजनं निष्पादयितुमीष्टे। क्रतुना क्रत्वीयेन वा पदार्थेन सहास्यसम्बन्धाभावात्। गोदोहनस्य तु पुरुषार्थस्यापि क्रत्वीयेन प्रणयनेन सहाश्रयाश्रयिभावलक्षणस्य सम्बन्धस्य विद्यमानत्वात्। अथ कस्मान्नयतिर्मधुमांसमश्नीयादित्येष निषेधः क्रत्वर्थस्य श्राद्धभोजनस्यैव न स्यात्।

ब्रूमः। शास्त्रप्राप्तनिषेधत्वापत्तौ दुष्टं विकल्पमापादयेत्, रागप्राप्तं च मधुमांसभोजनं यतेरनर्गलमापद्यते। उभयनिषेधोऽस्त्विति चेत्। एवं तर्ह्येकत्र विध्यन्तर-

सापेक्ष्योऽन्यत्र निरपेक्ष इति वैषम्येण पीडैव। एक एव चायं क्रत्वर्थः पुरुषार्थश्चेति विप्रतिषिध्यते। अतो रागप्राप्तस्य मधुमांसभोजनस्य पुरुषार्थो निषेधो न विधिप्राप्तस्य क्रतूपकारकस्य भोजनस्य निवर्त्तकः। अतः श्राद्धे यतेर्मधुमांसभोजनं न दुष्यतीति। अत्रोच्यते—भोजयेदिति श्राद्धाधिकारिकर्तृकं प्रयोजकव्यापारात्मकं मधुमांसभोजनं विहितम्। न तु श्राद्धनियोज्ययतिव्यापारात्मकमपीति कथं न निषेधः। प्रयोजकव्यापारविधिनार्थाक्षिप्तं तद्विहितमेवेतिचेत्। तर्हि मेषीमुभयतोमुखीं वा दद्यादित्येतद्विधाक्षिप्तः प्रतिग्रहोऽपि विहित एवेति न दुष्येत। किञ्चेदं भोजनं यदि सर्व्वस्य श्रोत्रियादेर्विहितं तर्हि केनचिदेकेनाप्यभुक्ते श्राद्धवैगुण्यमापद्येत।

अथ निमन्त्रितस्य विहितं तर्हि किमर्थं मधुमांसभक्षणं दूषणीयम्। यतिं श्राद्धकर्म्मणि निमन्त्रयेत् स्वाधिकारविधिसिद्ध्यर्थं प्रतिग्रहवदिति चेत्।

यतिः तर्हि किमर्थं निमन्त्रणमभ्युपगच्छेत्। निमन्त्रयितुरनुग्रहार्थमिति चेत्[1]। न हि कश्चिदात्मानमेतावति पातकपङ्के निमज्जयन्तं परानुग्रहलेशमिच्छति, इति विदालोच्यते। अतो रागत एव यतेर्निमन्त्रणग्रहणमवशिष्यते। तथा च निषेधानुप्रवेशान्न श्राद्धेऽपि मधुमांसभोजनम्। अथानिन्दितेनामन्त्रितो नापक्रामेदिति निषेधात् निमन्त्रणमङ्गीकरोति, अङ्गीकृतनिमन्त्रणस्य भुञ्जीरंस्तेऽपि वाग्यता इति भोजनविधानात् परिवेषितपरित्यागप्रतिषेधाच्च निमन्त्रणाङ्गीकरणपूर्व्वकं विहितमेव यतेः श्राद्धीयमधुमांसभोजनमिति।

अत्र ब्रूमः। अपक्रमणे प्रत्यवायमात्रं मधुमांसभक्षणे त्वाश्रमभ्रंश एव भवेत्। ततोऽपक्रमणस्यैव न्याय्यत्वात्। न वापक्रमणे प्रत्यवायोऽपि यत्याश्रमधर्म्मविरुद्धत्वादनपक्रमणादिविधीनां यतिव्यतिरिक्तविषयत्वात्। तदेवमेतत् सिद्धं मधुमांसविवर्ज्जिते श्राद्धप्रयोगे यतेर्नियोगः, यतिनियोगवर्ज्जिते च प्रयोगे मधुमांसोपकल्पनमिति।

इति यतेः श्राद्धे नियोगः।

अथातिथेः श्राद्धपङ्क्तौ भोजनीयत्वं वक्तुमतिथिस्वरूपं तावदुच्यते।
अत्र मार्कण्डेयपुराणे।

अज्ञातकुलनामानं तत्कालसमुपस्थितम्।
बुभुक्षुमागतं श्रान्तं याचमानमकिञ्चनम्॥
ब्राह्मणं प्राहुरतिथिं स पूज्यः शक्तितो बुधैः।

भविष्यत्पुराणे।

अचिन्त्यमानो नाहूतो वैश्वदेवमुपागतः।
अतिथिं तं विजानीयात् न पुनः पूर्व्वमागतम्॥
अचिन्तितागतो यस्मात् तस्मादतिथिरुच्यते।

---

[1] निमन्त्रयितारमनुग्रहीतुमिति चोदति।

शातातपोऽप्याह ।

प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव च ।
प्राप्तस्तु वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः ॥

मनुरपि ।

एकरात्रन्तु निवसन्नतिथिर्ब्राह्मणः स्मृतः ।
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥

ब्राह्मणग्रहणं क्षत्रियादेर्व्युदासार्थम् ।

तदप्याह मनुरेव ।

न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते ।
वैश्यशूद्रौ सखाचैव ज्ञातयो गुरुरेव चेति ॥

आह यमः ।

तिथिपर्व्वोत्सवाः सर्व्वे त्यक्ता येन महात्मना ।
सोऽतिथिः सर्व्वभूतानां शेषानभ्यागतान् विदुः ॥
व्रती यतिर्व्वैकरात्रं निवसन्नुच्यतेऽतिथिः ।
यस्मादनित्यं वसति तस्मात्तमतिथिं विदुः ॥

'तिथिः' दीपालिका प्रतिपदादिः । 'पर्व्वाणि' अमावास्यादीनि 'उत्सवाः' विवाहादयः । एतान्यन्नविशेषप्राप्तिहेतुभूतानि येन यतिधर्म्मप्रवणेन सता त्यक्तानि सोऽतिथिरित्यर्थः । 'व्रती' ब्रह्मचारी, 'यतिः' परिव्राजकः, अनयोरेव विधिधर्म्मक-योरतिथिसंज्ञकत्वं, न पुनर्गृहस्थवनस्थयोः । तयोरभ्यागतसंज्ञकत्वमुक्तम् ।

वायुपुराणे—

वालखिल्यो यतिश्चैव विज्ञेयोह्यतिथिः सदा ।
अभ्यागतः पचानः स्यादतिथिः स्यादपाचक इति ॥

'वालखिल्यः' ब्रह्मचारी । 'पचानः' पचमानः, पक्ता गृहस्थो वानप्रस्थश्चेत्यर्थः । द्विविधश्चातिथिः मध्याह्नागतः, सायमागतश्च ।

तत्र मध्याह्नागतः ।

आदित्यपुराणे ।

मध्याह्नसमये चैव वैश्वदेवे हुतेऽपि च ।
अतिथिञ्चैव सम्प्राप्तं पांशुपादं श्रमातुरम् ॥

तं पूजयेत् यत्नेन सोऽतिथिर्ब्राह्मणः सदा इति ॥

सायमागतस्तु सूर्य्योढशब्दवाच्यः ।

तमाह प्रचेताः ।

यः सायं वैश्वदेवान्ते सायं वा गृहमागतः ।
देववत् पूजनीयोऽसौ सूर्य्योढः सोऽतिथिः स्मृतः ॥

सायन्तनो वैश्वदेवः। न चैवं मन्तव्यं, माध्याह्निकसायन्तनवैश्वदेवकाल एवागतोऽतिथिः नान्यकालागत इति।

यतो मनुराह।

अप्रणोद्योऽतिथिः सायं सूर्य्योढो गृहमेधिना।
काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेदिति॥

आह याज्ञवल्क्यः।

अप्रणोद्योऽतिथिः सायमपि वाग् भूतृणोदकैः।

सायमागतोऽतिथिरन्नाभावे वाग् भूतृणोदकदानतोऽपि संपूजनीयः। न पुनः प्रत्याख्येयः।

अचिन्तितागतत्वादिलक्षणकस्यास्य श्राद्धकालोपपस्थितस्य नामान्तरमप्युक्तं पैठीनसिना।

कुतोऽपि श्राद्धवेलायां श्रोत्रियो यदि दृश्यते।
श्राद्धं पुनाति वै यस्मात् कुतपस्तेन संज्ञितः॥

कुतोऽप्यविज्ञायमानाद्देशादागतः पुनाति श्राद्धमित्यतिथिरेव कुतपसंज्ञयोच्यते। समानग्रामवासिनोऽचिन्तितागतस्याप्यतिथिसंज्ञकत्वं नास्तीत्युक्तम्।

विष्णुधर्म्मोत्तरे।

नैकग्रामीणमतिथिं विद्यान्नाब्राह्मणं तथा।

मार्कण्डेयपुराणे।

न मित्रमतिथिं कुर्य्यान्नैकग्रामनिवासिनम्।

आदित्यपुराणे।

नैकग्रामीणमतिथिं कथयन्ति मनीषिणः।

यत्तु वायुपुराणे।

न घोरो नापि सङ्कीर्णो नाविद्यो नाविशेषवित्।
नावसन् न सन्दधानो न सेवनपरोऽतिथिरिति॥

तदतिथिवहुत्वे शक्त्यभावे च द्रष्टव्यम्।

यदाह शङ्खः।

यदि बहूनां न शक्नुयादेकस्मै शीलवते दद्यात् प्रथममुपागतः स्याच्छ्रोत्रियस्तस्मा इति। तदेवमविज्ञातगोत्रनामा ग्रामान्तरतोऽकस्माद्वैश्वदेवादिकाले मैत्र्यादिसम्बन्ध-रहितः समागतो ब्राह्मणोऽतिथिरितिलक्षणमुक्तं वेदितव्यम्।

इत्यतिथिस्वरूपनिरूपणम्।

अथातिथि प्रशंसा ।

शिवधर्म्मोत्तरे ।

अनुग्रहाय लोकानां श्राद्धसंप्रेक्षणाय च ।
चरन्त्यतिथिरूपेण देवा योगाश्च भूतले ॥

'योगाः' योगिनः ।

आदित्यपुराणे ।

तस्मात् गृहाश्रमस्थस्य नान्यद्दैवतमुच्यते ।
ऋतेऽतिथेर्महाभागे सत्यमतेद्विचारय ॥

विष्णुपुराणे ।

धाता प्रजापतिः शुक्रो वह्निर्व्वसुगणो यमः ।
प्रविश्यातिथिमेते वै भुञ्जतेऽन्नं नरेश्वर ॥

विष्णुधर्म्मोत्तरे ।

देवा ब्राह्मणरूपेण चरन्ति पृथिवीमिमाम् ।
तस्मात् संप्राप्तमतिथिं प्रयत्नेन तु पूजयेत् ॥

प्रभासखण्डे ।

नातिथेः परमोबन्धुर्विद्यते गृहमेधिनाम् ।
गृहानुपेत्य कृपया सन्तारयति यः कुलम् ॥
सिद्धाश्चरन्ति पृथिवीं कौतुकेन यदृच्छया ।
अनुगृह्णन्ति सततं धर्म्मिष्ठा गृहमेधिनः ॥
अतिथीनां हि रूपेण गृहाङ्गणमुपागताः ।
तस्मादतिथियो मान्याः सर्व्वेषां सर्व्वदा नृप ॥

नारदीयपुराणे ।

पुनन्ति गृहिणाङ्गेहान् यदीयाः पादपांशवः ।
क्षालयत्यखिलं पापं यत्पादक्षालनोदकम् ॥
सत्कृतिः प्रणतिर्य्येषां यज्ञादपि विशिष्यते ।
येषामन्नोदकं दत्तं तारयत्यखिलं कुलम् ॥
अतिथिभ्यः परन्तेभ्यः किमस्ति भुवनत्रये ।
देवानामभिवन्द्याः स्युर्दूरादतिथयः शुभाः ॥
किं पुनः कर्म्मनिष्ठानां गृहस्थानां महामते ।

कार्ष्णाजिनिः ।

तिला रक्षन्ति त्वसुरात् दर्भा रक्षन्ति राक्षसात् ।
उपङ्क्त्यात् श्रोत्रियो रक्षेदतिथिः सर्व्वरक्षकः ॥

इति अतिथिप्रशंसा ।

अथातिथिपरीक्षानिषेधः ।

तत्र मार्कण्डेयपुराणे ।

न पृच्छेद्गोत्रचरणं स्वाध्यायञ्चापि पण्डितः ।
शोभनाशोभनाकारं तं मन्येत प्रजापतिम् ॥

विष्णुपुराणेऽपि ।

स्वाध्यायगोत्रचरणमपृष्ट्वा च तथा कुलम् ।
हिरण्यगर्भबुद्ध्या तं मन्येताभ्यागतं गृही ॥

विष्णुधर्म्मोत्तरे ।

रूपान्वितं विरूपं वा मलिनं मलिनाम्बरम् ।
योगीन्द्रशङ्कया नित्यमतिथिं न विचारयेत् ॥

वायुपुराणेऽपि ।

अविज्ञातं द्विजं श्राद्धे न परीक्षेत् सदा बुधः ।
सिद्धा हि विप्ररूपेण चरन्ति पृथिवीमिमाम् ॥
उर्व्वीं सागरपर्य्यन्तां देवा योगीश्वरास्तथा ।
नानारूपाश्चरन्त्येते प्रजाधर्म्मेण लीलया ॥

नारसिंहपुराणे ।

न परीक्षेत चरितं न विद्यां न कुलं तथा ।
न शीलं न च देशादीनतिथेरागतस्य हि ॥
कुरूपं वा सुरूपं वा कुचेलं वा सुवाससम् ।
विद्यावन्तमविद्यं वा सगुणं वाऽथ निर्गुणम् ॥
मन्येत विष्णुमेवैतं साक्षान्नारायणं हरिम् ।
अतिथिं समनुप्राप्तं विचिकित्सेन्न कर्हिचित् ॥

वायुपुराणे ।

अतिथिं ह्यागतं दृष्ट्वा द्वेष्यं बन्धुमिवागतम् ।
यादृशन्तादृशं वापि विचिकित्सेन्न जातुचित् ॥
न हि विद्यादयस्तस्मिन् पूज्यताहेतवः स्मृताः ।
केवलेनातिथित्वेन स भवेत् पङ्क्तिपावनः ॥
अनुग्रहार्थिलोकानां महात्मानो महीमिमाम् ।
चरन्त्यतिथयो भूत्वा न विचार्य्यास्ततस्तु ते ॥
गुणागुणविचारेण भवन्त्येतेऽवमानिताः ।
निर्दहन्त्याशु गृहिणं तादृशेष्ववमानना ॥
अतोतिथेर्न कर्त्तव्या कापि चर्य्या कदाचन ।

इत्यतिथिपरीक्षानिषेधः ।

अथातिथिपूजाविधिः ।

तत्र मनुः ।

सम्प्राप्ताय त्वतिथये प्रदद्यादासनोदके ।
अन्नञ्चैव यथाशक्ति सत्कृत्य विधिपूर्व्वकम् ॥

हारीतोऽप्याह ।

तस्य स्वागतमर्घ्यं पाद्यमाचमनीयमासनं प्रदद्यादिति ।

पराशरोऽपि ।

अतिथिं तत्र सम्प्राप्तं पूजयेत् स्वागतादिना ।
तथासनप्रदानेन पादप्रक्षालनेन च ॥
श्रद्धया च तथान्नेन प्रियप्रश्नादरेण च ।
गच्छतश्चानुयानेन प्रीतिमुत्पादयेत् गृही ॥

यमस्मृतौ ।

चक्षुर्दद्यान्मनोदद्याद्वाचन्दद्याच्च सूनृताम् ।
उत्थायचासनं दद्यात् स धर्म्मः पञ्चलक्षणः ॥

उत्थायेति श्रोत्रियातिथिविषयम् ।

अतएवापस्तम्बः ।

ब्राह्मणायानधीयानायासनमन्नमुदकमिति देयम् । न प्रत्युत्तिष्ठेदभिवादनीये-चोत्तिष्ठेदभिवादयेदिति ।

आदित्यपुराणे ।

चक्षुर्दद्यान्मनोदद्यात् वाचन्दद्याच्च सूनृताम् ।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ॥
पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् ।
दद्यादतिथिपूजार्थं स यज्ञः पञ्चदक्षिणः ॥
येन येन च तुष्येत नित्यमेव यथातिथिः ।
अथात्मनः प्रदानेन तत्तत्कुर्य्याद्विचक्षणः ॥

शिवधर्म्मोत्तरे ।

तस्मादतिथिमायान्तमभिगच्छेत् कृताञ्जलिः ।
स्वागतासनपाद्यार्घ्यस्नानान्नशयनादिभिः ॥

वायुपुराणे ।

तस्मादतिथिमायान्तमभिगच्छेत्कृताञ्जलिः ।
पूजयेच्चार्घ्यपाद्येन पादाभ्यञ्जनभोजनैः ॥

पिपासिताय श्रान्ताय संस्नाताय बुभुक्षते।
तस्मै सत्कृत्य दातव्यं यज्ञस्य फलमिच्छता॥
न वक्तव्यं सदा विप्रे क्षुधिते नास्ति किञ्चन।
तस्मै सत्कृत्य यो दद्यादपूर्व्वो यज्ञ उच्यते॥

हीनोत्तमातिथिसमवाये पूजाप्रकारमाह मनुः।

आसनावसथौ शय्यामनुव्रज्यामुपासनाम्।
उत्तमेषूत्तमं कुर्य्याद्धीने हीनं समे समम्॥ इति।

एकपङ्क्त्युपविष्टानामेषाम्भोजने तु वैषम्यं निराकरोति। हारीतः।

विद्यातपोधिकानाञ्च प्रथमासनमुच्यते।
पङ्क्तौ सहस्थितानान्तु भोजनादि समं स्मृतमिति॥

वैषम्ये दोषमाह वसिष्ठः।

यद्येकपङ्क्तौ विषमन्ददाति,
स्नेहाद्भयाद्वा यदि वार्थहेतोः।
वेदेषु दृष्टां ऋषिभिश्च गीतां,
तां ब्रह्महत्यां मुनयो वदन्ति॥

'विषमं' एकस्योत्तममन्यस्य हीनमित्यर्थः।

इत्यतिथिपूजाविधिः।

अथातिथिपूजाफलम्

तत्राह मनुः।

अतिथिं पूजयेद्यस्तु श्रान्तं वा दृष्टमागतम्।
सवृषं गोशतं तेन दत्तं स्यादिति मे मतिः॥

विष्णुरपि।

स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा।
नावाप्नोति गृही लोकान् यथा त्वतिथिपूजनात्॥

आदित्यपुराणे।

अतिथिः पूजितो यस्तु ध्यायते मनसा शुभम्।
तत्तु क्रतुशतेनापि फलमाहुर्म्मनीषिणः॥

महाभारते।

अन्नं हि दत्वातिथये[1] ब्राह्मणाय यथाविधि।
प्रदाता सुखमाप्नोति देवैश्चापि प्रपूज्यते॥

---

[1] अन्नं दत्त्वा त्वतिथये इति।

शिवरहस्ये ।

नित्यं ददाति यश्चान्नमतिथिभ्यः सुसंस्कृतम्[१] ।
स याति ब्रह्मसालोक्यमेवमाह पराशरः ॥

अत्र महाभारतेऽतिथिधर्म्मेण वा जयलुब्धकायाविद्यमानान्नतया स्वशरीरा-योग्यञ्चातिथ्यं चिकीर्षतः कपोतकस्य वाक्यम् ।

देवतानामृषीणाञ्च संवादेषु पुनः पुनः ।
श्रुतपूर्व्वो मया धर्म्मो महानतिथिपूजने ॥
सुदूरादाशया प्राप्तः क्षुत्तृषाश्रमकार्शितः ।
यः पूज्यतेऽतिथिः सम्यक् स तपः क्रतुरेव सः ॥

विष्णुधर्मोत्तरे ।

सततमिह नरो यः पूजनञ्चातिथीनां,
जलतृणमृदुवाद्यैः सारवद्भिर्विदध्यात् ।
सुरसमितिषु पूज्यो देवतानां सदा स्यात्,
भवति च नरलोके जायमानः समृद्धः ॥

इत्यतिथिपूजाफलम् ।

अथातिथ्यमकुर्व्वतो दोषः कथ्यते ।

तत्र व्यासः ।

पथि श्रान्तमविज्ञातमतिथिं क्षुत्पिपासिनम् ।
यो न पूजयते भक्त्या तमाहुर्ब्रह्मघातकम् ॥

अयञ्च ब्रह्महत्यातुल्यः प्रत्यवायः सत्यां शक्तावत्यन्तपात्रीभूतस्यातिथेरतिक्रमे-विज्ञेयः ।

तथा आदित्यपुराणे ।

पात्रन्त्वतिथिमासाद्य शीलाढ्यं यो न पूजयेत् ।
आदत्ते सुकृतं तस्य पातकञ्च प्रयच्छति ॥

विष्णुधर्म्मोत्तरे ।

वैश्वदेवे तु सम्प्राप्ते न कञ्चिदवमानयेत् ।
आदाय सुकृतं याति भग्नाशस्त्वतिथिर्गतः ॥

मार्कण्डेयपुराणे ।

अतिथिर्य्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स दत्त्वा दुष्कृतं तस्य पुण्यमादाय गच्छति ॥

'तस्य' गृहमेधिनः स्वकीयं दुष्कृतं दत्त्वा तदीयं पुण्यमादाय गच्छति ।

देवलोऽपि ।

---

[१] अतिथिभ्यश्च संस्कृतम् इति ।

अतिथिर्गृहमभ्येत्य यस्य प्रतिनिवर्तते ।
असंस्कृतनिराशश्च स सद्यो हन्ति सत्कुलम् ॥

आह मनुः ।

आसनाशनशय्याभिरद्भिर्मूलफलेन वा ।
नास्य कश्चिद्वसेद् गेहे शक्तितो नार्चितोऽतिथिः ॥

मनु-विष्णु-शातातपाः ।

येषामनश्नन्नतिथिर्विप्राणां व्रजते गृहात् ।
ते वै खरत्वमुष्ट्रत्वमश्वत्वं प्रतिपेदिरे ॥
यस्य चैव गृहे विप्रो वसेत्कश्चिदभोजितः ।
न तस्य पितरो देवाः हव्यं कव्यञ्च भुञ्जते ॥
अतिथिर्यस्य वै ग्रामे भिक्षमाणः प्रयत्नतः ।
स चेन्निरसितस्तत्र ब्रह्महत्या विधीयते ॥
अपि शाकम्पचानस्य शिलोञ्छेनापि जीवतः ।
स्वदेशे परदेशे वा नातिथिर्विमना भवेत् ॥

विष्णुपुराणे ।

देवातिथौ तु विमुखे गते यत्पातकं नृप ।
तदेवाष्टगुणं पुंसां सूर्य्योढे विमुखे गते ॥

इत्यातिथ्यमकुर्वतोदोषनिरूपणम् ।

अथ श्राद्धकालागतस्यातिथेः श्राद्धपङ्क्तौ भोजनीयत्वमुच्यते ।

तत्राह मनुः ।

ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् ।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥

तत्कालागतं भिक्षुकं ब्राह्मणं भोजयेत् ब्राह्मणानुमतेन ।

यमोऽपि ।

भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः ।
उपविष्टेष्वनुप्राप्तः कामन्तमपि भोजयेत् ॥

वाराहपुराणे ।

काले तत्रातिथिं प्राप्तमन्नकामं द्विजोत्तमम् ।
ब्राह्मणैरभ्यनुज्ञातः कामन्तमपि भोजयेत् ॥
योगिनो विविधैः रूपैर्भवन्तीत्युपकारिणः ।
भ्रमन्तः पृथिवीमेतामविज्ञातस्वरूपिणः ॥
तस्मादभ्यर्चयेत् प्राप्तं श्राद्धकालेऽतिथिं बुधः ।
श्राद्धक्रियाफलं हन्ति द्विजेन्द्रोऽपूजितोऽतिथिः ॥

अस्याभोजने दोषमाह शातातपः ।

अतिथिर्य्यस्य नाश्नाति तच्छ्राद्धं न प्रशस्यते ।
श्रुतवृत्तविहीनैश्च भुक्तमश्रोत्रियैश्च यत् ॥

एवंविधश्राद्धकर्त्तुः प्रत्यवायो भवतीत्युक्तम् ।

वायुपुराणे ।

यस्तु श्राद्धेऽतिथिं प्राप्तं दैवे वाप्यवमन्यते ।
तं वै देवा निरस्यन्ति हतो यद्वत् परावसुः ॥
सर्व्वस्वेनापि तस्माद्धि पूजयेदतिथिं बुधः ।
वानप्रस्थगृहस्थौ च सतामभ्यागतौ तथा ॥
कालागतो यतिर्ब्रह्मचारी वातिथिसंज्ञकः ।

तमवश्यं श्राद्धे पूजयेत् । यतस्तस्यापूजितारं श्राद्धकर्त्तारं देवाः स्वर्गलोकात् 'निरस्यन्ति' अपनुदन्ति । यथा होता होतृषदन उपविशन्निरस्तः परावसुरिति मन्त्रेणासुरविशेषं परावसुन्निरस्यति । अवज्ञातातिथिके श्राद्धे भोक्तॄणामपि प्रत्यवायं छागलेय-वृद्धशातातपावाहतुः ।

आतिथ्यरहिते श्राद्धे भुञ्जते येऽबुधा द्विजाः ।
वृथा तेनान्नपाकेन काकयोनिं व्रजन्ति ते ॥

लोभात् प्रमादाद्वा कथञ्चिदतिथिमवजानन्तं यजमानमतिथिधर्म्मोपदेशेन तत् स्वीकारमकारयतां ब्राह्मणानामयं प्रत्यवायः । एतत्त्वतिथिभोजनमतिथिलक्षणलक्षित-आगते सति द्रष्टव्यं, न पुनरतिथिवर्ज्जितश्राद्धकरणे दोषश्रवणादनुपस्थितेऽपि तस्मिन् कथमप्यतिथित्वेन परिकल्प्याप्यनुष्ठेयम् । स्वयं परिकल्पितस्य तल्लक्षणत्वेनातिथित्वा-भावात् । अतिथित्वरहितानान्तु क्षत्रियादीनां दूरदेशतत्कालागतत्वादिनातिथिसमान-धर्मेण ब्राह्मणभोजनानन्तरं भोजनीयत्वमाह मनुः ।

यदि त्वतिथिधर्म्मेण क्षत्रियो गृहमाव्रजेत् ।
भुक्तवत्सु च विप्रेषु कामन्तमपि भोजयेत् ॥

अत्र कामशब्दग्रहणात् भोजनं तेषामनावश्यकमिति गम्यते ।

यत्तु —

"अतिथित्वे तु वर्णानां देयं शक्त्यानुपूर्व्वशः" इति विष्णुपुराणे अतिथिधर्म्मेण सहागतानां ब्राह्मणक्षत्रियवैश्यानां ब्राह्मणक्रमेणैकपङ्क्तावेवोपवेशनं कारयित्वा भोजनं दातव्यमिति प्रतिभाति तच्छ्राद्धव्यतिरिक्तविषयमेवेति वेदितव्यम् । अब्राह्मणानां श्राद्धेऽन्वयाभावात् ।

यच्च पुराणे, "शेषान् वित्तानुसारेण भोजयेदन्यवेश्मनि" इति वेश्मान्तरं निमन्त्रितान्यब्राह्मणभोजनविधावतिथेः श्राद्धीयपङ्क्तिभोजनेन सह विरुद्धमिव प्रति-भाति तदपि तद्वेश्मन्यवकाशलाभासम्भवविषयं, अतिथिव्यतिरिक्तश्राद्धोत्तरकाल-भोजनीयब्राह्मणविषयं वा द्रष्टव्यम् । तदाप्याद्यो यः सोऽयं श्राद्धीयब्राह्मणोच्छिष्टान्तोप-

करणपक्ष एव। पक्षान्तरे तु वेश्मन्येवेति। अतिथिलक्षणरहितमेवालीकातिथिभावमाविष्कृत्य भोजनयाचनेन प्रकारान्तरेण श्राद्धे विघ्नकर्त्तारं प्रत्याह।

हारीतः।

चतुर्णां दुष्कृतं हन्ति ब्राह्मणो विघ्नकारकः।
अन्नस्यान्नपतेः पङ्क्तेर्भोजनाकाङ्क्षिणां तथा॥

'भोजनाकाङ्क्षिणां' शेषान्नभोजनीयानां, श्राद्धे वा श्राद्धार्थपाकतर्पणीयानां पितॄणामित्यर्थः।

इत्यतिथेः श्राद्धपङ्क्तौ भोजनीयत्व निरूपणम्।

अथैवमुक्तलक्षणानां ब्राह्मणानामसम्भवे न्यूनगुणैरपि श्राद्धं निर्व्वर्त्तयितुमनुकल्पोऽभिधीयते।

तत्र ज्ञानोत्कृष्टादीनुत्कृष्टतमान् द्विजानभिधायाह मनुः।

एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः॥

'एषः' अनन्तरोक्तः, 'प्रथमः' मुख्यः, 'कल्पः' विधिः, 'हव्यकव्ययोः प्रदाने' 'अयं' तु वक्ष्यमाणः, 'अनुकल्पः' अनुपश्चात्कल्पनं इत्यनुकल्पः, मुख्याभावेऽनुष्ठीयत इत्यर्थः। पूर्व्वमुत्कृष्टतमाय देयमित्युक्तम्। अतः परं तदभावे उत्कृष्टतराय, तस्याप्यभावे उत्कृष्टाय, तस्याप्यभावे किञ्चिदुत्कृष्टाय देयमिति वक्ष्यति। तथा पूर्व्वमसम्बन्धिने देयमित्युक्तम्। तदभावे सम्बन्धिभ्यो देयमित्यतः परं वक्ष्यति। स चायमनुकल्पः सद्भिरनुष्ठित इति प्रशंसा।

ब्रह्माण्डपुराणे।

अलाभे सति भिक्षूणां भोजयेद् ध्यानिनः शुभान्।
असम्भवे तु तेषां वै नैष्ठिकान् ब्रह्मचारिणः॥
तदभावेऽप्युदासीनं गृहस्थमपि भोजयेत्।

'भिक्षव' त्रिदण्डा यतयः, ध्यानिनो वानप्रस्थाः 'उदासीनः' दातुरसम्बन्धी मित्रारिभावशून्यो वा। प्रथमन्तावत् सर्व्वोत्कृष्टत्वेन भिक्षव एव ग्राह्या इति पूर्व्वमेव प्रतिपादितम्। तदलाभे वानप्रस्थाः। तेषामप्यसम्भवे वेदपारगाः, नैष्ठिकब्रह्मचारिणः। तेषामप्यभावे पङ्क्तिपावनत्वादिगुणयुक्तगृहस्थाः।

ब्रह्मवैवर्त्ते।

योगिनः प्रथमं पूज्याः श्राद्धेषु प्रयतात्मभिः।
तदभावे वेदविदः पाठमात्रास्ततः परम्॥
विनियोज्या महानेष पात्रसाध्यो विधिर्म्मतः।

गृहस्थानामपि मध्ये 'योगिनः' ब्रह्मविदः मुख्याः। तदभावे 'वेदविदः' वेदार्थज्ञाः। तेषामप्यभावे 'पाठमात्राः' वेदस्य पाठमात्रं ये कुर्व्वन्ति।

निरुक्तकारोऽपि वेदविदां प्रशंसामाह।

स्थाणुरयम्भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥

कूर्म्मपुराणे ।

स्थाणुर्भारहरो विप्रः पठन्नर्थं[१] न वेत्ति यः ।
स कथं पात्रतामेति कथमर्हति केतनम् ॥
अतो विद्वत्तामायैव हव्यकव्यानि दापयेत् ।
अधीतमात्रवेदन्तु तदभावे नियोजयेत् ॥

श्रोत्रियत्वं श्रोत्रियपुत्रत्वञ्चेति मिलितमुभयं श्रैष्ठ्यहेतुतया पूर्व्वमुक्तम् । इदानीमन्यतरापाये किञ्ज्याय्यमिति संशये मनुराह ।

अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः ।
अश्रोत्रियो वा पुत्रः स्यात् पितास्याद्वेदपारगः ॥
ज्यायांसमनयोर्विद्याद् यस्य स्याच्छ्रोत्रियः पिता ।
मन्त्रसम्पूजनार्थन्तु सत्कारमितरोऽर्हति ॥

एकस्य तु पिता अपठः स्वयन्तु साङ्गवेदाध्यायी । इतरस्य तु पिता वेदपारगः स्वयन्तु अपठः । तयोः कः श्रेयानिति संशयस्य सिद्धान्तमाह । अनयोर्द्वयोर्मध्ये यस्य पिता श्रोत्रियस्तं 'ज्यायांसं' श्राद्धयोग्यं विद्यात् । 'इतरः' स्वयमेव यः श्रोत्रियः, सोऽपि 'मन्त्रसंपूजनार्थम्', तेन ये मन्त्रा अधीताः तत्सम्माननार्थं, पूर्व्वाभावे 'सत्कारम्' श्राद्धे भोजनीयत्वमर्हति । यस्तु श्रोत्रियगोत्रप्रसूतोऽपि वृत्तहीनो न तस्य विहिताक्रियया कुलमात्रेण श्रैष्ठ्यम् ।

तदुक्तमग्निपुराणे ।

किं कुलेन विशालेन वृत्तहीनस्य देहिनः ।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु ॥

जातूकर्णोऽपि ।

अपि विद्याकुलैर्युक्तान् वृत्तहीनान् द्विजाधमान् ।
अनर्हान् हव्यकव्येषु वाङ्मात्रेणापि नार्चयेत् ॥

यस्य तु कुले कश्चिद्गरीयान् गुणो न विज्ञायते न च कश्चिद्दोषोऽपि श्रूयते, स्वयञ्च विद्यावृत्तसम्पन्नः सोऽपि विख्यातवंशस्य विद्वत्तमस्याभावे ग्राह्यः ।

आह मनुः ।

किं ब्राह्मणस्य पितरं किंवा पृच्छसि मातरम् ।
श्रुतञ्चेदस्ति वेद्यं वा तत् मातापितरौ स्मृतौ ॥

प्रश्नवचनादेव सम्बन्धकुलदोषापरिज्ञानमवगम्यते । 'श्रुतं' शास्त्रं, 'वेद्यं' शास्त्रावबोध्यं कर्म्मवानुष्ठेयतया यद्यस्ति तर्हि तावेव मातापितरौ किमस्य मातापितृविज्ञानेनेति । विद्यावृत्तयोर्वृत्तं ज्याय इत्याह मनुः ।

गायत्रीसारमात्रोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितश्चतुर्व्वेदी सर्व्वाशी सर्व्वविक्रयी ॥

---

१ पठनार्थमिति ।

अल्पतरविद्योऽपि स्वानुष्ठाननिष्ठः श्रेष्ठः। बहुतरविद्यो यथेष्टचेष्टो नेति वाक्यार्थः।

मत्स्यपुराणे।

सावित्रीं जपते यस्तु त्रिकालं भरतर्षभ।
भैक्षवृत्तिः क्रियावांश्च स राजन् केतनक्षमः॥

केतने निमन्त्रणे क्षमो योग्यः 'केतनक्षमः'।

स्कन्दपुराणे।

सदाचारपरा नित्यं स्वल्पविद्या अपि द्विजाः।
पितॄणान्तेऽपि कुर्व्वन्ति तृप्तिं भुक्ताः कुलोद्भवाः॥
कुलाचारसमोपेतान् तस्माच्छ्राद्धे नियोजयेत्।
ब्राह्मणान् नृपशार्दूल मन्दविद्याधरानपि॥

ये स्वल्पदोषा अपि बहुगुणाः, ये च निर्विद्या अपि स्वानुष्ठानशीलाः, ये च सदोषा अपि प्रायश्चित्तपूतात्मानस्तेषामपि सर्व्वगुणसम्पन्नपात्रालाभेऽनुग्रह उक्तो महाभारते।

श्राद्धे ये च विनिर्दिष्टाः[१] ब्राह्मणा भरतर्षभ।
दातुः प्रतिग्रहीतुश्च शृणुष्वानुग्रहात्पुनः॥
चीर्णव्रता गुणै-र्युक्ता भवेयुर्ये च कर्षुकाः।
सावित्रीज्ञाः[२] क्रियावन्तस्ते राजन् केतनक्षमाः॥
क्षत्रधर्म्मिणमप्याजौ केतयेत् कुलजं द्विजम्।
नत्वेव वणिजन्तात श्राद्धेषु परिकल्पयेत्॥
अग्निहोत्री च यो विप्रो ग्रामवासी च यो भवेत्।
अस्तेयश्चातिभीरुश्च स राजन् केतनक्षमः॥
सावित्रीं जपते यश्च द्विकालं भरतर्षभ।
भिक्षावृत्तिः क्रियावांश्च स राजन् केतनक्षमः॥
उदितास्तमिते होमी नित्यं कर्म्मपरायणः।
अहिंस्रश्चाल्पदोषश्च[३] स राजन् केतनक्षमः॥
गृहस्थवृत्तिर्य्यश्चापि ब्राह्मणो भरतर्षभ।
संवृत्तिः शुद्धवृत्तिश्च स राजन् केतनक्षमः॥
अव्रती कितवः स्तेनः प्राणविक्रय्यथो वणिक्।
पश्चाच्चेत् पीतवान्सोमं सोऽपि केतनमर्हति॥
अर्जयित्वा धनं पूर्व्वं दारुणैः कृषिकर्म्मभिः।
पश्चात्तपो निषेवेत स राजन् केतनक्षमः॥

---

[१] दैवे च निर्दिष्टा इति।

[२] सविज्ञाना इति।

[३] अहिंस्रश्चाल्पकोपश्चेति।

अर्जयित्वा धनं पूर्व्वं दारुणैः कृषिकर्म्मभिः ।
भवेत्सर्व्वातिथिः पश्चात् स राजन् केतनक्षमः ॥

असम्बन्धिनां श्राद्धे भोजनीयत्वमभिधाय गारुडपुराणे ।

उदासीनेष्वलब्धेषु भोज्याः सम्बन्धिनोऽपि हि ।
मातुलःश्यालयाज्यर्त्विक्शिष्याचार्य्यादयोऽपि च ॥

'मातुलः' मातुर्भ्राता । 'श्यालः' पत्नीभ्राता । 'याज्यः' यस्यार्त्विज्यं क्रियते । 'ऋत्विक्' याजकः । 'शिष्यः' अध्याप्यः । 'आचार्य्यः' वेदाध्यापकः ।

आपस्तम्बः ।

भोजयेद् ब्राह्मणान् ब्रह्मविदोयोनिगोत्रमन्त्रान्तेवास्यसम्बन्धान् गुणहान्यातु परेषां समुदेतः सोदर्य्योऽपि भोजयितव्यः । एतेनान्तेवासिनो व्याख्याताः । 'ब्रह्मविदः' वेदार्थज्ञान् अध्यात्मज्ञाननिष्ठान् वा, योन्यादिसम्बन्धरहितान् ब्राह्मणान् भोजयेत् । 'परेषां' योन्यादिसम्बन्धरहितानां, यदि वृत्तविद्यादिगुणहानिः तदा 'समुदेतः' सकलगुणोपेतः, सोदर्य्योऽपि भोजयितव्यः । किमङ्ग पुनः व्यवहितसम्बन्धाः श्याल-श्वशुर-जामातृ-मातुलादयः । 'एतेन' समुदितेन सोदर्य्येण, 'अन्तेवासिनः' समीप-वासिनः, व्याख्याताः । तेन भोजयेदित्यनुवृत्तौ गौतमः ।

शिष्यांश्चैके सगोत्रांश्च भोजयेदूर्ध्वं त्रिभ्यो गुणवतः । च शब्दाद् याज्याद्यांश्च, द्वितीय चशब्दात्समानार्षेयांश्च । 'ऊर्द्ध्वं त्रिभ्यः' इति मुख्यास्त्रयस्तावदसम्बन्धिन एव निमन्त्रणीयाः । असम्बन्धिभ्यस्त्रिभ्य ऊर्द्ध्वं पङ्क्तिपावनगुणयुक्तं शिष्यादिकं भोजये-दित्यर्थः । अन्येत्वेवं व्याचक्षते । सगोत्रेषु मध्ये त्रिभ्यः पुरुषेभ्य ऊर्द्ध्वं गुणवान् भोजनीय इति ।

अत्र वसिष्ठः ।

शिष्यानपि गुणवतो भोजयेत् ।

'गुणवतः' गुणप्रकर्षवतः । अपिशब्दादन्तेवासिनोऽपि ।

मनुकूर्म्मपुराणयोः ।

मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यांश्च भोजयेत् ॥

'मातामहः' मातुः पिता । 'स्वस्रीयः' भगिन्याः पुत्रः । 'गुरुः' उपाध्यायः । विशः प्रजाया दुहितुः पतिरिति व्युत्पत्या 'विट्पतिः' जामाता । अतिथिर्व्वा विट्पतिः । स हि गृहाभ्यागतः सन् सर्व्वासां विशां लोकनिष्ठ इति मेधातिथिः । श्राद्धीयद्विज-सन्निधावतिथिर्भोजनीय इत्युक्तम् । यदि तु श्राद्धे भोक्तारः प्रकृष्टगुणा न स्युः श्राद्धे एवासौ भोजनीय इत्यनुकल्पत्वम् ।

बन्धुमातुलश्यालादिरसगोत्रस्तथा गुणी ।
कामं श्राद्धेऽर्च्चयेन्मित्रं नाभिरूपमपि त्वरिम् ॥
द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ।

'अभिरूपमपि' विद्वांसमपीत्यर्थः। काममित्यभिधानादनुकल्पोऽयमिति गम्यते।

श्राद्धसम्पद इत्यनुवर्त्तमाने याज्ञवल्क्यः।

स्वस्रीयऋत्विक्जामातृयाज्यश्वशुरमातुलाः।
त्रिणाचिकेतदौहित्रशिष्यसम्बन्धिबान्धवाः॥

वायुपुराणे।

मातापितृपरश्चैव स्वस्रीयः सामवेदवित्।
ऋत्विक् पुरोहिताचार्य्यमुपाध्यायञ्च भोजयेत्॥
मातुलः श्वशुरः श्यालः सम्बन्धी द्रोणपाठकः।
एते श्राद्धे नियोक्तव्या ब्राह्मणा वेदपारगाः॥

मत्स्यपुराणे।

भोजयेच्चापि दौहित्रं यत्नतः श्वशुरं गुरुम्।
विट्पतिं मातुलं बन्धुमृत्विगाचार्य्यश्यालकान्॥

गुरुरत्र शिल्पादिशास्त्रोपाध्यायः।

प्रभासखण्डे।

दौहित्रऋत्विग्जामातृस्वस्रीयाः श्वशुरस्तथा।
मातापितृपरा भोज्याः शिष्यसम्बन्धिबान्धवाः॥

त्रिणाचिकेतादीनभिधायोक्तं विष्णुपुराणे।

ऋत्विक्स्वस्रीयदौहित्रा जामातृश्वशुरास्तथा।
मातुलोऽथ तपोनिष्ठः पितृमातृस्वसुः पतिः॥
शिष्याः सम्बन्धिनश्चैव मातापितृरतश्च यः।
एतान्नियोजयेच्छ्राद्धे पूर्वोक्तान् प्रथमं नृप॥
ब्राह्मणान् पितृतुष्ट्यर्थमनुकल्पेष्वनन्तरान्।

पूर्व्वोक्तांस्त्रिणाचिकेतादीन् प्रथमं नियोजयेत्। एतान् ऋत्विगादीन् तदनन्तरानुकल्पेषु नियोजयेत्।

अत्र शङ्खधरेणोक्तम्।

कुष्ठकुणित्वादिदोषरहिताः सन्ध्योपासनमात्रगुणा एते मातुलादयोऽनुकल्पतया नियोज्याः। यदि तु विद्वांस एते भवन्ति तदा मुख्यकल्पत्वेनैवेति। तदेतस्याः कल्पनायाः किं मूलमिति न विद्मः। वयन्तु ब्रूमः। उत्कृष्टगुणोदासीनाभावे प्रतिनिधीयन्ते खल्वेते। प्रतिनिधिश्च प्रथमन्तावत् सुसदृश एवेति तदलाभे असदृश एवेति। उत्कृष्टगुणोदासीनानामुत्कृष्टगुणा एव मातुलादयः सुसदृशा इति प्रथमतः प्रतिनिधीयन्ते[1]। तदभावे मध्यमगुणाः। तेषामप्यभावे हीनगुणा इति। एवं सति गुणवत्तरत्ववेदपारगत्वादीनि तद्विशेषणान्यपि समञ्जसानि स्युः।

---

[1] प्रथमतो विधीयन्ते इति।

ननु यद्येते प्रतिनिधयस्तर्हि मुख्याभावे सादृश्यात् स्वयमेव प्राप्स्यन्ति इत्यनुकल्पवचनानामानर्थक्यमेव[1] स्यात्। न। पूतिकवचनवन्नियमार्थत्वोपपत्तेः। यथा सोमाभावे बहुषु सुसदृशेषु प्राप्तेषु वचनेन नियमः क्रियते, पूतिका एवाभिषोतव्या इति। एवमिहापि नियमार्थानि वचनानि भविष्यन्ति। तदुक्तं जैमिनिना "नियमार्थः क्वचिद्विधिः" इति। नियमश्चैवं अत्र यथैवोत्कृष्टगुणानामुदासीनानामभावे प्रथमं गुणोत्कर्षसादृश्यादुत्कृष्टगुणा मातुलादयः प्राप्ताः। एवमौदासीन्यसादृश्येन मध्यमगुणा उदासीनाः प्राप्ताः, तत्र नियम्यते मातुलादय एव ग्राह्या इति। एवं च सति वक्ष्यमाणानि सम्बन्धिनमतिक्रम्य[2] वचनान्यपि नियमार्थानि स्युः। मुख्यब्राह्मणाभावे मातुलादीनतिक्रम्यान्ये न ग्राह्या इति। तत्र श्वशुरानपीति। किं पुनर्न्यायेनार्थवादत्त्वेन नेयम्। अमूर्खानिति तु पाठे सर्व्वमनवद्यमेव। अथवा शेषमन्नमिष्टैः सह भुज्यतामिति ब्राह्मणाभ्यनुज्ञातश्राद्धोपयुक्तशेषान्नप्रतिपत्त्यर्थं यदिष्टभोजनं तद्विषयाणि मूर्खानतिक्रमवचनानि।

आह गार्ग्यः।

> नैकगोत्रे हविर्दद्यात्समानप्रवरे तथा।
> न चाज्ञातकुले दद्यात् यथा कन्या तथा हविः॥
> अभावे ह्यन्यगोत्राणामेकगोत्रांस्तु भोजयेत्।
> असमप्रवराभावे समानप्रवरानपि॥

कूर्म्मपुराणे।

अभावे ह्यन्यगोत्राणां सगोत्रानपि भोजयेत्।

अत्र सगोत्र-शब्देन यथैकगोत्राः असम्बन्धिनोऽनुज्ञायन्ते तथा सपिण्डसमानोदकाद्याः सम्बन्धिनोऽप्यनुज्ञायन्त इति गम्यते।

तत्र विशेषमाहात्रिः।

> षड्भ्यस्तु पुरुषेभ्योऽर्व्वाक् न श्राद्धीयास्तु गोत्रिणः।
> एभ्यस्तु परतो भोज्या श्राद्धे स्युर्गोत्रजा अपि॥

ये षड्भ्यः परे न भवन्ति त इहार्व्वाक् शब्देन गृह्यन्ते। ततश्च गोत्रे षट्पुरुषाः श्राद्धे न भोजनीया इति तद्वचनार्थः। गुणवतां तेषामभावे श्रुताध्ययनसम्पन्नाः सप्तमादयोऽपि भोजनीयाः।

अत्र पङ्क्तिपावनानन्तरं बौधायनः।

तदभावे रहस्यविदृचो यजूंषि सामानीति श्राद्धस्य महिमा, तस्मादेवंविदं सपिण्डमप्याशयेदिति।

'रहस्यवित्' वेदान्तार्थवित्। यस्मादृग्यजुःसामानि श्राद्धस्य 'महिमा' महत्वापादकानि, तस्मात् 'एवंविदं' ऋग्यजुः सामविदं, सपिण्डमपि भोजयेत्। तथायं

---

[1] इत्यनुकल्पवचनमनर्थमेव इति। [2] सम्बन्धानतिक्रम्येति।

सपिण्डशब्दः साप्तपुरुषमात्रविषयः। त्रिभ्य ऊर्द्ध्वं सपिण्डानां भोजनीयत्वदर्शनात्। तदुक्तं गौतमेन।

भोजयेदूर्ध्वं त्रिभ्यो गुणवन्तमिति। चतुर्थादर्व्वाञ्चस्तु न भोजनीया एव।

तदाह सुमन्तुः।

पिता पितामहश्चैव श्राद्धेषु प्रपितामहः।
पितुः पितृव्यः स्वस्रीयो न भोज्याश्च सुतादयः॥

पितुः सुतादय इति सम्बन्धः। अत्र पितृपितामहानामुद्दिश्यमानाधिष्ठान-भूतत्वेन श्राद्धभोजनं निषिध्यते। न पुनरन्याधिष्ठानीभूतत्वेनापि पृथक् श्राद्धादिषु।

विप्रवद्वापि तं श्राद्धे स्वकं पितरमाशयेत्।
पितामहो वा तत् साक्षात् भुञ्जीत श्राद्धमर्च्चितः॥

इत्यादिभिस्तेषां श्राद्धे भोजनीयत्वदर्शनात्। अत्रिस्तु पित्रादीनां गुणवत्तराणां वैश्वदेवे नियोज्यत्वमुक्तवान्।

पिता पितामहो भ्राता पुत्रो वाथ सपिण्डकः।
न परस्परमर्हाः स्युः न श्राद्धे ऋत्विजस्तथा॥
ऋत्विक् पुत्रादयो ह्येते सकुल्या ब्राह्मणाः स्मृताः।
वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः॥

अतो यदापस्तम्बेन समुदेतस्य सोदर्य्यस्य भोजनीयत्वमुक्तं तदपि वैश्वदेवे-इति मन्तव्यम्। सगुणानामनुकल्पानामलाभे निर्गुणानामनुकल्पतया स्वीकारमाह वसिष्ठः।

आनृशंस्यं परो धर्म्मो याचते यत् प्रदीयते।
अयाचतः सीदमानान् सर्व्वोपायैर्निमन्त्रयेत्॥

आनृशंस्यं पर उत्कृष्टो धर्म्मस्तेन सगुणानामभावेऽपि निर्गुणायापि याचते यत् प्रदीयते तदप्यनुकल्पो भवति अयाचतः सीदमानान् अयाचनशीलान् कुत एव कारणात् सीदतो निर्गुणानपि सगुणानामलाभे निमन्त्रयेत्। सर्व्वोपायैरिति यादृशैस्ते निमन्त्रण-मभ्युपगच्छन्ति तादृशैरुपायैरित्यादरेण निमन्त्रणं तदयाचनेन सीदतामलाभे याच-मानाय प्रदानमिति दर्शयति। एवंविधेषु विप्रेषु सदाचारविकल्पदर्शनेऽपि निन्दा न कार्य्येत्याह स एव।

युगे युगे तु ये धर्म्मास्तेषु धर्म्मेषु ये द्विजाः।
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः॥

'युगे युगे तु ये धर्म्माः' युगानुरूपरागद्वेषादितारतम्यनिबद्धा ये ये असत्य-भाषणादयो दुःस्वभावाः, 'तेषु धर्म्मेषु ये द्विजाः' तेषु दुःस्वभावेषु वर्त्तमाना ये द्विजाः, युगानुरूपविप्रेष्वपि यथासम्भवं श्रेष्ठा एव ग्राह्याः। प्रथमकल्पशक्तस्य तु अनुकल्पा-नुष्ठातुर्दोषमाह मनुः।

प्रभुः प्रथमकल्पस्य योऽनुकल्पे तु वर्त्तते।
न साम्परायिकं तस्य दुर्म्मतेर्विद्यते फलम्॥

'प्रभुः' सम्पादने समर्थः। 'सम्परायः' उत्तरकालः। सम्परायशब्दस्य तद्वाचकताया अमरसिंहेनाभिहितत्वात्। एवं वायमर्थः। 'सम्पराये' भविष्यकाले भवं स्वर्गादिकं फलं न विद्यते इति।

इत्यनुकल्पनिरूपणम्।

अथ सन्निहितब्राह्मणानतिक्रमः।

तत्र शातातप-पराशरस्मृत्योः।

सन्निकृष्टमधीयानं ब्राह्मणं यस्त्वतिक्रमेत्।
भोजने चैव दाने च दहत्यासप्तमं कुलम्॥

अत्रैकग्रामनिवासिनां तुल्यगुणानां द्विजानां मध्ये स्वेच्छया श्राद्धपर्य्याप्तेषु गृह्यमाणेषु दैवात् केषाञ्चिदतिक्रमोभवन्नपि न दोषाय भवतीति। बुद्ध्या सन्निकृष्टं ब्राह्मणं नातिक्रामेत् तं परित्यज्यान्यं नोपाददीतेत्यर्थः। यस्मादतिक्रामन् 'आसप्तमं' स्वप्रभृतिसप्तमपुरुषपर्यन्तं स्वकुलं 'दहति' निरयाग्निना भस्मीकरोति।

षड्त्रिंशन्मते।

सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्।
भोजने चैव दानेषु दहेत् त्रिपुरुषं कुलम्॥

'त्रिपुरुषं' त्रिपुरुषपर्य्यन्तम्। अधीतवेदस्य सन्निकृष्टस्यातिक्रमे यो दोष उक्तः सोऽन्यस्यातिक्रमे नास्तीत्यर्थात् सिद्धमपि व्यास-वशिष्ठ-शातातपैर्हेतूपन्यासेन दृढीकृतम्।

ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते।
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते॥

'वेदविवर्जिते' वेदाध्ययनरहिते विप्रेऽतिक्रान्ते अनुपात्ते सति तस्य तदतिक्रमकृतप्रकृतप्रयोजनहानिप्रत्यवायादिरूपो न कश्चिद्दोषो जायते। यस्मान्नासौ हविः प्रतिष्ठापनयोग्यः। यथा वह्निं विहाय भस्मनि हविः प्रक्षेपयोग्यं न भवतीति दृष्टान्तः।

भविष्यत्पुराणे।

व्यतिक्रान्ते न दोषोऽस्ति निर्गुणं प्रति कर्हिचित्।

द्विविधोऽत्र सन्निकृष्टः समीपगृहवासी शरीरसम्बन्धी मातुलादिश्च।

ननु द्विविधस्यापि सन्निकृष्टस्यातिक्रमो निषेद्धुं न शक्यते। यस्मादसन्निकृष्टापेक्षयोत्तमस्य प्रथमकल्पत्वादेवानतिक्रमसिद्धेः, समस्य तु सन्निहितातिक्रमे कारणाभावादितिन्यायादतिक्रमाप्राप्तेः।

न चेयं प्राप्तिरिति वाच्यम्। यत्र लाघवेन निमन्त्रितत्वात्तस्य हीनस्य त्वतिक्रमोनिषिध्यमानः सर्व्वानपि योग्यायोग्यविधिनिषेधान् बाधेत। तस्मादतिक्रमस्य

निषेधोऽनुपपन्नः। अस्तु तर्हि नोद्यदादित्यवत्पर्य्युदासोऽयं व्यतिक्रमादन्यत् कर्त्तव्यमिति, किं तदन्यत् निमन्त्रणं, नैतदेवं, निषेधपक्षोक्तविकल्पदूषणैरेव निरस्तत्वात्। अतो न पर्य्युदासोऽपि सम्बन्धिषु व्यतिक्रमनिषेधस्य सम्बन्धिनिषेधानुकल्पविधिभ्यां विरोधश्चापरो दोषः। अतोऽतिक्रमनिषेधसम्बन्धिनिषेधानुकल्पविधीनामविरोधेन वक्तव्यो विषयविभागः।

उच्यते। यदा सर्व्वोत्तमगुण उदासीनो न लभ्यते तदानुकल्पविधिस्तदानीमेव मध्यमगुणोदासीनग्रहणे प्राप्ते उत्तमगुणा वा मध्यमगुणा वा सम्बन्धिनः पूर्व्वं गृहीतव्याः। हीनगुणेषु तु उदासीनेषु मध्यमगुणा वा हीनगुणा वा सम्बन्धिन एव ग्राह्याः। सोऽयमतिक्रमनिषेधस्य विषयः। उक्तमधीयानस्य सन्निहितस्यातिक्रमो न कर्त्तव्यः, अनधीयानस्य च कर्त्तव्य इति।

इदानीमनधीयानस्यापि सन्निहितस्यातिक्रमो न कर्त्तव्य इत्युच्यते।

भविष्यत्पुराणे।

अरुण उवाच।

एवमेतज्जगन्नाथ देवदेव जगत्पते।
किन्तु यन्मे पुरादेव श्रुतं वाक्यं महात्मनः॥
गदतो नारदस्येह शृणु त्वं ग्रहनायक।
गदतो मे सुरश्रेष्ठ धर्म्ममर्थं सुखावहम्॥
सन्निकृष्टं द्विजं यस्तु शुक्लजातिं प्रियम्बदम्।
मूर्खं वा पण्डितं वापि वृत्तहीनमथापि वा॥
नातिक्रमेन्नरो विद्वान् दारिद्र्याभिहतं तथा।
सप्तपूर्व्वान् सप्तपरान् पुरुषानात्मना सह॥
अतिक्रम्य द्विजो घोरे नरके पातयेत् खग।
तस्मान्नातिक्रमेत्प्राज्ञो ब्राह्मणान् प्रातिवेश्मकान्॥
सम्बन्धिनस्तथा सर्व्वान् दौहित्रं विट्पतिं तथा।
भागिनेयं विशेषेण तथा सम्बन्धिनः खग[1]॥
नातिक्रमेन्नरस्त्वेतान् स्वस्थितानपि गोपते।
अतिक्रम्य महारौद्रं रौरवं नरकं व्रजेत्॥

प्रभासखण्डे।

सम्बन्धिनस्तथा सर्व्वान् दौहित्रं विट्पतिं तथा।
भागिनेयं विशेषेण तथा बन्धुगणानपि॥
नातिक्रमेन्नरस्त्वेतान् मूर्खानपि वरानन। इति।

महाभारते।

गायत्रीमात्रसारोऽपि ब्राह्मणः पूजितः खग।
गृहासन्नो विशेषेण न भवेत् पतितः स चेत्॥

---

[1] बन्धून् खगाधिप।

यस्मिन्ब्राह्मणे गायत्रीमात्रमेव सर्व्वविद्यासारभूतं ब्राह्मण्यसारभूतं वास्ति सोऽप्यनुकल्पत्वेन श्राद्धादौ पूज्यतां प्राप्नोत्येव। यदि नामैवंविधो भूत्वा स्वगृह-प्रत्यासन्नगृहवासी भवेत्तदासौ प्रत्यासन्नत्वेन विशेषतः पूज्यतां लभते। विशेषेणेति वचनं तस्यानतिक्रमं सूचयति।

अयन्तु भविष्यत्पुराणाद्युक्तो निर्गुणसन्निहितब्राह्मणानतिक्रमो गुणयुक्तासन्निहितब्राह्मणालाभ एव, लाभे व्यतिक्रम एव।

तथा च महाभारते।

यदि स्यादधिको विप्रो दूरे वृत्तादिभिर्युतः।
तस्मै यत्नेन दातव्यमतिक्रम्यापि सन्निधौ॥

'अधिकः' वेदाध्ययनवृत्तादिगुणसम्पदा। अधिकग्रहणाद्यदि तु समस्तदा सन्निहितातिक्रमो न कर्तव्य इति गम्यते।

निशम्याथ गुणोपेतं ब्राह्मणं साधुसम्पदम्।
दूराद्गत्वा च सत्कृत्य यत्नतश्चापि पूजयेदिति॥

सन्निहितं वेदाध्ययनवृत्तादिगुणरहितं ब्राह्मणमतिक्रम्य गुणयुक्तं दूरमपि कृते श्राद्धादिरूपे कर्म्मणि भोजयेदित्यर्थः।

बौधायनोऽप्याह।

यस्य त्वेकगृहे मूर्खो दूरे वापि बहुश्रुतः।
बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः॥

षट्त्रिंशन्मतेऽपि।

यस्यत्वेकगृहे मूर्खो दूरतश्च गुणान्वितः।
गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः॥

'व्यतिक्रमो नास्ति' व्यतिक्रमदोषो नास्तीत्यर्थः। 'एकगृहे' इत्यनेन चैतत् सूच्यते एवंविधे विषये अत्यन्तसन्निधिरप्यतिक्रमप्रयोजको न भवतीति।

यत्तु दूरस्थे गुणाढ्ये सत्यपि सन्निहितस्य निर्गुणस्यातिक्रमो न कर्त्तव्य इत्युक्तं भविष्यत्पुराणे।

यस्त्वासन्नमतिक्रम्य ब्राह्मणं पतितादृते।
दूरस्थं भोजयेन्मूढो गुणाढ्यं नरकं व्रजेत्॥
तस्मात्संपूजयेदेनं गुणं तस्य न चिन्तयेत्।
केवलं चिन्तयेज्जातिं[1] गुणान् वा विततान् खग॥
तस्मादामन्त्रयेत् पूर्व्वमासन्नं ब्राह्मणं बुधः।

तत् पूर्व्वोक्तबहुतरवाक्यविरोधायानतिक्रमणमध्ये सन्निहितानतिक्रमदर्शनार्थं, न तु दूरस्थगुणाद्यलाभेऽप्यनतिक्रमार्थमिति व्याख्येयम्। अथवायं मूर्खानतिक्रम्य गृहप्रत्यासन्न-तत्समानाधिकरण-शरीरप्रत्यासन्नत्वविशिष्टब्राह्मणविषयो वर्णनीयः।

---

[1] तथा न चिन्तयेज्जातिमिति।

व्यासशातातपौ।

प्रस्तरे वापितं वीजं भिन्नभाण्डे च दोहनम्।
भस्मन्यपि हुतं हव्यं तद्वद्दानमसाधुषु॥

मनुः।

अनर्हते यद्ददाति न ददाति यदर्हते।
अर्हानर्हानभिज्ञानात् सोऽपि धर्म्माच्च हीयते॥

दोषवतां ग्रहणे न केवलं प्रकृतकर्म्मविनाशः किन्तु प्रत्यवायोऽपि भवतीत्येतत् ज्ञापनमपि दोषाभिधानस्य प्रयोजनम्। प्रत्यवायश्च दर्शितो वायुपुराणे।

न श्राद्धे भोजनीयाः स्युर्निन्दिता ब्राह्मणाधमाः।
यैर्भुक्तं नश्यति श्राद्धं पितॄन् दातॄंश्च पातयेत्॥

'पातयेत्' प्रत्यवायेन संयोजयेत्।

ब्रह्मपुराणे।

असताम्प्रग्रहो यत्र सताञ्चैवावमाननम्।
दण्डो दैवकृतस्तत्र सद्यः पतति दारुणः॥

दक्षः।

विधिहीने तथा पात्रे यो ददाति प्रतिग्रहम्।
न केवलं हि तद् याति शेषमप्यस्य नश्यति॥

विष्णुः।

यथा प्लवेनौपलेन निमज्जत्युदके नरः।
दातृप्रतिग्रहीतारौ तथैवान्यौ निमज्जतः॥

तथाह वशिष्ठः।

विद्वद्भोज्यान्यविद्वांसो येषु राष्ट्रेषु भुञ्जते।
तान्यनावृष्टिमृच्छन्ति महद्वा जायते भयम्॥

'ऋच्छन्ति' प्राप्नुवन्ति।

कथञ्चिद् गुणहीना अपि दोषवन्तः पङ्क्तिपावनमिश्रिततयोपवेशिता- नानर्थवहाः। "अपाङ्क्तयोपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः" इति मनुनाभिहित- त्वात्। अतएव सुमन्तुना कथञ्चिद्गृह्यमाणानां दोषवतां पङ्क्तिपावनमिश्रणमुक्तम्।

काणाः कुण्डाश्च मण्डाश्चाप्यचर्म्माणः कचैर्विना।
सर्व्वे श्राद्धे नियोक्तव्या मिश्रिता वेदपारगैः॥

'काणाः' एकाक्षाः। 'कुण्डा' चङ्क्रमणाक्षमचरणाः। 'मण्डाः' वक्रजङ्घाः। 'अचर्म्माणः' दुश्चर्म्माणः। 'कचैर्विना' खलतय इत्यर्थः।

काश्यपेन तु मिश्रणे विशेष उक्तः।

काणादीन् भोजयेद्दैवे श्राद्धे दाने तु वर्जयेत्।

श्राद्धे प्रसक्तौ वैश्वदेविके भोजयेत्। दाने तु वर्जयेत्। पङ्क्तिपावनामिश्रितेषु प्रमादाद्दोषवत्सु भोजितेषु दोषतारतम्यवशादेनसि "गुरुणि गुरूणि लघुनि लघूनीति" वचनात् यथायथं प्रायश्चित्तं विधेयम्। एतच्च वीक्षान्धो नवतेः काणः इत्येतन्मनु-श्लोकाभिप्रायं वर्णयता मेधातिथिना समुद्भेदितम्। अयोग्यस्य श्राद्धे भोक्तुरपि-प्रत्यवायमाहुः, यम-मनु-शातातपाः।

यावतो ग्रसते पिण्डान् हव्यकव्येष्वमन्त्रवित्।
तावतो ग्रसते प्रेत्य दीप्तान् ऋष्टीनयोगुडान्॥

'पिण्डान्' ग्रासान्। 'अमन्त्रवित्' वेदरहितः। 'दीप्तान्' अग्निसन्तप्तान्। 'ऋष्टिः' आयुधविशेषः। 'अयोगुडाः' अयोगोलकाः।

यमः।

देवतानां पितॄणाञ्च हव्यकव्यविनाशकः।
विप्रोऽधर्म्मपरो मूर्खो न लोकान् प्राप्नुयात् क्वचित्॥

तदेतत् सर्व्वमभिप्रेत्य याज्ञवल्क्येनोक्तम्।

गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम्।
नापात्रे विदुषा किञ्चिदात्मनः श्रेय इच्छता॥

वर्ज्या निरूप्यन्त इति प्रतिज्ञातम्। तत्र मित्रादयस्तावत्—

मनुः।

न श्राद्धे भोजयेन्मित्रं धनैः कार्य्योऽस्य संग्रहः।
नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विजम्॥

सत्यामेव श्रोत्रियत्वादिपूर्व्वगुणसम्पदि मैत्र्यानिमित्तेन प्रतिषेधोऽयम्। मनोवाक्कायैरनुकूलैकप्रवृत्तिः 'मित्रम्'। 'संग्रहः' चित्तानुरञ्जनम्। 'अरिः' शत्रुः। यो रागद्वेषयोरद्वेषस्तं भोजयेत्।

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च।
तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च॥

पूर्व्वस्य प्रतिषेधस्यार्थवादोऽयम्। मित्रशब्दो भावप्रधानः मैत्री प्रधानानीत्यर्थः। 'हवींषि' हव्यानि। प्रेत्येतिपरलोकवाचकमव्ययं असमानकर्तृकत्वेन क्यप्प्रत्यया-नुपपत्तेः।

यः सङ्गतानि कुरुते मोहात् श्राद्धानि मानवः।
स स्वर्गात् च्यवते लोकात् श्राद्धमित्रं द्विजाधमः॥

'सङ्गतानि' सख्यानि। 'मोहात्' शास्त्रार्थमजानन्। 'स्वर्गाच्यवते' स्वर्गेण न सम्बध्यत इत्यर्थः। 'श्राद्धं मित्रं' मित्रलाभहेतुर्यस्य। द्विजग्रहणं प्रदर्शनार्थं, शूद्रेणापि मित्रीभूता ब्राह्मणा न ग्राह्या इति मेधातिथिना बहु प्रपञ्चितम्।

सम्भोजनी साभिहिता पैशाची दक्षिणा द्विजैः।
इहैवास्ते तु सा लोके गौरन्धैवेकवेश्मनि॥

'सम्भोजनी' या सहभोजनी । मैत्र्या हि सहभोजनी प्रवर्त्तते ।

पिशाचानामयं धर्म्मो यच्छ्राद्धे मित्रसंग्रहः ।
सा दक्षिणा इहैवास्ते मित्रार्जनफला हि सा ॥

मित्रार्जनमात्रफलाभवतीत्यर्थः ।

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ।
पितृषु दैवयज्ञेषु दाता स्वर्गं न गच्छति ॥
श्राद्धेन यः कुरुते सङ्गतानि,
न देवयानेन पथा स याति ।
विनिर्मुक्तं पिप्पलं बन्धतो वा,
स्वर्गाल्लोकाद् भ्रश्यति श्राद्धमित्रः ॥

'देवयानशब्दः' पितृयाणस्याप्युपलक्षणम् । 'वा' शब्द उपमार्थः । 'पिप्पलं' पिप्पलफलम् ।

हारीतः ।

श्राद्धेन यः कुरुते सङ्गतानि,
न देवयानेन पथा स याति ।
वृन्ताच्च्युतं पिप्पलं बन्धनाद्वा,
लोकात् स्वर्गात् च्यवते श्राद्धमित्रः ॥

यमापस्तम्बौ ।

सम्भोजनी नाम पिशाचभिक्षा,
नैषा पितॄन् गच्छति नोत देवान् ।
इहैव सा भ्रमति क्षीणपुण्या,
शालान्तरे गौरिव नष्टवत्सा ॥

श्राद्धमधिकृत्य गौतमः ।

न च तेन मित्रकर्म्म कुर्य्यात् ।

बार्हस्पत्यसंहितायाम् ।

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ।
तस्य प्रेत्य फलं नैव स्यादित्यन्योन्यभोजनात् ॥

महाभारते ।

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ।
न प्रीणाति पितॄन् देवान् न स्वर्गं स च गच्छति ॥
यस्तु श्राद्धैः कुरुते सङ्गतानि,
न देवयानेन पथा स याति ।
स वै मुक्तं पिप्पलं बन्धनाद्वा,
स्वर्गाल्लोकाच्च्यवते श्राद्धमित्रः ॥

तस्मान्मित्रं श्राद्धकृन्नाद्रियेत,
दद्यान्मित्रेभ्यः संग्रहार्थं धनानि।
यं मन्यते नैव शत्रुं न मित्रं,
तं मध्यस्थं भोजयेत् श्राद्धकल्पे ॥

उत्कृष्टगुणोदासीनाभावे कदाचिदुत्कृष्टगुणं मित्रं ग्राह्यम्। शत्रुस्त्वनुकल्पतयापि न ग्राह्य इत्याह मनुः।

कामं श्राद्धेऽर्च्चयेन्मित्रं नाभिरूपमपि त्वरिम्।
द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥

"अभिरूपम्" योग्यम्।

सम्भवत्युदासीने मित्रं न ग्राह्यमेवेत्युक्तं बार्हस्पत्यसंहितायाम्।

उदासीनमतिक्रम्य यः श्राद्धे मित्रमाशयेत्।
परस्परस्य दानाद्धि तस्य नामुत्र तत्फलम् ॥

वायुपुराणे।

न भोजयेदेकगोत्रान् समानप्रवरांस्तथा।
एतेभ्यो हि हविर्दत्तं भुञ्जते न पितामहाः ॥

कूर्म्मपुराणे।

न श्राद्धे भोजयेद्विप्रान् सगोत्रान् ब्राह्मणान् क्वचित्।
सगोत्रैर्हि हविर्भुक्तमिहैव परिवर्तते ॥

ब्रह्माण्डपुराणे।

न भोज्या योनिसम्बन्धा गोत्रसम्बन्धिनस्तथा।
मन्त्रान्तेवासिसम्बन्धाः श्राद्धे विप्राः कदाचन ॥

ब्रह्मवैवर्त्ते।

शिष्याश्च ऋत्विजो याज्याः सुहृदः शत्रवस्तथा।
श्राद्धेषु श्वसुरः श्याला न भोज्या मातुलादयः ॥

इति मित्रादयः।

अथानधीयानादयः।

तत्र मनु-व्यास-यमाः।

ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति।
तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ॥

यथा स्तेनादयः पङ्क्तिदूषकाः, एवमनधीयानस्तत्कल्पदोष इत्येवमर्थं पुनर्वचनम्। यथा तृणाग्निर्न शक्नोति हवींषि पक्तुं हुतमात्रे च हविषि 'शाम्यति' क्षीणशक्तिर्भवति, एवमनधीयानो मूर्खः।

यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम्।
तथानृचे हविर्दत्त्वा न दाता लभते फलम्॥

'ईरिणम्' उषरम्। 'अनृचे' वेदरहिते।

शातातपः।

नाविद्वत्सु प्रदेयन्तु हव्यं वा कव्यमेव च।

महाभारते।

यथा प्रशान्ते ज्वलने जुहोति,
तन्नैव देवान्न पितॄनुपैति।
तथा दत्तं नृत्यते गायते च,
याश्चानृचे दक्षिणामावृणेद्धि॥
उभौ हिनस्ति न भुनक्ति चैषा,
या चानृचे दक्षिणा दीयते वै।
अथायनी गर्त्तमेषा पतन्ती,
तेषां प्रेतान् पातयेद्देवयानात्॥

'उभौ' दातृ-भोक्तारौ। 'न भुनक्ति' न पालयति। 'अयनी' पापगतिः।

कूर्म्मपुराणे।

यस्य वेदश्च वेदी च विच्छिद्येते त्रिपौरुषम्।
स वै दुर्ब्राह्मणो नार्हः श्राद्धादिषु कदाचन॥

व्यासः।

सन्ध्याहीने व्रतभ्रष्टे विप्रे वेदविवर्जिते।
दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतम्॥

विष्णुः।

न वार्य्यपि प्रयच्छेत विडालव्रतिके द्विजे।
न वकव्रतिने पापे नावेदविदि धर्म्मवित्॥
त्रिष्वप्येतेषु यद्दत्तं विधिनोपार्जितं धनम्।
दातुर्भवत्यनर्थाय परत्रादातुरेव च॥

यमः।

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्।
नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलाम्॥

तथा।

राजधानी यथा शून्या यथा कूपश्च निर्जलः।
यथा हुतमनग्नौ च तथा दत्तं द्विजेऽनृचे॥

वायुपुराणे ।

> प्राह वेदान् वेदभृतो वेदाद्यश्चोपजीवति ।
> उभौ तौ नार्हतः श्राद्धं पुत्रिकापतिरेव च ॥

वेदप्राप्तये दत्तवेतनः 'वेदभृतः' । 'वेदोपजीवनम्' घटिकाध्ययनादिद्रव्यग्रहणम् ।

महाभारते ।

> अनुयोक्ता च यो विप्रो योऽनुयुक्तश्च भारत ।
> नार्हतस्तावपि श्राद्धं ब्रह्मविक्रयिणौ हि तौ ॥
> यश्चादेशपूर्व्वकं हि स्वाध्यायमात्मनोऽब्रवीत् ।
> वेदविक्रयिणो ह्येते नैतान् श्राद्धेषु भोजयेत् ॥

अमुं वर्गममुमध्यायं पठेत्यादिष्टाः सन्तो येऽधीयते ते दत्तानुयोगाः ।

> ये कुर्व्वन्ति यदश्नन्ति जुह्वते ददते च यत् ।
> विधिवत्तेन पापेन महच्छ्वभ्रं पतन्ति ते ॥
> अभोजनीयास्ते सद्भिस्ते चाभोज्यास्तथा स्मृताः ।
> तेभ्यो दाता च भोक्ता च महादोषानवाप्नुयात् ॥
> स्वकर्मकुलशुद्धानां सत्यस्थानां महात्मनाम् ।
> संसत्स्वव्यवहार्य्यास्ते[1] स्त्रीशूद्रकृतनिश्चयाः ॥
> असंस्कृताध्यापकाश्च भृतकाध्यापकाश्च ये ।
> तमो विशन्ति ते घोरमिति वैवस्वतोऽब्रवीत् ॥

सौरपुराणे ।

> वेदान् ये निगदन्तीह लोभात् मोहात्फलार्थिनः ।
> ब्रह्मविक्रयिणस्ते वै श्राद्धकर्म्मणि वर्जिताः ॥

यमः ।

> न प्रतिग्रहमर्हन्ति वृषलाध्यापका द्विजाः ।
> शूद्रस्याध्यापनाद्विप्रः पतत्यत्र न संशयः ॥

इत्यनधीयानादयः ।

अथ शरीरदोषिणः ।

तत्र वसिष्ठः ।

> भोजयेद्द्विर्नग्न-शुक्ल-विक्लव-श्यावदन्त-कुनखि-वर्जम् ।

'द्विर्नग्नः' दुश्चर्मा खलतिरित्यपरे । 'शुक्लः' श्वित्री । 'विक्लवः' कुष्ठी । 'श्यावदन्तः'स्वभावत एव कृष्णदन्तः । 'कुनखी' कुत्सितनखः ।

शङ्खलिखितौ ।

न वै दुष्टान् भोजयेत् । दुश्चर्म्म-कुनखि-कुष्ठि-श्वित्रि-श्यावदन्ता ये चान्ये हीनातिरिक्ताङ्गास्तानपि वर्जयेत् ।

---

[1] सदस्यव्यवहार्यास्ते इति।

'दुश्चर्म्मा' गजचर्म्मरोगी। कुष्ठी प्रसिद्धः। 'श्वित्री' श्वेतकुष्ठवान्। 'हीनं' परिमाणतः सङ्ख्यया वा न्यूनम्, 'अङ्गम्' अवयवो यस्य स 'हीनाङ्गः'। एवमतिरिक्ताङ्गः। हीनत्वं चाङ्गानां स्वभावतः छेदादिना वापि भवति। तच्चोभयमपि संगृह्यते। आमन्त्रयेदित्यनुवृत्तौ कात्यायनः।

'द्विर्नग्न-शुक्ल-विक्लव-श्यावदन्त-विद्धप्रजनन-व्याधित-व्यङ्ग-श्वित्रि-कुनखिवर्जम्'।

'विद्धप्रजननः' विद्धशिश्नः। 'व्याधितः' दुश्चिकित्स्यरोगः, देवलोक्तपापरोगवान्वा। 'व्यङ्गः' हीनाङ्गः।

भोक्तुं श्राद्धे न चार्हन्ति दैवोपहतचेतसः।
षण्डो मूकश्च कुनखी खल्वाटो दन्तरोगवान्॥
श्यावदन्तः पूतिनासः छिन्नाङ्गश्चाधिकाङ्गुलिः।
गलरोगी च गडुमान् स्फुटिताङ्गश्च सज्वरः॥
खञ्जतूवरमण्डाश्च ये चान्ये हीनरूपिणः।

'षण्डः' षोढा पूर्व्वोक्तलक्षणः। 'मूकः' वाग्रहितः। 'खल्वाटः' केशरहितः। 'पूतिनासः' पूतिवन्नासाक्षिरोगी। 'गलरोगी' गलगण्डादिकण्ठरोगवान्। 'गडुमान्' कुब्जः। 'खञ्जः' कुण्टः। 'यौवनेऽप्यजातश्मश्रुः' 'तूपरः'।

स्कन्दपुराणे।

काणाः कुण्डाश्च मण्डाश्च खल्वाटाः श्यावदन्तकाः।
कुनखाः कुष्ठिनश्चैव द्विर्नग्ना विद्धमेहनाः॥
काणाः कुण्डाश्च मण्डाश्च मूकान्धवधिरा जडाः।
अतिदीर्घा अतिह्रस्वा अतिस्थूला भृशं कृशाः॥
निर्लोमानोऽतिलोमानो गौराः कृष्णा अतीव ये।
एतान् विवर्जयेत्प्राज्ञः श्राद्धेषु श्रोत्रियानपि॥

'जडाः' मूकमनसः।

शालङ्कायनः।

अविद्धकर्णैर्यद्भुक्तं लम्बकर्णैस्तथैव च।
दग्धकर्णैश्च यद्भुक्तं तद्वै रक्षांसि गच्छति॥

लम्बकर्णलक्षणमाह गोभिलः।

अविद्धकर्णः कृष्णश्च लम्बकर्णस्तथैव च।
वर्जनीयाः प्रयत्नेन ब्राह्मणाः श्राद्धकर्म्मणि॥

हारीतः।

हनुस्थलादधः कर्णौ लम्बौ तु परिकीर्त्तितौ।
द्व्यङ्गुलौ त्र्यङ्गुलौ शस्तौ तेन शातातपोऽब्रवीत्॥

इति शरीरदोषिणः।

———

अथ निन्दिताचाराः ।

व्यास-शातातपौ ।

ऊषरे वापितं वीजं यच्च भस्मनि हूयते ।
क्रियाहीनेषु यद्दत्तं तस्य नाशो विधीयते ॥

'क्रियाहीनाः' विहितानुष्ठानशून्याः ।

भविष्यत्पुराणे ।

नाब्राह्मणाय दातव्यं न देयं ब्राह्मणेऽक्रिये ।
न ब्राह्मणब्रुवे चैव न च दुर्ब्राह्मणे धनम् ॥

अब्राह्मणादीनां लक्षणान्युक्तानि संज्ञाप्रकरणे ।

हारीतः ।

विक्रयी शंसते पण्यं क्रयी निन्दति तद्‌गुणान् ।
व्याजोपायश्च कितवमश्राद्धेयं प्रजापतिः ॥

'व्याजः' छलम् । 'कितवः' धूर्त्तः ।

यमः ।

नाश्नन्ति पिशुने देवा नाश्नन्त्यनृतवादिनि ।
भार्य्याजितस्य नाश्नन्ति यस्य चोपपतिर्गृहे ॥
न खरैरुपयातस्य न रक्तान्तरवाससः ।
द्व्यङ्गुलातीतकर्णस्य भुञ्जते पितरो हविः ॥

'पिशुनः' परदोषप्रकाशकः । 'भार्य्याजितः' भार्य्यापरतन्त्रः । 'उपपतिः' नित्यजारः । रक्तमान्तरं वासः परिधानवस्त्रं यस्य स रक्तान्तरवासाः । वेधस्थाने तालपत्रादि प्रवेशेन यस्य कर्णपाशावङ्गुलद्वयादधिकं प्रवृद्धौ स द्व्यङ्गुलातीतकर्णः ।

आपस्तम्बः ।

नीलीकर्षणकर्त्ता तु नीलीवस्त्रानुधारकः ।
किञ्चिन्न तस्य दातव्यं चाण्डालसदृशो हि सः ॥

यः क्षेत्रे नीलीवीजानि निवपति स 'नीलीकर्षणकर्त्ता' ।

मनुः ।

अव्रतैर्यद्‌द्विजैर्भुक्तं परिवेत्रादिभिस्तथा ।
अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते ॥

हारीतः ।

आमपात्रे पयो यद्वद् भस्मन्येव हुतं यथा ।
क्षुद्रकर्म्मण्यवृत्तस्थे तद्वद् वित्तं प्रणश्यति ॥

यमः ।

मोहाद्दत्तानि नश्यन्ति कव्यानि च हवींषि च ।
विप्रेभ्यो भस्मभूतेभ्यो बीजानि च तथोषरे ॥
शान्ते यथाग्नौ घृतमाजुहोति,
तद्देव देवान्न पितृनुपैति ।
तथा दत्तं नृत्यते गायते च,
याञ्चानृचे दक्षिणां वै ददाति ॥
कामं विप्रं वृत्तवन्तं नियुञ्ज्या-
न्नत्वेवमन्येभ्यस्तथा प्रदेयम् ।
क्रोशत्यन्नमनृचे दीयमानं,
तस्मै दत्तं यातुधाना हरन्ति ॥
तस्मात्तुल्यविशिष्टेभ्यो दानं दद्यात्प्रयत्नतः ।
विद्यातपः समृद्धा हि तारयन्ति द्विजातयः ॥
अविवाहिकजातस्य हविर्दद्याच्च यो नरः ।
न तस्य पितरो देवाः प्रतिगृह्णन्ति तद्धविः ॥
दैवे वा यदि वा पैत्रे यत्र भुङ्क्ते तु मद्यपः ।
देवानाञ्च पितृणाञ्च[१] दातुस्तन्नोपतिष्ठते ॥
मद्यपाय न दातव्यं दैवे पित्र्ये तथा हविः ।
तस्मै नश्यन्ति तद्दत्तं यथा भस्मनि वै हुतम् ॥
दातुस्तु छिद्यते हस्तो भोक्तुर्जिह्वा च भिद्यते ।
ज्वलितान् ग्रसते ग्रासान् श्राद्धन्तदनृतं भवेत् ॥
मद्यपश्च निषादश्च यत्र भुङ्क्ते द्विजाधमः ।
न तत्र भुञ्जते देवा न पिबन्ति हविस्तथा ॥
वृषलीपतिभुक्तानि श्राद्धानि च हवींषि च ।
न प्रीणन्ति पितॄन् देवान् दाता स्वर्गं न गच्छति ॥

हारीतः ।

वृषलीपतिभुक्तानि श्राद्धानि च हवींषि च ।
देवानां नोपतिष्ठन्ति दाता स्वर्गं न गच्छति ॥

यमः ।

ये ह्यपेताः स्वकर्म्मभ्यः स्तेनास्ते परिकीर्त्तिताः ।
कव्यं ददाति यस्तेभ्यस्तस्य तत्प्रेत्य नश्यति ॥
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पमेधसः ।
पुरीषं भुञ्जते सर्व्वे शतवर्षाणि सुव्रत ॥
तस्माद्धि दातुकामेन दैवं श्राद्धञ्च सर्व्वशः ।
प्रशान्तेभ्यः प्रदातव्यं नाशान्तेभ्यः कदाचन ॥

---

[१] देवतानां पितृणाञ्चेति ।

नष्टं देवलोके दत्तमप्रतिष्ठन्तु वार्द्धुषे।
यत्तु वाणिज्यके दत्तं नेह नामुत्र तद्भवेत्॥
भस्मनीव हुतं हव्यं दत्तं पौनर्भवे द्विजे।
सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम्॥
श्लेष्मा तु पतिते चैव कृतघ्ने विषमुच्यते।
इतरेषु त्वपाङ्क्तेषु यथोदिष्टेष्वसाधुषु॥
मेदस्त्वङ्मांसमज्जादि भवति प्रतियाचितम्।

वायुपुराणे।

वृथा दारांश्च यो गच्छेत् याजयेच्चावृतोध्वरे।
नार्हत्यसावपि श्राद्धं द्विजो यश्चैव नास्तिकः॥
आत्मार्थं यः पचेदन्नं न देवातिथिकारणात्।
नार्हत्यसावपि श्राद्धं पतितो ब्रह्मराक्षसः॥
सदा रक्ताम्बरा ये च परिवादरताश्च ये।
अर्थकामरता ये च न तान् श्राद्धेषु भोजयेत्॥

महाभारते।

अधीयानः पण्डितं मन्यमानो,
यो विद्यया हन्ति यशः परेषाम्।
ब्रह्मन् स आचरति ब्रह्महत्यां,
लोकास्तस्य ह्येतदन्ता भवन्ति॥
सर्व्वे च वेदाः सह षड्भिरङ्गैः,
साङ्ख्यं पुराणं च कुले च जन्म।
नैतानि सर्व्वाणि गतिर्भवन्ति,
शीलव्यपेतस्य नरस्य राजन्॥
आकर्षणं शत्रुनिवर्हणं च,
कृषिर्व्वणिज्यं पशुपालनञ्च।
शुश्रूषणञ्चाप्यगुरोरहेतोः,
कार्य्यं नैतद्विद्यते[१] ब्राह्मणस्य॥
एते द्विजा निन्दितमाचरन्तः,
पित्र्ये च दैवे च विवर्जनीयाः।
तान् निन्दितान् मोहवशेन गृह्णन्,
सहात्मना मज्जयते पितृंश्च॥

इति निन्दिताचाराः।

---

[१] क्रियते इति।

अथाश्रमवाह्याः ।

काष्र्णाजिनिः ।

चत्वार आश्रमाः पुण्याः श्राद्धे दैवे[1] तथैव च ।
चतुराश्रमवाह्ये तु श्राद्धं नैव प्रदापयेत् ॥

प्रचेताः ।

आश्रमाद् ये वहिर्भूता द्विजरूपेण राक्षसाः ।
तेभ्यो हव्यं न दातव्यं न हि भस्मनि हूयते ॥

देवलः ।

चतुराश्रमवाह्याय दत्तं भवति निष्फलम् ।

वायुपुराणे ।

यस्तिष्ठेद् वायुभक्षस्तु चतुराश्रमवाह्यतः ।
अयतिर्म्मोक्षवादी च उभौ तौ पङ्क्तिदूषकौ ॥

'अयतिः' असंयतेन्द्रियः ।

उग्रेण तपसा युक्तः श्रोत्रियोऽपि वहुश्रुतः ।
अनाश्रमे तपस्तेपे तं विप्रं न निमन्त्रयेत् ॥
औपपत्तिस्तथा शक्यो नास्तिको वेदनिन्दकः ।
ध्यानिनं ये च निन्दन्ति सर्व्वे ते पङ्क्तिदूषकाः ॥

'औपपत्तिः' उपपत्तिवादी शुष्कतर्कैः शाक्यसाहचर्य्यात् ।

वृथामुण्डाश्च जटिलाः सर्व्वे कार्पटिकास्तथा ।
निर्घृणान् भिन्नवृत्तांश्च[2] सर्वभिक्षांश्च वर्ज्जयेत् ॥

मुण्डजटिलकाषायान् श्राद्धे यत्नेन वर्जयेत् ।

कूर्म्मपुराणे ।

बुद्धश्रावकनिर्ग्रन्थाः पञ्चरात्रविदो जिनाः ।
कार्पाटिकाः[3] पाशुपताः पाषण्डा ये च तद्विधाः ॥
यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः ।
न तस्य यद्भवेच्छ्राद्धं प्रेत्य चेह फलप्रदम् ॥
अनाश्रमी यो द्विजः स्यादाश्रमी वा निरर्थकः ।
मिथ्याश्रमाश्च ये विप्रा विज्ञेयाः पङ्क्तिदूषकाः ॥

---

[1] दाने इति ।
[2] निर्घृनान् विरतांश्चैव इति ।
[3] कापालिका इति ।

आदित्यपुराणे ।

अनाश्रमी तु यो विप्रो जटी मुण्डी वृथा च यः ।
वृथाकर्म्मपरित्यागः श्राद्धे तं दूरतस्त्यजेत् ॥

नन्दिपुराणे ।

ब्रह्मज्ञानापदेशेन ये कुर्व्वन्त्यशुभं महत् ।
सर्व्वकर्म्मसु वर्ज्यास्ते चाण्डाला द्विजरूपिणः ॥
सर्व्वावस्था द्विजा ये ते ब्रह्मविद्यापदेशतः ।
देशान्निर्व्वासनीयास्ते राज्ञा वै धर्म्मचारिणा[1] ॥

पद्मपुराणे ।

मिथ्यासङ्कल्पिनः सर्वे दुर्वृत्ता वा द्विजातयः ।
मिथ्यातत्त्वविदो वर्ज्या दाम्भिकाः सर्व्वकर्म्मसु ॥
ब्रह्मोपदेशं कुर्व्वन्ति जनानामर्थलिप्सया ।
स्वयं मूढास्तु मूढानां धूर्त्ता वै विप्रलम्भकाः ॥
ब्रह्मविक्रयिणः पापान् प्रीत्यावापि न पूजयेत् ।
वर्णश्रमविरुद्धानां कर्म्मणां ये तु सेवकाः ॥
मुण्डान् जटिलकाषायांस्तांस्तु श्राद्धे विवर्जयेत् ।

कालिकापुराणे ।

अनाश्रमी तु यो विप्रो जटी मुण्डी वृथा च यः ।
वृथाकाषायधारी यः श्राद्धे तं दूरतस्त्यजेत् ॥
ये सन्यासापदेशेन दुरात्मानो जडाधमाः ।
परित्यजन्ति कर्म्माणि तेऽपि वर्ज्याः प्रयत्नतः ॥
अदृष्टतत्त्वा अपि ये कर्म्ममार्गाद्बहिः स्थिताः ।
पतितास्ते न सन्देहः सन्त्याज्याः सर्व्वकर्म्मसु ॥

विष्णुपुराणे ।

पुंसां जटाधरणमुण्डवतां वृथैव,
मद्याशिनामखिलशौचविवर्जितानाम् ।
तोयप्रदानपितृपिण्डवहिष्कृतानां,
सम्भाषणादपि नरो नरकं प्रयाति ॥

इत्याश्रमबाह्याः ।

अथ केतनानर्हाः ।

तत्र महाभारते ।

यावन्तः पतिता विप्रा जडोन्मत्तास्तथैव च ।
दैवे वाप्यथवा पित्र्ये राजन्नार्हन्ति केतनम् ॥

---

[1] सङ्करकारिण इति ।

'पतिताः' पातित्यहेतुपातकवन्तः। 'उन्मत्ताः' उन्मादरोगिणः।

श्वित्री कुष्ठी च क्लीबश्च तथा पक्षहतश्च यः।
अपस्मारी च यश्चान्धो राजन्नार्हति केतनम्॥

'क्लीबः' नपुंसकः। पक्षाघातरोगेण कर्म्माक्षमदेहार्द्धः 'पक्षहतः'।

चिकित्सका देवलकाः वृथानियमधारिणः।
सोमविक्रयिणश्चैव राजन्नार्हन्ति केतनम्॥

'देवलकाः' मूल्येन देवपूजकाः। 'वृथानियमधारिणः' दाम्भिकाः। 'सोमविक्रयिणः' सोमलताविक्रेतारः।

गायका नर्त्तकाश्चैव प्लवका वादकास्तथा।
कथका बोधकाश्चैव राजन्नार्हन्ति केतनम्॥

'प्लवकाः' नाटिकाः। 'बोधकाः' वैतालिकाः।

होतारो वृषलानां ये वृषलाध्यापकास्तथा।
तथा वृषलशिष्याश्च श्राद्धे नार्हन्ति केतनम्॥

ये शूद्रान् व्याकरणादिशास्त्रमध्यापयन्ति ते वृषलाध्यापकाः। एवं वृषलशिष्याः।

येन कामात् कृतः पूर्व्वं वर्णान्तरपरिग्रहः।
ब्राह्मणः सर्व्वविद्योऽपि राजन्नार्हति केतनम्॥

येन ब्राह्मणादिकुमारीरपरिणीय मुख्यतया वर्णान्तरपरिग्रहः कृतः।

अनग्नयश्च ये विप्रा मृतनिर्य्यातकाश्च ये।
स्तेनाश्च पतिताश्चैव राजन्नार्हन्ति केतनम्॥

'अनग्नयः' अनाहिताग्नयः। मूल्येन प्रेतनिर्हारकाः 'मृतनिर्य्यातकाः'। 'स्तेनाः' चौराः।

अपरिज्ञातपूर्व्वाश्च गणपूर्व्वाश्च भारत।
पुत्रिकापुत्रपूर्व्वाश्च श्राद्धे नार्हन्ति केतनम्॥

अपरिज्ञाताः पूर्व्वे पूर्व्वजा येषान्ते 'अपरिज्ञातपूर्व्वाः'। गणेषु सङ्घेषु पूर्व्वा मुख्याः 'गणपूर्व्वाः'। 'पुत्रिकापुत्रपूर्व्वाः' पुत्रिकापुत्रसन्तानीयाः।

ऋणकर्त्ता च यो राजन् यश्च वार्द्धुषिको द्विजः।
प्राणिविक्रयवृत्तिश्च राजन्नार्हति केतनम्॥

योऽनावश्यकव्ययार्थं ऋणं कुरुते सः 'ऋणकर्त्ता'। 'वार्द्धुषिकः' धान्यवृद्धिजीवी। 'प्राणविक्रयवृत्तिः' सेवकः।

त्रिपूर्व्वः काण्डपृष्ठश्च यवनो भरतर्षभ।
अक्रियो ब्राह्मणश्चैव श्राद्धे नार्हति केतनम्॥

'त्रिपूर्व्वः' त्रिजातः। 'काण्ड पृष्ठः' पूर्व्वोक्तलक्षणः। 'यवनः' यवनदेशोत्पन्नः।

इति केतनानर्हाः।

अथापाङ्क्तेयाः ।

आहोशनाः ।

अथापाङ्क्तेया भवन्ति । तथा जड-बधिरान्ध-श्वित्रि-कुष्ठिकुणि-श्यावदन्त-वार्द्धुषिक-देवलक-वणिक्-षण्ढगणाभ्यन्तर-चिकित्सक-पौनर्भव-काण-शिल्पोपजीवि-पतित-सम्प्रयोक्तृ-कितवानृत-दाम्भिक-परपरिभाविताद्याः ।

विधिनिषेधप्रतिपत्तिमूढः 'जडः' । श्रोत्रेन्द्रियविकलः 'बधिरः' । अचक्षुः 'अन्धः' । श्वेतकुष्ठवान् 'श्वित्री' । 'कुष्ठी' प्रसिद्धः । कुत्सितहस्तः 'कुणिः' स्वभावतः-कृष्णदशनः 'श्यावदन्तः' । सत्यन्यस्मिन् जीविकोपाये धान्यवृद्धिजीविनः 'वार्द्धुषिकः' मूल्येन देवतापूजको देवद्रव्यभोक्ता वा 'देवलकः' । क्रयविक्रयव्यवहारोपाजीवी 'वणिक्' । 'षण्ढः' षोढा, संज्ञाप्रकरणे कृतलक्षणः । 'गणः' सङ्घः, ये सदैकया क्रियया जीवन्ति तेऽत्र गणशब्दवाच्याः, तदन्तर्गतश्चातुर्व्विद्योऽपि ब्राह्मणः 'गणाभ्यन्तरः' । धनार्थं रुजां प्रतिकर्त्ता 'चिकित्सकः' । धर्म्मार्थिनस्तु तस्य प्रशस्तत्वादिति मेधातिथिः । पुनः परिणीता 'पुनर्भूः' तस्या अपत्यं 'पौनर्भवः' । एकेनाक्ष्णा विकलः 'काणः' । तिर्य्यक्प्रेक्षीवकाणः । गृहप्रासादादिनिर्म्माणवृत्तिः 'शिल्पोपजीवी' । महापातकि-संसर्गदूषितः 'पतितः' । 'सम्प्रयोक्ता' द्यूतकारी । छद्मप्रयोक्ता 'कितवः' । असत्य-वदनशीलः 'अनृतः' । लोकप्रीत्यर्थं छद्मना धर्म्मानुष्ठाता 'दाम्भिकः' । गुरुतरपात-काभियोगेन परैः परिभवं प्रापितः 'परपरिभावितः' ।

आह मनुः ।

ये स्तेनाः पतिबाः क्लीबा ये च नास्तिकवृत्तयः ।
तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥
जटिलञ्चानधीयानं दुर्व्बलं कितवं तथा ।
याजयन्ति च ये पूगान् तांश्च श्राद्धे न भोजयेत् ॥
चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तः[१] वर्ज्याः स्ते हव्यकव्ययोः ॥
प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः ।
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषी तथा ॥
यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः ।
ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च ॥
कुशीलवोऽवकीर्णी च वृषलीपतिरेव च ।
पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥
भृतकाध्यापको यश्च भृतकाध्यापितश्च यः[२] ।
शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥
अकारणात् परित्यक्ता माता पित्रोर्गुरोस्तथा ।
ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः ॥

---

[१] जीवन्तीति । [२] भृतकाध्यापितस्तथेति ।

आगारदाही गरदः कुण्डाशी सोमविक्रयी।
समुद्रयायी वन्दी च तैलिकः कूटकरकः॥
पित्रा विवदमानश्च कितवो मद्यपस्तथा।
पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी॥
धनुः शराणां कर्त्ता च यश्चाग्रे दिधिषूपतिः।
मित्रध्रुक् द्यूतवृतिश्च पुत्राचार्यस्तथैव च॥
भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा।
उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च॥
हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति।
पक्षिणां पोषको यश्च[1] युद्धाचार्य्यस्तथैव च॥
स्रोतसां भेदको यश्च[2] तेषाञ्चावरणे रतः।
गृहसंवेशको दूतो वृक्षारोपक एव च॥
श्वक्रीडी श्येनजीवी च कन्यादूषक एव च।
हिंस्रो वृषलवृत्तिश्च गणानाञ्चैव याजकः॥
आचारहीनः क्लीबश्च नित्ययाचनकस्तथा।
कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च॥
औरभ्रिको माहिषिकः परपूर्व्वापतिस्तथा।
प्रेतनिर्य्यापकश्चैव[3] वर्ज्जनीयाः प्रयत्नतः॥
एतान्विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान्।
द्विजातिप्रवरो विद्वान् उभयत्र विवर्ज्जयेत्॥

'स्तेनाः' ब्राह्मणव्यतिरिक्तद्रव्यापहर्त्तारः। इतरेषां तु पतितपदेनैवाभिधानात्। 'पतिताः' महापातकिनः। 'क्लीबः' नपुंसकः, "मा क्लैब्यं गच्छ कौन्तेय" इति लिङ्गदर्शनात्। "सत्त्वशून्यः क्लीबः" इति हरिहरः। नास्ति दत्तं नास्ति हुतं नास्ति परलोक इति ये स्थितप्रज्ञाः तेषां 'वृत्तिः' आचारोऽश्रद्धानता 'नास्तिकवृत्तिः' सा वृत्तिर्य्येषां ते 'नास्तिकवृत्तयः'। उत्तरपदलोपी समासः। अथवा नास्तिक्यं वृत्तिः जीवनं येषान्त एवमुच्यन्ते। मनुग्रहणं प्रतिषेधादरार्थम्। 'जटिलो' ब्रह्मचारीति मेधातिथिः। स चानधीयानोऽप्रारब्धाध्ययनोऽत्र निषिध्यते। प्रारब्धाध्यनस्य तु ब्रह्मचारिणो विहितत्वात्। न च सर्व्वथाध्ययनसम्बन्धस्य प्राप्तिरेव नास्ति तत्कथं प्रतिषेध इति वाच्यम् व्रतस्थमपि दौहित्रमित्यादिना प्राप्तिसम्भवात्। 'दुर्व्वालः' लोहितकेशः, खलतिर्व्वा दुर्व्वल इत्यन्ये पठन्ति। 'दुर्व्वलः' विकोशध्वजः, भोक्तुमक्षमो वा। 'पूगान् सङ्घातान् याजयन्ति। मांसविक्रयिणः प्रसिद्धाः। 'विपणेन' लवणादिना प्रतिषिद्धेन पण्येन। ग्रामस्य राज्ञो वा 'प्रेष्यः' आज्ञाकरः। 'कुनखी' कुत्सितनखः। सर्व्वकार्य्येषु यो गुरोः

---

[1] प्रेतनिर्हारकश्चैवेति।

[2] पालको यश्चेति।

[3] भेदकश्चैवेति।

प्रतिषेधेन प्रातिकूल्ये वर्त्ततेऽसौ 'गुरोः प्रतिरोद्धा'। 'त्यक्ताग्निः' त्रेतावसथ्ययोरन्यतरस्यापि परित्यक्ता। 'यक्ष्मी' राजयक्ष्मगृहीतः। आजीवनार्थं यः पशून् रक्षति स 'पशुपालः'। सत्यधिकारे महायज्ञानुष्ठानरहितः 'निराकृतिः' विस्मृतवेदो वा। दुराकृतिरित्यन्ये। ब्राह्मणानां वेदस्य वा द्वेष्टा 'ब्रह्मद्विट्'। परिवेत्तृपरिवित्तौ, पूर्व्वोक्तलक्षणौ। चारणनर्त्तकगायनादयः 'कुशीलवाः'। 'अवकीर्णी' विप्लुतब्रह्मचर्य्यः। 'वृषली' शूद्रा, तस्याः पतिः। अदूक्षन्यायं वात्रमन्यन्ते, वृषल्या एव पतिः। 'उपपतिः' जायाजारः। स चोपेक्ष्यमाणो यस्य गृह एव वसति। इयता धनेनेदं करोमीति वचनव्यवस्थया वेतनग्राही 'भृतकः' भृतकश्चासावध्यापकश्च 'भृतकाध्यापकः'। एवं भृतकेनाध्यापितः 'भृतकाध्यापितः'। व्याकरणादिविद्यासु शूद्रस्य शिष्यः 'शूद्रशिष्यः'। 'गुरुः' शूद्रस्यैव। अत्रोपसर्जनीभूतस्यापि शूद्रस्य सम्बन्धः। विगर्हिताचारत्वस्य सर्व्वशेषत्वात् शूद्रस्यैव च गुरुत्वं गर्हितं नान्यत्। वाचा दुष्टः 'वाग्दुष्टः' परुषानृतभाषी अभिशस्तो वा। कुण्डगोलकावुक्तलक्षणौ। गुरुरत्राचार्य्यः। असति ब्रह्महत्यादिदोषपरित्यागकारणे यो मातरं पितरमाचार्य्यं च परित्यजति। परित्यागश्च शुश्रूषाद्यकरणम्। 'गुरुत्यागः' तस्मिन्नध्यापनसमर्थेऽध्यापयति तत्त्यागेनान्यत्राध्ययनम्। ब्राह्मैः याजनाध्यापनादिभिः 'यौनैः', कन्यादानादिभिः सम्बन्धैः, यः पतितैः सह संसर्गं गतः, संवत्सरेण पतति पतितेन सहाचरन्निति। पतितपदेनैव लब्धेऽपि संसर्गिणि वत्सरादर्व्वागपि प्रतिषेधार्थमिदम्। 'आगारदाही' गृहादिदाहकः। कृत्रिमाकृत्रिमविषप्रदाता 'गरदः'। कुण्डगोलकयोरन्नमश्नाति सः 'कुण्डाशी'। 'कुण्डम्' आढकः, तत्परिमाणान्नभोक्ता वा 'कुण्डाशी'। 'सोमं' लताविशेषं यागार्थमौषधार्थं वा यो विक्रीणाति सः 'सोमविक्रयी' सोमसाधनकयागविक्रेता वा। समुद्रं उदधिं याति प्रवहणादिभिर्लङ्घयति 'समुद्रयायी'। 'बन्दी' स्तुतिपाठकः। तिलादीनां पेष्टा 'तैलकः'। साक्षित्वेऽनृतवादी 'कूटकारकः', 'कूटानां' नाणकादीनां कर्त्ता वा। पित्रा-सह भागादिनिमित्तं पूर्वोत्तरपक्षभङ्गया यो विवदते विरुद्धं लपते। 'कितवः' कलितप्रेक्षी अध्यर्द्धदृष्टिः। कातर इत्यन्ये पठन्ति। स एव शुकपक्षसदृशतारकः। 'मद्यपः' सुराव्यतिरिक्तस्यारिष्टस्य। 'पापरोगी' कुष्ठी। 'अभिशस्तः' पातकोपपातकयोः। 'दाम्भिकः' लोके प्रसिद्धः। असत्यपि तत्कारितानिश्चये। 'रसविक्रयी' विषस्य विक्रेतेति मेधातिथिः। मधुरादिरसाधिष्ठानानां गुडलवणक्षौद्रतक्रप्रभृतीनां विक्रेतेति शङ्खधरः। 'रस' पारद इत्यपरे। अग्रेदिधिषूपतिरित्यत्र दिधिषूशब्दस्य अग्रे पदेन पतिपदेन च पृथक्सम्बन्धः। ततोऽग्रेदिधिषूरेकः दिधिषूपतिरन्यः। समासान्तर्गतस्याप्येकशब्दस्य द्वाभ्यां भिन्नप्रस्थानाभ्यामभिसम्बन्धः स्मृतिशास्त्रत्वादुपपद्यत इति समाहितं मेधातिथिना।

मृतस्य भ्रातुर्भार्य्यायां धर्म्मेण नियुक्तायामपि योऽनुरागवशादालिङ्गनचुम्बनादीनि कुर्य्यादसकृद् वा प्रवर्त्तते स 'दिधिषूपतिः'। जीवतस्तावत् भ्रातुर्भार्य्यायामनुरक्तः 'अग्रेदिधिषूः'। अथवा विवाहार्हायां ज्येष्ठायामनूढायां या कनीयसी परिणीयते सा 'अग्रेदिधिषूः', तस्याः पतिः 'अग्रेदिधिषूपतिः'। 'मित्रान् द्रुह्यतीति 'मित्रध्रुक्', मित्रकार्य्योपघातक इत्यर्थः। द्यूतं वृत्तिर्जीविका यस्य सः 'द्यूतवृत्तिः'। यो द्यूतकारा-

न्नियोज्य तेभ्योंऽशं लभते सोऽत्राभिधीयत इति स्वयंदेवित्वात् कितवेन सहापौनरुक्त्यम्। पुत्रः 'आचार्य्यः' अध्यापको यस्य सः 'पुत्राचार्य्यः'। मूर्खस्याचार्य्यत्वस्य पुत्रे-सम्भवात्। 'भ्रामरी' अपस्मारी। 'गण्डमाली' प्रसिद्धः। परमर्मप्रकाशकः 'पिशुनः'। वातादिदोषेण पिशाचादिगृहीतत्वेन वा अनवस्थितचित्तः 'उन्मत्तः'। हस्त्यादीनां दमनः गतिशिक्षयिता 'हस्तिगोश्वोष्ट्रदमनः'। नक्षत्रग्रहणं ज्योतिःशास्त्रोपलक्षणार्थम्। 'पक्षिणां' श्येनादीनां, आखेटकार्थं पोषयिता। धनुर्व्वेदोपदेष्टा 'युद्धाचार्य्यः'। यो व्रीह्यादिसेचनार्थं स्रोतांसि भिनत्ति अनेकधा नयति। यश्चिररुद्धप्रवृद्धानां स्रोत-साङ्गतिबन्धार्थं सेतुबन्धेनावरणं करोति। 'गृहसंवेशकः' वास्तुविद्योपजीवी स्थपति-सूत्रधारादिः। यः सन्धिविग्रहादिषु प्रेष्यते सः 'दूतः'। यो मूल्येन वृक्षान् रोपयति स 'वृक्षारोपकः'। श्वभिः शुनकैः क्रीडति 'श्वक्रीडी'। श्येनानां क्रयेण जीवति 'श्येनजीवी'। यः सता असता वा दोषेण कन्यान्निन्दति सः 'कन्यादूषकः'। 'हिंस्रः' स्वभावत एव प्राणिघातनिरतः[1]। वृषलेभ्यः शूद्रेभ्यः सेवादिना वृत्तिर्जीवनं यस्याऽसौ 'वृषलवृत्तिः'। गणानां देवताविशेषाणां याजकः। गणयागाः प्रसिद्धा-इति मेधातिथिः।

आचारः गृहाभ्यागतानां पूजासत्कारादिः, तेन वर्जितः 'आचारहीनः'। कर्त्तव्येषु भग्नोत्साहः 'क्लीबः'। सदैव याचनया लोकानुद्वेजयति सः 'नित्ययाचनकः'। निन्दादिभ्यः स्वार्थे कप्। 'कृषिजीवी' यः प्रतिषिद्धया कृष्या जीवति, सा चानापदि प्रतिषिद्धा। आपद्यपि स्वयं क्रियमाणा अन्यतः कार्य्याणामपि यथोक्तविधिविरहिता प्रतिषिद्धा।

कृषिविधिस्तु "राज्ञो दत्त्वा च षड्भागं देवतानाञ्च विंशकम्। त्रिषड्भागञ्च विप्राणां कृषिं कृत्वा न दोषभाक्" इत्यादिः स्मृतिकारैः प्रतिपादितः। दोषवशात् स्थूलैकपादः 'श्लीपदी'। यस्य प्रत्यक्षेण दोषो न लक्ष्यते सद्भिश्च निन्द्यमानो दृश्यते-ऽसौ 'सद्भिर्निन्दितः'। उरभ्राः मेषाः पण्यं यस्य स 'औरभ्रिकः'। एवं माहि-षिकः। परः पूर्वो यस्याः सा 'परपूर्व्वा' स्वैरिण्यादिः, तस्याः पतिः 'परपूर्व्वापतिः'। यो मूल्येन प्रेतान्निर्य्यापयति वहति सः 'प्रेतनिर्य्यापकः'। 'विगर्हिताचाराः' निन्दिता-चाराः। 'अपाङ्क्तेयाः' पङ्क्त्यनर्हाः। 'उभयत्र दैवे पित्र्ये च कर्म्मणि।
अत्राह सुमन्तुः।

तस्कर-कितवाजपाल-गण-गणिका-शूद्रप्रेष्यागम्यागामि-परिवेत्तृ-परिवित्ति-पर्य्या-हित-पर्य्याधातृ पौनर्भवान्ध-बधिर-चारण-क्लीबावकीर्णि वार्द्धुषिक-गरदायि-कूटसाक्षि-नास्तिक-वृषलीपत्युपहुतादोत्सृष्टाग्नि-सोमविक्रय्यविक्रेयविक्रेतृ-पौस्तिक-कथक-कुण्डाशि-कुण्डगोलकयन्त्रकार-काण्डपृष्ठ-दुश्चर्म-चण्ड-विद्धशिश्न-देवलक-षण्डारूढपतित-प्रायोत्थित-कुनखि-किलाशि-श्यावदन्त-वणिक्-शिल्पवादित्रनृत्यगीत-तालोपजीवि-मूल्यसांवत्सरिक-महापथिकाश्मकुट्टक-हीनातिरिक्ताङ्ग-विरागवास-सश्चापाङ्क्तेयाः।

---

[1] प्राणिद्रोहनिरत इति।

'तस्करः' चौरः। आजीवनार्थमजाः पालयति 'अजपालः'। 'गणः' सङ्घः। 'गणिका' वेश्या। शूद्रः प्रसिद्धः। एतेषां 'प्रेष्यः'। शूद्रसेवकप्रतिषेधान्महापदि वर्णान्तरसेवकस्य दोषान्तररहितस्यानुज्ञावगम्यते।

यदाह प्रचेताः।

महदापद् गतो विप्रः क्षत्रसेवां समाश्रयेत्।
शूद्रसेवा न कर्त्तव्या प्राणैः कण्ठगतैरपि॥

अगम्याः परस्त्रियो गच्छतीति 'अगम्यागामी'। ज्येष्ठे भ्रातर्य्यकृताग्न्याधाने यदि कनीयानग्न्याहितः स्यात्तदासौ पर्य्याधातेत्युच्यते, ज्येष्ठस्तु पर्य्याहित इति। एतच्च प्राग्विस्तरेण निर्णीतम्। चारणोऽत्र नग्नाचार्य्यः इतस्ततः कीर्त्तिप्रचारणात्। नर्त्तकविशेषस्य तु चारणस्य नृत्योपजीविशब्देन वक्ष्यमाणत्वात्। कूटमलीकं साक्ष्यङ्करोतीति 'कूटसाक्षी'। पञ्चयज्ञानविधाय यो भुङ्क्ते सः 'उपहुतादः'। 'उत्सृष्टाग्निः' परित्यक्ताग्निः। अविक्रेयं तिलयवादि विक्रीणाति 'अविक्रेयविक्रेता'। पुस्तकलेखनकर्मणा जीवति इति 'पौस्तिकः,' पुस्तकविक्रेता वा मूल्येन पुस्तकलेखको-वा। विटजनरञ्जनाय बृहत्कथादिकथानां कथयिता 'कथकः'। आखेटनार्थं दुर्गादिषु सङ्ग्रामार्थं वा यन्त्रनिर्माता 'यन्त्रकारः'। शस्त्रोपजीवी 'काण्डपृष्ठः'। काण्डपृष्ठः शस्त्रजीवीतिनामानुशासनस्मरणात्। अन्ये तु काण्डस्पृष्ट इति पठन्ति। तस्य-लक्षणमुक्तं प्राक्। 'दुश्चर्म्मा' दुश्चिकित्स्यत्वग्रोगी। 'चण्डः' छिन्नमेहनचर्म्मा, चण्डिः वल्कापनयन इति चौरादिको धातुः, चण्डयतीति चण्डः। विद्धशिश्नो द्रविडेषु प्रसिद्धः। तत्र हि शिश्नवृषणाधःशिरायां छिद्रं विधाय विटाः सुवर्णघटिकाघटितं मुक्ताफलादि विरचयन्ति। त्रिदण्डादिव्रतमारुह्य तस्मात् परिभ्रष्टः 'आरूढपतितः'। सन्न्यासपूर्व्वकं मरणान्तिकमनशनं 'प्रायः'। "सन्न्यासवत्यनशने पुमान् प्रायः" इति त्रिकाण्डस्मरणात्। प्रायं परित्यज्योत्थितः। 'किलाशी' सिध्मरोगी। 'वादित्रं' आतोद्यम्। 'नृत्त्यं' नर्तनम्। 'गीतं' गानम्। 'तालः' चञ्चत्पुटादिः, एतद्विद्या-प्रावीण्येन यो जीवति। धनलिप्सया नक्षत्राद्यादेशकः 'मूल्यसांवत्सरिकः'।

उक्तञ्च मनुना।

तिथिं परस्य न ब्रूयान्नक्षत्राणि न निर्दिशेत्" इति। 'महापथिकः' समुद्रपथचारी नित्याध्वगो वा। 'अश्मकुट्टकः' प्रासादादिनिर्म्माणाय पाषाणतक्षकः। 'हीनाङ्गाः' खञ्जादयः। 'अधिकाङ्गाः' षडङ्गुलिप्रभृतयः। विविधमाञ्जिष्ठादिरागयुक्तवाससः 'विरागवाससः,' त्रिदण्डग्रहणं विना लोकवञ्चनार्थं गैरिकादिरक्तवाससो वा।

आह यमः।

अपाङ्क्तेया द्विजाश्चान्ये तान्मे निगदतः शृणु।
येभ्यो दत्तं न देवानां न पितॄणाञ्च कर्म्मकृत्॥
काणाः कुब्जाश्च षण्डाश्च कृतघ्ना गुरुतल्पगाः।
ब्रह्मघ्नाश्च सुरापाश्च स्तेना गोघ्नाश्चिकित्सकाः॥

राष्ट्रकामास्तथोन्मत्ताः पशुविक्रयिणश्च ये।
ग्रामकूटास्तुलाकूटाः शिल्पिनो ग्रामयाचकाः॥
वृषलीभिः प्रपीताश्च श्रेणीराजन्ययाजकाः।
राजभृत्यान्धबधिरमूकखल्वाटपङ्गवः॥
कलोपजीविनश्चैव ब्रह्मविक्रयिणश्च ये।
दण्डध्वजाश्च ये विप्रा ग्रामकृत्यकराश्च ये॥
आगारदाहिनश्चैव गरदा वनदाहकाः।
कुण्डाशिनो देवलकाः परदाराभिमर्षकाः॥
श्यावदन्ताः कुनखिनः शिल्पिनः कुष्ठिनश्च ये।
वणिजो मधुहन्तारो हस्त्यश्वदमका द्विजाः॥
कन्यानां दूषकाश्चैव ब्राह्मणानाञ्च दूषकाः।
सूचकाः पोषकाश्चैव कितवाश्च कुशीलवाः॥
समयानाञ्च भेत्तारः प्रदाने ये च वारकाः।
आजाविका माहिषिकाः सर्व्वविक्रयिणश्च ये॥
वैष्णवीषु च ये सक्ताः शलाकादाहिनश्च ये।
धनुः कर्त्ता द्यूतवृत्तिर्मित्रध्रुक् शठ एव च॥
इषुकर्त्ता तथा वर्ज्यो यश्चाग्रेदिधिषूपतिः।
पाण्डुरोगी गण्डमाली यक्ष्मी च भ्रामरी तथा॥
पिशुनः कूटसाक्षी च दीर्घरोगी वृथाश्रमी।
प्रव्रज्योपनिवृत्तश्च वृथा प्रव्रजितश्च यः॥
यस्तु प्रव्रजिताज्जातः प्रव्रज्यावसितश्च यः।
तावुभौ ब्रह्मचण्डालावाह वैवस्वतो यमः॥
राज्ञः प्रेष्यकरो यश्च ग्रामस्य नगरस्य च।
समुद्रयायी वार्त्ताशी केशविक्रयिणश्च ये॥
अवकीर्णी च वीरघ्नो गुरुघ्नः पितृदूषकः।
गोविक्रयी च दुर्बालः पूगानाञ्चैव याजकः॥
मद्यपश्च कदर्य्यश्च सह पित्रा विवादकृत्।
दाण्डिको बन्धुकीभर्त्ता त्यक्तात्मा दारदूषकः॥
सद्भिश्च निन्दिताचारः[१] स्वकर्म्मपरिवर्जितः।
परिवित्तिः परिवेत्ता भृत्याचार्य्यो निराकृतिः॥
शूद्राचार्य्यः सुताचार्य्यः शूद्रशिष्यश्च नास्तिकः।
दुष्टस्तु दारकाचार्य्यो मानकर्त्तैलिकस्तथा॥
चौरा वार्द्धुषिका दुष्टाः परस्वानाञ्च नाशकाः।
चतुराश्रमवाह्याश्च ये चान्ये पङ्क्तिदूषकाः।
इत्येतैर्लक्षणैर्युक्तांस्तान् द्विजान् न नियोजयेत्॥

---

[१] निन्दितश्चौर इति।

'गुरुतल्पगः' गुरुभार्य्यागामी। पौरोहित्यार्थं यज्ञार्थं वा राष्ट्रं वशीकर्तुं कामयते सः 'राष्ट्रकामः'। ग्रामं कूटयति छलयतीति 'ग्रामकूटकः'। बहुभिरलीकव्यवहारैर्ग्राम-द्रव्यं भक्षयतीत्यर्थः। अलीकतुलाव्यवहारेण वञ्चयिता 'तुलाकूटः'। वृषल्या प्रपीतोऽसकृच्चुम्बितः 'वृषलीप्रपीतः'। 'श्रेण्यः' सुवर्णकाराद्याः प्रकृतयः, तासां याजकः 'श्रेणीयाजकः'। कलया सुवर्णवृद्ध्या जीवतीति 'कलोपजीवी'। चतुःषष्टिकलोप-जीवी वा। ब्रह्मणो वेदस्य पुत्रस्य वा विक्रेता 'ब्रह्मविकयी'। जीविकार्थं ब्रह्म-विद्योपदेष्टा वा। यो महापराधी राज्ञा च पदाद्यङ्केन कृतदण्डः सः 'दण्डध्वजः' उच्यते। मधुग्रहणाय मधुमक्षिकोपघाती 'मधुहन्ता'। 'सूचकः' परदोषज्ञानोपाय-प्रयोक्ता। अन्येन प्रकाशितं परदोषं पुष्णाति सम्बद्धवचनेन दृढयति। राजादिकृता-व्यवस्थाः 'समयाः'। अजाविकेन जीवन्तीति 'आजाविकाः'। एवं माहिषिकाः। व्यभिचारिणीपुत्रा वा। 'वैष्णवीषु' इन्द्रजालादिमायासु, 'सक्ताः' निषण्णमतयः। 'शलाका' शस्त्रं, 'दाहः' अग्निकर्म, ताभ्यां ये भैषज्यमाचरन्ति ते 'शलाकादाहिनः'। अपकारशीलः 'शठः'। 'इषुकर्त्ता' शराणां कर्त्ता। यः शास्त्राविहितेष्वाश्रमेषु वर्त्तते स 'वृथाश्रमी'। प्रव्रज्यां विधास्यामीति सङ्कल्प्य प्रव्रज्यां न कुरुते स 'प्रव्रज्योपनिवृत्तः'। यस्तु वैराग्यादिकमन्तरेणैव प्रव्रजति सः 'वृथाप्रव्रजितः'। प्रव्रजितेनोत्पादितः 'प्रव्रजिताज्जातः'। विधिवत्प्रव्रज्यां स्वीकृत्य ततः परिभ्रष्टः 'प्रव्रज्यावसितः'। वार्त्तया कृषिवाणिज्यादिरूपया वैश्यवृत्त्या यो जीवति सः 'वार्त्ताशी'। यो वा निगूढ-प्रचारेण सकललोकवृत्तान्तमधिगम्य राज्ञे निवेदयति सोऽपि वार्त्ताजीवनाद्वार्त्ताशी पुरुष इति लोके प्रसिद्धः। वान्ताशीति वा पाठः। तल्लक्षणमुक्तं संज्ञाप्रकरणे। 'केशविक्रयी' चामरादिविक्रेता। 'वीरघ्नः' बालहन्ता। अवीरामिव मामयमित्यस्याः श्रुतेरबालामिव मामयमिति नैरुक्तिव्याख्यानात्। 'पूगयाजकः' समानजातीयानामपि समानव्यवसायानां समूहः पूगस्तस्य याजयिता 'पूगयाजकः'। कदर्य्यलक्षणमुक्तम्। अपराधप्रयोज्यदण्डाधिकृतः 'दाण्डिकः'। 'बन्धुकीभर्त्ता' पुंश्चलीपतिः। 'त्यक्तात्मा' कृतात्मघातोद्यमः। मुखसुखादिना पुरुषान्तरसंयोजनेन वा कुलस्त्रीणां दूषयिता 'दारदूषकः'। वनितान्तरानुरक्तया पूर्वदाराणां मिथ्याभियोक्ता वा 'दारदूषकः'। भृतकाध्यापको भृतकाध्यापितो वा 'भृत्याचार्य्यः'। एवं शूद्राचार्यः। शिशूनामक्षर-पाठको 'दारकाचार्य्यः'। धान्यभूम्यादिमानव्यवसायेन यो जीवति स 'मानकृत्'। एषु किञ्चिद्व्याख्यातं किञ्चित्सुबोधम्।

शङ्खलिखितौ।

अनृक् तस्करो राजभृत्यो वृक्षारोपकवृत्तिर्गरदोऽग्निदः श्वागणिकः शूद्रोपाध्यायो वन्दी घाण्टिको देवलः पुरोहितो नक्षत्रादेशवृत्तिर्ब्रह्मपुरुषो मद्यपो ब्रह्मविक्रयी कितवः कूटकारको मानुषपशुविकयिणश्चेत्यपाङ्क्तेयाः।

अनधीतवेदः 'अनृक्'। श्वगणैः चरतीति 'श्वागणिकः'। यः क्षुद्रघण्टिकादि-निबन्धनपुरःसरेण नृत्यगीतादिना जीवति स 'घाण्टिकः'।

यो वा महतीं घण्टां वादयन्नेव प्रतिगृहं भिक्षते सोऽपि घाण्टिकः। गूर्जर-देशे घण्टाल इति प्रसिद्धः। यो जीवन्मुक्तवेषेण लोकं प्रतारयन् द्रव्यमर्जयति स 'ब्रह्मपुरुषः'।

पैठीनसिः।

कुनखि-किलाशि-श्यावदन्ताः पित्रा विवदमानश्च यश्च स्त्रीजितः कुष्ठी क्लीबः कितवोदुर्व्वारो दुश्चर्म्मा सुरागर्भो विद्धप्रजननः पतितः पिशुनः सोमविक्रयी यज्ञवेद-विक्रयी वाणिजको ग्रामयाजी मिथ्याभिशस्तो वृषल्यामभिजातः परिवित्तिः परिविन्दानो दिधिषूपतिः पुनर्भूपुत्रः गोलककुण्डाजाविकाश्चौरः काण्डपृष्ठः सेवकश्चेत्यपाङ्क्तेयाः। श्राद्धे चैतान्न भोजयेन्न यज्ञकर्मणि।

यस्य गृहे प्राधान्येन भार्य्यैव सर्वव्यवहारान् विधत्ते स च भीतः सन् तत्पार-तन्त्र्येण वर्त्तते स 'स्त्रीजितः'।

उक्तञ्च यमेन।

नाश्नन्ति पितरो दैवे नाश्नन्त्यनृतवादिनि।
भार्य्याजितस्य नाश्नन्ति यस्य चोपपतिर्गृहे इति॥

सुरापस्त्रीगर्भसम्भूतः 'सुरागर्भः' कृतप्रायश्चित्तेन सुरापेण जनितो वा। तीर्थ-यात्राद्यर्ज्जितधर्मविक्रेता 'तीर्थविक्रयी'।

शातातपः।

अग्निष्टोमादिभिर्यज्ञैर्ये यजन्त्यल्पदक्षिणैः।
तेषामन्नं न भोक्तव्यमपाङ्क्तेयाः प्रकीर्त्तिताः॥

देवलः।

देवकोशोपजीवी च नाम्ना देवलको भवेत्।
अपाङ्क्तेयः स विज्ञेयः सर्वकर्मसु सर्वदा॥

मनुः।

अव्रतैर्यत् द्विजैर्भुक्तं परिवेत्रादिभिस्तथा।
अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते॥

यमः।

अपाङ्क्तेयो दहत्याशु यावत्समनुपश्यति।
भ्रश्यते तत्फलं तेभ्यो दानञ्चापि विनश्यति॥

भ्रश्यते तत्फलमिति काम्यस्य भ्रंशः। दानञ्चापि विनश्यतीति नित्य-कर्मभ्रंशः।

इत्यपाङ्क्तेयाः॥

अथ पङ्क्तिदूषकाः ।

शङ्खः ।

ब्राह्मणा ये विकर्मस्था बैडालव्रतिकाः शठाः ।
हीनाङ्गा ह्यधिकाङ्गाश्च विज्ञेयाः पङ्क्तिदूषकाः ॥
कुनखी श्यावदन्तश्च दुश्चर्मा वृषलीपतिः ।
कुष्ठी च राजयक्ष्मी च ब्राह्मणाः पङ्क्तिदूषकाः ॥
गुरूणां प्रतिकूलाश्च वेदाग्न्युत्सादिनश्च ये ।
गुरूणां त्यागिनश्चैव ब्राह्मणाः पङ्क्तिदूषकाः ॥
अनध्यायेष्वधीयानाः शौचाचारविवर्जिताः ।
शूद्रान्नरसपुष्टाङ्गा ब्राह्मणाः पङ्क्तिदूषकाः ॥

अविहितप्रतिषिद्धकर्मानुष्ठातारो 'विकर्मस्थाः' । विस्मृतवेदास्त्यक्ताग्नयश्च 'वेदाग्न्युत्सादिनः' शूद्रदत्तस्यान्नस्य भोक्तारः 'शूद्रान्नरसपुष्टाङ्गाः' ।

हारीतः ।

चिकित्सक-वृषलप्रेष्य-कारुक-कितव-श्वक्रीडक-शकुनिजीव-मीनघातकावेष्टिक-पौंश्चल-वार्द्धुषिकाहितुण्डिक--प्रत्यवसित-भृतकाध्यापकाध्यापित-तैलिक-सूचक-नियामक-कुशीलवादीन् दैवे पित्र्ये च विवर्ज्जयेत् । नास्तिक-क्लीब-कदर्याक्रीडिनोऽनृतवादिनो-जपहोमसन्ध्याशौचविवर्ज्जिताः सौव-यौन-सौवसङ्कर-सङ्कीर्णापुण्याब्राह्मणवृत्तिप्लव-बन्धोपजीव-वृषलीपति-शूद्र ग्रामयाचक-तस्करागारदाहि - गरद- सोमविक्रयि - गायन-नर्त्तक-धनुःशरयोजका--अण्डगोघ्नौनराशंस-प्रघाण्टिक--नक्षत्रजीवि-महाब्धिगामि-दीर्घ-रोगि-महापथिकाः पतिताः पतितपुरोहिताश्चानिवर्त्तमानाः पङ्क्तिदूषकाः । 'कारुकः' शिल्पी, शकुनिभिः श्येनादिभिर्जीवतीति 'शकुनिजीवः' । मरणफलकङ्ग्रीवावेष्टनं 'आवेष्टः' । आवेष्टेन पशुसंज्ञपनार्थं यो यज्ञे परिक्रीयते स 'आवेष्टिकः' । सङ्गृहीत-पुंश्चलीशुल्केन यो जीवति स 'पौंश्चलः' । अहितुण्डेन दीव्यतीति 'आहितुण्डिकः' सर्पक्रीडीत्यर्थः । आश्रमात्परिच्युतः 'प्रत्यवसितः' । तैलविक्रयादिना जीवति सः 'तैलिकः' । पोतवाहकः 'नियामकः' । प्रपणस्य नेतेति यावत् । मृगयाशीलः 'आक्रीडी' । स्वं धनं स्वस्यायं 'सौवः' सचासौसङ्करश्च 'सौवसङ्करः' वृत्तिसङ्कर इत्यर्थः । नृशंस एव 'नराशंसः' यो नरानाशंसति स्तौति सोऽपि 'नराशंसः' । 'महाब्धिगामी' द्वीपान्तरगन्ता । मुमूर्षुतया प्रस्थितः 'महापथिकः' । महापथात् दूरदेशान्तरादागतो वा स चाज्ञातकुलशीलत्वात्प्रतिषिध्यते । 'अनिवर्त्तमानाः' प्रायश्चित्तमकुर्वाणाः ।

विष्णुरपि ।

हीनाधिकाङ्गान् विवर्ज्जयेद्विकर्मस्थांश्च वैडालव्रतिकान् वृथालिङ्गिनो नक्षत्र-जीविनो देवलकांश्चिकित्सकांश्चानूढपुत्रान् बहुयाजिनो ग्रामयाजिनः शूद्रयाजिनो-व्रात्यांस्तद्याजिनः पर्षकारान् सूचकान् भृतकाध्यापकान् भृतकाध्यापितान् शूद्रान्नपुष्टान्

पतितसंयुक्ताननधीयानान् सन्ध्योपासनभ्रष्टान् राजसेवकानुग्रान् पित्रा विवदमानान् पितृगुर्वग्निस्वाध्यायत्यागिनश्चेति श्राद्धे वर्जयेत्।

ब्राह्मणाय सदा ह्येते कथिताः पङ्क्तिदूषकाः।
एतान्विवर्ज्जयेद्यत्नात् श्राद्धकर्मणि पण्डितः॥

'व्रात्याः' पतितसावित्रीकाः। 'पर्व्वकाराः' काण्डकाराः। उग्रश्चण्डोऽतिकोपनः इति यावत्।

आपस्तम्बः।

श्वित्री शिपिविष्टः परतल्पगाम्युपपुत्रः शूद्रोत्पन्नो ब्राह्मण्यामिति।

यो विशुद्धजातीयायामपि ब्राह्मण्यां शूद्राच्छूद्रसमानात् ब्राह्मणादुत्पन्नः। शूद्रसमस्य लक्षणमुक्तं संज्ञाप्रकरणे।

देवलः।

गोभर्तृविश्वस्तान्नद-प्रव्रजितबन्धुमित्रघातकाः। मातृपितृपुत्रदाराग्निहोत्रत्यागिनो यज्ञापहन्ता वृषलीपतिः सोमविक्रयी व्रात्यो निःक्रियश्चेति पतिताः जारोपपतिः कुण्डगोलभर्त्ता दिधिषूपतिः मूढभृतकाध्यापकायाज्ययाजकब्रह्मधर्मदुष्टद्रव्यविक्रयि–कदर्यवर्णसम्भेदकानार्यभ्रष्टशौचाधन्यदेवलकवार्द्धुषिकगोत्रभित्परिवित्ति-परिवेत्तृ-कृष्णपृष्ठ-काण्डपृष्ठ-निराकृत्यवकीर्णि-म्लेच्छावरेटकरणागारदाहिनः षड्विधाः क्लीबाश्चेत्युपपत्त्यनपत्यकूटोपसाक्षि–पुष्टोपघाति-स्त्रीजित--सेतुभेदक तालावचरण--खड्गोपजीविधर्मपाठकाः नित्ययाचक-प्रायश्चित्तवृत्तिधूर्त्तसाधनिकमृगयुकितव-नास्तिक-पिशुन-शवर-वणिग्बन्दि–पौनर्भवात्मम्भरि–शुल्कि-–समुद्रयायि–कृत्याभिचारशील–तैलिक–शाब्दिक–वैद्यभृतक-कन्यादूषक-भ्रूणघ्न-क्रूर-कुहक-मित्रध्रुक्–दत्तापव्ययि–समयभेदक–वाग्दण्डपरुषाशक्त्यशिल्पिक-हस्त्यारोहाश्च बन्धकाश्चेति पातनीयकाः अष्टाभिः पापरोगैरभिभूता विकलेन्द्रिया हीनाङ्गा अधिकाङ्गाश्चेति पङ्क्तिदूषकाः। उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासमधुमेहोभगन्दराश्मरीत्यष्टौ महारोगाः। जडान्ध-काण-वधिर-कुणिः-इति विकलेन्द्रियाः। उभयभागक्लेदा दुष्टव्रणाः पापिष्ठतमाश्चेति।

एते पञ्चविधाः प्रोक्ता वर्ज्जनीया नराधमाः।
स्वसंज्ञालक्षणास्ते स्युर्विशेषश्चात्र दृश्यते॥

तथा।

एते दुर्ब्राह्मणाः सर्व्वे क्रमशः समुदाहृताः।
कर्मणा योनितश्चैव देहदोषैश्च कुत्सिताः॥
एतेषां कर्मदोषेण पतिता ये नराधमाः।
यान्ति ते निरयान् घोरान् त्यक्ताः सद्भिरिहैव च॥
योनिदोषेण ये दुष्टा ये च दोषैः शरीरजैः।
इहैव वर्ज्जनं तेषां भवेदनपराधिनाम्॥

कृतघ्नः पिशुनः क्रूरो नास्तिकः कुहकः शठः।
मित्रध्रुक् चेति सर्व्वेषां विशेषान्निरयालयाः॥
सर्वे पुनरभोज्याः स्युरदानार्हाश्च कर्मसु।
ब्रह्मभावान्निरस्ताश्च पापदोषवशानुगाः॥

घातकशब्दो गवादिभिः सप्तभिः प्रत्येकं सम्बध्यते। मात्रादिभिश्च पञ्चभिस्त्यागिशब्दः। तत्र मातापितरौ वृद्धौ पुत्रः शिशुः दाराः साधव इति ज्ञेयम्।

'यज्ञापहन्ता' यज्ञविघ्नकारी, नित्यनैमित्तिकयोरकर्त्ता 'निष्क्रियः'। 'गोलस्य' वैधवेयस्य, 'भर्त्ता' पुत्रत्वेन स्वीकर्त्ता, 'गोलभर्त्ता'। मूढवर्णसम्भेदकस्तु 'अन्यगोत्रभित्'। कृष्णपृष्ठम्लेच्छावरेटकरणानां लक्षणानि संज्ञाप्रकरणे द्रष्टव्यानि। ब्रह्मैव-धर्मो यस्य स 'ब्रह्मधर्म्मा' ब्रह्मवित्त्व व्याजेन सकलधर्मत्यागीत्यर्थः। 'अनार्य्यः' अशिष्टः। 'निकृतः' छद्मप्रयोगपरः। पृष्ठोपघाती 'पृष्ठघातकः', परोक्षे घातोपायप्रयोक्तेत्यर्थः, चमरीपुच्छछेत्ता वा बलीवर्दपुच्छोत्पाटनेन वाणिज्यादिकर्त्ता वा। 'तालावचरणः' तालवादकः, चरतेर्भक्षणार्थत्वात्तालफलस्य तालनिर्यासस्य भक्षयिता वा। श्रुतिस्मृतिविहितानां धर्माणामध्येता 'धर्मपाठकः'। प्रायश्चित्तोपदेशलब्धेन प्रायश्चितप्रत्याम्नायभूतेन वा परप्रायश्चिताचरणलब्धेन वा द्रव्येण वृत्तिर्जीवनं यस्यासौ 'प्रायश्चित्तवृत्तिः'। 'धूर्त्तः' वञ्चकः। तुरगादिसाधनेष्वधिकृतः 'साधनिकः'। 'मृगयुः' पापर्द्धिव्यसनी। देवपित्रादिभ्योऽप्रदाय निजोदरभरणमात्रपरायणः 'आत्मम्भरिः'। 'भ्रूणघ्नः' गर्भघाती। 'कुहकः' दाम्भिकः। 'दत्तापव्ययी' परैर्दत्तस्य धनस्यासद्व्ययकर्त्ता।

यमः।

अपङ्क्तिपावनः पङ्क्त्या यावत्समनुपश्यति।
भ्रश्यते तत्फलं तस्माद्दर्शनात्तस्य दुर्मतेः॥

तथा।

यावतो ब्राह्मणान् पङ्क्त्या वीक्षते शूद्रयाजकः।
निरर्थकन्तु तत्सर्वं दातुर्दानं न संशयः॥

मनुः।

यावतः संस्पृशेदङ्गैः ब्राह्मणान् शूद्रयाजकः।
तावतां न भवेद्दातुः फलं दानस्य पौर्त्तिकम्॥

अङ्गस्पर्शोऽत्राविवक्षितः, वीक्षत इति यमेनाभिधानात्। पूर्त्ते भवं 'पौर्त्तिकं' वहिर्वेदिदानोद्भवं फलम्।

तथा।

अपाङ्क्त्यां यावतः पङ्क्त्यो भुञ्जानाननुपश्यति।
तावतां न फलं तेषां दाता प्राप्नोति बालिशः॥

'बालिशः' मूर्खः ।

वीक्ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु ।
पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥

अन्धस्य दर्शनाभावात्तत्सन्निधानमनेन लक्ष्यते । अतो यावान् देशश्चक्षुष्मतो-दृष्टिगोचरस्तावतो देशादनावृतान्धो नोपासनीय इत्यर्थः । तत्र 'पापरोगी' कुष्ठी ।

यमः ।

षष्टिं काणः शतं षण्ढः श्वित्री यदनुपश्यति ।
शतञ्च पाण्डुरोगी च सहस्रं पतितस्तथा ॥

दूषयतीति शेषः । सङ्ख्याभेदो दोषतारतम्येन प्रायश्चित्तभेदार्थः ।

महाभारते ।

पङ्क्तिदूष्यास्तु ये राजन् कीर्त्तयिष्यामि तान् शृणु ।
कितवो भ्रूणहा यक्ष्मी परिवेत्ता निराकृतिः ॥
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्वविक्रयी ।
आगारदाही गरदः कुण्डाशी सोमविक्रयी ॥
सामुद्रिको राजभृतस्तैलिकः कूटकारकः ।
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ॥
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ।
पर्वकारश्च सूची च मित्रध्रुक् पारदारिकः ॥
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ।
परिवित्तिश्च योऽपि स्यात् दुश्चर्म्मा गुरुतल्पगः ॥
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ।
एतानिह विजानीयात् ब्राह्मणान् पङ्क्तिदूषकान् ॥

ब्रह्मपुराणे ।

मित्रध्रुक् कुनखी क्लीबः क्षयी श्वित्री वणिक्पथः ।
श्यावदन्तोऽथ खल्वाटः काणोऽन्धो बधिरो जडः ॥
मूकः पङ्गुः कुणिः षण्ढो दुश्चर्मा व्यङ्गकेकरौ ।
कुष्ठी रक्तेक्षणः कुब्जो वामनो विकटोऽलसः ॥
मित्रशत्रुर्दुष्कुलीनः पशुपालो निराकृतिः ।
परिवित्तिः परिवेत्ता परिवेदनिकासुतः ॥
वृषलीपतितत्पुत्रः[१] आद्यश्राद्धस्यभुग् द्विजः ।
वृषलीपुत्रसंस्कर्त्ता अनृचो दिधिषूपतिः ॥
भृतकाध्यापको यश्च भृतकाध्यापितश्च यः ।
शुनीसुतेभपोष्टा च मृगयुः सोमविक्रयी ॥

---

[१] वृषलीपतितत्सूनुरिति ।

अभिशस्तस्तथा स्तेनः पतितो वार्द्धुषिः शठः ।
पिशुनो वेदसन्त्यागी दाराग्नित्यागनिष्ठुरः ॥
राज्ञः पुरोहितो भृत्यो विद्याहीनोऽथ मत्सरी ।
दिधिषुः किङ्करः क्रूरो मूढो देवलकस्तथा ॥
नक्षत्रसूचकश्चैव पर्वकारश्च गर्हितः ।
अयाज्ययाजकः षण्डो गर्हितोऽन्ये च येऽधमाः ।
न ते श्राद्धे नियोक्तव्या दुष्टं स्यात्पङ्क्तिदूषकाः ॥

कूर्मपुराणे ।

दुश्चर्मा कुनखी कुष्ठी श्वित्री च श्यावदन्तकः ।
मद्यपो वृषलीसक्तो भ्रूणहा दिधिषूपतिः ॥
आगारदाही कुण्डाशी सोमविक्रयिणो द्विजाः ।
परिवेत्ता हिंस्रश्चैव परिवित्तिर्निराकृतिः ॥
पौनर्भवः कुसीदश्च तथा नक्षत्रसूचकः ।
गीतवादित्रशूकश्च व्याधितः काण एव च ॥
हीनाङ्गश्चातिरिक्ताङ्गो ह्यवकीर्णी तथैव च ।
अन्नदूषी कुण्डगोलावभिशस्तश्च देवलः ॥
मित्रध्रुक् पिशुनश्चैव नित्यं भार्यानुवर्त्तितः ।
मातापित्रोर्गुरोस्त्यागी दारत्यागी तथैव च ॥
गोत्रध्रुक् भ्रष्टशौचश्च काण्डपृष्ठस्तथैव च ।
अनपत्यः कूटसाक्षी याचको रङ्गजीवकः ॥
समुद्रयायी कृतहो तथा समयभेदकः ।
वेदनिन्दारतश्चैव विशेषात्पङ्क्तिदूषकाः ॥
सर्वे पुनरभोज्यान्नास्तथानर्हाश्च कर्मसु ।
ब्रह्माचाराभिशस्ताश्च वर्जनीयाः प्रयत्नतः ॥
शूद्रान्नरसपुष्टाङ्गः सन्ध्योपासनवर्जितः ।
महायज्ञविहीनश्च ब्राह्मणाः पङ्क्तिदूषकाः ॥
अधीननाशनश्चैव[1] स्नानमौनविवर्जितः ।
तामसो राजसश्चैव ब्राह्मणाः पङ्क्तिदूषकाः ॥

इति पङ्क्तिदूषकाः ।

अथ प्रकीर्णकाः ।

तत्र गौतमः ।

न भोजयेत् स्तेन-क्लीब-पतित-तद्वृति-नास्तिक-वीरहाग्रेदिधिषू-दिधिषूपति-स्त्री-ग्रामयाजकाजपालोत्सृष्टाग्नि-मद्यप-कुचर-कूटसाक्षि-प्रातिहारिकानुपपतिर्यस्य[2] च कुण्डाशि-सोमविक्रय्यगारदाहि-गरदावकीर्णि-गणप्रेष्यागम्यागामि-हिंस्र-परिवित्ति-परि-

---

[1] अधीतनाशनश्चैवेति । [2] समुपपतिर्यस्येति पाठान्तरम् ।

वेतृ-पर्याहित-पर्याधातृ-त्यक्तात्मदुर्बलि-कुनखि--श्यावदन्त--पौनर्भव--कितवाजाप--राज-प्रेष्य-प्रातिरूपिक-शूद्रापति-निराकृति--विलासि-कुसीदि-वणिक्--शिल्प-जीवि-ज्याशील-वादित्र तालनृत्यगीतशीलान् पित्रा चाकामेन विभक्तांश्छिष्यांश्चैकसगोत्रांश्च ।

तेभ्यः पतितेभ्यो वृत्तिर्यस्य सः 'तद्वृत्तिः'। 'वीरहा' राजहन्ता। स्त्रीणां-ग्रामस्य याजकः 'स्त्रीग्रामयाजकः'। प्रतिहार एव 'प्रातिहारिकः' ऐन्द्रजालिको वा। 'उपपतिर्यस्य' इति। यस्य भार्या नित्यं व्यभिचारिणीत्यर्थः। 'त्यक्तात्मा' प्राणत्यागे-कृतप्रयत्नः। 'अजापः' गायत्र्यादिजपरहितः। 'प्रातिरूपिकः' द्रव्याणां कूटप्रतिकृति-कर्त्ता। 'ज्याशीलः' आयुधाभ्यासरतः। ये चानिच्छतोऽपि पितुर्गृहाद्भागं गृहीतवन्तः।

याज्ञवल्क्यः।

रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा।
भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः॥
मित्रध्रुक् पिशुनः सोमविक्रयी परिविन्दकः।
मातापित्रोः गुरोस्त्यागी कुण्डाशी वृषलात्मजः।
परपूर्वापतिस्तेनः कर्मदुष्टाश्च निन्दिताः॥

कश्यपः।

दारर्त्विग्भ्रूणहन्तृंश्च व्यङ्गान्नक्षत्रसूचकान्।
वर्जयेद् ब्राह्मणानेतान् सर्वकर्मसु यत्नतः॥

नागरखण्डे।

अनर्हा ये च निर्दिष्टास्तानेतान् शृणु वच्मि ते।
हीनाङ्गानधिकाङ्गांश्च सर्वभक्षान्निराकृतीन्॥
श्यावदन्तान् वृथावेदान् वेदविक्रयकारकान्।
वेदविप्लावकान् वापि वेदशास्त्रविवर्जितान्॥
कुनखान् रोगसंयुक्तान् द्विर्नग्नान् परहिंसकान्।
जनापवादसंयुक्तान् नास्तिकाननृतानपि॥
वार्द्धुषिकान् विकर्मस्थान् शौचचारविवर्जितान्।
अतिदीर्घान् कृशान् वापि स्थूलानप्यतिलोमशान्॥
निर्लोमान् वर्जयेच्छ्राद्धे य इच्छेत् पितृतर्पणम्।
परदाररतश्चैव तथा यो वृषलीपतिः॥
शठो मलिम्लुचो लोभी[१] राजभृच्छून्यवृत्तयः।
सगोत्रायाश्च सम्भूतस्तथैकप्रवरासु च।
कनिष्ठः प्राकृताधानः कृतोद्वाहस्त्वपङ्क्तयः॥

तथा।

प्राग् दीक्षितो यः कनिष्ठः सन्त्यज्याग्रजसंयुजम्।
मातापितृपरित्यागी तथा च गुरुतल्पगः॥

---

[१] दम्भीति।

निर्दोषां यस्त्यजेत्पत्नीं कृतोद्वाहश्च कर्षकः।
शिल्पजीवी प्रमादी च पण्यजीवी धृतायुधः॥
एतान् विवर्जयेच्छ्राद्धे येषां न ज्ञायते कुलम्॥

वायुपुराणे।

वर्जनीयांस्तु वक्ष्यामि गदतो मे निबोधत।
कितवो मद्यपो यक्ष्मी पशुपालो निराकृतिः॥
ग्रामप्रेष्यो वार्द्धुषिको गायनो वणिजस्तथा।
आगारदाही गरदः कुण्डाशी सोमविक्रयी॥
समुद्रयायी दुश्चर्मा तैलिकः कूटकारकः।
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे॥
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति।
सूचकः पापकारी च यश्च मित्रेषु द्रुह्यति॥
गणयाचनकश्चैव नास्तिको वेदवर्जितः।
उन्मत्तः पाषण्डशठौ भ्रूणहा गुरुतल्पगः॥
भिषक्जीवी प्रेषणिकः परस्त्रीं यस्तु गच्छति।
विक्रीणाति च यो ब्रह्म व्रतानि च तपांसि च॥
नष्टं स्यान्नास्तिके दत्तं नेह नामुत्र तद्भवेत्।
निक्षेपहारिणे चैव कितवे वेदनिन्दके॥
तथा वाणिजके चैव कारुके धर्मवर्जिते।
भस्मनीव हुतं द्रव्यं दत्तं पौनर्भवे द्विजे॥

मत्स्यपुराणे।

एते भोज्याः प्रयत्नेन वर्जनीयान्निबोध मे।
पतिताभिशस्त--क्लीबान्ध–पिशुन--व्यङ्ग--रोगिणः॥
कुनखी श्यावदन्तः श्वित्रि-कुण्ड-गोल-जटाधरान्।
परिवित्तिर्विमुक्तात्मा मतोन्मत्तवकव्रताः॥
विडालव्रत-—वृत्तिघ्न-—दम्भि-—देवलकादयः।
कृतघ्ना नास्तिकास्तद्वन्म्लेच्छदेशनिवासिनः॥
त्रिशङ्कुकरवीरान्ध्राः चीनद्रविडकुङ्कणाः।
एतांस्तु वर्जयेत् सर्वान् श्राद्धकालेषु धर्मवित्॥

सौरपुराणे।

अङ्गवङ्गकलिङ्गांश्च सौराष्ट्रान् गूर्जरांस्तथा।
आभीरान् कौङ्कणांश्चैव द्राविडान् दक्षिणापथान्।
आवन्त्यान् मागधांश्चैव ब्राह्मणांस्तु विवर्जयेत्॥

इति प्रकीर्णकाः।

अथ ब्राह्मणानां दानोपादानहेतुभूतदोषगुणपरिज्ञानार्थं परीक्षोच्यते ।

तत्र महाभारते ।

श्राद्धेषु च महाराज परीक्षेद् ब्राह्मणान् बुधः ।
कुलशीलवयोरूपैर्विद्यया विनयेन च ॥

कुलादिग्रहणं श्राद्धभोजनयोग्यतामात्रोपलक्षणार्थम् ।

ब्रह्मवैवर्ते ।

तस्मात्परीक्षिते देयं पात्रभूते द्विजन्मनि ।
कष्टः श्राद्धविधिर्नित्यं जायतेऽसौ बहुच्छलः ॥

यतोऽयं श्राद्धविधिः 'बहुच्छलः' केनाप्यल्पतमेनापि दोषेण पराङ्मुखी भवितुमिच्छति, अतः षण्डपाषण्डवार्द्धुषिकदेवलवैडालव्रतिकत्वादि दोषनिराकरणपूर्वकं वेदविद्याव्रतशीलादिमत्वेन पात्रतया परीक्षिते द्विजन्मनि श्राद्धं देयम् । तथायं विधिर्देशकालक्रियाद्रव्यकर्त्तृभोक्तृगतमल्पमपि दोषमवाप्य नश्यति । तथा छलग्राहिश्राद्धविघ्नकर्तृरक्षःसञ्चारद्वारभूतदुर्निवारानेकसूक्ष्मच्छिद्रवान् , अतः कष्टानुष्ठानः । अतः स पङ्क्तिपावनैस्त्रिणाचिकेतादिविशेषणयुक्तैर्योगनिष्ठैश्च निश्छिद्रः क्रियते ।

तदुक्तम् ।

बहुच्छिद्रः पुरा प्रोक्तः पैत्रो यज्ञो महर्षिभिः ।
निष्प्रत्यूहश्च निश्छिद्रो जायते योगिरक्षयेति ॥

अतः पङ्क्तिपावनार्थं ब्राह्मणं परीक्षेत ।

अत्र परीक्षायां मनुशातातपाभ्याङ्गुणोपदेशः क्रियते ।

दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् ।
तीर्थन्तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः ॥

परीक्षेत दूरादिति श्राद्धकालात् पूर्वं दूरतरे काले परीक्षेत, तत्काले हि परीक्षा क्रियमाणा ब्राह्मणस्य खेदं जनयेत् । अथवा न स्वयं साक्षात् परीक्षां कुर्वीत । किन्तु पुरुषान्तरेण कारयेत् । यथा मामयमस्मै कार्याय परीक्षत इत्येवं ब्राह्मणो नोपलक्ष्येत् । अथवा दूरान्मातृतः पितृतश्च दशपुरुषं त्रिपुरुषं वा वेदपारगत्वं परीक्षेत । अथ पितृवंशे मातृवंशे च दश त्रयो वा पुरुषा वेदपारगत्वेन विख्याताः स्वयं च वेदपारगइत्येवंविधा परीक्षा श्राद्धेऽवश्यं विधेयेत्यर्थः । अतएव दशोभयतः श्रोत्रिया इति हारीतव्यासाभ्यामुक्तम् ।

मातापित्रोर्यस्य वंश्याः श्रोत्रिया दशपूरुषाः ।
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा ॥

शङ्खलिखितावप्याहतुः ।

यस्य दशपुरुषाः मातृपितृवंश्याः श्रोत्रिया ज्ञायन्ते विद्वांसः स्नातकाश्चेति पङ्क्तिपावना भवन्तीति ।

दशपुरुषानवगतौ पुरुषत्रयपरीक्षापिच्छागलेयेनोक्ता।

ब्रह्माण्डपुराणे।

सर्वलक्षणसंयुक्तं विद्याशीलं गुणान्वितम्।
पुरुषत्रयविख्यातं सर्वं श्राद्धे प्रकल्पयेदिति॥

वेदविहितकर्मवेदनं 'वेदः', तस्य समाप्तिस्तं गच्छति स 'वेदपारगः' इति मेधातिथिः। अतो मन्त्रसंहिताब्राह्मणमात्राध्यायी श्रोत्रियशब्दवाच्यो वेदपारगः। वेदपारगग्रहणं पंक्तिपावनगुणानामुपलक्षणार्थम्। तीर्थं तद्धव्यकव्यानामिति 'तीर्थं' तीर्थमिव। यथा तीर्थेनावतरणमार्गेणोदकार्थिनो गच्छन्त उदकं लभन्ते, एवं तादृग्विधब्राह्मणगतानि हव्यकव्यानि पितॄन् प्राप्नुवन्तीत्यर्थः। प्रदाने सोऽतिथिरिति प्रसङ्गादिदमुच्यते। स एवंविधो ब्राह्मणोऽन्यस्मिन्नधिप्रकृष्टे गोभूमितिलहिरण्यादिदानेऽतिथिर्भवति। यथातिथये स्वयमुपस्थिताय निर्विचिकित्सतया दत्तमन्नं महाफलमेवमीदृशाय ब्राह्मणाय हव्यकव्ये निर्विकल्पे दत्ते महाफले भवत इत्यर्थः।

दूरादेव परीक्षेत ब्राह्मणांश्चरितव्रतान्।
स्थविरान् तपस्विनो दान्तानिष्टान्वा यदि वेतरान्॥

तथा।

पूर्वमेव परीक्षेत ब्राह्मणान् वेदपारगान्।
शरीरप्रभवैर्दोषैर्विशुद्धांश्चरितव्रतान्॥

'पूर्वं' श्राद्धदिनात् प्रागेव। 'शरीरदोषाः' काणत्वकुणित्वादयः। 'व्रतानि' ब्रह्मचर्यादीनि।

यदाह देवलः।

ब्रह्मचर्यं सत्यवचनं मधुमांसविवर्जनम् मौनमयाचनमृतुकालाभिगमनमेवमादीनि व्रतानीति।

आह उशनाः।

तत्रादित एवं पात्रपरीक्षा कार्या पात्रमिति शोभनस्याख्या भवति।

ननु ब्राह्मणपरीक्षानिषेधपराण्यपि वचनानि दृश्यन्ते भविष्यत्पुराणे।

आदित्य उवाच।

एवमेव न सन्देहो यथा वदसि खेचर।
ममाप्येतन्मतं वीर ब्राह्मणं न परीक्षयेत्॥
सर्वदेवमयं विप्रं सर्वलोकमयं तथा।
तस्मात् संपूजयेदेव न गुणं तस्य चिन्तयेत्॥
केवलं चिन्तयेज्जातिं न गुणान्विनतात्मज।

आह विश्वामित्रः।

न ब्राह्मणं परीक्षेत कदाचिदपि बुद्धिमान्।
दातॄन् परीक्ष्य दत्तानि नयन्ति नरकं ध्रुवम्॥

परीक्षामनुमन्येत यः प्रतिग्रहलिप्सया ।
निरये कर्म्मचण्डालः पच्यतेऽसौ द्विजाधमः ॥

यो दातृभिः क्रियमाणामात्मनः परीक्षां प्रतिग्रहीतानुजानीते, परीक्षध्वं मां गुणवानस्मि चेत्ततो यदभिरुचितं तत् प्रदीयतामिति । असौ कर्म्मचण्डालो नरके पच्यते ध्रुवम् । तदेवं परीक्षाकर्त्रनुमन्त्रोर्दातृप्रतिग्रहीत्रोः प्रत्यवायश्रवणं परीक्षाविधेर्विरुद्धमिति । नैष दोषः । निषेधवाक्यानां साक्षात् परीक्षणविषयत्वात् । कस्मिन् देशे जातोऽसि, कीदृशन्ते कुलं किमधीषे किं शुश्रुवान् असीत्येवं प्रश्नप्रतिवचनाभ्यां यत्परीक्षणं तदेभिः प्रतिषिध्यते ।

तदाह गोभिलः ।

कीदृशस्त्वमिति ब्रूयात् किं वेत्सीत्यपि यो द्विजः ।
संवत्सरायुतं सास्त्रमन्वे तमसि मज्जति ॥

आह गौतमः ।

दाता तु यो द्विजं पृच्छेदधीतञ्च श्रुतं कुलम् ।
यश्च तस्मै प्रतिब्रूते तावुभावपि नारकौ ॥

बृहस्पतिः ।

अधीतेऽस्मिन्निदं दास्ये इत्युक्ते यस्तु दुर्म्मतिः ।
पठेत् शास्त्राणि वेदं वा स प्रेत्य श्वाभिजायते ॥

ब्रह्माण्डपुराणे ।

नानुयोगोऽस्ति वेदानां योऽनुयुङ्क्ते स पापकृत् ।
भोक्ता वेदफलाद्भ्रस्येद्दाता दानफलात्तथा ॥

भविष्यत्पुराणे ।

अनुयोगेन यो दद्याद् ब्राह्मणाय प्रतिग्रहम् ।
स पूर्व्वं नरकं याति ब्राह्मणस्तदनन्तरम् ॥

अध्ययनादिविषयः प्रश्नः 'अनुयोगः' ।

वेदाक्षराणि यावन्ति नियुञ्ज्यादर्थकारणात् ।
तावतीर्भ्रूणहत्या वै वेदविक्रयमाप्नुयात् ॥

साक्षात्परीक्षणमन्तरेण प्रकारान्तरेण तु परीक्षायां न कश्चिद्दोषः । गुणवतेदानविधानात् । गुणवत्तायाश्च परीक्षया विना दुर्ज्ञेयत्वात् ।

यत्तु विष्णुधर्मोत्तरे ।

अन्नदाने न कर्त्तव्यं पात्रावेक्षणमण्वपि ।
अन्नं सर्वत्र दातव्यं धर्मकामेन वै द्विज ॥
सदोषेऽपि तु निर्दोषं सगुणेऽतिगुणावहम् ।
तस्मात् सर्वप्रयत्नेन देयमन्नं सदैव तु ।
पित्र्ये कर्म्मणि तु प्राज्ञः परीक्षेत प्रयत्नतः ॥

एतत्तु श्राद्धव्यतिरिक्तान्नदानविषयम्। श्राद्धे परीक्षाया विहितत्वात्।

तदाह मनुः।

न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्म्मवित्।
पित्र्ये कर्म्मणि तु प्राप्ते परीक्षेत प्रयत्नतः॥

शङ्खः।

ब्राह्मणान्न परीक्षेत दैवे कर्म्मण्यतन्द्रितः।
पित्र्ये कर्म्मणि संप्राप्ते युक्तमाहुः परीक्षणम्॥

अत्र ब्राह्मणपरीक्षायां शङ्खलिखितौ।

श्राद्धे परीक्षा न दैवे।

विष्णुः।

दैवे कर्म्मणि ब्राह्मणं न परीक्षेत यत्नात् परीक्षेत पित्र्ये। अत्र ब्राह्मणपरीक्षायां गौतमः।

हविःषु चैवं दुर्व्वालादीन् श्राद्ध एवैके।

'हविःषु' दैवकर्म्मसु। वहुवचनं व्याप्त्यर्थम्। केवलं पित्र्याङ्गभूते दैवेऽन्येष्वपि दैवेषु श्रोत्रिया भोजनीयाः स्तेनादयो वर्ज्याः। दुर्व्वालादारभ्य येऽनुक्रान्तास्ते-तु श्राद्धे एव वर्ज्याः न दैव इत्येकेषां मतम्।

वायुपुराणे।

न ब्राह्मणान् परीक्षेत सदा दैवे तु मानवः।
दैवे कर्म्मणि पित्र्ये तु श्रूयते वै परीक्षणम्॥

महाभारते।

ब्राह्मणान्न परीक्षेत क्षत्रियो दानधर्म्मवित्।
दैवे कर्म्मणि पित्र्ये तु न्याय्यमाहुः परीक्षणम्॥
देवताः पूजयन्तीह दैवेनैवेह तेजसा।

दैवेन तेजसा संरक्ष्यमाणाः सन्तः पूजयितारो देवताः पूजयन्ति। न तत्तत्कर्म्म-प्रत्यूहनिवारणाय पङ्क्तिपावनादीन् गोघृतमिवापेक्षन्ते। अतो देवताभ्य उपहृत्य परिकल्प्य सर्व्वेभ्यो ब्राह्मणेभ्यो दद्यात्। न तत्रात्यन्तगुणदोषपरीक्षां कुर्वीतेत्यर्थः। अत्रेदमनुयुज्यते केन पुनः प्राप्ता सती दैवेऽन्नदाने परीक्षा निषिध्यते। गुणवद्विधि-दोषवत्प्रतिषेधाभ्यां प्राप्ता सतीति ब्रूमः। तथा हि तस्य परीक्ष्यमाणो ब्राह्मणो गुणवत्त्वेन दोषवत्त्वेन वा ज्ञायते। न चाज्ञात एवोपादातुं हातुं वा शक्यते। तथा च गुणदोषवद्विधिप्रतिषेधावतारार्थकौ स्याताम्। अतस्ताभ्यामेवार्थात् परीक्षा प्रापितेति। कथं तर्हि परीक्षानिषेधापादितं गुणदोषवत् विधिप्रतिषेधानर्थक्यं परि-हर्त्तव्यम्। अथ गुणदोषवद् ब्राह्मणविधिप्रतिषेधयोः पितृकान्नदानकविषयत्वं ज्ञापयितु-मयं परीक्षाया नित्यानुवादो न प्रतिषेधः। निषेधे वा सामान्यशास्त्ररूपयोर्विधिप्रति-

षेधयोः पित्र्य एवान्नदाने उपसंहारायेति मतम्। तन्न। विशेषत एव दैवेऽन्नदाने गुणदोषवद् ब्राह्मणविधिप्रतिषेधयोर्दर्शनात्।

तथाहि।

श्रोत्रियायैव देयानि कव्यानि च हवींषि च इति।

तथा।

ये स्तेनाः पतिताः क्लीबा ये च नास्तिकवृत्तयः।
तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥

तत्र हव्यशब्देन दैवमुक्तम्। अतश्चायुक्तो दैवेन्नदाने परीक्षानिषेधः।

अत्र तावत् शङ्खधरानुमतं समाधानं ब्रूमः। मुख्यकल्पिकानुकल्पिकेषु ब्राह्मणेषु मिलितेषु ये मुख्यास्ते प्रधानभूते पित्र्ये नियोक्तव्याः। येऽन्ये दोषरहिता नातीवगुणवत्तरास्ते वैश्वदैविक इत्येवंविधा न परीक्षेति दैवे कर्म्मणीत्यस्याशय इति। स्वाभिमतं पुनरिदम्। श्रोत्रियायैवेत्यादिना योऽयं गुणवन्नियमः, ये स्तेनेत्यादिना यश्च दोषवत् प्रतिषेधस्तयोः श्राद्धसम्बन्धिन्येव हव्ये प्रकरणेन व्यवस्थापितत्वाच्छ्राद्धाङ्गभूतवैश्वदेविकव्यतिरिक्तानि देवतोद्देशत्यज्यमानहविर्भोजनीयब्राह्मणकान्यन्यानि दैवानि कर्म्माणि दैवे कर्म्मणि न परीक्षेत्यस्य विषय इति।

यत्तु स्कन्दपुराणे।

सौरण्येन श्राद्धे भोजनीयस्यापरीक्षणीयत्वमुक्तम्—
परीक्ष्य श्राद्धं दातव्यमित्येवं वैदिकी श्रुतिः।

परीक्षणाच्च रम्भोरु आर्जवङ्गुणवत्तरम्।
अपरीक्ष्य तु यो दद्याच्छ्राद्धमार्जवमास्थितः।
तस्य तुष्यन्ति पितरो देवताश्च न संशय इति॥

तदप्यनयैव व्यवस्थया समाधेयम्। अथवा तत्तीर्थश्राद्धविषयमतिथिविषयञ्च व्याख्येयम्।

तथा च पद्मपुराणे।

तीर्थेषु ब्राह्मणान्नैव परीक्षेत कथञ्चन।
अन्नार्थिनमनुप्राप्तं भोजयेन्मनुशासनादिति॥

अतिथिपरीक्षानिषेधस्तु ब्रह्मवैवर्त्ते।

अविज्ञातं द्विजं श्राद्धेष्वतिथित्वे नियोजयेत्।

अतिथिव्यतिरिक्तस्य च ब्राह्मणस्य परीक्षा कर्त्तव्येति। परीक्षाप्रकारस्तु वृद्धमनुस्मृति-मत्स्यपुराणयोर्दर्शितः।

शीलं संवसनात् ज्ञेयं शौचं संव्यवहारतः।
प्रज्ञा संकथनात् ज्ञेया त्रिभिः पात्रं परीक्षते॥

चिरकालमतिसन्निहितदेशे वासः 'संवसनम्'। तत्त्वार्थनिर्द्धारणार्थं सुहृद्भावे शास्त्रचर्चा 'सङ्कथनम्'। 'प्रज्ञा' मेधा प्रकृष्टं ज्ञानं वा।

परीक्ष्यगुणवत्त्वेन निर्द्धारितानां ब्राह्मणानां श्राद्धे स्वीकारमाह जातूकर्ण्यः।

तस्मात्परीक्ष्य युञ्जीत श्राद्धे वेदार्थवित्तमान्।
आनन्त्यं स्वल्पमप्येति प्रदत्तं सुपरीक्षिते॥

दोषवत्त्वेन निर्द्धारितत्यागस्तु ब्रह्मवैवर्त्ते उक्तः।

यस्मिन्दोषाः प्रदृश्येयुः सद्भिर्वा वर्जितस्तु यः।
जानीयाद्वापि संवासाद्वर्जनीयाः प्रयत्नतः॥

आह देवलः।

ब्राह्मणेष्वप्यपाङ्क्तेयान् सर्वान् काम्येषु वर्जयेत्।
परीक्ष्य बहुधा विप्रानाहरेत् पङ्क्तिपावनान्॥

इति ब्राह्मणपरीक्षा।

इति श्रीमहाराजाधिराजश्रीमहादेवीयसकलश्रीकरणाधिपति-पण्डित श्रीहेमाद्रि-विरचिते चतुवर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे ब्राह्मणनिरूपणं नाम षष्ठोऽध्यायः समाप्तः॥

——

॥ अथ सप्तमोऽध्यायः ॥

अपासनीयनिरूपणप्रकरणम् ।

पुण्यानां परमाकरेण करुणाकल्लोलिनीभूभृता
तत्त्वातत्त्वविचारचारुनिधिना प्रज्ञाप्रभाभास्वता ।
नर्मालापसुधार्णवेन सुधिया हेमाद्रिणा वर्ण्यते
श्राद्धासन्नभुवोपनेयमधुना दुष्प्राणिजातन्त्विह ॥

अथ वर्जनीयब्राह्मणप्रसङ्गादन्यान्यपि श्राद्धादपासनीयान्युच्यन्ते ।

तत्र देवलः ।

हीनाङ्गः पतितः कुष्ठी व्रणी पुक्कस-नास्तिकौ ।
कुक्कुटः शूकरः श्वानो वर्ज्याः श्राद्धेषु दूरतः ॥

वीभत्सुमशुचिं नग्नं मत्तं धूर्त्तं रजस्वलाम् ।
नीलकाषायवसनं छिन्नकर्णञ्च वर्जयेत् ॥

शस्त्रं कालायसं सीसं मलिनाम्बरवाससम् ।
अन्नं पर्युषितञ्चापि श्राद्धेषु परिवर्जयेत् ॥

'पुक्कसः' म्लेच्छविशेषः । 'नास्तिकः' परलोकत्रासशून्यः । 'शूकरः' विड्वराहः । 'वीभत्सुः' जुगुप्सितः । 'अशुचिः' शुचिरहितः । 'नग्नः' संज्ञा-प्रकरणोक्तलक्षणः । छिन्नकर्णः' सन्धितकर्णः । इतरस्य हीनाङ्गत्वेनैवोक्तत्वात् । 'शस्त्रं' खड्गक्षुरिकादि । 'कालायसं' लोहम् । 'सीसं' नागाख्यो धातुः । मलिने-अम्बरवाससी अन्तरीयोत्तरीये यस्यासौ 'मलिनाम्बरवासाः' । कालायसादिवत्, पर्युषितमन्नमपि श्राद्धार्हदेशासन्निहितं कार्य्यम् ।

विष्णुः ।

न हीनाधिकाङ्गाः श्राद्धं पश्येयुर्न शूद्रा न पतिता न महारोगिणः ।

आपस्तम्बः ।

श्वभिरपपात्रैश्च श्राद्धस्य दर्शनं परिरक्षेत ।

'अपपात्रैः' अपभ्रष्टपात्रगुणैः । 'परिरक्षेत' निवारयेत् ।

उशनाः ।

विड्वराह-मार्जार-कुक्कुट-नकुल-शूद्र-रजस्वला-शूद्रीभर्त्तारश्च दूरमपनेतव्याः ।

श्राद्धप्रदेशादिति शेषः । 'शूद्रीभर्त्ता' अविद्यमानसजातीयभार्य्यो ब्राह्मणादि-रित्यर्थः ।

मनुः ।

चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च ।
रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान् ॥

ईक्षणेन सन्निधिरत्र लक्ष्यते ।

होमे प्रदाने भोज्ये च यदेभिरभिवीक्षितम् ।
दैवे हविषि पित्र्ये वा तद्गच्छत्ययथातथम् ॥

'होमे' अग्निहोत्रादौ शान्त्यादिहोमे वा । 'प्रदाने' गो-भू-हिरण्यादि-विषयेऽभ्युदयार्थे । 'भोज्ये' अदृष्टार्थे ब्राह्मणभोजने । 'दैवे हविषि' दर्शपूर्णमासादौ । 'पित्र्ये' श्राद्धे । 'एभिः' चाण्डालादिभिर्यद्वीक्षितं तदयथातथं गच्छतीति, यदर्थं क्रियते तद्विपरीतमेव साधयतीत्यर्थः । यद्यपि श्राद्धप्रकरणं तथापि वाक्यादन्यत्रापि होमादावयं प्रतिषेधः । अन्ये तु श्राद्धसम्बन्धिष्वेव होमादिष्वयं प्रतिषेध इत्याहुः । ते चैवं व्याचक्षते । 'होमे' अग्नौकरणहोमदेशे । 'प्रदाने' पिण्डप्रदानाद्यन्नत्यागदेशे । 'भोज्ये' भोज्योपकल्पनदेशे महानसादौ । च शब्दादन्यस्मिन्नपि स्थाने यदन्नादिकं चाण्डालादिभिरभिवीक्षितं तदयथातथं गच्छति, तेन श्राद्धदेशादेते दूरतोपनेया इत्यभिप्रायः ।

घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः ।
श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः ॥

'अवरवर्णजः' शूद्रः । तस्य च द्विजातिश्राद्धे श्राद्धोपकरणस्पर्शनिषेधेऽयं नात्मीये ।

खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत् ।
हीनातिरिक्तगात्रो वा तमप्यपनयेत्ततः ॥

'प्रेष्यः' परिचारकः । अपि शब्दादन्योऽपि यदृच्छासन्निहितो बान्धवादिरपनेयः ।

यमः ।

कुक्कुटो विड्वराहश्च काकश्चापि विडालकः ।
वृषलीपतिश्च वृषलः षण्ढो नारी रजस्वला ॥
एतानि श्राद्धकाले तु परिवर्ज्यानि नित्यशः ।
कुक्कुटः पक्षवातेन हन्ति श्राद्धमसंवृतम् ॥
घ्राणेन विड्वराहश्च वायसश्च रुतेन तु ।
श्वा तु दृष्टिनिपातेन मार्जारः श्रवणेन तु ॥
वृषलीपतिश्च दानेन चक्षुर्भ्यां वृषलस्तथा ।
छायया हन्ति वै षण्ढः स्पर्शेन तु रजस्वला ॥
खञ्जः काणः कुणिः श्वित्री दातुः प्रेष्यकरो भवेत् ।
ऊनाङ्गोवातिरिक्ताङ्गस्तमाशु निनयेत्ततः ॥

'विडालः' मार्ज्जारः। 'वृषलः' संज्ञाप्रकरणोक्तः, शूद्रो वा। 'असंवृतं' अनावृत-प्रदेशम्। 'श्रवणेन' शब्दश्रवणेन। 'दानेन' पात्रीकृतः सन्नित्यर्थः।

हारीतः।

दैवे वा यदि वा पित्र्ये सुराप्यायतनं स्पृशेत्।
रजस्वला पुंश्चली च निवापे समुपस्थिते॥

'निवापः' पितृकर्म। समुपस्थितशब्दात् पाकोपक्रमात् प्रभृतीति विज्ञेयम्।

तदाह व्याघ्रपात्।

मद्यपः स्वैरिणी या च परपूर्वापतिस्तथा।
नैव श्राद्धेऽभिवीक्षेरन्नावापात् प्रभृतिक्रमात्॥

'आवापः' पाकं कर्तुं तण्डुलादीनां पिठरादौ प्रक्षेपः, तत्प्रभृतिभोजननिष्पत्ति-पर्य्यन्तं, क्वचित् पाकस्थाने भोजनस्थानेऽन्यत्र वा स्थितान् भोज्यपदार्थान् भुञ्जानांश्च विप्रांश्छ्राद्धकर्मणि यथा मद्यपादयो नाभिवीक्षेरन् तथा दूरत एवापासनीया इत्यर्थः। मद्यपादि ग्रहणमप्रशस्तानामुपलक्षणार्थम्।

आह गौतमः।

श्व-चाण्डाल-पतितावेक्षणे दुष्टं, तस्मात् परिवृते दद्यात्तिलैर्वावकिरेत् पङ्क्तिपावनो वा शमयेत्।

श्वादीनामवेक्षणे 'दुष्टं' दोषवद्भवति। अतः कारणात् 'परिवृते' प्रच्छन्ने, श्राद्धं कुर्यात्। तथा न कृतं चेत्तर्हि समन्तात् तिलानवकिरेत्। पङ्क्तिपावनो वा पङ्क्ति-मूर्द्धनि निवेशितस्तं सर्वमपि दोषं शमयेत्।

बृहस्पतिरप्याह।

श्वपाकषण्ढपतित श्वानशूकरकुक्कुटात्।
रजस्वलायाश्चण्डालात् श्राद्धे कुर्याच्च रक्षणम्॥
परिश्रितेषु दद्याद्वा तिलैर्वा विकिरेन्महीम्।
निनयेद्वोपविष्टस्तु तं दोषं पङ्क्तिपावनः॥

'श्वपाकः' निषादः। 'षण्ढः' नपुंसकः। 'रक्षणं कुर्यात्' इति यथा श्वपाक-दृष्ट्युपघातो न स्यात् तथा कुर्यादित्यर्थः। 'परिश्रितेषु' परिवृतेषु। महीमित्युपलक्षणं, यावन्तः पदार्थाः श्वपाकादिभिर्दुष्टास्तावन्तः कृष्णतिलैरवकीर्याः। पङ्क्तिपावनो वा दोषं 'निनयेत्' अपहरेत्।

दूरस्थानपि निषिद्धदर्शनान् श्राद्धकर्ता यथा न पश्येत् तथा श्राद्धदेशः परिवृतो विधेय इत्याह विष्णुः।

संवृते च श्राद्धं कुर्यान्न रजस्वलां पश्येन्न श्वानं न विड्वराहं न ग्रामकुक्कुटं प्रयत्नात् श्राद्धमजस्य दर्शयेत्।

'श्राद्धं' श्राद्धार्थान् पदार्थान्। 'अजः' कृष्णच्छागः। तद्दर्शनेन हि दुष्टदृष्टिदूषिताः पदार्थाः पूता भवन्तीति कृत्वा तस्य प्रयत्नेन दर्शयेत्।

ब्रह्माण्डपुराणे।

नग्नादयो न पश्येयुः श्राद्धमेतत् कदाचन।
गच्छन्त्येतैस्तु दृष्टानि न पितॄन्न पितामहान्॥

एतैर्दृष्टानि हवींषीति शेषः। 'नग्नाः' वेदपरित्यागिनः। आदिशब्देन तत्प्रकारा वैदिककर्मानुष्ठानत्यागिनो गृह्यन्ते।

तथा च तत्रैवोक्तम्।

सर्वेषामेव भूतानां त्रयी संवरणं यतः।
ये वै त्यजन्ति तां मोहात् ते वै नग्ना इति स्मृताः॥

'त्रयी' वेदः 'संवरणं' प्रावरणं यथा प्रवरणं शीतवातादिभ्यः पुरुषांस्त्रायते एवं त्रय्यपि स्वधर्मानुष्ठापयन्ती दुःखेभ्यः त्रायते इति प्रावरणसादृश्यम्।

बौद्ध–श्रावक–निर्ग्रन्थ–शाक्त–जीवक–कापिलान्।
ये धर्म्माननुवर्त्तन्ते ते वै नग्नादयो जनाः॥

'बौद्धाः' सौगताः। 'श्रावकाः' श्वेतपटाः। 'निर्ग्रन्थाः' जैनाः। 'शाक्ताः' कौलाः। 'जीवकाः' वार्हस्पत्याः चार्वाका इति यावत्। 'कपिलः' लोकायतिकदेशीयः, तेन प्रणीताः 'कापिलाः।

वायुपुराणे।

वृथाजटी वृथामुण्डी वृथानग्नश्च यो नरः।
महापातकिनो ये च ते वै नग्नादयो नराः॥

ब्रह्मवैवर्ते।

शम्भुरुवाच।

नग्नादीन् भगवन् सम्यक् ममाद्य परिपृच्छतः।
आचक्ष्व सर्वथा सर्वान् विस्तरेण यथातथम्॥
एवमुक्तो महातेजा वृहस्पतिरुवाच तम्।
पुरा देवासुरे युद्धे निर्जितेष्वसुरेष्वथ॥
पाषण्ड्याधिकृताः सर्व्वे ह्येते सृष्टाः स्वयम्भुवा।
तपश्चरत्सु सर्वेषु असुरेषु च पार्थिव॥

विष्णुः।

सुदुस्तरां महामायामास्थाय सुरनोदितः।
मोहयामास योगात्मा ततो विघ्नाय तान् विभुः॥
स मूढान् बुद्धरूपेण तानुवाच महामनाः।
शक्या जेतुं सुराः सर्व्वे युष्माभिरिति दर्शनैः॥

बौद्धं धर्म्मं समास्थाय शक्यास्तेनु बभूविरे।
तानुवाचार्हते भन्ते यूयं भूत्वा च तद्विधाः॥
ज्ञानेन सहितं धर्म्मं तेनार्हन्त इति स्मृताः॥
बुद्ध-श्रावक-निर्ग्रन्थाः सिद्धपुत्रास्तथैव च।
एते च सर्व्वे चार्हन्तो विज्ञेया दुष्टचारिणः॥
त्रयीक्लेशं समुत्सृज्य जीवतेत्यब्रवीत्तु यान्।
जीवका नाम ते जाताः सर्व्वधर्म्मवहिष्कृताः॥
यान् भूत्वा द्विव्यवद्व्योम्नि धर्म्मान् वै प्रत्यपादयत्।
कापिलास्तेऽपि संप्रोक्ताः कपिलो हि दिवाकरः॥
चरध्वन्तानुवाचेदं मच्छासनमतिद्युति।
चरकास्तेऽपि विज्ञेया अधर्म्मचरणाः शठाः॥
दीर्घं चिरमिति प्रोक्तं सूक्ष्मं वा धर्म्मरूपकम्।
धर्म्मञ्चरध्वमित्युक्त्वा यस्मात्ते दीर्घचक्षुषः॥
चीराणि चैव नीलानि विभ्राणाश्चीरकास्ततः॥
एष चोक्षति संबुद्धो धर्म्मस्तं श्रयतेति यत्।
उवाच मायया विष्णुस्तेहि चौक्षाः प्रकीर्तिताः॥
स त्वं सर्वेषु भूतेषु भगवानिति चाब्रवीत्।
सात्वतास्तेऽपि विज्ञेया उक्ता भागवताश्च ये॥
विड्भक्षाश्चैव ये केचित् कपालकृतभूषणाः।
शैवाः पाशुपताश्चान्ये पाञ्चरात्रास्तथापरे॥
तथान्ये च दुरात्मानः सर्वेऽप्यासुरदैवताः।
शब्देन च त्रयीधर्म्मपालनाज्जगतां स्मृताः॥
तं षण्डयन्ति यस्मात्तो पाषण्डास्तेन हेतुना।
ततस्ते कर्मणा बद्धा इह सम्यग्व्यवस्थिताः॥
असुरेभ्यः पुनर्जाता भावितास्तेन कर्म्मणा।
निरयं प्राप्य तैरेव कर्म्मभिर्भाविताः पुनः॥
बौद्ध-श्रावक-निर्ग्रन्थाः शाक्या जीवकपालिकाः।
चरकाश्चीरकाश्चौक्षाः सिद्धपुत्राः ससात्वताः॥
नैरात्म्यवादिनश्चैव अयज्ञा नास्तिवादिनः।
वर्त्तमानाः स्वधर्म्मेषु जायन्ते च पुनः पुनः॥
वृथाजटी वृथामुण्डी वृथा नग्नाश्च ये नराः।
एतेऽन्ये च त्रयीवाह्याः सर्वे नग्नादयो जनाः॥

वायुपुराणे।

वैदिकैश्चापि ये मन्त्रैर्दीक्षिता विधिवद्द्विजाः।
यज्ञेष्वधिकृता नित्यमाश्रमास्ते न संशयः॥
अमन्त्रसंस्कृता ये तु यज्ञेभ्यश्च बहिष्कृताः।
पाषण्डांस्तांस्तदा ब्रह्मा उवाचाधश्चरांस्तथा॥

कुलधूमा निरमासाश्च व्याधा मुष्टिकलङ्घनाः ।
कुकर्म्मसंस्कृता ये च कुपथाः परिकीर्तिताः ॥
पूजयिष्यन्ति वः सर्वा म्लेच्छा दुर्मतयश्च ये ।
एतस्मात् कारणादेते निन्द्या नग्नादयः स्मृताः ॥
एभिः संस्पृष्टं दृष्टं वै श्राद्धं गच्छति दानवान् ।
ब्रह्मघ्नांश्च कृतघ्नांश्च नास्तिकान् गुरुतल्पगान् ॥
दस्यांश्चैव नृशंसांश्च दर्शनेन विवर्जयेत् ।
ये चान्ये पापकर्म्माणः सर्व्वांस्तानपि वर्जयेत् ॥
देवतानामृषीणाञ्च पापवादरताश्च ये ।
असुरान् यातुधानांश्च दृष्टमेभिर्व्रजत्यधः ॥
अपुमानपविद्धश्च कुक्कुटो ग्रामशूकरः ।
श्वा चैव हन्ति श्राद्धानि दर्शनादेव सर्वशः ॥
नष्टं लूतकिभिर्दृष्टं दीर्घरोगिभिरेव च ।
पतितैर्मलिनैश्चैव न द्रष्टव्यं कथञ्चन ॥

नागरखण्डे ।

शरटोलूखलोत्थे च यच्च शब्दे व्यवस्थितम् ।
शूर्पस्य वा विशेषेण तच्छ्राद्धं व्यर्थतां व्रजेत् ॥

इति श्रीमहाराजाधिराज-श्रीमहादेवीय-सकलश्रीकरणाधिपतिपण्डित- श्रीहेमाद्रिविरचिते चतुवर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे अपासनीयनिरूपणं नाम सप्तमोऽध्यायः समाप्तः ।

अथाष्टमोऽध्यायः

प्रक्षेप्यद्रव्यनिरूपणप्रकरणम् ।

यन्मूर्त्तिमालोक्य तमः प्रशस्तं,
जहाति लोकः सह शोकवेगैः ।
योग्यान्ययोग्यानि च सोऽभिधत्ते,
द्रव्याणि हेमाद्रिरिहाखिलानि ॥

अथ श्राद्धाय हविः प्रक्षेपाधिकरणेषु निरूपितेषु प्रक्षेप्यजिज्ञासायां द्रव्याणि निरूप्यन्ते । तानि च स्वभूतानि पितृपितामहाद्युद्देशेन त्यक्त्वा प्रक्षेप्याणि । स्वभावश्च तेषां लोकसिद्धैरेवोपायैः । ते चोपाया धर्म्योपायार्जितस्य द्रव्यस्य विधिरुच्यते ।

तथा च आपस्तम्बः प्रशस्तानि द्रव्याणि अनुक्रम्याह ।

एतैस्तीव्रतरा पितृणां प्रीतिस्तृप्तिर्द्राघीयांसञ्च कालं तथा धर्मानुहृतेन द्रव्येण तीर्थप्रतिपन्नेन ।

'प्रीतिः' परितोषातिशयः । 'तृप्तिः' आर्त्तिनिवृत्तिः । 'द्राघीयांसम्' 'दीर्घतरम् । 'धर्म्मानुहृतेन' धर्म्योपायार्जितेन । 'तीर्थप्रतिपन्नेन' सत्पात्रप्रतिपादितेन । शङ्खलिखितावपि ।

धर्म्मेण वित्तमादाय पितृभ्यो दद्यात् ।

अत्र पञ्चमहायज्ञानुद्दिश्य सुमन्तुः ।

अनुतिष्ठेन्न्यायागतेन द्रव्येणेत्याह बुधः । न्यायागतेन द्रव्येण कर्म्माणि कुर्य्यादिति ।

अतो धर्म्यैरेवोपायैरर्जितानि धान्य-शाक-फल-मूल-पयः प्रभृतीनि श्राद्धे देयानि । धर्म्याश्च द्रव्यार्जनोपायाः स्मृतिषु दर्शिताः ।

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥

'वित्तागमाः' द्रव्यार्जनोपायाः । 'धर्म्याः' पुरुषार्थत्वपक्षे प्रत्यवायानुत्पादकाः, वक्ष्यमाणप्रकारेण क्रत्वर्थत्वे तु क्रियमाणाय धर्माय हिताः साद्गुण्यहेतवः । तत्र स्वामिसम्बन्धेनैव निमित्तेन यदन्यदीयं द्रव्यमन्यस्य स्वम्भवति सः 'दायः' । अत्र-स्वामिसंबन्धएवोपायत्वेनोक्तः । अनन्यपरिगृहीतस्य जलतृणकाष्ठादेर्निध्यादेर्वाधिगमः 'लाभः' । द्रव्यविनिमयः 'क्रयः' । शत्रुपराभवः 'जयः' । वृद्ध्यर्थं परस्य द्रव्यसमर्पणं 'प्रयोगः' । कर्मणा आर्त्विज्याध्यापन-पौरोहित्यादिना शिल्पेन शुश्रूषया वा सम्बन्धः 'कर्मयोगः' । दीयमानद्रव्यस्वीकारः 'प्रतिग्रहः' । सन् साधुरनिषिद्धः प्रतिग्रहः 'सत्प्रतिग्रहः' । अत्र दायादिष्वपि सत्त्वमनुसन्धेयम् । एतेषु च दाय-लाभक्रयाः साधारणाः । जयः क्षत्रियस्यैव, स च दण्डाकरकरादीनामुपलक्षणम् । प्रयोगा-

वैश्यस्यैव, स च कृषिवाणिज्यादेरुपलक्षणम्। आर्त्विज्याध्यापनपौरोहित्यलक्षणः कर्मयोगः प्रतिग्रहश्च ब्राह्मणस्यैव। शिल्पलक्षणः कर्मयोगः कारुकाणामेव। शुश्रूषा-लक्षणस्तु शूद्रादेरेवेति।

तथा च गौतमः।

स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरिति।

यद्ग्रहणं स्वामिजीवनेन प्रतिसम्बन्धेन क्रियते सः दायः 'रिक्थम्'। यथा पुत्राणां पौत्राणां च पितृधनं पैतामहं च धनम्। स्वामिजीवनप्रतिबद्धग्रहणको दायः 'संविभागः' यथा भ्रात्रादीनां विभक्तभ्रात्रादिद्रव्यम्। अनन्यप्रतिगृहीतस्य जल-तृणकाष्ठादेः स्वीकारः 'परिग्रहः'। निध्यादेः प्राप्तिः 'अधिगमः'। एतेषु निमित्तेषु सत्सु 'स्वामी' भवति। 'अधिकम्' असाधारणम्। 'लब्धम्' प्रतिग्रहाध्यापनयाजनैः प्राप्तम्। 'विजितम्' विजयदण्डादिलब्धम्, क्षत्रियस्याधिकम्। वैश्यशूद्रयोर्निर्विष्टम-धिकम्। तत्र वैश्यस्य कृषिगोरक्षादिलब्धं 'निर्विष्टम्'। शूद्रस्य द्विजशुश्रूषादौ भृतिरुपेण लब्धं निर्विष्टम्। एवमनुलोमजानां प्रतिलोमजानां च लोकप्रसिद्धेषु स्वस्व-हेतुषु यद्यदसाधारणमुक्तं सूतानामश्वसारथ्यमित्यादि तत्तत्सर्वं निर्विष्टशब्देनोच्यते सर्वस्यापि भृतिरूपत्वात्।

निर्वेशो भृतिभोगयोरित्यभिधानकोशानुशासनात्।

अत्रार्जनीयत्वेन धनं प्रकृत्याह नारदः।

> तत्पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च।
> कृष्णञ्च तस्य विज्ञेयो विभागः सप्तधा पुनः॥

एकैकस्य शुक्लादेः सप्त सप्त भेदा भवन्तीत्यर्थः।

> श्रुतशौर्यतपः कन्यायाज्यशिष्याऽन्वयागतम्।
> धनं सप्तविधं शुक्लमुदयोऽप्यस्य तद्विधः॥

आगतशब्दः श्रुतादिभिः प्रत्येकं सम्बध्यते। श्रुतेन विद्यया निमित्तेन यः प्रति-ग्रहस्तेन यत्प्राप्तम्, शौर्य्येण निमित्तेन यद्विजितं भृतिरुपेण वा लब्धम्। तपसा निमित्तेन प्रतिग्रहेण यल्लब्धम्। अत्र प्रतिग्रहस्य शुक्लत्वे दातृप्रतिग्राह्यशुद्धिरपि कारणत्वेनानु-सन्धेया। 'कन्यागतम्' कन्याप्रतिग्रहकाले श्वशुरादिभ्यो यल्लब्धम्। 'शिष्यागतम्' शिष्यादध्याप्यादध्यापनेन निमित्तेन यत् प्राप्तं गुरुदक्षिणादि। 'अन्वयागतम्' दाय-प्राप्तम्। अत्र यथाधिकारं शुक्लत्वमनुसन्धेयम्। 'उदयोऽपि तद्विधः' इति तद्धन-विहितकर्मजं फलमपि 'शुक्लं'। 'शुक्लं' दुःखासंभिन्नमित्यर्थः।

> कुसीद-कृषिवाणिज्य-शिल्पशुल्कानुवृत्तितः।
> कृतोपकारादाप्तञ्च शबलं समुदाहृतम्॥

न्याय्योपचयार्थं द्रव्यप्रयोगः 'कुसीदम्'। 'कृषिः' लाङ्गलकर्म। क्रयविक्रय-व्यवहारेण धनवर्द्धनं 'वाणिज्यम्'। अत्र कुसीदादीनि वैश्यव्यतिरिक्तेनापदि क्रिय-

माणानि द्रव्यस्य शबलत्वकारणानि। अनापदि तु कृष्णत्वकारणान्येव। वैश्यस्य तु सदा शुक्लान्येव। 'शिल्पं' कारुकर्म। तदप्यन्यदीयमन्येनानुष्ठितं शबलत्वहेतुः। शुल्कं वणिजादेः यः करः। तच्च राजव्यतिरिक्तानां शबलम्। 'अनुवृत्तिः' द्विजातिशुश्रूषा, तदर्जितं धनं शूद्रव्यतिरिक्तस्य शबलम्। कृतोपकाररूपेण यद्गृहीतं तत् सर्वेषां शबलम्। शबलत्वञ्च किञ्चित् प्रत्यवायकरत्वम्। एतद्धनविहितस्य कर्म्मणः फलमपि 'शबलम्' दुःखानुविद्धम्।

पार्श्विकद्यूत चौर्य्यार्त्ति प्रतिरूपकसाहसैः।
व्याजेनोपार्ज्जितं यत् तत् सर्वेषां कृष्णमुच्यते॥

योऽहि राजादिपार्श्वे वर्त्तमानः कस्यापि स्वतः सम्भावितमुपकारं कथञ्चिदुपलभ्य तं प्रतिब्रूते तवेमञ्चेदुपकारं कारयामि तदा त्वयेदं मम देयमित्येवं धनमर्जयति स 'पार्श्विकः'। एवं विपत्प्रशमनप्रदर्शनेनापि धनार्जयिता 'पार्श्विकः'। यश्चोत्तमवर्णाद्वित्तमादाय प्रत्यर्पणानिच्छुस्तत् पुरतो नावतिष्ठते सोऽपि 'पार्श्विकः'। तेनैवं यदुपार्जितं धनं तत्कृष्णम्। 'द्यूतं' अक्षदेवनादि। तदर्ज्जितं धनं क्षत्रियव्यतिरिक्तानां कृष्णम्। 'चौर्य्यम्' प्रच्छन्नापहारः। 'आर्त्तिः' परपीडा। 'प्रतिरूपकम्' परवञ्चनार्थं मणिसुवर्णादेः प्रतिकृतिकरणम्। 'साहसम्' स्वप्राणव्ययाङ्गीकारेण पश्यतोहरत्वम्। 'व्याजः' दम्भेन तपः प्रभृति। एतैरुपार्जितं धनं सर्वेषां 'कृष्णं' दुःखप्रायफलम्।

तेन क्रयो विक्रयश्च दानं ग्रहणमेव च।
विविधाश्च प्रवर्त्तन्ते क्रियाः सम्भोग एव च॥

यथाविधेन द्रव्येण यत् किञ्चित्कुरुते नरः।
तथाविधमवाप्नोति तत्फलं प्रेत्य चेह च॥

'यथाविधेन' शुक्लेन शबलेन कृष्णेन च द्रव्येण, 'यत्किञ्चित्' पारलौकिकं दानादिकमैहिकञ्च शान्तिकपौष्टिकादि 'कुरुते' तस्य फलं तथाविधं भवति। शुक्लेन शुक्लं दुःखरहितम्। शबलेन शबलं मिश्रं सुखदुःखम्। कृष्णेन कृष्णं बहुदुःखहेतुस्वल्पसुखम्।

पद्मपुराणे।

शुक्लेन वित्तेन कृतं पुण्यं बहुफलं भवेत्।
शबलं मध्यमफलं कृष्णं हीनफलं धनम्॥

ब्रह्मप्रोक्ते।

शुक्लवित्तेन यो धर्म्मं प्रकुर्य्याच्छ्रद्धयान्वितः।
तदर्थं पात्रमासाद्य देवत्वेन तदश्नुते॥
राजसेन च भावेन वित्तेन शबलेन च।
प्रदद्याद्दानमर्थिभ्यो मानुषत्वे तदश्नुते॥
तमोवृत्तस्तु यो दद्यात् कृष्णं वित्तं तु मानवः।
तिर्य्यक्त्वे तत्फलं प्रेत्य समश्नाति नराधमः॥

नारदः ।

तत्पुनर्द्वादशविधं प्रतिवर्णाश्रयात् स्मृतम् ।

तदेवं शुक्लादिभेदेन त्रिविधं धनं प्रत्येकवर्णचतुष्टयाश्रयणादाश्रयभेदेन द्वादशविधं भवति ।

तस्यैव प्रकारान्तरेण द्वादशभेदानाह ।

साधारणं स्यात् त्रिविधम् ।

असाधारणन्तु त्रिषु वर्णेषु प्रतिवर्णं त्रैविध्यान्नवविधमित्युभयं मिलित्वा द्वादशविधम् । शूद्राश्रितस्यासाधारणधनभेदस्य पृथग्वक्ष्यमाणत्वात् ।

क्रमागतं प्रीतिदायः प्राप्तञ्च सह भार्यया ।
अविशेषेण सर्वेषां वर्णानां त्रिविधं धनम् ॥

'प्रीतिदायः' प्रीतिदानेन लब्धम् ।

वैशेषिकं धनं ज्ञेयं ब्राह्मणस्य त्रिलक्षणम् ।
प्रतिग्रहेण यल्लब्धं याज्यतः शिष्यतस्तथा ॥
त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम् ।
युद्धोपलब्धं काराच्च दण्डाच्च व्यवहारतः ॥

'कारात्' करग्रहणात् । 'व्यवहारतः' न्यायेन ।

वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम् ।
कृषिगोरक्षवाणिज्यैः शूद्रस्यैभ्यस्त्वनुग्रहात् ॥

शूद्रस्य पुनः 'एभ्यः' द्विजातिभ्यः, अनुग्रहात्' शुश्रूषाजनितमनः प्रसादात्, यल्लब्धं तदसाधारणम् ।

सर्व्वेषामेव वर्णानामेवं धर्म्यो धनागमः ।
विपर्य्ययादधर्म्यः स्यान्नचेदापद्गरीयसी ॥

तदेवं स्त्रीपुंसयोरविशेषेण धर्म्या द्रव्यर्जनोपाया उक्ताः ।

अथ स्त्रीणामेवोच्यन्ते ।

अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतिकर्म्मणि ।
भ्रातृ-मातृ-पितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥

अध्यग्न्यादिधनस्वरूपं तु कात्यायनेनाभिहितम् ।

विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितम् ॥
यत्पुनर्लभते नारी दीयमाना पितुर्गृहात् ।
अध्यावाहनिकं नाम स्त्रीधनं तदुदाहृतम् ॥
प्रीत्या दत्तं तु यत्किञ्चित् श्वश्र्वा वा श्वशुरेण वा ।
पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते ॥

ऊढ़या कन्यया वापि पत्युः पितृगृहेऽपि वा।
भ्रातुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्॥

किञ्च—

बन्धुदत्तं तथाशुल्कमन्वाधेयकमेव च।

कन्याया मातृबन्धुभिः पितृबन्धुभिश्च दत्तं 'बन्धुदत्तम्'। यद्दत्वा परिणीयते तच्छुल्कम्। परिणयनादनु पश्चाद्यद्दीयते तत् 'अन्वाधेयकम्'।

उक्तञ्च कात्यायनेन,—

विवाहात्परतो यच्च लब्धं भ्रातृकुलात् स्त्रिया।
अन्वाधेयन्तु तद्द्रव्यं लब्धं भर्तृकुलात्तथा॥

याज्ञवल्क्यः।

पितृ-मातृ-पति-भ्रातृ-दत्तमध्यग्न्युपागतम्।
आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम्॥

पित्रादिभिर्यद्दत्तं यच्च विवाहकालेऽग्निसमक्षं मातुलादिभिर्दत्तं, 'आधिवेदनिकम्' अधिवेदननिमित्तम्।

"अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम्" इत्यादि वक्ष्यमाणं पत्नीदुहितरश्चे-त्यादिना प्राप्तम्।

भगिन्यश्च निजादंशाद्दत्वांशन्तु तुरीयकमिति। भगिनीशुल्कं सोदर्याणामूर्द्ध्वं मातुरिति।

अनपत्यस्य पुत्रस्य माता दायमवाप्नुयादिति।
मातर्य्यपि च वृत्तायां पितुर्माता हरेद्धनमिति॥
जनन्यां संस्थितायान्तु समं सर्वे सहोदराः।
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः॥
यास्तासां स्युर्दुहितरस्तासामपि यथार्थतः।
मातामह्या धनात् किञ्चित् प्रदेयं प्रीतिपूर्वकमिति॥
मातुस्तु यौतकं यत्स्यात् कुमारीभाग एव स इति।

स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति पत्नी हि पारिणय्यस्येष्ट इत्या-दिभिः प्राप्तं स्त्रीधनं स्त्रीणां धर्म्यम्। तदेवं धर्म्योपायार्जितस्य द्रव्यस्य श्राद्धादौ विधिर्दर्शितः।

इति धर्म्योपायार्जितद्रव्यविधिः।

अथाधर्म्योपायार्जितस्य प्रतिषेधः प्रदर्श्यते।

आह वृद्धशातातपः।

द्रव्येणान्यायलब्धेन यः करोत्यूर्ध्वदैहिकम्।
न स तत्फलमाप्नोति तस्यार्थस्य दुरागमात्॥

'ऊर्द्ध्वदैहिकं' श्राद्धादि ।

देवलोऽप्याह ।

अन्यायाधिगतां दत्वा सकलां पृथिवीमपि ।
श्रद्धावर्जमपात्राय न काश्चिद्भूतिमाप्नुयात् ॥

'भूतिः' फलम् ।

वह्निपुराणे ।

अन्यायोपगतं द्रव्यं गृहीत्वा यो ह्यपण्डितः ।
धर्म्माभिकाङ्क्षी यजते न धर्म्मफलमश्नुते ॥
धर्म्मवैतण्डिको यस्तु पापात्मा पुरुषस्तथा ।
ददाति दानं विप्रेभ्यो लोकविश्वासकारणम् ॥
पापेन कर्म्मणा विप्रो धर्म्मलुब्धो निरंशकः ।
रागमोहान्वितः शान्तः कलुषां योनिमाप्नुयात् ॥
एवं लब्ध्वा धनं लोभात् यजते यो ददाति च ।
स पापकर्मणा तेन न सिद्ध्यति दुरागमात् ॥
एतैरन्यैश्च बहुभिरन्यायोपार्जितैर्धनैः ।
आरभ्यन्ते क्रिया यास्तु पिशाचास्तत्र दैवतम् ॥

आह शातातपः ।

वेदविक्रयजं नेष्टं स्त्रिया यच्चार्जितं धनम् ।
न देयं पितृदेवेभ्यो यच्च क्लीवादुपार्जितम् ॥

'वेदविक्रयजं' वेदविक्रयलब्धम् । वेदविक्रयश्च षड्विधः, स चोक्तो भविष्यत्पुराणे ।

प्रख्यापनञ्च व्याख्यानं प्रश्नपूर्वः प्रतिग्रहः ।
याजनाध्यापने वादः षड्विधो वेदविक्रय इति ॥

ईदृशोऽहं वेदवेदाङ्गेष्वधीतीति धनार्थं तत्र तत्राध्ययनप्रकाशनं 'प्रख्यापनम्' । अर्थलिप्सया वेदार्थविवरणं 'व्याख्यानम्' । ख्यातिलाभपूजार्थं श्रोत्रियपराजयपर्य्यवसानो वेदतदर्थसम्बन्धी विवादः 'वादः' । स्त्रीव्यापारोपजीवनेनार्जितं स्त्रीष्वर्जितं स्त्रीविक्रयार्जितं वा । 'क्लीवः' षण्डः ।

व्यासः ।

वेदविक्रयजं नेष्टं स्त्रिया यच्चार्जितं धनम् ।
न देयं पितृदेवेभ्यो यच्च क्लीवादुपार्जितम् ॥

स्त्रिया स्वातन्त्र्येण कुसीदसेवाद्युपायैर्यदर्जितं तत्पत्या नादेयम् ।

मार्कण्डेयपुराणे ।

यच्चोत्कोचादिना प्राप्तं पतिताद् यदुपार्जितम् ।
अन्यायकन्याशुल्कोत्थं द्रव्यं चात्र विगर्हितम् ॥

पित्रर्थं मे प्रयच्छस्वेत्युक्त्वा यच्चाप्युपार्जितम् ।
वर्जनीयं सदा सद्भिस्तत्तद्वै श्राद्धकर्मणि ॥

कार्य्यप्रतिबन्धनिवृत्त्यर्थमापत्प्रतीकारार्थं वा राजाधिकृतेभ्यो यद्दीयते स 'उत्कोचः' तेन रूपेण यत् प्राप्तम् । गोमिथुनाधिककन्याशुल्कसम्भूतं 'अन्यायकन्याशुल्कोत्थम्' । तथा श्राद्धक्रियाप्रयोजनत्वेनाभिधाय यद् याचितं तत्सर्वप्रकारं द्रव्यं श्राद्धकर्मणि वर्जयेदिति ।

रेवाखण्डे ।

देवद्रव्यं गुरुद्रव्यं द्रव्यं चण्डेश्वरस्य च ।
त्रिविधं पतनं दृष्टं दानलङ्घनभक्षणात् ॥

मत्स्यपुराणे ।

हस्त्यश्वौ गामनड्वाहं मणिमुक्तादिकाञ्चनम् ।
परोक्षं हरते यस्तु पश्चाद्दानं प्रयच्छति ॥
न ते गच्छन्ति वै स्वर्गं दातारो यत्र भोगिनः ।
अनेन कर्मणा युक्ताः पच्यन्ते नरकेऽधमाः ॥
अपहृत्य परस्यार्थं दानं यस्तु प्रयच्छति ।
स दाता नरकं याति यस्यार्थस्तस्य तत्फलम् ॥

तथा ।

परिभुक्तमविज्ञातमपर्य्याप्तमसंस्कृतम् ।
यः प्रयच्छति विप्रेभ्यस्तद्भस्मन्यवतिष्ठते ॥

'परिभुक्तं' परिगृहीतोपयोगं वस्त्रादि, 'अपर्य्याप्तं'स्वकार्य्याक्षमं जरद्गवादि ।

इत्यधर्मोपार्जितद्रव्यप्रतिषेधः ।

तदेवं धर्म्यैरुपायैरर्जितेन श्राद्धादीनि कर्त्तव्यानि । न तु यत्किञ्चिदुपायार्जितेनेति । ननु लिप्सासूत्रेऽर्जननियमानां पुरुषार्थतोक्ता । एतैस्तु पुरुषदर्शितैर्वचनैः सा समुद्भ्रियते । नान्यायेनार्जननियमानां पुरुषार्थतोक्ता वचनैस्तु नियमार्जितस्य धनस्य क्रत्वर्थतोऽच्यते । इति धनार्जनाधिकरणस्य वचनानाञ्च विषयभेदाद्विरोधाभावे कथंवचनैरर्जननियमानां पुरुषार्थता समुद्भ्रियते । नियमार्जितस्य क्रत्वर्थत्वं प्रतिपादयद्भिर्वचनैरर्थान्नियमानामपि क्रत्वर्थतापादिता तथा धनार्जनाधिकरणोक्तेन न्यायेन नियमानां पुरुषार्थत्वं कुर्वता तैरर्जितस्य धनस्यापि पुरुषार्थत्वमापादितमिति न्यायस्य वचनानां चैकविषयत्वमेवेति चेत् । तन्न । पुरुषार्थैरेव नियमैरर्जितस्य धनस्य क्रत्वर्थत्वाविरोधात् । नन्वर्ज्यमानस्य पुरुषार्थतामनापाद्य कथं नियमाः पुरुषार्था भवेयुः ।

अत्र ब्रूमः । अदृष्टमपि पुरुषोपकारं निवर्त्तयन्तो नियमाः पुरुषार्था भवन्ति । कथं पुनः पुरुषोपयोगिनि धनस्वत्वे दृष्टे सम्भवत्यदृष्टकल्पना । उच्यते । पुरुषोपकारिणो धनस्वत्वस्य नियममन्तरेणोपायमात्रादेव सिद्धेर्नियमस्यादृष्टमात्रैकफलत्वा ।

तस्माद् दृष्टद्वारा पुरुषार्था भवद्भिः प्रतिग्रहादिनियमैरर्ज्यमानं धनं पुरुषक्रतूभयार्थतोदासीनेन रूपेण पुरुषसम्बन्धं लभते। पुरुषापेक्षितलौकिकवैदिकक्रियामात्रार्थतारूपेण वा। तत्रोदासीनेन रूपेण पुरुषसम्बन्धं प्राप्तस्य क्रतूपयोगयोग्यता वचनेनोच्यते। यदा तु क्रियामात्रार्थतारूपेण तदा नियमानियमप्रकारार्जितस्यापि क्रतूपयोगयोग्यत्वे प्रसक्ते नियमान्यप्रकारार्जितस्य क्रतूपयोगयोग्यत्वाभावो वचनेनोच्यत इति न कश्चिद्विरोधः।

अस्तु वा धनस्य पुरुषार्थैकरूपता, तथापि पुरुषार्थस्यैव सतोऽर्थात् क्रतूपकारकतास्तु। उपकारकत्वे योग्यतामात्रं तु वचनैरुच्यते। न क्रत्वर्थतेति न विरोधः। असत्प्रतिग्रहाद्यर्जितस्य योग्यताभावस्तन्निषेधवचनैरिति। अथवा लिप्सासूत्रे प्रतिग्रहादिनियमवाक्ये सामर्थ्योपनीयमाना पुरुषार्थतोक्ता न पुनर्वचनान्तरोपकल्प्यमाना क्रत्वर्थता निराकृता।

नन्वेवं सति नियमार्जितेनैव क्रतवः कर्त्तव्याः, तथाविधेनैव च स्वार्थः साधनीयः, ततश्चार्जननियमानां महता प्रबन्धेन पुरुषार्थताप्रतिपादनं किमर्थम्। न्यायव्युत्पत्तिमात्रार्थमिति ब्रूमः। अथवा नियमातिक्रमे प्रायश्चित्तप्राप्त्यर्थम्। अथवा धनान्तरालाभे नियमातिक्रमार्जितेनापि धनेन नित्यनैमित्तिकक्रतुसिद्धिः सम्भवतीति प्रतिपादनार्थमित्यनवद्यम्।

इति धनार्जनाधिकरणविरोधपरिहारः।

अथ व्रीह्यादिद्रव्योत्पत्तिः।

मार्कण्डेयपुराणे।

भूरियं पुरा कदाचिदोषधीरभ्रसतेति प्रतिपाद्योक्तम्।

ग्रस्तासु च पुनस्तासु विभ्रान्तास्ताः पुनः प्रजाः।
ब्रह्माणं शरणं जग्मुः क्षुधार्त्ताः परमेष्ठिनम्॥
स चापि तत्त्वतो ज्ञात्वा तदा ग्रस्तां वसुन्धराम्।
वत्सं कृत्वा सुमेरुन्तु दुदोह भगवान् विभुः॥
दुग्धेयं गौस्तदा तेन सस्यानि पृथिवीतले।
जज्ञिरे तानि बीजानि ग्राम्यारण्यास्तु ताः पुरा॥
ओषध्यः फलपाकान्ताः गणाः सप्तदश स्मृताः।
व्रीहयश्च यवाश्चैव गोधूमाश्चाणवस्तिलाः॥
प्रियङ्गवोह्युदाराश्च कोरदूषाः सचीनकाः।
माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः॥
आढक्यश्चणकाश्चैव गणाः सप्तदश स्मृताः।
इत्येता अभवन् ग्राम्यास्तथारण्याश्च जज्ञिरे[१]॥
ओषध्यो यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश।
व्रीहयश्च यवाश्चैव गोधूमाश्चाणवस्तिलाः॥

---

[१] इत्येता ओषधीनान्तु ग्राम्याणां जातयः पुरा इति वा पाठः।

प्रियङ्गुसहिता ह्येते सप्तमास्तु कुलत्थकाः ।
श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ॥
कुरुविन्दा मर्कटकास्तथा वेणुयवाश्च ये ।
ग्राम्यारण्याः स्मृता ह्येता ओषध्यश्च चतुर्दश ॥

फलपाकेन अन्तो नाशो यासान्ताः 'फलपाकान्ताः'। 'व्रीहयः' षष्टिकाः । सितगौरमहाव्रीहि–कृष्णव्रीहि–जतूमुख–कुर्कुण्डक–लाचक–परापतक–सूकर–कोदाल–कोजाल–चीनशार–वर्दुर–गन्धन–कुरुविन्द–पाटलादयः । 'अणवः' वरयिकाः । 'प्रियङ्गुः' कङ्गुः उदारचीनः । 'कुरुविन्दाः' व्रीहिविशेषाः । 'कोरदूषकः' कोद्रवः । 'नीवाराः' अरण्यव्रीहयः । 'जर्त्तिलाः' कृष्णतिलाः । 'गवेधुकाः' कुसुम्भवीजसदृशाः । 'मर्कटकः' तृणधान्यविशेषः । 'वेणुयवाः' वंशबीजानि, 'यज्ञियाः' यज्ञार्हाः ।

ब्रह्मवैवर्त्ते ।

त्वष्ट्रा वै यजमानेन वार्य्यमाणो महात्मना ।
पपौ शचीपतिः सोमं पृथिव्यां विप्रुषोऽपतन् ॥
श्यामाकास्तु ततो जाताः पित्रर्थमपि पूजिताः ।
गोधूमाश्च यवाश्चैव समुद्गा रक्तशालयः ॥
एते सोमात् समुद्भूताः पितॄणाममृतं ततः ।
तस्मात् प्रयत्नतो देया एते श्राद्धेषु वंशजैः ॥

वायुपुराणे—

त्वष्ट्रा वै वार्य्यमाणस्य शचीशस्य महात्मनः ।
शक्रस्य पिबतः सोमः पृथिव्यामपतत्पुरा ॥
श्यामाकास्तत उत्पन्नाः पित्रर्थमभिपूजिताः ।
विप्रुषस्तस्य कतिचित् पृथिव्यामपतन् पुरा ॥
लिप्सिताः शीतला हृद्या मधुरास्तत इक्षवः ।
श्यामाकैरिक्षुभिश्चैव पितॄणां सार्वकामिकम् ॥
कुर्यादाग्रयणं यस्तु स शीघ्रं सिद्धिमाप्नुयात् ।
श्यामाका हस्तिनामानो विद्धि तान् यज्ञनिश्चितान् ।
यस्मात्ते देवसृष्टास्तु तस्मात्ते यज्ञियाः स्मृताः ॥

मत्स्यपुराणे ॥

अमृतं पिबतो वक्त्रात् सूर्य्यस्यामृतविन्दवः ।
निपेतुर्ये तण्डुलादि शालिमुद्गेक्षवः स्मृताः ॥
शर्करापरतस्तस्मादिक्षुसारोऽमृतात्मवान् ।
इष्टा रवेरतः पुण्या शर्करा हव्य-कव्ययोः ॥

'शालयः' रक्तशालि-महाशालि-कलम-तूर्णक-शकुनाहृ-सारामुख-दीर्घशूक-रोध्र-शूक-सुगन्ध पतङ्ग-तपनीयादयः । 'मुद्गाः' शिम्बिधान्यविशेषः । 'इक्षवः' पौण्ड्रक-

वांशिक-कर्म्मार-नेपालशात-शातपर्वकादयः । 'शर्करा' इक्षुविकारविशेषः । मत्स्यण्डिका-खण्डसितादयो यद्भेदः ।

नागरखण्डे ।

सृष्टिं प्रकुर्वता पूर्वं पशवो लोककारिणा ।
खड्ग-वार्ध्रीण-शार्दूलाः पूर्वं सृष्टास्ततोऽपरे ॥
यो यथा प्रथमं सृष्टः स तथा मेध्यतां गतः ।
यथैते प्रथमं सृष्टाः पशवोऽत्र नराधिप ॥
शस्यानि सृजता तद्वत्तिलाः पूर्वं विनिर्मिताः ।
ततो यवा व्रीहयश्च ततश्चैव प्रियङ्गवः ॥
गोधूमाश्च मसूराश्च माषा मुद्गास्तथाणवः ।
नीवाराश्चापि श्यामाका एवं सृष्टा यथाक्रमम् ॥
यदा पुष्पलताः सृष्टास्तदा प्राक् शतपत्रिका ।
सृष्टा तेन च पुण्या सा श्राद्धकर्मणि सर्वदा ॥
शाकानि सृजता पूर्वं कालशाकः स्वयम्भुवा ।
असृज्यत ततः श्राद्धे स स्यादक्षयकारकः ॥
धातूंश्च सृजता पूर्वं रूप्यं सृष्टं स्वयम्भुवा ।
तेन तद्विहितं श्राद्धे दक्षिणार्थं द्विजोत्तमाः ॥
राजतानि च पात्राणि पितृणां प्रीतये ततः ।
रसांश्च सृजता पूर्वं मधु सृष्टं स्वयम्भुवा ॥
तेन तच्छस्यते श्राद्धे पितृणां तुष्टिदायकम् ।
यच्छ्राद्धं मधुना हीनं तद्रसैः सकलैरपि ॥
मिष्टान्नैरपि संयुक्तं पितृणान्नैव तृप्तये ।
अणुमात्रमपि श्राद्धे यदि न स्याच्च माक्षिकम् ॥
नामापि कीर्त्तनीयं स्यात् पितृणां प्रीतये ततः ।
वीरुधः सृजता तेन दर्भाः सृष्टाः पुरा नृप ॥
तेन ते मेध्यतां प्राप्ता विशेषात् श्राद्धकर्मणि ।
पात्राणि सृजता तेन विधिना नृपसत्तम ॥
योगिनः प्रथमं सृष्टाः श्राद्धार्हास्तेन ते स्मृताः ।
पशून् वै सृजता तेन पूर्वं गावो विनिर्मिताः ॥
तेन तासां पयः शस्तं श्राद्धे सर्पिर्विशेषतः ।
प्रजा वै सृजता तेन पूर्वं सृष्टा द्विजोत्तमाः ।
तेन तैस्तर्पितैः श्राद्धे पितृतृप्तिः प्रजायते ॥
देवांश्च सृजता तेन विश्वेदेवाः पुरा कृताः ।
तेन ते प्रथमं पूज्याः प्रवृत्ते श्राद्धकर्मणि ॥
एतैर्मुख्यतमैः सृष्टैः पुरा श्राद्धं विनिर्मितम् ।
स्वयं पितामहेनैव ततो देवा विनिर्मिताः ॥

तेन ते पूर्वलोकेषु गताः ख्यातिं परां नृप।
एतत् श्राद्धस्य सर्वस्वं मया ते परिकीर्त्तितम्॥
पितॄणां परमं गुह्यं दत्तस्याक्षयकारकम्।
यश्चैतत्कीर्त्तयेत् श्राद्धे क्रियमाणे नृपोत्तम॥
विप्राणां भोक्तुकामानां तच्छ्राद्धं चाक्षयं भवेत्।
यश्चैतच्छृणुयाद्राजन् सम्यक् श्रद्धासमन्वितः॥
विहितस्य भवेत्पुण्यं श्राद्धस्य तदवाप्नुयात्॥

इति व्रीह्यादिद्रव्योत्पत्तिः।

अथ ग्राह्याणि धान्यानि निरूप्यन्ते।

मनुः।

हविर्यच्चिररात्राय यच्चानन्त्याय कल्प्यते।
पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः॥

चिररात्रशब्दो दीर्घकालवचनः। यच्चानन्त्याय केनचिद्धविषा दीर्घकाला तृप्तिर्जायते, केनचिदनन्तैव तदुभयं ब्रवीमीति प्रणिधानार्थमुच्यते। कल्प्यते प्रीतय-इत्यध्याहार्य्यम्।

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन च।
दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणाम्॥

तिलादिग्रहणं नेतरधान्यपरिसङ्ख्यानार्थम्। किन्तु पात्राणां फलविशेषप्रदर्शनार्थम्।

कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्वशः॥

'कालशाकं' कालिकाशाकम्। 'महाशल्काः' शल्यका उच्यन्ते। अन्ये तु मत्स्यान् शल्कानाहुः। 'खड्गः' गण्डकः। 'लोहः' 'कृष्णछागः' सर्व्वरक्तो वा। 'कृष्णछागस्तथा रक्त आनन्त्यायैव कल्प्यते' इति स्मरणात्। लोहशब्दो वर्णलक्षणतया तद्गुणयुक्ते छागे वर्तते। 'कृष्णायसे च ताम्रे च लोहशब्दः प्रयुज्यते' इत्यभिधानात्। यद्यपि चैष वर्णो मेषादिष्वपि सम्भवति तथापि स्मृत्यन्तरप्रसिद्धः छाग एव गृह्यत इति। अन्ये तु शकुनिर्लोहपृष्ठनामा देवदत्तो दत्त इतिवदुच्यत इत्याहुः। 'मधु' माक्षिकम्। 'मुनयः' वानप्रस्था, तेषां 'अन्नानि' नीवारादीनि।

तथा।

मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम्।
अक्षारलवणञ्चैव प्रकृत्या हविरुच्यते॥

'पयः' क्षीरं, अत्रास्य विकारा अपि दध्यादयो गृह्यन्ते। स्मृतिसदाचारानुसारात्। 'सोमः' ओषधिविशेषः। 'अनुपस्कृतं' अविकृतम्। अप्रशस्तविकाररहितं, अप्रतिषिद्धञ्च। 'अक्षारलवणं' क्षारमृतिकाकृतलवणादन्यल्लवणम्। क्षारश्च

लवणश्चेति द्वन्द्वगर्भे हि नञ्समासे वृत्तिद्वयमाश्रयणीयं प्रतिपदश्च नञ्सम्बन्ध इत्येतद्गौरवं स्यात्। 'प्रकृत्या हविः' इत्येतदनाश्रितविशेषासु हविष्येण वर्त्तते, हविषा प्रातराशंभुङ्क्ते इत्याद्यासु सामान्यचोदनासु विज्ञेयम्।

आह प्रचेताः।

कृष्णमाषास्तिलाश्चैव श्रेष्ठाः स्युर्नवशालयः।
महायवा व्रीहियवास्तथैव च मधूलिकाः॥
कृष्णाः श्वेताश्च लोहाश्च ग्राह्याः स्युः श्राद्धकर्म्मणि।

'श्वेताः' शिरशूकाः, महायवा व्रीहियवाश्च यवविशेषाः। 'मधूलिकाः' यावनालविशेषः। अस्यैव विशेषणं कृष्णाः श्वेताश्च लोहाश्चेति। 'लोहाः' लोहिताः। शालिविशेषो वा 'मधूलिकाः'।

अत्रिरपि।

अगोधूमञ्च यच्छ्राद्धं कृतमप्यकृतं भवेत्।

ब्रह्मपुराणे।

यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा।
सन्तर्पयेत् पितॄन् मुद्गैः श्यामाकैः सर्षपद्रवैः॥
नीवारैश्च तथा माषैः प्रियङ्गुभिरथार्चयेत्।

'चणकः' हरिमन्थकः, महाराष्ट्रदेशेऽश्वाहारत्वेन प्रसिद्धः। 'सर्षपाः' गौरसर्षपाः।

मार्कण्डेयपुराणे।

राजश्यामाकश्यामाकौ तद्वच्चैव प्रशान्तिका।
नीवाराः पौष्कराश्चैव षण्मासं पितृतृप्तये॥
यवमाषौ सगोधूमौ तिलमुद्गाः ससर्षपाः।
प्रियङ्गवः कोविदारा निष्पावाश्चात्र शोभनाः॥

'प्रशान्तिका' मध्यदेशे प्रसिद्धो धान्यविशेषः। 'पौष्कराः' पद्मवीजानि। 'निष्पावाः' वल्लाः।

ब्रह्मवैवर्त्ते।

प्रशान्तिका प्रियङ्गुश्च ग्राह्या स्याच्छ्राद्धकर्मणि।
एतान्यपि समानानि श्यामाकानाङ्गुणैस्तु तैः॥

कूर्म्मपुराणे।

व्रीहिभिश्च यवैर्माषैरद्भिर्मूलफलेन वा।
श्यामाकैश्चणकैः शाकैर्नीवारैश्च प्रियङ्गुभिः।
गोधूमैश्च तिलैर्मुद्गैर्मासम्प्रीणयते पितॄन्॥

व्यासः।

हवींषि श्राद्धकाले तु यानि श्राद्धविदो विदुः।
तानि मे शृणु काम्यानि फलञ्चैषां युधिष्ठिर॥

बर्द्धमानतिलं श्राद्धमक्षयं मनुरब्रवीत् ।
सर्व्वेष्वेव तु भोज्येषु तिलाः प्राधान्यतः स्मृताः ॥

'बर्द्धमानतिलं' तिलबहुलम् ।

विष्णुधर्म्मोत्तरे ।

गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि ।
श्राद्धेषु दत्तैः प्रीयन्ते मासमेकं पितामहाः ॥

'सतीनाः' कलायाः । कलायस्तु सतीनक इत्यभिधानात् ।

इति ग्राह्याणि धान्यानि ।

अथ वर्ज्याणि धान्यानि ।

तत्र वायुपुराणे ।

अकृताग्रयणं धान्यजातं वै परिपाटलाः ।
राजमाषानणूंश्चैव मसूरांश्च विवर्जयेत् ॥

नवान्ननिष्पत्तावाहिताग्नेरिष्टिविशेषः 'आग्रयणम्' । अनाहिताग्नेस्तु नवान्नेन 'आग्रयणम्' ।

तदुक्तं वायुपुराणे ।

श्यामाकैरिक्षुभिश्चैव पितॄणां सार्व्वकामिकम् ।
कुर्य्यादाग्रयणं यस्तु स शीघ्रं सिद्धिमाप्नुयादिति ॥

'धान्यजातं' विहितं धान्यमात्रम् । 'परिपाटलाः' प्रादेशमात्राः । शिम्बिसम्बन्धि-नीलसान्द्रापरनामधेयाः 'राजमाषाः' । 'अणवः' व्याख्याताः । 'मसूरः' मङ्गल्य-काख्यश्चिपिटाकृतिः शिम्बिधान्यविशेषः ।

षट्त्रिंशन्मते ।

कृष्णधान्यानि सर्व्वाणि वर्जयेच्छ्राद्धकर्मणि ।
न वर्जयेत्तिलांश्चैव मुद्गान् माषांस्तथैव च ॥

अत्र तिलमुद्गमाषाणामवर्जनमुच्यमानं न तज्जातिमात्रेण सम्बध्यते, किन्तु कृष्णवर्णवतैव । प्रसक्ते हि वर्जने तन्निषेधो वक्तव्यः । वर्जनप्रसक्तिश्च कृष्णानामेव । कृष्णधान्यवर्जनेन सहैकवाक्यतापन्नत्वाच्चार्थस्य प्रतिप्रसवस्थ कृष्णैकविषयत्वम् । कृष्णेतराणान्तु तिलमुद्गमाषाणां न विधिर्न निषेधः । यस्तु स्मृतिचन्द्रिकाकारेण भरद्वाजवचने मुद्गमाषयोः सामान्यतो निषेधो दर्शितः, 'मुद्गाढकीमाषवर्जं विदलानि दद्यात्' इति । स तु नञभावभ्रान्तिमूलकः । अन्यथा सर्व्वस्मृतिपुराण-निषिद्धानां कुलत्थमसूरादीनां ग्राह्यत्वमापद्येत । दृश्यते च महार्णवादिषु नञ्युक्त एव पाठः, "मुद्गाढकीमाषवर्जं विदलानि न दद्यात्" इति ।

"आढकी" तूवरीशब्दवाच्यः शिम्बिधान्यविशेषः । "मुद्गमाषौ" प्रसिद्धौ । भ्रमत्पाषाणयन्त्रगर्भसंभृतानि धान्यानि प्रायशो द्विधा भिद्यन्ते, तानि विदलानि

मसूरप्रभृतीनि। अस्मिंश्च ग्राह्यवर्ज्यधान्यप्रकरणे यश्चणकाढकीनिष्पावादीनां विधिर्दृश्यते स कृष्णेतरविषयः। यश्च निषेधः स कृष्णविषय इति पूर्व्वप्रदर्शितकृष्णधान्यवर्जनवचनवशाद्व्यवस्थापनीयम्। विहितप्रतिषिद्धन्यायाद्विकल्पो वा वक्तव्यः।

आह सुमन्तुः।

"बीजपूरकमाषञ्च न श्राद्धे दद्यात्" इति। 'बीजपूरकं' मातुलुङ्गम्। महार्णवे हारितवचनपाठः।

"पालङ्क्या-नालिका-पोतीक-शिग्रु-सृसुक-वार्त्ताक-भूस्तृण-माष-मसूर-कृतलवणानि च श्राद्धे न दद्यात्"।

शङ्खधरे पाठान्तरम्।

"पालङ्क्या-पोतका-नालिका-सृसुक-निष्पाव-मसूर-चणकादि श्राद्धे न दद्यात्" इति।

पालङ्क्यादीनां व्याख्यानं शाकप्रकरणे करिष्यते। 'कृतलवणं' क्षारमृत्तिकयाकृतं लवणम्। अत्र माषाः कृष्णमाषेतरे राजमाषशब्दवाच्याः। ते हि "वर्ज्या-मर्कटकाः श्राद्धे राजमाषास्तथैव च" इत्यादिवचनैर्निषिद्धाः।

ननु ये राजमाषशब्दवाच्यास्ते कथं केवलमाषशब्देन प्रत्येतव्याः, न हि द्विजराजशब्दाभिधेयं केवलेन द्विजशब्देन प्रत्याययितुं शक्यते। विशेषेषु सामान्यस्य विद्यमानत्वात् सामान्यशब्देन तत् प्रत्ययो न विरुध्यते। यथा शालिशब्देन लोहितशालि-महाशालि प्रत्ययः। यत्र तु तद्विशेषावच्छेद्यसामान्यवाचकत्वाभावो न तत्र तेन पथा प्रत्ययः। अपि च वाचकशब्दैकदेशा अपि वाचका दृश्यन्ते। यथा मातुलुङ्गोलुङ्ग इति।

चतुर्विंशतिमते।

> कोद्रवा राजमाषाश्च कुलत्था वरकास्तथा।
> निष्पावाश्च विशेषेण पञ्चैतांस्तु विवर्जयेत्॥
> यावनालानपि तथा वर्जयन्ति विपश्चितः।

'कुलत्थाः' मुद्गवत् सूपव्यूषाद्यनेकोपकारकारित्वेन शिम्बिधान्यविवेषरूपाः प्रसिद्धाः। ते च श्वेताः कृष्णाश्च द्विविधा अपि वर्जनीयाः। कृष्णमुद्गादिवत् प्रतिप्रसवाभावात्। 'वरकाः' वनमुद्गाः। 'यावनालाः' जोन्थलाः। ते च मधूलिकाख्यजोन्थलव्यतिरिक्ता एव वर्ज्याः। मधूलिका शब्दं शालिभेदवचनं वा वर्णयन्ति। तन्मते सर्व एव यावनालाः वर्जनीयाः।

आह निगमः।

> यावनालानपि तथा वर्जयन्ति विपश्चितः।
> तैलमप्यापदि प्राज्ञाः संप्रयच्छन्ति याज्ञिकाः॥

तैलमपि विपश्चितो वर्जयन्तीत्यन्वयः। आपदि तूभयोरप्यभ्यनुज्ञानार्थमाह। "आपदि प्राज्ञाः संप्रच्छन्ति याज्ञिकाः"। इति तस्मादन्यवस्त्वभावे आभ्यामपि श्राद्धं कर्तव्यमेवेत्यत्र तात्पर्यम्। न प्राप्तस्य विलोपोऽस्ति पैतृकस्य विशेषत इति वचनात्।

षट्त्रिंशन्मते।

वर्ज्या मर्कटकाः श्राद्धे राजमाषास्तथैव च।
विप्रुषीका मसूराश्च श्राद्धकर्मणि गर्हिताः॥

'मर्कटकाः' लङ्काः। 'विप्रुषीकाः' शालिभेदाः।

कात्यायनः।

श्राद्धे न देयाः पालङ्क्या निष्पावाः सहकोद्रवाः।
मसूर--क्षार--वार्त्ताक--कुलत्थ---शण—शिग्रवः॥

'क्षारः' यवक्षारादिः। 'वार्त्ताकं' कण्टकारिकाफलात् किञ्चिदधिकपरिमाणं तदाकृतिक्षुद्रवार्त्ताकीसंज्ञकबृहतीफलम्। 'शणः' धान्यविशेषः। अस्य स्वयंजातस्य सर्वदा प्रतिषिद्धत्वादत्र प्राप्त्यसम्भवेऽपि कृष्यादिजातस्य प्राप्तिसम्भवात्। शिग्रोरपि रक्तपुष्पस्य सर्वदा निषिद्धत्वेनात्र प्राप्त्यभावेऽपि श्वेतपुष्पस्य पत्रशाकत्वेन प्राप्तिरस्तीति प्रतिषेधोऽर्थवान्। अथवा पुरुषार्थे प्रतिषेधे कृतेऽपि श्राद्धवैगुण्यपरिहारार्थं पुनः प्रतिषेधः।

आह मरीचिः।

कुलत्थाश्चणकाः श्राद्धे न देयाश्चैव कोद्रवाः।
कटुकानि च सर्वाणि विरसानि तथैव च॥

'कटुकानि' पिप्पल्यादीनि।

वर्जयेदित्यनुवृत्तौ विष्णुस्मृतिः।

राजमाष-मसूर-पर्युषितकृतलवणानि च।

'पर्युषितं' मोदकादिवर्ज्यम्।

शङ्खः।

राजमाषान्मसूरांश्च कोद्रवान् कोरदूषकान्।
लोहितान् वृक्षनिर्यासान् श्राद्धकर्मणि वर्जयेत्॥

अत्र 'कोरदूषकः' वनकोद्रवः।

महाभारते।

अश्राद्धेयानि धान्यानि कोद्रवाः पुलकास्तथा।

'कोद्रवाः' कोरदूषकाः। 'पुलकाः' कोद्रवाद्यपेक्षया सूक्ष्माणि धान्यानि। स्यात् पुलाकः सूक्ष्मधान्य इत्यनुशासनात्। मध्याक्षरदीर्घाभावः पुराणे छान्दसः।

पद्मपुराणे।

दातॄणाञ्च प्रवक्ष्यामि श्राद्धे वर्ज्यानि नित्यशः।
मसूर—शण—निष्पाव—राजमाष—कुलत्थकः॥

कोद्रवोद्दाल—वरक—कुसुम्भ—मधुकातसी।
एतानि नैव देयानि पितॄणां प्रियमिच्छता॥

'मधुकं' ज्येष्ठीमधु। तच्छाकत्वेन शाकसंस्कारकद्रव्यत्वेन वा प्रसज्यमानं निषिध्यते। 'अतसी' उमासंज्ञिका तैलप्रकृतिभूतानामतिमसृणानां चिपिटाकृतीनां बीजानामुत्पादिका ओषधिः। सा शाकत्वेन तैलप्रकृतित्वेन वा प्रसक्ता सती निषिध्यते।

मत्स्यपुराणे।

द्रव्याणि संप्रवक्ष्यामि श्राद्धे वर्ज्यानि यानि च।
मसूर—शण—निष्पाव—राजमाष—कुसुम्भिकाः।
कोद्रवोद्दाल—वरक—कपित्थ—मधुकातसी॥

'कपित्थं' दधित्थं फलम्।

विष्णुपुराणे।

श्राद्धे न देयाः पालङ्क्यास्तथा निष्पाव—कोद्रवाः।
मसूर—क्षार—वार्ताक—कुलत्थ—शण—शिग्रवः॥

ब्रह्माण्डपुराणे।

सर्व्वश्राद्धेऽञ्जनं पुष्पं कुसुम्भं राजसर्षपाः।
तोवरी राजमाषञ्च कोद्रवं कोरदूषकम्॥
वर्ज्यञ्चापक्रियं सर्व्वं निशि यत्त्वाहृतं जलम्॥

'अञ्जनं पुष्पं' अञ्जनद्रुमकुसुमम्। 'तोवरी' तूवरी। 'अपक्रियं' अपगतस्वोचितक्रियम्। अपक्रियं चान्नं यथोचितक्रियाराहित्येन विनष्टप्रशस्तरसगन्धवर्णमिति यावत्।

मार्कण्डेयपुराणे।

वर्ज्याश्चाभिषवा नित्यं शतपुष्पं गवेधुकम्।

'अभिषवाः' सन्धानानि। 'शतपुष्पं' निशिः।

ब्रह्मपुराणे।

राजमाषानणूंश्चैव मसूरान् कोरदूषकान्।
विप्रुषान् मर्कटांश्चोरान् कोद्रवांश्चापि वर्जयेत्॥

'चोरः' चोरकः।

मार्कण्डेयपुराणे।

वर्ज्या मर्कटकाः श्राद्धे राजमाषास्तथाणवः।
विप्रूषिका मसूराश्च श्राद्धकर्मणि गर्हिताः॥

कूर्मपुराणे ।

आढकीं कोविदारांश्च पालङ्क्यां मरिचं तथा ।
वर्जयेत् सर्व्वयत्नेन श्राद्धकाले द्विजोत्तमः ॥

'कोविदारः' काञ्चनपुष्पम् । मरिचान्यार्द्राणि स्वतन्त्रशाकतया प्राप्तानि प्रतिषिध्यन्ते न तु शाकसंस्कारकद्रव्यत्वेन शुष्काणि ।

ब्रह्मवैवर्त्ते ।

राजमाषास्तथैवान्ये वर्ज्याः सद्भिः प्रयत्नतः ।
मसूराः शतपुष्पाश्च कुसुम्भं श्रीनिकेतनम् ॥
वर्ज्याश्चातियवा नित्यं तथा दुरालभा यवा ॥

'अतियवाः' शालिभेदाः । 'श्रीनिकेतनं' रक्तविल्वम् ।

देवलः ।

न वीजान्युपयुञ्जीत रोगापत्तिमृते बुधः ।
फलान्येषामनन्तानि वीजानां हि विनाशयेत् ॥

'रोगापत्तिमृते' रोगाद्यापदं विना 'नोपयुञ्जीत' न नियुञ्ज्यात् । उपयुञ्जानो हि तज्जन्यां भूयसीं शस्यसमृद्धिं नाशयेत् ।

इति वर्ज्यानि धान्यानि ।

अथ ग्राह्याणि फलमूलानि ।

तत्र आह शङ्खः ।

आम्रान् पालेवतानिक्षून्मृद्वीका-भव्य-दाडिमान् ।
विदार्यांश्च भरुण्डांश्च श्राद्धकाले प्रदापयेत् ।
दद्यात् श्राद्धे प्रयत्नेन शृङ्गाट-विस-केवुकान् ॥

'आम्राः' चूतफलानि । 'पालेवतं' जम्बीराकारं फलं काश्मीरेषु प्रसिद्धम् । 'मृद्वीका' द्राक्षा । 'भव्यं' कर्मरङ्गम् । 'विदार्यान्' भूकूष्माण्डीकन्दान् । कृष्णकूष्माण्ड्याः फलानि वा । 'भरुण्डाः' काश्मीरदेशे प्रसिद्धाः । 'शृङ्गाटकं' जलजं त्रिकटम् । "शृङ्गाटो जलकन्दः स्यात् त्रिकोणस्त्रिकटस्त्रिकः" इति मदननिघन्दुः । 'बिसं' पद्मिनीमूलम् । 'केवुकं' आर्द्रकसदृशः कन्दः महाराष्ट्रदेशे प्रसिद्धः । केवुकस्य निषेधस्त्वारण्यककेवुकविषयो वर्णनीयः ।

ब्रह्मपुराणे ।

आम्रमाम्रातकं विल्वं दाडिमं बीजपूरकम् ।
चीणाकं लकुचं जम्बु भव्यं भूतं तथारुकम् ॥
प्राचीनामलकं क्षीरं नारिकेलं परूषकम् ।
नारङ्गञ्च सखर्जूरं द्राक्षा नीलकपित्थकम् ॥
पटोलञ्च प्रियालञ्च कर्कन्धु वदराणि च ।

वैकङ्कतं वत्सकञ्च एर्वारुर्व्वारुकानि च ।
एतानि फलजातीनि श्राद्धे देयानि यत्नतः ॥

'आम्रातकं' कपीतस्य फलम् । 'विल्वं' बालश्रीफलम् । 'चीणाकं' अतिदीर्घाकारमेर्वारुकसदृशम् । 'लकुचं' लिकुचस्य फलं एलावनेषु प्रसिद्धम् । 'जम्बु' राजजम्बूफलम् । 'भूतं' वहिःकेसरावृतं फलं कर्णाटदेशे प्रसिद्धम् । 'आरुकं' आरण्यैर्व्वारुकम् । 'प्राचीनामलकं' पानीयामलकम् । 'क्षीरं' राजादनफलम् । 'नारिकेलं' प्रसिद्धम् । 'परूषकं' कुङ्कणे प्रसिद्धम् । नारङ्गादीनि प्रसिद्धानि । 'नीलकपित्थकं' हरितवर्णं दधित्थस्य फलम् । 'पटोलं' स्वादु पटोलीफलम् । 'प्रियालं' चारवृक्षस्य फलम् । 'कर्कन्धुः' आरण्यबदरीफलम् । 'वैकङ्कतं स्रुवद्रुमस्य फलम् । 'वत्सकं' कुटजस्य फलम् । 'एर्वारुः' स्वादुकर्कटी । 'वारुकानि' वारुकीफलानि । 'फलजातीनि' फलत्वजातियुक्तानीत्यर्थः । यत्नत इति वचनमेषामन्येभ्यो विशिष्टतां गमयन्ति न त्वन्यनिवृत्त्यर्थम् । अत एषामलाभेऽपि भोज्यवैचित्र्यार्थमन्येषामपि फलानां नित्यनिषेधवचनैरनिषिद्धानां श्राद्धे देयत्वमभ्यनुज्ञातं भवति ।

तथा ।

कालशाकं तन्दुलीयं वास्तुकं मूलकं तथा ।
शाकमारण्यकं चैव दद्यात् पुष्पाण्यमूनि च ॥

'तन्दुलीयः' अल्पमारिषः । 'वास्तुकं' कण्टवास्तुकम् । मूलकशब्देन दीर्घमूलकं ग्राह्यम् । पिण्डमूलकस्य निषिद्धत्वात् । 'आरण्यकशाकानि' फञ्जीचुञ्चुप्रभृतीनि । अमूनीति वक्ष्यमाणाभिप्रायेण ।

तथा ।

दाडिमं मागधी चैव नागरार्द्रकतिन्तिडीः ।
आम्रातकं जीरकञ्च कुम्बरञ्च नियोजयेत्[1] ॥

'मागधी' पिप्पली । 'नागरं' शुण्ठी । 'आर्द्रकं' शृङ्गवेरम् । 'तिन्तिड़ी' चिञ्चा । 'जीरकं' गौरजीरकम् । 'कुम्बरं' कुस्तुम्बरम् ।

कूर्मपुराणे ।

विल्वामलकमृद्वीकम्पनसाम्रातदाडिमम् ।
भव्यं पारावताक्षोटखर्जूराम्रफलानि च ॥
कसेरुः कोविदारञ्च तालकन्दस्तथा विसम् ।
तमालं शतकन्दश्च मध्वालुः शीतकन्दली ॥
कालेयं कालशाकञ्च सुनिषणः सुवर्चला ।
मांसं शाकं दधि क्षीरं चुञ्चुर्वैत्राङ्कुरस्तथा ॥
कट्फलं कौङ्कणी द्राक्षा लकुचम्मोचमेव च ।
उष्ट्रगीवं कचोरश्च तिन्दुकं मधुसाह्वयम् ॥

---

[1] कुम्बरं प्रतियोजयेदिति ।

वैकङ्कतं नारिकेलं शृङ्गाटकपरूषकम् ।
पिप्पली मरिचश्चैव पटोलं वृहतीफलम् ॥
सुगन्धगन्धि सिञ्चन्ती कलायाः सर्व एव च ।
एवमादीनि चान्यानि स्वादूनि मधुराणि च ॥
नागरञ्चात्र वै देयं दीर्घमूलकमेव च ।

'आमलकं' धात्रीफलम् । 'पनसं' कण्टकिफलस्य फलम् । 'पारावतं' पालेवतम् । 'आखोटं' द्वीपान्तरीयपीलुफलं 'आखरोट' इति प्रसिद्धम् । 'कसेरुः' पल्वलेषु रोमशः कन्दः सेरुनाम्ना प्रसिद्धः । 'कोविदारं' काञ्चनारस्य तत्सदृशस्य वा वृक्षविशेषस्य कोमलावस्थं फलं पुष्पं वा । कोविदारस्य निषेधोऽपि वक्ष्यते, अतो विकल्पः । 'तालकन्दः' भूम्यन्तर्निहिततालफलप्रभवमारब्धफलाकारं पाण्ड्यदेशादौ प्रसिद्धं मूलम् । तालमूलीकन्दो वा 'तालकन्दः' । 'तमालं' तापिञ्जम् । 'शतकन्दं' शतावरी । 'मध्वालुः' दीर्घरोमा मधुरैकरसः कन्दविशेषः मोहालुरिति प्रसिद्धः । 'शीतकन्दली' शीतकन्दः, शालूकमिति यावत् । 'कालेयं' करालाख्यं शाकमिति गोविन्दराजः । 'सुनिषणः' चाङ्गेरिसदृशो जलप्रभवः शाकविशेषः । सुणसुणेति प्रसिद्धः । 'सुवर्चला' आदित्यभक्ता । 'चूञ्चुः' चूचुरिति प्रसिद्धः । 'कट्फलं' कट्फलाख्यस्य वृक्षस्य फलम् । 'कौङ्कणीद्राक्षा' कुङ्कणदेशप्रभवा । उपलक्षणञ्चैतत् स्वादुरसाया द्राक्षायाः । 'मोचं' कदलीफलम् । 'उष्ट्रग्रीवं' उष्ट्रग्रीवाकृतिफलमुत्तरापथे प्रसिद्धम् । 'तिन्दुकं' सीतिसारकस्य फलम् । 'मधुसाह्वयं' ज्येष्ठीमधु । 'वृहतीफलं' कण्टकारिकाफलम् । 'सुगन्धगन्धि' कर्पूरकचोरकः, पिण्डालुकसदृशः चौरितपर्णः सोधीति लाटदेशे प्रसिद्धः कन्दविशेष इत्यपरे । 'सिञ्चन्ती' रुदन्ती । 'दीर्घमूलकं' पिण्डकादन्यन्मूलकम् ।
वायुपुराणे ।

विल्वामलकमृद्वीकमित्यादिकूर्मपुराणसदृशं पठित्वैतावान् विशेषो दर्शितः ।

अगस्त्यस्य शिखास्ताम्राः कषायाः सर्व एव च ।
सुगन्धि मत्स्यं मांसञ्च कलायाः सर्व एव च ॥

'अगस्त्यः' मुनिद्रुमः, तस्य 'शिखाः' किशलयानि । 'ताम्राः' लोहिताः । 'कषायाः' कषायरसाः । अन्याः अपि चूतादिवृक्षाणां शिखाः ।

प्रभासखण्डे ।

विल्वामलकमृद्वीकं द्राक्षा चाम्रातदाडिमम् ।
भव्यं पारेवतञ्चैव खर्जूराम्रफलानि च ॥
कसेरुका वदर्य्यश्च तालकन्दस्तथा विसम् ।
तमालं शतकन्दञ्च मध्वालुः शीतकन्दली ॥
कालेयं कालशाकञ्च मुद्गान्नञ्च सुवर्चलम् ।
मांसं शाकं दधि क्षीरं चोरं वेत्राङ्कुरास्तथा ॥
कट्फलं कतकं द्राक्षा लकुचं मोचमेव च ।
प्रियालामलचुक्रीकास्तिन्दुकं मधुसाह्वयम् ॥

विकङ्कतं नारिकेलं शृङ्गाटकपरूषकम्।
पिप्पली मरिचञ्चैव पटोलं बृहतीफलम्॥
आरामस्य तु सीमन्ताः कलायाः सर्व एव तु।
एवमादीनि चान्यानि शस्तानि श्राद्धकर्मणि॥

'कतकं' जलप्रसादनम्। 'चुक्रीका' चाङ्गेरी चिञ्चा वा। 'आरामस्य' उद्यानस्य 'सीमन्ताः' नवपल्लवानि।

इति ग्राह्याणि फलमूलादीनि।

अथ वर्ज्यानि फलमूलादीनि।

वायुपुराणे।

वर्जनीयानि वक्ष्यामि श्राद्धकर्मणि नित्यशः।
लशुनं गृञ्जनञ्चैव पलाण्डुं पिण्डमूलकम्॥
कलम्बा यानि चान्यानि हीनानि रसगन्धतः।
श्राद्धकर्मणि वर्ज्यानि कारणञ्चात्र वक्ष्यते॥
पुरा देवासुरे युद्धे निर्जितस्य बलेः सुरैः।
ब्राह्मणेभ्यो विस्फुरन्तः पतितास्तोयविन्दवः॥
तत एतानि जातानि वर्ज्यानि श्राद्धकर्मणि।
पिप्पली मरिचञ्चैव पटोलं बृहतीफलम्॥
वांशं करीरं सुरसमर्जकं भूतृणानि च।
अवेदोक्ताश्च निर्यासा लवणान्यूषराणि च॥
श्राद्धकर्मणि वर्ज्यानि याश्च नार्य्यो रजस्वलाः।

'लशुन-गृञ्जन-पलाण्डवः' पलाण्डुभेदाः। एतच्च भेदत्रयं सर्वेषामपि पलाण्डु-भेदानामुपलक्षणार्थम्। ते च भेदाः सुश्रुते दर्शिताः।

लशुनं दीर्घपत्रश्च पिच्छगन्धा महौषधम्।
करण्यश्च पलाण्डुश्च लतार्कश्च परारिका।
गृञ्जनो यवनेष्टश्च पलाण्डोर्दश जातय इति॥

पलाण्डुशब्दश्चैतद्विशेषदशकव्यापके सामान्ये वर्तते। विशेषे चैकस्मिन् उभयत्र प्रयोगात्। तत्र हरिद्रक्तवर्णः 'गृञ्जनः'। श्वेतकन्दः 'पलाण्डुः'। लशुनादीनां तु भेदका धर्मा वैद्यकादौ द्रष्टव्याः। पिण्डाकृतिमूलं 'पिण्डमूलकम्'। 'कलम्बा' वेणुपत्राकृतिपत्रो जलजः शाकभेदः कटुफला तुम्बी वा। पिप्पल्यः आर्द्राः स्वतन्त्र-शाकतया प्रतिषिध्यन्ते। शुष्काणां तु संस्कारकत्वेनाभिमतत्वात्। पटोलं आरण्यपटो-लस्य फलं न लता। लतायां हि पटोलस्तिह्लकः कटुरिति पटोलशब्दस्य लिङ्गानुशासने पुलिङ्गतया प्रयोगात्। बृहतीफलं क्षुद्रवार्त्ताकी फलम्। 'वांशः करीरः' वंशाङ्कुरः। 'सुरसं' निर्गुण्डीपत्रम्। 'अर्जकं' श्वेतकुठेरकपत्रम। 'भूतृणः' भूतीकसंज्ञकः शाकविशेषः। स च काश्मीरेषु प्रसिद्ध इत्येके। कलम्बीकेत्यपरे। स्मृतिचन्द्रिका-कारेण त्वेवमुपलक्षितः। यस्य नाले ग्रन्थिस्थाने परिमण्डलावयवा भवन्ति स भूतृण-

इति । अस्य च मालातृणकभूस्तृणौ इत्यभिधानकोशे वक्ष्यमाणासु च स्मृतिषु सुडागमसहितस्यैव प्रयोगो दृश्यते । अतस्तद्रहितस्यात्र प्रयोगः छान्दसः ।

'अवेदोक्ताश्च निर्यासा' इति । वेदे भक्ष्यत्वेनाभ्यनुज्ञातेभ्योऽन्ये वृक्षनिर्यासा लोहितवर्णा व्रश्चनप्रभवाश्च निर्यासा इति यावत् ।

अथो खलु य एव लोहितो यो व्रश्चनान्निर्वेषति तस्य नाश्यं काममन्यस्येति तैत्तिरीयश्रुतेः । 'व्रश्चनं' छेदः । तस्माल्लोहितवर्णादन्योऽपि वृक्षादीनां रसो निर्याति, यो वा व्रश्चनमन्तरेण लोहितवर्णो निर्याति तस्य रसस्यैकदेशोऽपि न भक्षणीयः । अन्यस्य तु कामं यथेष्टं भक्षणीयः । लवणानि क्षारमृत्तिकाकृतानि कृष्णानि विटसंज्ञकानि प्रत्यक्षाणि चात्र निषिध्यन्ते । स्मृत्यन्तरेष्वेतेषामामेव निषिद्धत्वात् । तत्र प्रत्यक्षाणां निषेधं विष्णुराह ।

न प्रत्यक्षं लवणं दद्यादिति ।

कृष्णकृत्रिमविटानां तु निषेधः पुरस्ताद्दर्शयिष्यते । अतो न सामुद्रादीनामप्रत्यक्षाणां निषेधः । तथा च देयमित्यनुवृत्तौ ब्रह्मपुराणे ।

गव्यं पयो दधि घृतं तैलञ्च तिलसम्भवम् ।
सैन्धवं लवणञ्चैव तथा मानससम्भवम् ।
पवित्रे परमे ह्येते प्रत्यक्षे अपि नित्यश इति ॥

'सैन्धवं' सागरोत्थम् । सैन्धवमानससम्भवयोस्तु प्रत्यक्षयोरप्यनिषेधः ।

तथा च ब्रह्मपुराणे ।

शाकसंस्कारमरिचपिप्पलीवर्जं शुण्ठीवर्जञ्च कटुरसानि द्रव्याणि । लवणान्यौषराणि चेत्यस्मिंस्तु पाके ऊषरमृत्तिकया कृतानि लवणानीति ।

'रजस्वलाः' त्रिरात्राद्यनन्तरमप्यनिवृत्तरजस्काः इति ।

आह विष्णुः ।

भूतृण–शिग्रु–सर्षप–कूष्माण्डालावु–वार्त्ताक–पालङ्क्या–तन्दुलीयक–कुसुम्भ–महिषीक्षीराणि वर्जयेदिति ।

'शिग्रुः' सोभाञ्जनकः । तस्य रक्तपुष्पस्य सर्वदा निषिद्धत्वेनात्र प्राप्त्यभावेऽपि श्वेतपुष्पस्य पत्रशाकत्वेन प्राप्तिरस्तीति प्रतिषेधोऽर्थवान् । सर्षपश्च राजसर्षपो विवक्षितो न तु सर्षपमात्रं, कुसुम्भं राजसर्षप इति स्मृत्यन्तरे विशेषप्रतिषेधात् । तस्य च शेषाभ्यनुज्ञार्थत्वात् । अतः सामान्यवचनं सर्षपविशेषे सङ्कोच्यम् । सामान्यानि हि विशेषं प्रति साकाङ्क्षाणि विशेषमनुरुन्धन्ति । न तूपलक्षणीभूय विशेषः सामान्यानुसारी भवति । सामान्यापेक्षया विशेषस्य बलीयस्त्वात् । अन्यथैकस्मिन्नपि वाक्ये सामान्यशब्दोविशेषमुपलक्षणीकृत्य शब्दविशेषव्यवहारं हन्यात् । को ह्येकवाक्यगतस्य वाक्यान्तरगतस्य वा विशेषशब्दस्यास्ति विशेषः । यदि तु स्याद्विशेषः तर्हि चतुर्द्धाकरणं नाग्नेयपुरोडाश उपसंह्रियेत । अतः सर्षपोऽत्र राजसर्षप एव । अतश्च गौरसर्षपो ग्राह्य एव । 'कूष्माण्डं' कर्कारु । 'अलावु' तुम्बिनीफलम् । तच्च वर्तुलमेव वर्ज्यम् ।

अलावु वर्तुलञ्चेति वचनान्तरे विशेषदर्शनात्। 'वार्त्ताकं' क्षुद्रवार्त्ताकीफलम्। 'पालङ्क्या' मुकुन्दाख्यो गन्धद्रव्यविशेषः। 'कुसुम्भं' प्रसिद्धम्। कुसुम्भस्य चाकण्टकिनो नित्यनिषिद्धत्वात्, कण्टकिनोऽपि कोमलावस्थस्य शाकत्वसम्भवान्निवृत्यर्थः प्रतिषेधः।

विष्णुवचने पाठान्तरम्।

पिप्पली-सृसुक--भूतृणासुरी-सर्षप-सुरस-कूष्माण्डालावु-वार्त्ताक-पालङ्क्या तन्दुलीयक-कुसुम्भ-पिण्डमूल-महिषीक्षीराणि वर्जयेदिति।

'सृसुकं' खदिरशाकम्। 'आसुरी' राजसर्षपः। आसुरी चासौ सर्षपश्चेति वा विग्रहः। तथा च गौरसर्षपो न वर्ज्यः।

हारीतोऽप्याह।

पालङ्क्या-नालिका-पौतीक-शिग्रु-सृसुक-वार्त्ताक-भूस्तृण--कफेल्ल-माष--मसूर-कृतलवणानि च श्राद्धे न दद्यादिति।

नालिका नाम दीर्घनाला शिरोभागावस्थितस्वल्पपल्लवा जलाशयोद्भवा शाकत्वेन प्रसिद्धनालदला वल्लिः। 'पौतीकं' पौतिक आपादकेतिपर्यायाभिधेयं शाकम्। 'कफेल्लः' 'आरण्यविशेषः' काश्मीरेषु प्रसिद्ध इति हारीतस्मृतिभाष्यकारः। 'कृतलवणानि' कृत्रिमलवणानि।

आह शङ्खः।

> भूस्तृणं सुरसं शिग्रुः पालङ्क्या सृसुकं तथा।
> कूष्माण्डालावु-वार्त्ताक-कोविदारांश्च वर्जयेत्॥
> पिप्पलं मरिचञ्चैव तथा वै पिण्डमूलकम्।
> कृतञ्च लवणं सर्वं वंशाग्रञ्च विवर्जयेत्॥

'वंशाग्रं' वंशाङ्कुरः, न त्वग्रमात्रम्।

शाट्यायनोऽप्याह।

> मारिषं नालिका चैव रक्ता या च कलम्बिका।
> असुरान्नमिदं सर्वं पितॄणां नोपतिष्ठति॥

'मारिषः' जीवशाकसंज्ञकस्तन्दुलीयकसदृशस्तदपेक्षया स्थूलतरः शाकविशेषः। 'कलम्बिका' वेणुपत्राकृतिपल्लवा जलजैव, रक्तेतिविशेषणात् श्वेता न प्रनिषिध्यते।

मार्कण्डेयपुराणे।

> वर्ज्याश्चाभिषवा नित्यं शतपुष्पा गवेधुका।
> जम्बीरजं फलवर्ज्यं कोविदारञ्च नित्यशः॥

सर्षप-लवणादियुक्तेषु जल-तक्र-काञ्जिकाद्रवेषु निक्षिप्य त्रिपञ्चसप्ताहादिकालेनाम्लक्षारादिरसान्तरमप्युक्तम्। अतो विकल्पः। प्रशस्त जम्बूफलविषयो वा निषेधो वर्णनीयः। यस्य फलमूलाम्रादेरुपरि केनचित् क्षुतं कृतं तदवक्षुतमित्युच्यते, यस्योपरि

केनचिद्रोदनं कृतं तदवरुदितम्। उपलक्षणञ्चैतदपवित्रश्लेष्मादिसंसर्गोपादकानां निष्ठीवनादिक्रियाप्रसङ्गानाम्।

उशना अपि।

नालिका–शण–छत्राक–कुसुम्भालावु–विड्भवान्।
कुम्भी–कम्बुक–वृन्ताक–कोविदारांश्च वर्जयेत्॥
वर्जयेद्गृञ्जनं श्राद्धे काञ्जिकं पिण्डमूलकम्।
करञ्जं येऽपि चान्ये वै रसगन्धोत्कटास्तथा॥

'छत्राकं' शतपुष्पा, वर्षाकाले भूमौ वृक्षेषु वा समुद्भूतं छत्रमित्यपरे।

"भूमिजं वृक्षजं वापि छत्राकं भक्षयन्ति ये।
ब्रह्मघ्नांस्तान्विजानीयाद् ब्रह्मवादिषु गर्हितान्॥"

इति, यमस्मरणात्।

'विड्भवान्' विष्ठासंसर्गदूषितभूप्रदेशोद्भवान्। उपलक्षणञ्चैतदपवित्रभूप्रदेशसम्भवानाम्। 'कुम्भी' श्रीपर्णीका। 'कम्बुकं' वृत्ताकारमलावुफलम्। अलावुशब्दस्तु पत्रादेः शाकत्वप्रतिषेधार्थोऽस्तु। कम्बुकमित्यत्राम्बुकमिति पाठान्तरम्। 'वृन्ताकं' श्वेतवृन्ताकम्। 'गृञ्जनं' गाजर इति प्रसिद्धम्। 'काञ्जिकं' ख्यातम्। 'करञ्जं' नक्तमालफलम्। एवमन्येऽपि ये 'रसगन्धोत्कटाः' आहत्योग्ररसगन्धयुक्ताः तेऽपि वर्जनीयाः।

भारद्वाजः।

नक्तोद्धृतन्तु यत्तोयं पल्वलाम्बु तथैव च।
स्वल्पं तु कूष्माण्डफलं वज्रकन्दश्च पिप्पली॥
तन्दुलीयकशाकञ्च माहिष्यञ्च पयो दधि।
शैम्बिकानि करीराणि कोविदारं गवेधुकम्॥
कुलत्थ-शण-जीराणि करम्भाणि तथैव च।
अब्जादन्यद्रक्तपुष्पं शिग्रुः क्षारस्तथैव च॥
नीरसान्यपि सर्वाणि भोक्ष्य-भोज्यानि यानि च।
एतानि नैव देयानि सर्वस्मिन् श्राद्धकर्मणीति॥

'नक्तोद्धृतं' रात्रौ जलाशयात् उद्धृतं पृथक्कृतम्। 'पल्वलाम्बु' ग्रामे वा अरण्ये वा स्वल्पतरनिम्नावटद्रोण्यादिसम्भृतं जलम्। पल्वलाम्बुनो विशेषणं स्वल्पमिति एकस्या अपि गोस्तृप्तेरपर्याप्तम्। 'वज्रकन्दः' आरण्यसूरणः। माहिषमिति पयोदधिविशेषणान्माहिषमात्रं पयोदधि वर्ज्यमिति गम्यते। मसूरं कृष्णाढकी, कृष्णनिष्पावं, कृष्णचणकं, कृष्णेतरमाष-कृष्णेतरमुद्गादीनि शिम्बिधान्यानि शैम्बिकानीत्युच्यन्ते। 'करीरः' पत्रशून्योवदराकृतिफलो जाङ्गलोद्भवो वृक्षविशेषः। 'जीरकं' कृष्णजीरकं स्मृत्यन्तरे विशेषितत्वात्। 'करम्भाणि' दधिमिश्राः सक्तवः। अब्जशब्दो जलजातपुष्पजातिविशेषवचनः। 'क्षारः' सर्जिका यवक्षारादिः। 'नीरसानि' मन्दरसानि

निकृष्टरसानि वा। 'भक्ष्याणि' दन्तैरवखण्ड्यावगीर्याणि, अवखण्डनमन्तरेणाभ्यवहार्योग्यानि 'भोज्यानि'। सर्वस्मिन्निति नित्यश्राद्धादन्यत्र सर्वस्मिन्। प्रतिदिनं हि कूष्माण्डादिद्रव्यवर्जनपूर्वकमन्ननिष्पादनस्याशक्यत्वात्। अतएव नित्यश्राद्धं विषयीकृत्य रामायणादावुच्यते।

इङ्गुदैर्बदरैर्बिल्वै रामस्तर्पयते पितॄन्।
यदन्नं पुरुषो भुङ्क्ते तदन्नास्तस्य देवता इति॥

आह सुमन्तुः।

बीजपूरकमाषाणि श्राद्धे न दद्यात्।

ब्रह्मपुराणे।

तालं करुणकाकोले बहुपुत्रार्जुनीफलम्।
जम्बीरं रक्तविल्वञ्च शालस्यापि फलं त्यजेत्॥
अलाबु तिक्तपर्णी च कुष्माण्डी कटुपत्रिका।
वार्त्ताकं शिम्बिजातिञ्च लोमशानि जटीनि च॥
कालिङ्गं रक्तचारञ्च चीणाकं धृतचारकम्।
श्राद्धकर्मणि वर्ज्यानि गन्धचिर्भटिकं तथा॥
कपालं काकमाचीञ्च करम्भं पिण्डमूलकम्।
गृञ्जनं चुक्रिकां चुकं गाजरं पोतिकां तथा॥
जीवकं शतपुष्पाञ्च नालिकां ग्राम्यशूकरम्।
हलं नृत्यं सर्षपञ्च पलाण्डु लशुनं त्यजेत्॥
माणकन्दं तन्दुलीयं विषकन्दं गतास्थिगम्।
पुरुषालुं सपिण्डालं श्राद्धकर्मणि वर्जयेत्॥
नोग्रगन्धञ्च दातव्यं कोविदारकशिग्रुकौ।
अत्यम्लं पिच्छिलं रूक्षमन्यच्च मुनिसत्तम॥
न वै देयं गतरसं मद्यगन्धञ्च यद्भवेत्।
हिङ्ग्वग्रगन्धापनसं भूनिम्बनिम्बराजिके॥
कुस्तुम्बरं कलिङ्गोत्थं वर्जयेदम्लवेतसम्।

तथा।

कुसुम्भशाकं जम्बीरं शिग्रुकं कोविदारकम्।
पिण्याकं शिग्रषाञ्चैव मसूरं गृञ्जनं शणम्॥
कोद्रवं कोकिलाक्षञ्च चुक्रं कम्बु च पद्मकम्।
चकोरश्येनमांसञ्च वर्तुलालावुनालिनीम्॥
फलं तालतरूणाञ्च भुक्त्वा नरकमृच्छति।
दत्त्वा पितृभ्यस्तैः सार्द्धं व्रजेत् पूयवहं नरः॥
तस्मात् सर्वप्रयत्नेन नाहरेत विचक्षणः।
निषिद्धानि वराहेण स्वयं पित्रर्थमादरात्॥

'करुणं' करुणस्य फलं गूर्जरदेशे प्रसिद्धम्। 'काकोलं' काकोलीफलं उत्तरापथे प्रसिद्धम्। 'बहुपुत्रा' शतावरी तस्या मूलं किसलयञ्च। 'अर्जुनीफलं' ककुभलताफलं। 'शालः' सर्जः। 'तिक्तपर्णी' कटुकरोहिणी। 'कटुपत्रिका' राजिका। 'शिम्बिजातिः' कुलत्थमसूरादिशिम्बिधान्यानि। 'रोमशानि' कपिजम्बूफलानि। 'रक्तचारं' लोहितचारफलम्। 'धृतचारकं' चिरसंगृहीतचारबीजम्'। 'कपालं' नालिकेरम्। गुड-मधुकाञ्जिकमस्त्वादिद्रवद्रव्यं धान्याद्युष्माणि त्र्यहसप्ताहादिकालमवस्थाप्यातिशुक्ततां नीतं, 'चुक्रं' इत्युच्यते। 'गाजरं' गाजर इति लोके प्रसिद्धम्। 'जीवकः' काकोल्यादि-जीवनीयादिके पठिते जीवकसंज्ञयैवोत्तरापथे प्रसिद्धः। 'हलं' लाङ्गली। 'नृत्यं' नटी। 'उग्रगन्धा' वचा। 'भूनिम्बः' किराततिक्तकः। 'पिण्याकं' यन्त्रसमाकृष्ट-तैलानां तिलानां कल्कः। 'कोकिलाक्षः' ईक्षुरः, कोलिसा इति लोके प्रसिद्धः। 'पद्मकः' स्वनाम्नैव प्रसिद्धः। 'चकोरश्येनौ' पक्षिविशेषौ।

मार्कण्डेयपुराणे।

लशुनं गृञ्जनञ्चैव पलाण्डुं पिण्डमूलकम्।
करम्भं यानि चान्यानि हीनानि रसवर्णतः॥
गन्धारिकामलावूनि लवणान्यौषराणि च।
वर्जयेत्तानि वै श्राद्धे यच्च वाचा न शस्यते॥

'गन्धारिका' गंजाधिका सङ्गीत्यर्थः। यच्च वाचेति। दात्रा प्रदानकाले सत्कारार्थं वाचा यन्न स्तूयते तदपि श्राद्धसाद्गुण्याय न भवतीत्यर्थः।

तथा।

पूति पर्युषितञ्चैव वार्त्ताकाभिषवास्तथा।
वर्जनीयानि वै श्राद्धे तथा वसु च लोहितम्॥

'पूति' दुर्गन्धं, 'लोहितं' वसुकाख्यं शाकम्। यद्वा लोहितवर्णं वसु द्रव्यं कर-वीरपुष्पादि। अन्ये तु तथा वस्त्रञ्च लोहितमिति पठन्ति।

कूर्म्मपुराणे।

पिप्पलीं रुचकञ्चैव तथा चैव मसूरकम्।
कूष्माण्डालावुवार्त्ताकभूस्तृणं सुरसं तथा॥
कुसुम्भं पिण्डमूलञ्च तन्दुलीयकमेव।
राजमाषांस्तथा क्षीरं माहिषाख्यं विवर्जयेत्॥
आढकीं कोविदारञ्च पालङ्क्यां मरिचं तथा।
वर्जयेत् सर्वयत्नेन श्राद्धकाले द्विजोत्तमः॥

'रुचकं' सौवर्चलम्।

पद्ममत्स्यपुराणयोः।

पद्म—विल्वक—धुस्तूरपारिभद्राढरूषकाः।
न देयाः पितृकार्येषु पयश्चाजाविकं तथा॥

'पारिभद्रः' निम्बः। 'आढरूषकः' सिंहास्यः।

महाभारते।

हिङ्गुद्रव्येषु शाकेषु मालानं लशुनं तथा।
पलाण्डुसौभाञ्जनकौ तथा गृञ्जनकादयः॥
किष्किण्डजान्यलाबूनि कृष्णं लवणमेव च।
ग्राम्यं वराहमांसञ्च यच्चैवाप्रोषितं भवेत्॥
कृष्णाजाजी विटञ्चैव शीतपाकी तथैव च।
अङ्कुराद्यास्तथा वर्ज्या गृहश्रृङ्गाटकानि च॥
वर्जयेल्लवणं सर्वं तथा जम्बुफलानि च।
अवक्षुतावरुदितं तथा श्राद्धेषु वर्जयेत्॥

'किष्किण्डजान्यलाबूनीत्यत्र कुकुण्डकान्यलाबूनीत्यपि पठन्ति। व्याचक्षते च 'कुकुण्डकानि' छत्राकसमानप्रकृतिद्रव्याणि पिण्डोपमानि। 'कृष्णं लवणं' सौवर्चलम्। शाकादिसंस्कारद्रव्येषु मध्ये हिङ्गु वर्जनीयम्। यत्तु हिङ्गुनो ग्राह्यत्वमुक्तं, आदित्यपुराणे।

मधुकं रामठं चैव कर्पूरं मरिचं गुडम्।
श्राद्धकर्मणि शस्तानि सैन्धवं त्रिपुसन्तथेति॥

तद्विहितप्रतिषिद्धत्वाद्विकल्पेनेति मन्तव्यम्। अन्ये तु तच्छ्वेतहिङ्गुविषयं वर्णयन्ति। लोहितान् वृक्षनिर्यासान् वर्जयेदिति स्मृत्यन्तरे दर्शनात्। अन्ये च शाकसंस्कारद्रव्यान्तरालाभेऽनुकल्पत्वेन हिङ्गूपादेयमित्याहुः। अपरे च शाकरूपादिहिङ्गुविषयं वदन्ति। हिङ्गुलवणमरिचानाममिश्रत्वेन प्रत्यक्षाणां निषेधादिति। एतत्तु हिङ्गुनः पृथक्भूतस्यानुपयोज्यत्वाल्लवणस्यैव च प्रत्यक्षस्य निषेधादयुक्तम्।

ब्रह्माण्डपुराणे।

सुगन्धं पञ्चशिम्बञ्च कलायाः सर्व एव च।
वांशं करीरं सुरसमर्जकं भूस्तृणानि च।
भक्ष्यत्वेन निषिद्धं च न देयं श्राद्धंकर्मणि॥

'सुगन्धं' गन्धनाकुल्याः पत्रादि। निष्पाव-मसूर-राजमाष-मठ-कुलत्थाख्यानि पञ्च शिम्बिधान्यानि 'पञ्चशिम्बम्'। यच्च धर्मशास्त्रेषु भक्षणीयत्वेन प्रतिषिद्धं तदपि न देयम्। किं पुनस्तदित्यपेक्षायां पैठीनसिराह।

वृन्ताक-नालिका-पौतीक-कुसुम्भाश्मन्तकाश्चेति शाका न भक्ष्याः इति।

'वृन्ताकं' श्वेतवृन्ताकम्।

तथा च देवलः।

कन्दूरं श्वेतवृन्ताकं कुम्भाण्डञ्च विवर्जयेत्।

'कण्डूरं' कण्डूरायाः प्रावृषेऽण्यापरनामधेयायाः फलम्। तच्चात्यन्तकण्डूति-जनकबहुरोमयुक्तं भवति। 'कुम्भाण्डं' कुम्भवद्वर्तुलमदीर्घालाबुसदृशं फलम्। 'कुसुम्भं' कण्टकरहितम्। स्मृत्यन्तरे विशेषितत्वादिति देवस्वामी।

कुसुम्भादीनां भक्षणे दोषमाहोशनाः।

कुसुम्भं नालिकाशाकं वृन्ताकं पौतिकं तथा।
भक्षयन्पतितस्तु स्यादपि वेदान्तगो द्विजः[१]॥

भविष्यत्पुराणे।

लशुनं गृञ्जनञ्चैव पलाण्डुं कवकानि च।
वार्त्ताकं नालिकालावु ह्यवेयाज्जातिदूषितम्॥

एतज्जात्यैव दूषितं 'अवेयात्' जानीयात्।

हारीतः।

न वट-प्लक्षोडुम्बर-दधित्थ-नीप-मातुलिङ्गानि भक्षयेत्।

'दधित्थं' कपित्थफलम्। 'नीपं' कदम्बपत्रम्।

आह मनुः।

लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा।
शैलु गव्यञ्च पीयूषं प्रयत्नेन विवर्जयेत्॥

'शैलुः' श्लेष्मातकः। प्रसूतायाः दशाहं पयः पीयूषम्।

इति वर्ज्यानि फलमूलादीनि।

अथ ग्राह्याणि वर्ज्यानि च क्षीरादीनि।

कूर्म्मपुराणे।

क्षीरं क्षीरविकारश्च पायसं शर्करा मधु।
देयं श्राद्धेषु यत्नेन सर्वदा पितृतृप्तये॥

पद्मपुराणे।

अन्नञ्च सदधिक्षीरं गोघृतं शर्करान्वितम्।
मांसं प्रीणाति वै सर्वान् पितृनित्यब्रवीदजः॥

पितरस्तृप्यन्ति इत्यनुवृत्तौ मनु-देवल-कात्यायनाः।

संवत्सरन्तु गव्येन पयसा पायसेन च।

मनुः।

अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा।
आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः॥

---

[१] अपि दाता तथा द्विजः।

आरण्यानाञ्च सर्वेषां मृगाणां माहिषं विना।
स्त्रीक्षीरञ्चैव वर्ज्यानि सर्वशुक्तानि चैव हि॥

इह अनिर्दशाहञ्च गोः क्षीरमिति पाठे अनिर्दशाहशब्दानुवृत्तौ उष्ट्रादीनामपि दाशाहिकः प्रतिषेध आशङ्क्येत। तत्रात्यन्तिकतत्प्रतिषेधार्थं समाचार आश्रयणीयः। अनिर्दशाया इति स्त्रीलिङ्गपाठे आशङ्कैव नास्ति। न हि तद्धितान्तैरौष्ट्रमित्यादिभिरनिर्दशाया इत्यन्वेति। यस्याः प्रसूताया दशदिनान्यनपक्रान्तानि सा गौरनिर्दशा। उष्ट्र्याः करभ्या इदम् 'औष्ट्रम्'। एकशफादीनां वड़वाप्रभृतीनां इदं 'ऐकशफम्'। अविकानामिदं 'आविकम्'। उत्तरत्र पुनः क्षीराग्रहणसमाचाराच्च औष्ट्रैकशफाविकानिर्दशगवादिक्षीराणि सविकाराणि प्रतिषिध्यन्ते। सन्धिन्या अवत्सायाश्च गोः क्षीरमेव। वृषभेणक्रान्ता 'सन्धिनी'। मेधातिथिस्त्वाह। या उभयोः कालयोः प्राप्तदोहा कथञ्चिदन्यतरत्र दुह्यते, सायमदुग्धा प्रातर्दुग्धाप्रातरदुग्धा सायं वा दुग्धा सा 'सन्धिनी'। अन्या तु स्वल्पदुग्धत्वान्नित्यमेकस्मिन्नेव काले दुह्यमाना। अत्र दोहशब्दस्य सन्धानात् सन्निकर्षात् सन्धिनीशब्दप्रवृत्तौ सन्धाशब्दात् सन्धिशब्दाद्वा व्रीह्यादिपाठादिनिः। कश्चिदाह या मृतवत्सा वत्सान्तरसन्धानेन दुह्यते सा सन्धिनीति। सन्धिनीशब्दस्यावस्थाविशेषवचनत्वात्तदवस्थाया एव क्षीरं वर्ज्यम्। नोत्तरकालमपि विवत्सायाः। मृतवत्सायास्तु गोर्वत्सविरहजनितशोकशान्तिपर्यन्तं पयो वर्ज्यम्। या तु जीवद्वत्सापि वत्समन्तरेणैव तुष-चूक-पिण्याकादिना दुह्येत तस्या अपि विवत्सायाः पयो वर्ज्यम्। पयोग्रहणञ्च समासान्तर्गतस्य क्षीरपदस्योत्तरत्रान्वयात्। आरण्यानां मृगाणामित्यत्र पुंलिङ्गस्य पयः प्रकृतिभावेनान्वयासम्भवाज्जातिमात्रविवक्षायां सामर्थ्याच्चमरीप्रभृतीनां पयोवर्ज्यमिति लभ्यते। 'माहिषं विना' आरण्यमहिषीक्षीरमन्तरेण। 'स्त्रीक्षीरम्' मानुषीक्षीरं, तदपि नित्यं वर्ज्यम्। सर्वाणिशुक्तान्यपि वर्ज्यानि।

यमः।

अनिर्दशाया गोः क्षीरं आजं माहिषमेव च।
आविकं सन्धिनीक्षीरं औष्ट्रमैकशफञ्च यत्॥
वर्जयेद्गोरवत्सायाः पयश्चैवान्यवत्सायाः।
आरण्यानान्तु सर्वेषां वर्जयित्वा तु माहिषम्।
आविकादीनि वर्ज्यानि सदा स्वायम्भुवोऽब्रवीत्॥

याज्ञवल्क्यः।

सन्धिन्यनिर्दशावत्सा गोः पयः परिवर्जयेत्।
औष्ट्रमैकशकं ऐणं आरण्यकमथाविकम्॥

वशिष्ठः।

अग्रामपाश्वविषयः सन्धिनीक्षीरं गोमहिष्यजानामनिर्दशाहानाम्।

गौतमः।

गोश्च क्षीरमनिर्दशायाः सूतके अजामहिष्योश्च नित्यमाविकमपेयमौष्ट्रमैकशफञ्च स्यन्दिनी-यमसू-सन्धिनीनाञ्च याश्च वत्सव्यपेताः।

'स्यन्दिनी' स्वयमेव क्षीरं प्रस्यन्दमाना प्रस्यन्दमानयोनिर्वा। 'यमसूः' प्रसूतयमला।

बौधायनः।

अनिर्दशाहासन्धिनीक्षीरमपेयं विवत्सायाश्चाविकमैकशफञ्चापेयम्।

आपस्तम्बः।

अपेयं तथैणकं पय उष्ट्रीक्षीरं मृगीक्षीरं सन्धिनीक्षीरं यमसूक्षीरं गोश्चानिर्दशायाः।

हारीतः।

स्यन्दिनी वृषस्यन्ती तस्याः पयो न पिबेत्। न ऋतुमद्भवति। न हतवत्सायाः शोकाभिभूतत्वात्। न दुग्धाया विना वत्सात्! यथा ह्यश्नत आच्छिद्यात्मनाऽश्नीयादेवं तत्। न नवसूतायाः सरजस्कत्वात्। सप्तरात्रादित्येके दशरात्रादित्यपरे मासेनापि पूयं भवतीति धर्मविदः।

एवं ह्याहुः।

> द्वौ मासौ पाययेद्वत्सं तृतीये द्विस्तनं दुहेत्।
> चतुर्थे त्रिस्तनञ्चैव यथान्याय्यं यथाबलम्॥

वृषेण मैथुनमिच्छती 'वृषस्यन्ती' तदीयं पयः। 'ऋतुमद्भवति' ऋतुमत्याः सम्बन्धि भवतीत्यर्थः। अनेन निवृत्तमैथुनेतरायाः पयो न निषिद्धमिति गम्यते। 'हतवत्सा' मृतवत्सा। शोकाभिभूतत्वादिति हेतुः। तेन विस्मृतवत्सशोकायाः पयसि न प्रतिषेधः। अस्य हेतुवन्निगदार्थवादता स्मृतिचन्द्रिकाकारेणैव निराकृतेति तन्न प्रपञ्चयते। वत्साद्विनेति क्षीरलोभात्। जीवन्तमेव वत्सं अन्यतोनिधाय दुग्धायाः पयो न पिबेत्। दृष्टान्तेन निषिद्धं द्रढ़यति। यथा 'अश्नतः' भुञ्जानात्, 'अन्नं' 'आच्छिद्य' हठात् गृहीत्वा, 'आत्मना' स्वयं अश्नीयात्। एवं तदिति। नवसूतायाः पयो न पिबेदिति सम्बन्धः। रजस्कत्वादिति हेतुः। सप्तरात्रादुपरि पूयं भवतीत्येके। दशरात्रादुपरीत्यपरे। मासादुपरीति धर्म्मविदः मन्यन्त इति शेषः। एतेषु सप्तरात्रादिपक्षेषु यथा रजोनिवृत्तिव्यवस्था द्रष्टव्या। धर्मविद्ग्रहणं मासान्ते रजोनिवृत्तिसंशयोऽपि नास्तीति ज्ञापनार्थं, तेन यदा सप्तरात्रादावपि रजोनिवृत्तिनिश्चयः तदा पयः पानेऽपि न धर्महानिः।

शङ्खलिखितौ।

> माहिषं गव्यमाजञ्च भक्ष्यं क्षीरन्तु निर्दशम्।

शङ्खः।

> सर्वासां द्विस्तनीनां क्षीरमभोज्यं अजावर्ज्यमिति।

आपस्तम्बस्तु ब्राह्मणव्यतिरिक्तेन कापिलं पयो न पेयमित्याह ।

क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोऽथवा पुनः ।
यः पिबेत् कापिलं क्षीरं ततोऽन्यो नास्त्यपुण्यकृत् ॥

तेन ब्राह्मणव्यतिरिक्तः कपिलाया गोः क्षीरं श्राद्धादिकर्मोपयुक्तशेषमपि प्रयत्नेन वर्जयेदित्यर्थः । ब्राह्मणस्य हुतशेषव्यतिरिक्तकापिलक्षीरपाने दोषो भविष्यत्पुराणे दर्शितः ।

कापिलं यः पिवेत् शूद्रो नरके स विपच्यते ।
हुतशेषं पिवेद्विप्रो विप्रः स्यादन्यथा पशुरिति ॥

हुतशेषे पीते विप्रस्य जन्मान्तरेऽपि विप्रत्वं भवति ।

तथा ।

हुतशेषव्यतिरिक्तकापिलक्षीरे पीते विप्रस्य जन्मान्तरे पशुत्वं भवतीत्यर्थः । क्षीरवर्जनविधानादेव क्षीरविकारस्यापि कूर्चिकादेर्वर्ज्यत्वं सिद्धम् । कूर्चिकादिविकारेऽपि क्षीररसस्य सद्भावात् । अतएव क्षीरे वर्जयितव्ये तद्रसवतः पायसादेरपि वर्जनं कार्य्यमिति मीमांसायां प्रतिपादितम् । अतएव निषिद्धक्षीरविकाराणां भक्षणे निषिद्धातिक्रमस्य कृतत्वात् प्रायश्चित्तमाह शङ्खः ।

क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ।
सप्तरात्रव्रतं कुर्य्यात् प्रयत्नेन समाहित इति ॥

श्राद्धेषु महिषीक्षीरस्य निषेधेऽपि वचनान्तरेण प्राशस्त्यप्रतिपादनान्महिषीघृतं ग्राह्यमेव ।

भविष्यत्पुराणे ।

श्राद्धेषु महिषी क्षीरमजाक्षीरञ्च वर्जयेत् ।
गवाञ्चानिर्दशाहानां सन्धिनीनां पयस्त्यजेत् ॥

आदित्यपुराणे ।

न च गोव्यतिरिक्तानां पयः श्राद्धेषु शस्यते ।
सविकारं गवामेव पितॄणां तृप्तये पयः ॥

सुमन्तुः ।

पयोदधि घृतञ्चैव गवां श्राद्धेषु पावनम् ।
महिषीणां घृतं प्राहुः श्रेष्ठं न तु पयः क्वचित् ॥

देवलः ।

अजावि-महिषीणान्तु पयः श्राद्धेषु वर्जयेत् ।
विकारान् पयसश्चैव माहिषं तु घृतं हितम् ॥

मार्कण्डेयपुराणे ।

मार्गमाविकमौष्ट्रञ्च सर्व्वमैकशफञ्च यत् ।
माहिषञ्चामरञ्चैव धेन्वा गोश्चाप्यनिर्दशम् ॥
पित्रर्थं मे प्रयच्छस्वेत्युक्त्वा यच्चाप्युपाहृतम् ।
वर्जनीयं सदा सद्भिः तत्पयः श्राद्धकर्म्मणि ॥

ब्रह्मपुराणे ।

माहिषञ्चामरं मार्गमाविकैकशफोद्भवम् ।
ऐणमौष्ट्रं याचितञ्च दधिक्षीरं त्यजेत् घृतम् ॥
घृतात्फेनं घृतान्मण्डं पीयूषमथ चार्द्रगोः ।
सगुडं मरिचाक्तन्तु तथा पर्य्युषितं दधि ।
दीर्णं तक्रमपेयञ्च नष्टास्वादञ्च फेनवत् ॥

अयमर्थः । 'घृतात्फेनम्' घृतादुद्धृत्य फेनं, अपेयम् । 'घृतान्मण्डम्' घृतादुद्धृता सन्तानिका । तथा 'आर्द्रगोः पीयूषम्' यावत् प्रसूतागौरार्द्रयोनिस्तावत् क्षीरमपेयम् । तथा पयोदधिगुडमरिचमिश्रितं यत् पर्य्युषितं तदप्यपेयम् । तथा यत्तक्रं 'दीर्णम्' दर्व्वीघट्टन-शून्याग्नितापादिना स्वतो वा स्फुटितम् । यच्च 'नष्टास्वादम्' शुक्तं नष्टरसम् । यच्च बहुदिनस्थित्या सञ्जातफेनं तदप्यपेयम् ।

इति ग्राह्याणि वर्ज्यानि च क्षीरादीनि ।

अथ ग्राह्याणि मांसानि ।

तत्र तावत् सामान्यतः श्राद्धे मांसदानविधिः ।

मनुः ।

मुन्यन्नानि पयो-सोमो-मांसं यच्चानुपस्कृतम् ।
अक्षारलवणञ्चैव प्रकृत्या हविरुच्यते ॥

पूर्व्वं व्याख्यातः श्लोकः ।

पितृणां मासिकं श्राद्धं अन्वाहार्य्यं विदुर्बुधाः ।
तदामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नतः ॥

तदेतत्प्रतिमासममावास्यायां विहितं श्राद्धं तत् पितृणामन्वाहार्य्यमिति मुनयो-मन्यन्ते । तदेतदामिषेण मांसेन कर्त्तव्यम् । प्रशस्तेनाप्रतिषिद्धेन द्वौ मासौ मत्स्य-मांसेनेत्यादिविशेषविहितेन वा । अयञ्च मुख्यः कल्पः । तदभावे दधिघृतसूपादि विधायिष्यते । मांसञ्च व्यञ्जनं भक्तादेर्भोज्यस्य न पुनरेतदेव केवलं भोज्यम् । येन वक्ष्यति । गुणांश्च सूपशाकाद्यानामिति । तथा यावन्तश्चैव यैश्चान्नानि इति । स्मृत्यन्तरे ।

विना मांसेन यत् श्राद्धं कृतमप्यकृतं भवेत्।
क्रव्यादाः पितरो यस्मादभावे[1] पायसादयः ॥

पुराणे।

मांसं शाकं दधि क्षीरं मधु चान्यत्तथैव च[2]।

इति सामान्यतः श्राद्धे मांसदानविधिः।

अथ मांसभक्षणे विधिरुच्यते।

मनुः।

यत्प्रोक्षितं भवेन्मांसं ब्राह्मणानाञ्च काम्यया।
यथाविधि नियुक्तश्च प्राणानामेव चात्यये ॥

पशुं प्रोक्षतीत्यादि विहितप्रोक्षणादिसंस्कारयुक्ताग्नीषोमीयादिपशुप्रकृतिकं मांसं प्रोक्षितमित्युच्यते। 'ब्राह्मणकाम्यया' ब्राह्मणेच्छया। काम्यशब्दः छान्दसः।

यदा ब्राह्मणाः प्रार्थयन्ति तदा प्रोक्षणार्हप्रकृतिकमप्यप्रोक्षितं कृताभक्षणसङ्कल्पोऽपि भक्षयेत्। 'यथाविधि' यथाशास्त्रं, मधुपर्कयज्ञश्राद्धेषु 'नियुक्तः' नियोगमङ्गीकारितः मांसं भक्षयेत्। अतः श्राद्धे भोक्ष्य इत्युपेत्य इदमश्नामीदं नाश्नामीति नार्हति वक्तुम्। यतिब्रह्मचारिभ्यां तु नियुक्ताभ्यामपि मांसं न भक्षणीयमिति प्रतिपादितं प्राक्। 'प्राणानामत्यये' अशनान्तराभावात् भाविप्राणापगमनिश्चये देवपितृकार्योपयुक्तशेषादन्यदपि निषिद्धमपि पौनः पुन्येनापि ब्रह्मचर्येऽपि मांसं भक्षयेत्। सर्वत आत्मानं गोपायेदिति वचनादात्मघातपातकपरिहारस्यावश्यकार्यत्वाच्च।

यमोऽपि।

भक्षयेत्प्रोक्षितं मांसं सकृत् ब्राह्मणकाम्यया।
दैवे नियुक्तः श्राद्धे वा नियमे तु विवर्जयेत् ॥

अनियमे पूर्वपादत्रयोक्तनियमाभावे मांसं विवर्जयेत्।

याज्ञवल्क्य-विश्वामित्रौ।

प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया।
देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दुष्यति ॥

देवलः।

भक्षयन्नपि मांसानि शेषभोजी न लिप्यते।
औषधार्थमशक्तौ वा नियोगाद्यज्ञकारणात् ॥

---

[1] यस्मादलाभे इति।

[2] मुन्यन्नमेव चेति।

बृहस्पतिः ।

रोगी नियुक्तो विधिनाहितं विप्रवृतस्तथा ।
मांसमद्याच्चतुर्द्धैषा परिसङ्ख्या प्रकीर्त्तिता ॥

'रोगी' मांसभक्षणैकपरिहार्य्यरोगवान् । नियुक्तः श्राद्धादौ । विधिनाहितं हुत-शेषम् । 'विप्रवृतः' विप्राभ्यर्थितः । 'चतुर्द्धा परिसङ्ख्या' चतुर्द्धा चतुः प्रकारो नियम इत्यर्थः ।

हारीतः ।

वृथामांसं भक्षयंस्तु पुष्पकृच्छ्रञ्चरेद्बुधः ।
काम्यया ब्राह्मणानान्तु यथाकामं समश्नुयात् ॥

'यथाकामम्' यावदिच्छम् ।

विष्णुः ।

असंस्कृतान् पशून् मन्त्रैर्नाद्याद्विप्रः कथञ्चन ।
मन्त्रैस्तु संस्कृतानद्यात् शाश्वतं विधिमास्थितः ॥

'शाश्वतम्' नित्यं वैदिकमित्यर्थः ।

यजुषा संस्कृतं मांसं भक्षयीत यथाविधि ।
न भक्षयेद्वृथामांसं वृथामांसं विवर्जयेत् ॥
श्राद्धे मांसं समश्नीयात् यदातिथ्ये निवेदयेत्[१] ।

इति मांसभक्षणविधिः ।

अथ नियुक्तस्य मांसभक्षणे प्रत्यवाय उच्यते ।

पैठीनसिः ।

निमन्त्रितो योनाश्नाति श्राद्धे मांसं द्विजोत्तमः ।
यावन्ति पशुरोमाणि तावन्नरकमृच्छति ॥

यावन्ति हतस्य पशोः रोमाणि तावत् सङ्ख्यानि च वर्षाणि नरके वसतीत्यर्थः ।

मनुः ।

नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥

'सम्भवान्' जन्मानि ।

वशिष्ठः ।

नियुक्तस्तु यदि श्राद्धे दैवे मांसं समुत्सृजेत् ।
यावन्ति पशुरोमाणि तावन्नरकमृच्छति ॥

---

[१] यदातिथ्यनिवेदितमिति ।

यमः ।

आमन्त्रितस्तु यः श्राद्धे दैवे मांसं समुत्सृजेत् ।
यावन्ति पशुरोमाणि तावन्नरकमृच्छति ॥

इति नियुक्तस्य मांसाभक्षणे प्रत्यवायनिरूपणम् ॥

अथ प्रशस्तमांसप्रकृतयः ।

प्रशस्तेनामिषेण श्राद्धं कुर्यादिति मनुवचने पूर्व्वमुक्तत्वात् ।

तत्राह शङ्खः ।

तित्तिरञ्च मयूरञ्च लावकञ्च कपिञ्जलम् ।
वार्ध्रीणसं वर्त्तकञ्च भक्ष्यानाह यमः सदा ॥

'तित्तिरः' चित्रपक्षः । 'मयूरः' शिखण्डी । 'लावकः' प्रसिद्धः । 'कपिञ्जलः' शरुर्बभ्रुवर्णः पक्षी । 'वार्ध्रीणसः' कृष्णग्रीव इत्यादिना द्वादशवार्षिकतृप्तौ वक्ष्यमाण-लक्षणः । 'वर्त्तकः' वृत्ताकृतिश्चित्रविन्दुलाञ्छितः तुलपुच्छः पक्षिविशेषः ।

मनुः ।

पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः ॥

'पाठीनः' बहुदंष्ट्रोमत्स्यः, सहस्रदंष्ट्रः पाठीन इत्यभिधानात् । 'रोहितः' रक्त-वर्णो मत्स्यः । एतावुभौ हव्यकव्यनियोगेन श्राद्धादौ भक्षणीयौ । 'राजीवाः' पद्मवर्णा-मत्स्या इति केचित्, राजीभिः रेखाभिर्युक्ता इत्यपरे । 'सिंहतुण्डाः' सिंहमुखाकृति-मुखाः । 'सशल्काः' पृष्ठप्रतिष्ठितशुक्त्याकारशकलाः, राजीवाद्याः सर्वशोऽनियुक्तेनापि भक्ष्याः ।

तथा ।

श्वाविदं शल्यकां गोधां खड्गं कूर्मं शशांस्तथा ।
भक्ष्यान् पञ्चनखानाहुरनुष्ट्रांश्चैकतोदतः ॥

'श्वाविदः' श्वभक्षको व्याघ्रविशेषः । 'शल्यकः' शललीसंज्ञतनूरुहः श्वापद-विशेषः । 'गोधा' दीर्घाकृतिर्विलेशयः प्राणिविशेषः । 'खड्गः' गण्डकः । 'कूर्म्मः' कच्छपः प्रसिद्धः । शशः पञ्चनखानां मध्ये श्वावित्प्रभृतीन् भक्ष्यानाहुः । स्मृत्यन्तरे तु खड्गे विकल्पः ।

तथा च वशिष्ठः । खड्गे तु विवदन्त इति ।

उष्ट्रवर्जितानेकविभागस्थितदन्तपङ्क्तीन् गोजाविमृगान् भक्ष्यानाहुः ।

भक्ष्या इत्यनुवृत्तौ बौधायनः ।

मत्स्या सहस्रदंष्ट्रा गोजाविमृगा बृहच्छिरसः तित्तिरिरोहितराजीवाः ।

भक्ष्या इत्यनुवृत्तौ गौतमः ।

मत्स्याश्चाविकृताः ।

वशिष्ठः ।

श्वाविच्छल्यकशशकच्छपगोधाः पञ्चनखानां भक्ष्याः अनुष्ट्राः पशूनाम्, अदन्ताश्च ।

देवलः ।

पञ्च पञ्चनखा भक्ष्याः धर्म्मतः परिकीर्त्तिताः ।
गोधाकूर्म्मशशाः श्वावित् शल्यकश्चेति ते स्मृताः ।

भक्ष्या इत्यनुवृत्तौ बौधायनः ।

पक्षिणः तित्तिरि-कपोत-कपिञ्जल-लाव-तृणमयूर-वारणाचारणाऽवर्ज्याः पञ्च विष्किराः ।

'कपोतः' प्रसिद्धः । विष्किराणां मध्ये एते पञ्च भक्ष्याः । 'वारणाचारणौ' कपोतभेदौ ।

शङ्खलिखितौ ।

माहिषञ्चाजमौरभ्रं मार्गं रौरवमेव च ।
भक्ष्यमांसं समुद्दिष्टं यच्च वै पार्षतं स्मृतम् ॥
वराहाश्च तथा भक्ष्या महारण्यनिवासिनः ।

महिषस्येदं 'माहिषम्' । उरभ्रस्य मेषस्य मांसं 'औरभ्रम्' । मृगस्य ताम्रहरिणस्य 'मार्गम्' । रुरोः कृष्णसारङ्गस्य बहुश्रृङ्गस्य वा मृगस्य मांसं 'रौरवम्' । पृषतस्य-विन्दुवतो मृगस्य 'पार्षतम्' । 'वराहाः' शूकराः ।

हारीतः ।

ग्राम्यारण्यानां पशूनामृच्छन्ति यथाजमेष-हिरण्य-खड्ग-रुरु-पृषत-ऋष्य-वभ्रु-महारण्यवासिनश्च वराहास्तथा शशक-शल्यक-मेधा-गोधा-कूर्म्म-वर्त्तक-तित्तिर-मयूर-वार्धीणस-लावक-कुरर-कपिञ्जलान् सशल्कांश्च मत्स्यान्न्यायोपपन्नान् भक्षयेत् ।

इति प्रशस्तमांसप्रकृतयः ।

अथ मांसभक्षणप्रतिषेधः ।

मनुः ।

असंस्कृतान् पशून्मन्त्रैर्नाद्याद्विप्रः कदाचन[१] ।
मन्त्रैस्तु संस्कृतानद्याद्वैदिकं[२] विधिमास्थितः ॥

---

[१] कथञ्चन इति । [२] शाश्वतमिति ।

प्रोक्षणादिसंस्कारमन्तरेण ये निहितास्तान्नाद्यात्। ये तु वैदिकैर्मन्त्रैः संस्कृतास्तानेव भक्षयेत्।

पुलस्त्योऽपि।

वर्जयेद्दूरतः श्राद्धे यदप्रोक्षितमामिषम्।
राज्ञानुत्पादितं यच्च व्याधिनाभिहतञ्च यत्॥

'अप्रोक्षितं' प्रोक्षणादिरहितं मांसं, श्राद्धे ब्राह्मणादिर्दाता वर्जयेत्। राज्ञा तु मृगव्येन स्वयं यदनुत्पादितम्। व्याधिनाभिहतात् पशोर्यद्गृहीतं तत्सर्वं वर्ज्यम्। अयमप्रोक्षितप्रतिषेधो ग्राम्यपशुविषयः। आरण्यास्तु प्रोक्षणमन्तरेणापि प्रशस्ता एव।

ब्रह्मपुराणे।

आरण्यानाञ्च सर्वेषां प्रोक्षणं ब्रह्मणा कृतम्।
अत एव तु ते भक्ष्या ब्राह्मणक्षत्रियादिभिः॥

व्यासोऽपि।

प्रजानां हितकामेन अगस्त्येन महात्मना।
आरण्याः सर्वदेवत्याः प्रोक्षिताः सर्वशो मृगाः॥
तस्मादप्रोक्षिता एव प्रयोज्यास्ते सदा बुधैः॥

आरण्यानां पशूनाम् अगस्त्येन ब्रह्मणा च सर्वार्थतया प्रागेव प्रोक्षणस्य कृतत्वादन्यैर्न कर्तव्यमित्यर्थः।

अत्र कश्चिदाह। असंस्कृतान् पशून्नाद्यादित्ययं फलविशेषकामस्य पर्युदासवचनो[१] न प्रतिषेधः। अतः फलार्थित्वाभावेऽसंस्कृतमपि मांसं भक्षणीयमेवेति।

तन्न। यतः प्रतिषेधत्वे सम्भवति पर्युदासत्वं फलकल्पना चेति न न्याय्यम्।

"न मांसभक्षणे दोषो न मद्ये न च मैथुने।
प्रवृत्तिरेषा जन्तूनां[२] निवृत्तिस्तु महाफला॥"

इत्यादि वचनोक्तन्यायादिति चेत्। न। अस्य वचनस्य मन्त्ररहितशूद्रादिविषयत्वेनैवोपपत्तेः। अतो विप्रो मन्त्रसंस्कृतमेव मांसमद्यान्नान्यत्। येन हि मांसेन देवाश्च पितरश्चार्च्यन्ते तन्मन्त्रसंस्कृतमेव भवति। देवपित्रर्चनसम्बद्धस्यैव ब्राह्मणभोज्यत्वेन विहितत्वात्।

तदुक्तं मनुना।

देवान् पितॄन् समभ्यर्च्य खादन्मांसं न दोषभागिति। विधिपूर्वकभक्षणे गुणमभिधायाविधिपूर्वकभक्षणे दोषमाह स एव।

यस्तु भक्षयते मांसं विधिं हित्वा पिशाचवत्।
स लोकेऽप्रियतां याति व्याधिभिश्चैव पीड्यते॥

---

[१] मांसविशेष वर्जनव्रतोपदेशः इति।

[२] भूतानामिति।

तथा

> यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ।
> ततोऽन्यथा प्रवृत्तस्तु राक्षसो विधिरुच्यते ॥

'जग्धिः' भक्षणम् ।

विष्णुः ।

> नाद्यादविधिना मांसं विधिज्ञोनापदि द्विजः ।
> जग्ध्वा तु विधिना मांसं प्रेत्य तैरद्यते तु सः ॥

तैः पशुभिरद्यते ।

हारीत-शातातपौ ।

> विषच्छद्महतं मांसं व्याधिभिर्जग्धितञ्च यत् ।
> न प्रशंसन्ति वै श्राद्धे यच्च मन्त्रविवर्जितम् ॥

'विषेण' 'छद्मना' कूटयन्त्रादिप्रकारेण, हतस्य तथा व्याधिभिः सिंहव्याघ्रव्यतिरिक्तश्वापदैश्च हतस्य पशोर्यन्मांसं यच्च मन्त्रवर्जितं तच्छ्राद्धादौ न प्रशंसन्ति अर्हं न मन्यन्ते ।

आपस्तम्बः ।

> हिंसार्थेनासिनाच्छिन्नं तदभोज्यं विदुर्बुधाः ।

इति मांसभक्षणप्रतिषेधः ॥

अथ निषिद्धमांसप्रकृतयः ।

तत्राह मनुः ।

> क्रव्यादः शकुनीन्[1] सर्वान् तथा ग्रामनिवासिनः ।
> अनिर्दिष्टांश्चैकशफान् टिट्टिभांश्च विवर्जयेत् ॥
> कलविङ्कं प्लवं हंसं चक्राह्वं[2] ग्रामकुक्कुटम् ।
> सारसं रज्जुवालञ्च दात्यूहं शुकशारिके ॥
> प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान् ।
> निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च ॥
> वकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम् ।
> मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्वशः ॥

क्रव्यं मांसमदन्तीति 'क्रव्यादः' केवलमांसभक्षकाः काकगृध्रादयः । 'ग्रामनिवासिनः' अक्रव्यादोऽपि पारावतादयः । 'एकशफाः' अश्वाश्वतरगर्दभादयः ।

---

[1] क्रव्यदान् शकुनानिति ।

[2] चक्राङ्गमिति ।

'अनिर्दिष्टाः' श्रुतौ भक्ष्यत्वेन नोक्ताः। येतूक्तास्ते तत्र भक्ष्याः। यथा "त्वाष्ट्रं वाडवमालभेत् गौरं वा गर्दभं प्रजाकामस्य च मांसमश्नीयात्" इति। 'टिट्टिभाः' अत्युच्चतरशब्दोपलक्षिताः। कदुत्काणनामानः पक्षिविशेषाः[1] 'टिट्टिभाः'। 'कलविङ्कः' ग्रामचटको निगमे दृष्टः। तस्य ग्रामवासित्वेन प्रसिद्धौ सत्यामपि पुंलिङ्ग-शब्देन पुनस्तत्प्रतिषेधः तत्स्त्रियाश्चाभ्यनुज्ञानार्थम्। अन्ये तु कलविङ्कशब्दस्य चटकजातिमात्रवचनत्वं मन्यमानाः आरण्यनिवृत्त्यर्थं तत्प्रतिषेधं वर्णयन्ति। 'प्लवः' जलकुक्कुटः। 'हंसः' मरालः। 'चक्राह्वः' चक्रवाकः। प्लवहंसचक्रवाकानां वर्ज्यमानजालपादप्रतिषेधात् सिद्धे प्रतिषेधे नित्यार्थं वचनम्। अतश्चाषादीनां-विकल्पेन भक्षणं गम्यते। ग्रामग्रहणादारण्यकुक्कुटो भक्ष्यः। सारसः पुष्कराह्वयः। स च दीर्घगलजङ्घोनीलाङ्गः पक्षी। 'रज्जुवालः' रज्जुसदृशदीर्घकेशः पक्षी। रजुदाल— इति तु पाठे वृक्षकुक्कुटको ज्ञेयः। 'दात्यूहः' कालकण्ठः। 'शुकः' कीरः। 'सारिका' 'सारिका' एवं नाम प्रसिद्धा। प्रतुद्य प्रहृत्य चञ्च्वा ये भक्षयन्तीति 'प्रतुदाः' जीव-जीवक-भृङ्गाह्वलद्वार-कोकिल-हारित-कपोत-शतपत्रादयः। 'जालपादाः' जाल-सदृशपादाः चाषादयः। 'कोयष्टिः' आरण्यपक्षिविशेषः। नखैर्विकीर्य्यभक्षयन्ति ये ते 'नखविष्किराः' वार्तीकवर्तीरक्तवर्त्मककुभोपचक्राह्वचकोरकुरराह्वक्रकचकरणानर्द्ध-गिरिवर्त्तकशारपदेद्राभवाड्रादयः। निमज्य ये मत्स्यान् भक्षयन्ति जलवायस प्रभृतयः तेऽपि वर्ज्याः। यत्र मांसविक्रयार्थं पशवो हन्यन्ते सा सूना। आपणोमांसस्येत्येके। सूनायां भवं 'सौनं'। 'वल्लूरं' संशोष्य स्थापितं छागादिमांसम्। वकः प्रसिद्धः। 'वलाका' विकण्टका[2]। 'काकोलः' कृष्णकाकः। 'खञ्जरीटः' खञ्जनः। यो वर्षासु शिखोद्गमेनाहृष्यो भवति। बकबलाकाकाकोलानां निमज्जन्मत्स्यादैः सह पौनरुक्त्यं परिहर्तुं ये कदाचिदुन्मज्ज्य न भक्षयन्ति ये च केवलान् मत्स्यानेवादन्ति तत्र मकरादयो मत्स्याद शब्देन गृह्यन्ते। विड्वराह प्रतिषेधादारण्यस्याभ्य-नुज्ञा। पूर्व्वसूत्रस्थितस्य ग्रामनिवासिशब्दस्य प्रकरणात् पक्षिविशेषणत्वे सिद्धे विड्वराहविषयात्वाभावादपौनरुक्त्यम्। 'मत्स्याः' मीनाः। 'सर्वशः' सर्वदा। उत्सर्गोऽयम्।

यमः।

मत्स्यानशल्कान् वै सर्वान् वेदाध्यायी विवर्जयेदिति।

'अशल्कान्' पृष्ठभागे शल्करहितान्। वेदाध्यायी त्रैवर्णिकः।

देवलः।

वलाकोहंस—दात्यूह—भृंगराड्वक—चित्रकाः।
उलूक--कुरर—श्येन—गृध्र—कुक्कुट—वायसाः॥
चकोरः कोकिलोरज्जुबालकश्चाषमद्गुकौ।
पारावत-कपोतौ च न भक्ष्याः पक्षिणः स्मृताः॥

---

[1] कदुत्काणनासाः पक्षिविशेषा इति।

[2] सकण्टका इति०।

'भृङ्गराजः' तेनैव नाम्ना प्रसिद्धः। 'चित्रकः' मयूरः। 'उलूकः'—कौशिकः घूकश्च। 'कुररः' क्रोशकः। 'चकोरः' चन्द्रिकाहरोलोहितचञ्चुचरणचक्षुः पक्षी। 'कोकिलः' कुहूकण्ठः। 'चाषः' किकीदिविः। मद्गुः' जलवायसः।

देवलः।

अभक्ष्याः पशुजातीनां गो-खरोष्ट्राश्च कुञ्जराः।
सिंह—व्याघ्रर्क्ष—शरभ—सर्पाजगरकास्तथा॥
आखु—सूकर—मार्जार—नकुल—ग्राम्यसूकराः।
श्व–सृगाल–कपि–द्वीपि–गोलाङ्गूलक-मर्कटा इति॥

'खरः' गर्दभः। 'ऋक्षः' भल्लुः। 'शरभः' अष्टचरणः सिंहशत्रुः। 'आखुः' स्थूलोन्दुरः। 'नकुलः' बभ्रुः। 'सृगालः' जम्बुकः। 'कपिः' प्लवङ्गः। 'द्वीपी' महाव्याघ्रः। 'गोलाङ्गूलः' गोपुच्छसदृशपुच्छो वानरविशेषः। 'मर्कटः' लोहितमुखः शाखामृगः। अत्रोक्ताः पञ्चनखा श्वावित् प्रभृति पञ्चनखव्यतिरिक्तपञ्चनखोपलक्षणार्थाः। अतएव न भक्षयेदित्यनुवृत्तौ।

आह मनुः।

सर्वान् पञ्चनखांस्तथेति।

इति निषिद्धमांसप्रकृतयः।

अथ कालविशेषावच्छेदेन तृप्तिकराणि द्रव्याण्युच्यन्ते।

तत्राह मनुः

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा।
दत्तेन मासं प्रीयन्ते विधिवत् पितरो नृणाम्॥
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हरिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेनेह पञ्च तु॥
षण्मासान् छागमांसेन पार्षतेनाथ सप्त तु।
अष्टावैणेन मांसेन रौरवेण नवैव तु॥
दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः।
शशकूर्म्मयोस्तु मांसेन मासानेकादशैव तु॥
संवत्सरन्तु गव्येन पयसा पायसेन वा।
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी॥
कालशाकं महाशल्कः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्वशः॥

श्राद्धविधिमाश्रित्य दत्ततिलादिद्रव्येणैकवारं मासमेकं पितरस्तृप्यन्त्यनुवृत्त्या प्रीयन्ते। अत्र द्विजातिकर्तृकस्य मुख्यस्य श्राद्धस्य ब्राह्मणभोजनात्मकत्वादन्नाकाङ्क्षायां तत्प्रीतियोग्यानां तिलव्रीह्यादीनां तृप्तिसाधनत्वेन विधीयमानानां दृष्टद्वारेण साधनत्वोप-

पत्तये स्वविकारभूतान्नद्वारेणैव तृप्तिसाधनत्वं तेषां च तत्प्रथमं समुच्चितानामेव भोजनस्य लोकतः समुच्चितनानाविधान्नफलमूलादिसाध्यत्वावगमात्। अलाभे तु तृप्तिकरत्वयोग्यान्नप्रकृतिभूतस्यैकस्यापि श्राद्धीयभोजनसाधनत्वम्। लौकिकोपाय-साधनकं हि भोजनं समुच्चितालाभे एकेनापि दृश्यते। एवंचामश्राद्धेऽपि समुच्चया समुच्चयौ वेदितव्यौ, तत्रापि तेषां भोज्यान्नप्रकृतिभावानुपसन्धानेनैवोपकल्पितत्त्वात्। उक्तन्यायादन्नद्वारेणैषां साधनत्वमामश्राद्धे च वचनादपोद्यत इति नैष दोषः।

अन्नद्वारेणैवैषां श्राद्धसाधनत्वमुक्तं प्रचेतसा।

'हरित-मुद्ग-कृष्णमाष-श्यामाक-प्रियङ्गु-गोधूमेक्षुविकारांश्च दद्यादिति।' विधीयन्ते चापूपपायसादीन्यन्नानि श्राद्धे। तानि च प्रकृतिद्रव्यसाकाङ्क्षाणि। अतो व्रीहिपुरोडाशयोरिव तिलव्रीह्यादीनां अन्नानां प्रकृतिविकारभावेनान्वयसिद्धिः। न विकल्पो दोषबाहुल्यात्।

कात्यायनवचने चान्नीभूतानामेवैतेषां तृप्तिसाधत्वं स्फुटं भविष्यति। सत्यपि-समुच्चये अद्भिर्मूलफलेनवेति विकल्पवचनं ब्राह्मणतृप्तिपर्याप्तान्नसाधनीभूतव्रीह्याद्यला-भेनुकल्परूपपक्षान्तराभिप्रायेणेति कात्यायनव्याख्याने च दर्शयिष्यते।

मासतृप्तिकराणि तु मूलफलानि मार्कण्डेयेन प्रपञ्चितानि।

विदार्यैस्तु परूषैस्तु विसैः शृङ्गाटकैस्तथा।
कम्बुकैश्च तथा कन्दैः कर्कन्धुवदरैरपि॥
पालेवतैरारुकैश्च अक्षोटैः पनसैस्तथा।
काकोल्या क्षीरकाकोल्या तथा पिण्डालुकैः शुभैः॥
लाजाभिश्च सधानाभिः त्रपुसैश्चारुचिर्भटैः।
सर्षपाराजशाकाभ्यामिङ्गुदैराजजम्बुभिः॥
प्रियालामलकैर्मुख्यैः फल्गुभिश्च विलम्बकैः।
वंशाङ्कुरैस्तालकन्दैः चुक्रिकाक्षीरिकाधवैः॥
वोचैः समोचैर्लकुचैस्तथा वै बीजपूरकैः।
मुञ्जातकैः पद्मफलैर्भक्ष्यभोज्यैस्तु संस्कृतैः॥
रागषाड्वचोष्यैश्च त्रिजातकसमन्वितैः।
दत्तैस्तु मासं प्रीयन्ते श्राद्धेषु पितरो नृणाम्॥

'कन्दः' सूरण। अर्शोघ्नः सूरणः कन्द इत्यभिधानात्। 'बदरं' बदरीफलम्। 'काकोली-क्षीरकाकोल्यौ' गौड़देशे प्रसिद्धौ। सर्षपेति स्त्रीलिङ्गतया निर्देशः छान्दसः। 'राजशाकं' राजवृक्षाख्यं शाकम्। 'इङ्गुदी' तापसतरुः। 'राजजम्बुः' जम्बुविशेषः। 'मुख्यान्यामलकानि' स्थूलामलकानि। 'फल्गूनि' क्षुद्रामलकानि। विलम्बकानि' पटोलानि। 'वंशाङ्कुरः' प्रसिद्धः। 'क्षीरिका' फलाध्यक्षम्। राजादनः फलाध्यक्षे क्षीरिकायामित्यमरसिंहेनाभिधानात्। 'मोचं' कदलम्।

'लकुचः' लिकुचः। स च जम्बीरफलतुल्यखर्वफलवान् गुल्मविशेषः। 'बीजपूरः' मातुलिङ्गः। 'मुञ्जातं' गौड़ देशे प्रसिद्धं फलम्। 'पद्मफलम्' पद्मबीजकोश-

कर्णिकेतियावत्। मुद्गाढक्यादीनि मांसानि वा मूलफलादीनि निष्काष्य गृहीता रसाः शर्करामध्वादिद्रव्यसङ्गेन मधुरीकृताः 'रागाः'। अम्लद्रव्यसंयोगेनाम्लीकृतास्तु 'षाड्वाः' उच्यन्ते। 'चोष्याणि' वक्ष्यमाणलक्षणानि। 'त्रिजातकं' लवङ्गैलापत्रकाणां समाहारः। एतैर्द्रव्यैर्मासमेकं पितरः प्रीयन्ते। एवमनिषिद्धेन मत्स्यमांसेन द्वौ मासौ। 'हरिणः' ताम्रमृगः तस्य मांसं 'हारिणम्'। उरभ्रो मेषः तस्य मांसं 'औरभ्रं'। शकुनिः पक्षी। स चात्रारण्यकुक्कुटतित्तिरादिरनिषिद्ध एव विवक्षितः। तस्य मांसं 'शाकुनं' 'छागः' वस्तः। पृषतः चित्रमृगः तस्येदं 'पार्षतं'। 'एणः' कृष्णमृगः। तस्येदमैणम्। एणः कृष्णमृगो ज्ञेयस्ताम्रो हरिण उच्यते इत्यभिधानात्। येत्त्वष्टावैणेयमांसेनेति पठन्ति तत्र हरिणीमांसेनेत्युच्यते। 'रुरुः' बहुश्रृङ्गोमृगः। तस्य मांसं रौरवम्'। 'वराहः' अरण्यसूकरः। ग्रामसूकरस्य निषिद्धत्वात्। 'महिषः लुलापः'। 'आमिषं' मांसम्। अत्र माहिषाणि च मांसानि श्राद्धेषु परिवर्जयेदिति विष्णुपुराणदर्शनात् माहिषमांसस्य विहितप्रतिषिद्धत्वेन विकल्पो वेदितव्यः। स च तदामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नत इति। विना मांसेन यत् श्राद्धंकृतमप्यकृतं भवेदित्यादिवचनावगतावश्यकाङ्गभावस्य मांसान्तरस्याभावे महिषस्य ग्रहणं कर्त्तव्यमन्यदा नेत्येकरूप इति केचित्, तद्विचारणीयम्। अप्रशस्तस्य ह्यवगतत्वेन सर्वथा प्रतिषेधे गृह्यमाणस्य प्रशस्तहरिणोरभ्रछागादिमांसेभ्योधिकं माहिष्यमुच्यमानं विरुद्धं स्यात्। 'शशः' प्रसिद्धः। 'कूर्म्मः' कच्छपः। श्रुतसम्बन्धबलीयस्त्वान्माहिषेण पयसेति सम्बन्धो न मांसेनेति।

शङ्खधरस्त्वाह।

गव्यं प्रकरणान्मांसमेव।

अतएव व्यासः।

गवयस्य तु मांसेन तृप्तिर्मासं सदैव तु।
मासानेकादश प्रीतिः पितॄणां माहिषेण तु॥
गव्ये तु दत्ते श्राद्धेषु संवत्सरमिहोच्यते। इति।

तन्न, कलौ गवालम्भस्य निषिद्धत्वात् लोकविद्विष्टत्वाच्चेति। पयसा सिद्धमोदनं 'पायसं' पयोविकारो दध्यादि च। 'वार्ध्रीणसः' छागविशेषः पक्षिविशेषो वा।

तथा च निगमविष्णुधर्मोत्तरयोः।

त्रिः पिबन्त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम्।
वार्ध्रीणसन्तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि॥

यस्य पिबतो जलं कर्णौ स्पृशतः स किल कर्णाभ्यां मुखेन पिबतीति "त्रिपिबः"। 'क्षीणेन्द्रियः' संभोगाक्षमः। 'अजापतिः' अज इत्यर्थः।

पाठान्तरे—

त्रिः पिबन्त्विन्द्रियक्षीणं यूथस्याग्रचरं तथा।
रक्तं वर्णेन राजेन्द्र अजं वार्ध्रीणसं विदुः॥

तथा निगम एव ।

कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहङ्गमः ।
स वै वार्ध्रीणसः प्रोक्त इत्येषा नैगमी श्रुतिः ॥

कालशाकादीनि धान्यप्रकरणे व्याख्यातानि ।

इह सर्वत्र प्रीत्यतिशयो विवक्षितः । न तु यथाश्रुत एव कालः । तथा सति द्वादशवर्षपर्यन्तं पितॄणां तृप्तत्वात् श्राद्धाकरणे प्राप्ते सति न "प्रतिवर्षं यत्नात् कार्यम्" इत्येतद्वचनं विरुद्ध्यत इति हरिहरादयः ।

आह कात्यायनः—

अथ तृप्तिर्ग्राम्याभिरोषधीभिर्मासं तृप्तिरारण्याभिर्वा तदलाभे मूलफलैरद्भिर्वा सहान्नेनोत्तरास्तर्पयन्ति । छागोस्त्र-मेषा आलब्धव्याः । शेषाणि क्रीत्वा लब्ध्वा वा स्वयंमृतानां वाहृत्य पचेन्मासद्वयं मात्स्यैः, त्रीन्मासान् हारिणमृगमांसेन, चतुरः शाकुनेन, पञ्च रौरवेण, षट् छागेन, सप्त कौर्मेण, अष्टौ वाराहेण, नव मेषमांसेन, दश-माहिषेण, एकादश पार्षतेन, संवत्सरं गव्येन पायसेन पयसा वा, वार्धीणसस्य मांसेन च द्वादशवर्षाणि अक्षया तृप्तिः । खड्गकालशाक लोहछागो महाशल्को वर्षासु मघासु च श्राद्धं हस्तिच्छायायाञ्च ।

'ग्राम्याभिः' शालियव गोधूम—मुद्गाद्याभिः. 'ओषधीभिः' सकृद्दत्ताभिर्मासं तृप्तिर्भवति । 'आरण्याभिः' अरण्यौषधीभिः मासमेव तृप्तिः ।

यत्वारण्यानामेव स्मृत्यन्तरे तृप्तिसाधनत्वमुक्तं, तद्वानप्रस्थादिकर्तृकश्राद्ध-विषयम् । 'तदलाभे' ग्राम्यारण्यानामोषधीनामलाभे, मूलफलैरद्भिश्च मासमेव तृप्तिः । मूलादीनां केवलानां तृप्तिसाधनत्वं निराकर्तुमाह सहान्नेनेति । 'उत्तराः' मूलफलादयः । ओषधीनामुपरिष्टान्निर्दिष्टत्वादुत्तराः अन्नेन सहैव दत्ताः सत्यस्तर्पयन्ति न केवलाः, तदन्नोपसर्जनीभूत एव तृप्तिकारित्वेन लोके प्रसिद्धाः ।

ननु-ओषधीनामलाभे मूलादीनां प्रदेयत्वमन्नसाहित्यञ्चेति विप्रतिषिद्धम् । मैवम् । इह हि सम्पूर्णतृप्तिसाधनीभूतान्नसम्पादनपर्याप्तानामोषधीनामलाभे स्वल्पान्न-सहितानां मूलादीनां तृप्तिसाधनत्वमुच्यत इत्यविरोधात् ।

अथ चोत्तराः सत्यन्ने सहान्नेन, असति तु तस्मिन् केवला इत्यनुसन्धेयम् ।

अथ चैवं व्याख्या—

ग्राम्यौषधिसिद्धान्नालाभे मूलफलैरद्भिश्च सहिताः 'उत्तराः' आरण्या ओषध्यः, 'अन्नेन' अन्नद्वारा, मासं तर्पयन्ति । यद्यपि ग्राम्यौषधिसिद्धान्नसाहित्यं शाकत्वेन-मूलादीनामस्त्येव तथाप्यारण्यानां मन्दरसत्वात् शाकसाहित्यमपेक्षिततरमिति प्राधान्येन तत्रोक्तमिति मन्तव्यम् ।

अन्नादिभिर्मासं तृप्तिमुक्त्वा मांसैर्द्विमासादि तृप्तिं प्रतिपादयिष्यंस्तदुपादानविधिं तावदाह ।

छागोस्रमेषा आलब्धव्या इत्यादि। 'उस्रः' अनड्वान्। प्रोक्षणादिसंस्कार-पूर्वकं संज्ञपनं 'आलम्भः'। एतत् पशुत्रयव्यतिरिक्तानां तु पशूनां प्रोक्षणादिसंस्कार-मन्तरेणापि स्वयं परेण वा हतानां क्रयाद्युपायसम्पादितं मांसं श्राद्धादावुपयोजनीयम्।

तथा चाहतुः हारीतशातातपौ।

क्षत्रियैस्तु मृगव्येन विधिना समुपार्जितम्।
श्राद्धकाले प्रशंसन्ति सिंहव्याघ्रहतञ्च यत्॥

मनुः।

क्रीत्वा स्वयं वाप्युत्पाद्य परोपहृतमेव वा।
देवान् पितॄंश्चार्चयित्वा खादन्मांसं न दुष्यति॥

गौतमः।

व्यालहतादृष्टदोषवाक्प्रशस्तान्यभ्युक्ष्योपयुञ्जीतेति।

आहोशनाः।

तत्र व्रीहियवैर्माषैरर्चिता मासं पितरस्तृप्ता भवन्ति, मासद्वयं मात्स्येन मांसेन, त्रयं हरिणमृगमांसेन चतुरोमासान् कृष्णसारङ्गेन, पञ्च शाकुनेन, षट् छागेन, सप्त-पार्षतेन, अष्टौ वराहेण, नव रुरुणा, मेषेण दश, एकादश कूर्मेण, पायसेन पयसा गव्येन संवत्सरं, वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी।

खड्गमांसेनानन्त्यमपि चोदाहरन्ति।

खड्गश्च कालशाकञ्च लोहछागस्तथैव च।
महाशल्कश्च मुन्यन्नं पित्र्येनन्त्याय कल्प्यते॥

याज्ञवल्क्यः।

हविष्यान्नेन वै मासं पायसेन तु वत्सरम्।
मात्स्य--हारिण--कौरभ्र-शाकुन—छाग—पार्षतैः॥
ऐण—-रौरव—-वाराह—-शाशैर्मांसैर्यथाक्रमम्।
मासवृद्ध्याभितृप्यन्ति दत्तैरिह पितामहाः॥
खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च।
लोहामिषं कालशाकं मांसं वार्धीणसस्य च॥
यद्ददाति गयास्थश्च सर्वमानन्त्यमश्नुते।

'हविष्यं' हविर्योग्यं तिलव्रीह्यादि, तत्प्रकृतिकेनान्नेन सकृद्दत्तेन मासपर्यन्तं पितॄणां तृप्तिर्भवति। तत् ऊर्द्ध्वं तु यथाक्रममेकैकमासवृद्ध्या मत्स्यादारभ्य शशपर्यन्तैर्मांसैस्तृप्तिर्भवति। मत्स्या अनिषिद्धा रोहितादयः। 'शाशं' शशमांसम्। 'मुन्यन्नं' नीवारादि।

यमः।

अद्भिर्मूलफलैः शाकैः पुण्यैर्व्रीहियवैस्तिलैः।
प्रीणाति मासं दत्तेन श्राद्धेनेह पितामहान्॥

मत्स्यैः प्रीणाति मासौ द्वौ त्रीन्मासान् हारिणेन तु ।
शल्यकश्चतुरो मासान् रुरुः प्रीणाति पञ्च च ॥
शशः प्रीणाति षण्मासान् कूर्मः प्रीणाति सप्त तु ।
अष्टौ मासान् वराहस्तु मेषः प्रीणयते नव ॥
माहिषं दशमासांस्तु गावयं रुद्रसम्मितान् ।
गव्यं द्वादशमासांस्तु पयः पायसमेव वा ॥
वार्ध्रीणसस्य मांसे तु तृप्तिर्द्वादशवार्षिकी ।
आनन्त्याय भवेद्दत्तं खड्गमांसं पितृक्षये ॥
पितृक्षयो गयाज्ञेया(१) तत्र दत्तं महाफलम् ।
कालशाकञ्च खड्गश्च लोहछागस्तथैव च ॥
महाशल्काश्च मत्स्याश्च पित्र्येऽनन्त्याय कल्पिताः ।
यत्किञ्चिन्मधुसंयुक्तं तदानन्त्याय कल्पयेत् ॥
उपाकृतन्तु विधिना मन्त्रेणान्नं तथाकृतम् ।

गवयो नामारण्यो गवा सहात्यन्तसदृशः पशुस्तस्य मांसं 'गावयम्' । 'रुद्रसम्मितान्' एकादशेति यावत् । 'पितृक्षये' पितॄणां क्षयो गृहं, तच्च गयासंज्ञकं तीर्थम् । 'उपाकरणम्' वैदिकसंस्कारविशेषः ।

देवलः ।

अद्भिर्मूलफलैः शाकैर्व्रीहिमाषयवैरपि ।
मासं तृप्यन्ति पितरः श्राद्धेष्विह निवेदितैः ॥
तुष्यन्ति मत्स्यैर्द्वौ मासौ त्रीन्मासान् रुरुभिर्मृगैः ।
शाकुनैश्चतुरोमासान् पञ्च तृप्यन्ति पार्षतैः ॥
शशैः षाण्मासिकी तृप्तिः कूर्मैः स्यात्सप्तमासिकी ।
अष्टौ मासान् वराहेण नव तृप्यन्त्यजेन च ॥
दश माहिषमांसेन तृप्यन्त्येकादशाविकैः ।
संवत्सरन्तु गव्येन पयसा पायसेन वा ॥
वार्ध्रीणसस्य मांसे तु तृप्तिर्द्वादशवार्षिकी ।
आनन्त्याय भवेद्दत्तं खड्गमांसं पितृक्षये ॥
महाशकलिनो मत्स्याश्छागो वा सर्वलोहितः ।
कालशाककमित्येतदानन्त्याय प्रकीर्त्तितम् ॥

आह विष्णुः ।

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलैः शाकैः प्रियङ्गुनीवारैः मुद्गैः गोधूमैश्च मासं प्रीयन्ते । द्वौ मासौ मत्स्यमांसेन, त्रीन्मासान् हारिणेन तु, चतुरश्चौरभ्रेण, पञ्च शाकुनेन, षट् छागेन, सप्त रौरवेण, अष्टौ पार्षतेन, नव गावयेन, दश माहिषेणैकादश तूपरेणाजेन,

---

[१] पितृक्षयाहे सा तत्रेति पाठो वा ।

सम्वत्सरन्तु गव्येन पयसा पायसेन च तद्विकारैर्वा। कालशाकं महाशल्का वा वार्ध्रीणसमांसं खड्गमांसमक्षय्याय।

अत्र पितृगीता गाथा भवन्ति।

कालशाकं महाशल्का मांसं वार्ध्रीणसस्य च।
विषाणवर्ज्या ये खड्गा आसूर्य्यं तान् लभेमहि॥

'गाथाः' श्लोकविशेषाः। 'आसूर्य्यम्' यावच्चन्द्रसूर्य्यादिपदार्थानामवस्थानं, तावत्कालं तान् वयं लभेमहीति पितरः प्रार्थयन्ते।

विष्णुधर्मोत्तरे।

खड्गा विषाणैः परिवर्जिता ये तेषां हि मांसेन भवत्यनन्तम्।

आह पैठिनसिः।

घृतेन मासं प्रीणाति। कालशाकेन द्विमासं, यवाग्वपूपकृशरेण त्रिमासं, मत्स्यैश्चतुरोमासान्, आजेन मांसेन पञ्च, पायसेन षण्मासान्, शाकुनेन सप्त मासान्, अष्टौमासानैणेयेन, नव मासान् पार्षतेन, दश मासान् गव्येन, एकादशमासान् माहिषेण, द्वादशमासान् छागेन, खड्गेन त्रयोदशमासान्, सर्व्वलोहछागेनानन्त्यमिति।

ब्रह्मपुराणे।

मासं तृप्तिः पितॄणान्तु हविष्यान्नेन जायते।
मासद्वयं मत्स्यमांसैस्तृप्तिं यान्ति पितामहाः॥
त्रीन्मासान् हारिणं मांसं विज्ञेयं पितृतृप्तये।
प्रीणाति चतुरोमासान् शशीयैः पिशितैः पितॄन्॥
शाकुनं पञ्च वै मासान् षण्मासान् शूकरामिषम्।
छागलं सप्त वै मासानैणञ्चैवाष्टमासिकीम्॥
करोति तृप्तिं नव वै रुरुमांसं न संशयः।
गवयस्य मांसं तृप्तिं करोति दशमासिकीम्॥
तथैकादशमासांस्तु औरभ्रं पितृतृप्तिदम्।
संवत्सरं तथा गव्यं पयः पायसमेव च॥
वार्ध्रीणसामिषं लोहं कालशाकं तथा मधु।
दुहित्रामिषमन्नञ्च दत्तान्यात्मकुलोद्भवैः॥
अनन्तां वै प्रयच्छन्ति तृप्तिं गौरीसुतस्तथा।
पितॄणां नात्र सन्देहो गयाश्राद्धञ्च भो द्विजाः॥

'दुहित्रामिषम्' खड्गमांसम्।

कूर्म्मपुराणे।

व्रीहिभिश्च यवैर्माषैरद्भिर्मूलफलेन वा।
श्यामाकैश्चणकैः शाकैः नीवारैश्च प्रियङ्गुभिः॥

गोधूमैश्च तिलैर्मुद्गैर्मासं प्रीणयते पितॄन् ।
द्वौ मासौ मत्स्य-मांसेन त्रीन्मासान् हारिणेन तु ॥
औरभ्रेणाथ चतुरः शाकुनेनेह पञ्च तु ।
षण्मासान् मृगमांसेन पार्षतेनेह सप्त वै ॥
अष्टावेणस्य मांसेन रौरवेण नवैव तु ।
दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः ॥
शशकच्छपयोर्मांसं मासानेकादशैव तु ।
संवत्सरन्तु गव्येन पयसा पायसेन तु ॥
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ।
कालशाकं महाशल्काः खड्गलोहामिषं मधु ॥
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्व्वशः ।

प्रभासखण्डे ।

गुणैश्च सूपशाकाद्यैर्नानाभक्ष्यैस्तथैव च ।
अन्नन्तु सुदधिक्षीर गोघृतं शर्करान्वितम् ॥
मासं प्रीणाति वै सर्व्वान् पितॄनित्याह बाहुजः ।
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु ॥
औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै ।
सप्त लोहस्य मांसेन तथाष्टावेणजेन तु ॥
पृषतस्य तु मांसेन तृप्तिर्मासान् नवैव तु ।
दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः ॥
शशकूर्म्मस्य मांसेन मासानेकादशैव तु ।
संवत्सरन्तु गव्येन पयसा पायसेन वा ॥
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ।
कालशाकेन चानन्त्यं खड्गमांसेन चैव हि ॥
यत्किञ्चिन्मधुसंमिश्रं गोक्षीरघृतपायसम् ।
दत्तमक्षय्यमित्याहुः पितरः पूर्व्वदेवताः ॥

वायुपुराणे ।

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते श्राद्धेन तु पितामहाः ॥
मत्स्यैस्तृप्यन्ति द्वौ मासौ त्रीन्मासान् हरिणेन तु ।
शशस्तु चतुरोमासान् पञ्च प्रीणाति शाकुनम् ॥
वाराहेण तु षण्मासान् छागलं सप्तमासिकम् ।
अष्टमासिकमित्युक्तं यच्च वै पार्षतं भवेत् ॥
रौरवेणतु प्रीयन्ते नव मासान् पितामहाः ।
गवयस्य तु मांसेन तृप्तिः स्याद्दशमासिकी ॥

कूर्म्मस्यैव तु मांसेन मासानेकादशैव तु ।
श्राद्धमेवं विजानीयात् गव्यं संवत्सरं भवेत् ॥
तथा गव्यसमायुक्तं पायसं मधुसर्पिषा ।
वार्धीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥
आनन्त्याय भवेद्दत्तं खड्गमांसं पितृक्षये ।
गयायामक्षयं श्राद्धं जपोहोमस्तथैव च ॥
पितृक्षये हि सा प्रोक्ता तस्मात्तत्राक्षयं स्मृतम् ।
कृष्णछागस्तथा लोह आनन्त्यायैव कल्प्यते ॥

महाभारते ।

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते श्राद्धेन पितरो नृप ॥
द्वौ मासौ तु भवेत्तृप्तिर्मात्स्यैः पितृगणैः सह ।
त्रीन्मासानाविकेनाहुश्चतुर्मासान् शशेन तु ॥
आजेन मासान् प्रीयन्ते पञ्च वै पितरो नृप ।
वराहेण तु षण्मासान् सप्त वै शाकुनेन च ॥
मासानष्टौ पार्षतेन रौरवेण नवैव तु ।
गवयस्य तु मांसेन तृप्तिर्मासान् दशैव तु ॥
मासानेकादश प्रीतिः पितृणां माहिषेण तु ।
गव्येन दत्ते श्राद्धे तु संवत्सरमिहोच्यते ॥
यथा गव्यं तथा युक्तं पायसं सर्पिषा सह ।
वार्धीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥
आनन्त्याय भवेद्दत्तं खड्गमांसं पितृक्षये ।
कालशाकञ्च लोहञ्चाप्यनन्तं छागमुच्यते ॥
गाथाश्चाप्यत्र गायन्ति पितृगीता युधिष्ठिर ।
अपि नः स कुले जातो यो नो दद्यात् त्रयोदशीम् ॥
आपोमूलफलं मांसमन्नञ्चापि पितृक्षये ।
यत्किञ्चिन्मधुसंमिश्रं तदानन्त्याय कल्प्यते ॥

नागरखण्डे ।

अप्राप्तौ खड्गमांसस्य तथा वार्ध्रीणसस्य च ।
मधुना सह दातव्यं पायसं पितृतृप्तये ॥
तेनापि वार्षिकी तृप्तिः पितृणाञ्चोपजायते ।
अभावे चापि तस्यापि शिशुमारसमुद्भवम् ॥
मांसन्तु तृप्तये प्रोक्तं वत्सरं मासवर्जितम् ।
तदभावे वराहोत्थं दशमासप्रतुष्टिदम् ॥
आरण्यमाहिषोत्थेन तृप्तिः स्यान्नवमासिकी ।
रुरोश्चैवाष्टमासान् वै एणस्य सप्तमासिकी ॥

छागस्य मासषट्कञ्च शशकस्य च पञ्च वै।
चतुरः शल्यकस्योक्तास्त्रयो विष्किरिकस्य च॥
मासद्वयञ्च मत्स्यस्य मांसं कपिञ्जलस्य च।
नान्येषां योजयेन्मांसं पितृकार्ये कथञ्चन॥
एतेषामपि चाभावात् पायसञ्च नराधिप॥

योजयेदिति शेषः।

इति कालविशेषावच्छेदेन तृप्तिकराणि द्रव्याणि।

अथान्नानि।

तत्र धान्यफलमूलादीनां साक्षादभ्यवहार्यभक्ष्यभोज्यलेह्य-पेयचोष्यरूप स्वविकार प्रकृतिभावेन श्राद्धसम्बन्धात् धान्यादीनां ग्राह्यत्ववर्ज्यत्वप्रतिपादनं तद्विकारग्राह्यत्व-वर्ज्यत्वपर्यन्तमिति ग्राह्यद्रव्यसाध्यस्यान्नस्य ग्राह्यत्वं वर्ज्यसाध्यस्य च वर्ज्यत्वमिति सिद्धमेव। अतो यद्ग्राह्यद्रव्यविकाराणां सामान्यतो ग्राह्यत्वं वचनैः प्रतिपाद्यते तत् स्पष्टत्वार्थम्। यच्च विशेषतो विकारविशेषाणामपूपपायसादीनां तदन्येभ्यो विकारेभ्योऽपि प्रशस्ततरत्वप्रतिपादनार्थमिति विवेक्तव्यम्।

तत्र ग्राह्याण्युच्यन्ते।

आह प्रचेताः।

पायस-तिलकृशर-ब्रह्मसुवर्चला-हरित-मुद्ग–कृष्णमाष-श्यामाक-प्रियङ्गु–यव गोधूमेक्षुविकारांश्च दद्यात्। तिलतण्डुलसिद्धोदनः 'कृशरः' 'ब्रह्मसुवर्चलाः' आदित्यभक्ताः। विकारशब्दः प्रत्येकं प्रकृतिभिः सम्बध्यते। विहितद्रव्यप्रकृतिकाभ्यवहार्याशेषविकारोप-लक्षणार्थमिति।

देवलः।

ततोऽन्नं बहुसंस्कारं नैकव्यञ्जनभक्ष्यवत्।
चोष्यपेयसमृद्धञ्च यथाशक्त्युपकल्पयेत्॥

'बहुसंस्कारं' सूपकारशास्त्रोपदिष्टैः समृद्धतरगृहजनप्रतिसिद्धैर्हिङ्गुमरिचैलाकर्पूरादियुक्तिजन्यैरभिज्ञरसनीयैरतिशयविशेषैर्युक्तम्। 'नैकव्यञ्जनभक्ष्यवत्' व्यज्यतेनेनान्नस्य रस इति, 'व्यञ्जनं' सूपशाकादिकम्। दन्तैरवखण्ड्य यद् भुज्यते तद् 'भक्ष्यम्'। यस्य ओष्ठदशनरसनादिभिर्निपीडितस्य सफूत्कारेण मुखमारुतेन रसो निष्पीयते तत् 'चोष्यम्' यथेक्षुखण्डादिकम्'। 'पेयं' द्रवैकस्वभावं पानकादि। उपलक्षणं चैतद्भोज्य-लेह्ययोः। यत्त्वनतिकाठिन्याददतिप्रयत्नवत्खण्डनानपेक्षं चर्व्वयित्वैव निगीर्य्यते तत् 'भोज्यम्'। यत्तु सान्द्रद्रवस्वभावतया दशनानपेक्षेण रसनाव्यापारेणाश्यते तत् 'लेह्यम्'। 'यथाशक्ति' शक्तिमनतिक्रम्य। 'उपकल्पयेत्' सम्पादयेत्।

ब्रह्मपुराणे ।

गुड़-शर्कर-मत्स्यण्ड्यो देयं फाणित-मुर्मुरम् ।
गव्यं पयो दधि घृतं तैलञ्च तिलसम्भवम् ॥

पाकाद् घनीभूतो गोलाकारेणोपनिबद्धेक्षुरसः 'गुड़ः'। इक्षुरसपाकप्रभव एव श्वेतवर्णचूर्णात्मको विकारः 'शर्करा'। उत्कृष्टः शर्कराभेदः 'मत्स्यण्डी'। ईषत् कथितस्येक्षुरसस्य द्रव एव विकारः 'फाणितम्'। गुड़मरिचैलामिश्रो गोधूमस्थूलचूर्णविकारः 'मुर्मुरः'। तैलमित्यादि, तिलसम्भवमेव तैलं देयं नान्यत्। अयञ्च श्राद्धार्थप्रदीपप्रवर्त्तकस्य श्राद्धीयशाकपाकार्थस्याभ्यङ्गोद्वर्त्तनार्थस्य च तैलस्य नियमायोपदेशोऽनुसन्धेयः ।

तथा ।

पायसं शालिमुद्गाढ्यं मोदकादींश्च भक्तितः ।
पूरिकाञ्च रसालाञ्च गोक्षीरञ्च नियोजयेत् ॥
यानि चाभ्यवहार्य्याणि स्वादुस्निग्धानि भो द्विजाः ।
ईषदुष्णकटून्येव देयानि श्राद्धकर्म्मणि ॥

'मोदकः' लड्डुकः । 'पूरिका' अनेनैव नाम्ना प्रसिद्धः अपूपविशेषः । शर्करात्वगेलानागकेसरमधुमरिचमिश्रमनुद्धृतस्नेहभागं वस्त्रे संघृष्य गालितं गोदधि 'रसाला'।

तदुक्तमायुर्वेदे ।

सिताचतुर्जातमधूषणाढ्यं,
दधि प्रघृष्टं सरसं रसालेति ।

तथा ।

मृष्टस्निग्धानि यानि स्युरीषत्कट्वम्लकानि च ।
स्वादूनि देवभोज्यानि तानि श्राद्धे नियोजयेत् ॥

कूर्म्मपुराणे ।

लाजान् मधुयुतान् दद्यात् सक्तून् शर्करया सह ।
दद्याच्छ्राद्धे प्रयत्नेन शृङ्गाटबिससेबुकान् ॥

किञ्चिदार्द्रीकृत्य भृष्टाः शालयः 'लाजाः'। शर्करायुतानि भृष्टयवपिष्टानि 'सक्तवः'। वायुपुराणे ।

भक्ष्यान् वक्ष्ये करम्भञ्च इष्टका घृतपूरकाः ।
कृशरं मधु सर्पिश्च पयः पायसमेव च ॥
स्निग्धमुष्णञ्च यो दद्यादग्निष्टोमफलं लभेत् ।

करम्भस्य विहितप्रतिषिद्धत्वाद्विकल्पः। इष्टकाकृतिः खण्डेष्टकाख्यो भक्ष्यविशेषः 'इष्टका'। घृताक्तदुग्धालोड़ितैः शालिगोधूमपिष्टसारैर्विहितापूपविशेषाः[१]

[१] पूरीविशेषा इति ।

'घृतपूराः'। 'सर्पिः' आज्यं, तच्च गव्यं माहिषं वा। 'पयः' क्षीरं, तच्च गव्यमेव। 'स्निग्धं' स्नेहद्रव्यसंस्कृतम्। 'उष्णं' ईषदुष्णम्। 'अग्निष्टोमः' ज्योतिष्टोमस्याद्या संस्था।

उष्णं दद्यादित्यस्यापवादः सौरपुराणे।

विविधं पायसं दद्याद्भक्ष्याणि विविधानि च।
लेह्यं चोष्यं यथाकाममुष्णमेव फलं विना॥
विविधान्यपि मांसानि पितॄणां पितृपूर्व्वकम्॥

अत्राग्निपकात् फलादन्यत् फलं विनेति बोद्धव्यम्। पकस्य कदुष्णस्यैव स्वादुत्वात् तथाविधस्यैव दानं युक्तम्। उपलक्षणं चैतदपकभक्ष्याणां कन्दमूलादीनाम्।

अतएव कूर्म्मपुराणे।

उष्णमन्नं द्विजातिभ्यो दातव्यं श्रेय इच्छता।
अन्यत्र फलमूलेभ्यः पानकेभ्यस्तथैव च॥

'पानकानि' गुड़मरिचशर्कर्रैलाकर्पूरादिसंस्कृतापकद्राक्षाकदलादिफलद्रवाः।

भविष्योत्तरे।

उष्णमन्नन्तु विप्रेभ्यः श्रद्धया विनिवेदयेत्।
अन्यत्र फलमूलेभ्यः पानपुष्पादिकांस्तथा॥

वायुपुराणे।

दधि गव्यमसंसृष्टं भक्षान्नानाविधानपि।
दत्वा न शोचति श्राद्धे वर्षासु च मघासु च॥

'असंसृष्टं' असंपृक्तम्। महिष्यादिक्षीरविकारैः अपवित्रद्रव्यान्तरेण वा भक्षवटकमण्डकमोदकादयो लोकसिद्धप्रकारका एव विशिष्टतरश्राद्धाचरणसमुत्पादितपरिपुष्ट-पारलौकिक-सुखोत्पादक-सुकृतराशित्वादकृतान्यबहुपुण्योऽपि स्वर्गसुखाभाव-निमित्तकं शोकं न करोति।

तथा।

घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेत्।
शर्कराक्षीरसंयुक्ताः पृथुका नित्यमक्षयाः॥
स्युश्च संवत्सरं प्रीता बर्करैर्मेषकैणकैः।
सक्तून्लाजांस्तथापूपान् कुल्माषान् व्यञ्जनैः सह॥
सर्पिःस्निग्धानि सर्वाणि दध्ना संस्कृत्य भोजयेत्।
श्राद्धेष्वेतानि यो दद्यात् पितरः प्रीणयन्ति तम्॥

घृतं भूमौ समुत्सृजेदित्यस्य घृतबाहुल्ये तात्पर्य्यम्। तथा घृतं परिवेष्यं यथा पात्रमापूर्य्य भूमावप्युपसर्पति। अङ्गारभृष्टकणिशगलिता धान्यकणाः 'पृथुकाः'। 'बर्करैः' तरुणैः। 'मेषैः' उरभ्रैः। 'पूपाः' पूपलिकादि बहुभेदाः। अर्द्धस्विन्नानि धान्यानि 'कुल्माषाः'।

कूर्म्मपुराणे ।

अथ पिण्डावशिष्टान्नं विधिवद्भोजयेद्द्विजान् ।
मांसान्यपूपान् विविधान् दद्यात्कृसरपायसम् ॥
पूपशाकफलानीक्षून् पयोदधि घृतं मधु ।
अन्नं चैव यथाकामं विविधं भोज्यपेयकम् ॥
यद् यदिष्टं द्विजेन्द्राणां तत्तत्सर्वं निवेदयेत् ।
धानांस्तिलांश्च विविधान् शर्करा विविधास्तथा ॥

अथेत्यग्नौकरणकालीनपिण्डप्रदानानन्तरम् ।

कालिकापुराणे ।

पायसं मधुसर्पिर्भ्यां खण्डेन च विमिश्रितम् ।
आदौ पिण्डान् समुद्दिश्य द्विजेभ्यस्तदनन्तरम् ॥

दद्यादिति शेषः ।

देवलेन तु प्रदेयस्यान्नस्य तिलादिसाहित्यमुक्तम् ।

अथ पिण्डावशिष्टान्नं भोजयेत्प्रयतो द्विजान् ।
भोजनैः सतिलैः स्नेहैर्भक्ष्यपूपविमिश्रितैः ॥

मैत्रायणीयसूत्रे तु परिवेषणीयस्य मध्वादिसाहित्यमप्युक्तम् ।

तिलवन्मधुमच्चान्नं सामिषञ्च दद्यादिति ।

प्रदेयस्यान्नस्य प्रभूतत्त्वं तु पिप्पलादसूत्रे प्रतिपादितम् ।

मांसैः शाकैर्माषैर्मधुना घृतेन दध्ना पयसा च प्रभूतमन्नमिष्टं दद्यात् ।

शङ्खलिखितौ ।

ततस्तिलैर्माषैः शाकैः पूपैः कृसरपायसापूपैर्लाजैर्भक्ष्यैः पानैर्मधुना घृतेन दध्ना पयसा च प्रभूतमिष्टमन्नं दद्यात् ।

तत इत्यग्नौकरणशेषप्रतिप्रत्युत्तरकालं । यच्च जीवतः पित्रादेर्भक्ष्यभोज्यादिकं प्रियमासीत् तत् पितृताङ्गताय तस्मै श्राद्धे देयम् ।

तदाह कार्ष्णाजिनिः ।

यदिष्टं जीवतश्चासीत्तद्दद्यात्तस्य यत्नतः ।
सुतृप्तौ दुस्तरं मार्गं ततो याति न संशयः ॥

पायसाद्यन्नविशेषदाने फलविशेषाः ।

तत्र ब्रह्मवैवर्त्ते ।

सदान्नं पायसं सर्पिर्मधुमूलफलानि च ।
भक्षांश्च विविधान्दत्वा परत्रेह च मोदते ॥
नवशस्यानि यो दद्यात् श्राद्धं सत्कृत्य यत्नतः ।
सर्वान् भोगानवाप्नोति पूज्यते च दिवङ्गतः ॥

भक्ष्यभोज्यानि चान्यानि प्रलेह्यान्यपराणि च।
सर्वश्रेष्ठानि यो दद्यात् सर्व्वश्रेष्ठो भवेन्नरः॥
वैश्वदेव्यञ्च सौम्यञ्च खङ्गमांसं वरं हविः।

प्रभासखण्डे।

तिलानिक्षूंस्तथा भोज्यं श्राद्धे सत्कृत्य दापयेत्।
मित्राणि लभते लोके स्त्रीषु सौभाग्यमेव च॥

भगवतीपुराणे।

सर्वेषामेव चान्नानां परमान्नञ्च पायसम्।
सर्वान्नदः स तु प्रोक्तो येन दत्तन्तु पायसम्॥
पायसेन पितॄन्प्रीणन्प्रीणाति सुधया नरः।
कपिलापायसं गव्यं पयः सर्पिस्तथामिषम्।
मधु वेत्यक्षयां तृप्तिं पितॄणां साधयन्ति हि॥

मत्स्यपुराणे।

यत्किञ्चिन्मधुना मिश्रं गोक्षीरघृतपायसैः।
दत्तमक्षय्यमित्याहुः पितरः पूर्वदेवताः॥

यत्किञ्चिद्भक्ष्यभोज्यं मधुमिश्रितं गोक्षीरघृतपायसैः सहितमक्षय्यमित्यर्थः।

पयसा प्राप्नुयाच्चैव गोक्षीरं गोसवे फलम्।
सर्पिषा तु शुभं चक्षुः षोडशाहफलं लभेत्॥
मधुना तु त्रिरात्रस्य फलञ्च समवाप्नुयात्॥
अन्नं नरः प्राप्नुयाच्छ्रद्दधानः सर्वैः कामैर्भोजयेद्यस्तु विप्रान्।
सर्वार्थदः सर्वविप्राभिवन्द्यः फलं भुंक्ते सर्वमेधस्य नित्यम्॥

इति ग्राह्याण्यन्नानि।

अथवर्ज्यान्यन्नानि।

तत्राह शाट्यायनिः।

वर्ज्यमन्नं त्रिधाप्रोक्तमाद्यमाश्रयगर्हितम्।
जातितो गर्हितं यच्च यच्च भावादिदूषितम्॥
अभोज्यान्नं विजानीयादन्नमाश्रयगर्हितम्।
लशुनादिकमन्नं यत् ज्ञेयं जातिविगर्हितम्॥
दुष्टं भावक्रियावस्थासंसर्गैस्तु तृतीयकम्।

अभोज्यान्नमिति तच्च परिभाषाप्रकरणे वक्ष्यते। तत्र कारणगतजातिदुष्टतया वर्ज्यानि वर्ज्यधान्याभिधानेनैवाभिहितानि भावक्रियासंसर्गावस्थादुष्टतया वर्ज्यानि तूच्यन्ते।

विश्वामित्रः ।

जातिक्रियादुष्टमसत्संसर्गदुष्टं सकृल्लेखं न भक्षयेत् ।

आह गोभिलः ।

अतिशुक्तोग्रलवणं विरसं भावदूषितम् ।
राजसं तामसं चैव हव्यकव्येषु वर्जयेत् ॥

'अतिशुक्तं' यत् स्वयमनम्लं द्रव्यान्तरेण संपृष्टं वा कालवशादुत्पन्नातिकुत्सितरसं । 'उग्रलवणं' लवणाधिक्येन मुखोद्वेगकरं । 'विरसं' स्वभावतोऽतिमन्दरसं, कालादपगतस्वाभाविकरसं वा । 'भावदूषितं' कार्पण्यकुत्साकुत्सितसारूप्यारोपादिभिरन्तः करणविकारैर्दूषितं । 'राजसं' रजोगुणस्य कार्यं कारणं वा । एवं तामसम् ।

तच्चोभयमुक्तं भगवद्गीतासु ।

कट्वम्ल लवणात्युष्ण तीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥
यातयामङ्गतरसं पूतिपर्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥

अतः सात्विकमेवान्नं प्रशस्तम् । तदपि तत्रैव दर्शितम् ।

आयुः सत्त्वबलारोग्य सुखप्रीतिविवर्द्धनाः ।
रसाः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रिया इति ।

'हव्यकव्येषु' हव्यकव्यसाध्येमु कर्म्मसु ।

ब्रह्माण्डपुराणे ।

आसनारूढमन्नाद्यं पादोपहतमेव च ।
अमेध्यादागतैः स्पृष्टं शुक्तं पर्युषितञ्च यत् ॥
द्विःस्विन्नं परिदग्धञ्च तथैवाग्रावलेहितम् ।
शर्कराकीटपाषाणैः केशैर्यच्चाप्युपद्रुतम् ॥
पिण्याकं मथितञ्चैव तथातिलवणञ्च यत् ।
सिद्धाः कृताश्च ये भक्ष्याः[१] प्रत्यक्षलवणीकृताः ॥
वाग्भावदुष्टाश्च तथा[२] दुष्टैश्चोपहता अपि ।
वाससा चोपधूतानि वर्ज्यानि श्राद्धकर्म्मणि ॥

'आसनारूढं' साक्षादासनस्योपरिस्थापितं, भूव्यतिरिक्ताधिकरणस्थापितपात्रस्थितं वा । 'अन्नाद्यं' अदनार्हमन्नं, 'पादोपहत' साक्षात् भाजनद्वारा वा पादस्पर्शदूषितम् । 'अमेध्यादागतैः' अपवित्रस्पर्शदूषितैश्चेतनाचेतनैः स्पृष्टम् । 'शुक्तं' पूर्व्वमुक्तम् । 'पर्युषितं' रात्र्यन्तरितम् । 'द्विः स्विन्नं' वारद्वयं पक्वम् । यदन्नमवश्रयणान्तं पचिक्रियया-सिद्धं सन्मार्दवाय पुनरुदकं निनीयावस्रावरणान्तमेव पच्यते तत् द्विः स्विन्नम् । न तु यत्सिद्धमेव पुनरौष्ण्यनिर्वाहार्थमग्निसन्निधौ स्थाप्यते । 'अत्युष्णं सर्वमन्नं स्यात्' इति

[१] भक्ता इति ।　　[२] वासावदुष्टाश्च तथेति ।

वचनात्। अतएव पुनर्व्विलाप्यमानमाज्यमाप न द्विः स्विन्नम्। यस्य तु सूरणादेरधिश्रयणद्वयेनैव सिद्धिः प्रसिद्धा तस्य तावदवयव एक एवासौ पाक इति, तत्रापि न द्विः पक्वता। 'परिदग्धं' द्रवांश संशोषणात् भाण्डाग्निना परिप्लुष्टम्। 'अग्रावलेहितं' अग्रे उपरिभागे मार्जारादिभिरवलीढं, पूर्वमन्येनास्वादितैकदेशं वा। 'शर्कराः' श्वेताश्मजातिविशेषः। 'कीटाः' पिपीलिकादयः। 'पाषाणः' दृषत्। 'केशः' कचः। एतैर्दूषितं अन्तः प्रविश्याभक्ष्यतां नीतं 'मथितम्' आलोडितं दधि। 'अतिलवणम्' अतिमात्रलवणयुक्तम्। 'सिद्धाः कृताश्च ये भक्ष्याः' येषु तैलपक्वगोधूमचूर्णमयवर्त्तिशोषितफल-फाणि-पर्पटकादिरूपेषु भक्ष्येषु चिरकालस्थितेष्वपि पर्युषितव्यवहारो नास्ति ते भक्ष्याः सिद्धाः कृता इत्युच्यन्ते। 'प्रत्यक्षलवणीकृताः' भोक्तरि पश्यति लवणेन संयोजिताः। 'वाग्दुष्टाः' निन्दादिरूपया वाचा दूषिताः। 'दुष्टैश्चोपहताः' श्व-शूकर-काक-कुक्कुटादिभिर्नग्न-पतित-पाषण्डादिभिश्च दर्शन-स्पर्शनादिगोचरीकृताश्च ये भक्ष्याः। 'वाससा चोपधूतानि' येषामुपरि मक्षिकापगमार्थमौष्ण्यनिवृत्तये वा प्रसङ्गान्तरेण वा वस्त्रमवधूयते तान्यन्नानि तथोच्यन्ते।

मनुः।

केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः।
भ्रूणघ्नावेक्षितञ्चैव संस्पृष्टञ्चाप्युदक्यया॥
पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च।
गवा चान्नमुपघ्रातं घुष्टान्नञ्च विशेषतः॥
शुक्तं पर्युषितञ्चैव शूद्रस्योच्छिष्टमेव च।
वृथाकृशरसंयाव पायसापूपमेव च॥
अनुपाकृतमांसञ्च देवान्नानि हवींषि च॥

केशकीटैरवपन्नं संस्पृष्टं 'केशकीटावपन्नम्'। केशग्रहणं नखरोम्नां दूषिकादिमलानाञ्च प्रदर्शनार्थम्। कीटग्रहणं क्षुद्रजन्तूनां कृमि-पतङ्गामाम्। कीटेषु च मक्षिकादयो मृता एव दूषयन्ति न जीवन्तः, अन्ये तु जीवन्तोऽपि। 'कामतः' बुद्धिपूर्वम्, कामकारेण यत्पादस्पृष्टं, अतः प्रमादस्पृष्टे न दोषः। 'भ्रूणहा' ब्रह्महा, तेनावेक्षितं निपुणमवलोकितं। प्रदर्शनार्थं चैतदन्येषां महापातकिनां। स्पृष्टस्य तु प्रतिषेधः स्नानविधानादेव सिद्धः। 'उदक्या' रजस्वला, तया स्पृष्टस्यैव प्रतिषेधो नावेक्षितस्य। उदक्यास्पृष्टस्यापि स्नानविधानादेव प्रतिषेधसिद्धौ प्रक्षालितमपि तदन्नं भोज्यमित्येतदर्थं स्पृष्टग्रहणम्। 'पतत्री' पक्षी स च समाचारात् क्रव्यादो गृध्र-वायसादिः, न तु शुक-हंसादिः। 'घुष्टान्नं' भुज्यतामत्र ये केचिदर्थिन इति यदुद्घुष्य दीयते। यद्वान्यस्मै प्रतिश्रुत्यान्यस्मै दीयते। प्रतिज्ञाने ह्ययं धातुः पठ्यते। शूद्रस्य' शूद्रस्वामिकं यदन्नं। 'उच्छिष्टं' भुक्तावशिष्टम्। तिलैः सह सिद्धौदनः 'कृशरः'। 'संयावः' तिलसर्पिर्गुडादिसहित–गोधूमशकलनिर्म्मितो भक्ष्यविशेषः सूदेषु प्रसिद्धः। पयसि सिद्धौदनः 'पायसः'। 'अपूपः' अस्नेहपक्को गोधूमविकारः। वृथाशब्दः सर्वत्रानुषज्यते। यदात्मार्थं क्रियते देवान् पितृनतिथीन् वानुद्दिश्य तद्वृथा। 'अनुपाकृतम्' अप्रोक्षितं मांसम्। 'देवान्नानि' देवस्वीभूतान्यन्नानि'। 'हवींषि' देवतार्थमुपकल्पितानि।

याज्ञवल्क्यः ।

अनर्चितं वृथामांसं केशकीटसमन्वितम् ।
शुक्तं पर्युषितोच्छिष्टं[1] श्वस्पृष्टं पतितेक्षितम् ॥
उदक्यास्पृष्ट——संघुष्ट——पर्यायान्नञ्च वर्जयेत् ।
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टञ्च कामतः ॥

तथा ।

वृथाकृसरसंयावपायसापूपशष्कुलीः ।

'अनर्चितं' अर्चार्हाय यदवज्ञया दीयते । 'वृथामांसं' देवाद्यर्चनशिष्टं न भवति, आत्मार्थमेव यत्साधितं, तच्च प्राणत्ययादिव्यतिरेकेण वर्जयेत् । 'श्वस्पृष्टं' शुनास्पृष्टं । अन्यसम्बन्धव्यपदेशेन यद्दीयते तत् 'पर्यायान्नम्' । पर्याचान्तमिति पाठे परिगतमाचान्तं गण्डूषग्रहणं यस्मिन्भुज्यमाने तत् 'पर्याचान्तम्' । पार्श्वाचान्तमिति पाठे एकस्यां पङ्क्तौ पार्श्वस्थे आचान्ते न भोक्तव्यम्, भस्मोदकादिविच्छेदो न कृतश्चेत् । 'शकुनः' क्रव्यादपक्षी । स्नेहपक्वो गोधूमविकारः 'शष्कुली' ।

यमः ।

उदक्यया च संस्पृष्टं गवाघ्रातञ्च यद्भवेत् ।
काक-कुक्कुटसंस्पृष्टं शुक्तञ्च कृमिसंयुतम् ॥
अभोज्यं च द्विजातीनां धर्म्मराजवचो यथा ।
यवागूं कृसरञ्चैव पायसापूपशष्कुलीः ॥
ऋजीषपक्वमांसञ्च मत्स्यानप्यनुपाकृतान् ।
वर्जयेत्सर्वशुक्तानि देवान्नानि हवींषि च ॥
स्नेहेन तु समायुक्तं नैव सर्वं प्रयोजयेत् ।

तथा ।

अवधूतमवज्ञातं सरोषं विस्मयान्वितम् ।
गुरोरपि न भोक्तव्यमन्नं संस्कारवर्जितम् ॥
अवघुष्टं यदुच्छिष्टं वागदुष्टमपि यद्भवेत् ।
अश्रद्धया हुतं दत्तमभोज्यञ्च द्विजातिभिः ॥

तथा ।

भिन्नभाण्डे न भुञ्जीत न रात्रौ दधिसक्तुकान् ।
दिवा दधित्थधानासु रात्रौ च दधिसक्तुषु ॥
श्लेष्मातके तथा लक्ष्मीर्नित्यमेव कृतालया ॥

यवागूप्रभृतीन्यात्मोद्देशेन साधितान्यभक्ष्याणि । अनवश्रावितोविरलद्रव ओदनः 'यवागूः' । 'ऋजीषं' पिष्टपचनभाण्डं । अनग्निक उष्मा 'ऋजीषं' तेन धान्यराश्यादिगतोष्मपक्वमिति स्मृतिचन्द्रिकायाम् । 'अवधूतं' वाससा । 'दधित्थं' कपित्थं' । 'धानाः' भृष्टयवाः ।

---

[1] पर्य्युषितं शिष्टमिति ।

देवलः ।

अभोज्यं प्राहुराहारं शुक्तं पर्युषितञ्च यत् ।
अन्यत्र मधु-सक्तुभ्यां भक्ष्येभ्यः सर्पिषो गुडात् ॥
नाश्नीयात् पयसा नक्तं भुक्तं चेन्न स्वपेन्निशि ।
न चीरमुत्सृजेत् प्राप्तं पवित्रं हि पयः स्मृतम् ॥

गौतमः ।

उद्धतस्नेहविलयन-पिण्याक-मथितप्रभृतीनि चात्तवीर्याणि नाश्नीयात् ।

'विलयनं' भक्तमण्डः ।

आपस्तम्बः ।

विलयनं मथितं पिण्याकं मधुमांसं वर्जयेत् । कृष्णधान्यञ्च शूद्रान्नं ये चान्ये नास्य सम्मताः । अहविष्यमनृतं क्रोधं येन च क्रोधः स्मृतिमिच्छन् यशो मेधां स्वर्गं बुद्धिं द्वादशैतानि वर्जयेत् ।

तथा ।

अप्रयतोपहतमन्नमप्रयतमभोज्यम् । अप्रयतेन शूद्रेणोपहतमभोज्यम् । यस्मिंश्चान्ने केशः स्यादन्यद्वाऽमेध्यममेध्यैरवस्पृष्टं कीटो वाऽमेध्यः । सदा मूलकलिङ्गं वा पदाचोपहतं शिवया शुना वाप्यपात्रेण वा दृष्टं शुचा वोपहतं भुञ्जानं श्वा शूद्रो वा उपस्पृशेदनर्हद्भिर्वा समानपङ्क्तौ भुञ्जानेषु वा यत्रानुत्थायोच्छिष्टं प्रयच्छेदाचामेद्वा कुत्सयित्वा वा यत्रान्नं दद्युः गोभिरवघ्रातमन्यैर्वाऽमेध्यैः ।

तथा ।

नापणीयमन्नमश्नीयात्तथा रसानां मांसं मधुलवणानि परिहाप्य तैल-सर्पिषीतूपयोजयेत् । उदकेऽवधाय कृतान्नं पर्युषितमाप्यद्यात् तच्चानाद्यं शुक्तं चेत्यपराणि च पृथुकतण्डुलकरम्भतरुजसक्तुशाकमांसपिष्टक्षीरवृक्षौषधिवनस्पतिमूलफलवर्जं शुक्तञ्चापरियोगम् ।

शङ्खलिखितौ ।

तत्रापेयान्यभक्ष्याणि वर्जयेदमेध्यपतितचाण्डालपुक्कसरजस्वलाकुणपकुष्ठिसंस्पृष्टानि ।

तथा ।

नापणीयमान्नमश्नीयान्न द्विःपक्वं न शुक्तं न पर्युषितमन्यत्ररागचुक्रखाण्डवदधिगुडगोधूमयवपिष्टविकारेभ्यः ।

अश्नीयादित्यनुवृत्तौ हारीतः ।

न रजस्वलादत्तं न पुंश्चल्या न क्रुद्धया न मलवद्वाससा नापरयाद्वारापन्नं न द्विः पक्वं न शुक्तं न पर्युषितमन्यत्र गुड़पिष्टसक्तुस्नेहगोरसतैलादिषु पक्वान्नतैलदध्यन्नपानं नावक्षुतान्नं न जुगुप्सितम् ।

गौतमः।

नित्यमभोज्यं केशकीटावपन्नं रजस्वलाकृष्णशकुनिपदोपहतं भ्रूणघ्नावेक्षितं गवाघ्रातं भावदुष्टं शुक्तं केवलमदधि पुनः सिद्धं पर्युषितान्नशाकभक्ष्यस्नेहमांसमधूनि।

अभोज्यमित्यनुवृत्तौ वशिष्ठः।

अन्नं पर्युषितं भावदुष्टं सकृल्लेखं पुनःसिद्धमाममृजीषपकञ्च कामं तु दध्ना-घृतेनवाभिघारितमुपभुञ्जीत।

तथा।

उच्छिष्टमगुरोर्नभोज्यं समुच्छिष्टमुच्छिष्टोपहतञ्च यद्वसनकेशकीटोपहतञ्च।

वृहस्पतिः।

नाद्याच्छास्त्रनिषिद्धन्तु भक्ष्यभोज्यादिकं द्विजः।
मांसं विगर्हितञ्चैव शुक्तं बहुविधं तथा॥
अत्यम्लं शुक्तमाख्यातं निन्दितं ब्रह्मवादिभिः॥

यमः।

घृतं वा यदि वा तैलं विप्रो नाद्यान्नखच्युतम्।
यमस्तदशुचि प्राह तुल्यं गोमांसभक्षणैः॥
हस्तदत्ताश्च ये स्नेहा व्यञ्जनं लवणानि च।
दातारं नोपतिष्ठन्ति भुक्त्वा भुञ्जीत किल्बिषम्॥
एकेन पाणिना दत्तं शूद्रदत्तञ्च यद्भवेत्।
घृतं तैलञ्च लवणं पानीयं पायसं तथा॥

वर्ज्यमिति शेषः। दर्व्याद्यनन्तर्द्धाय साक्षाद्धस्तेनैव यद्दत्तं तद्धस्तदत्तम्। तथा हस्तेन दत्तं शौद्रं यदपि किमानीयतां तदपि शीतलं शौद्रं शूद्रैः परिविष्टं भवति। अथवा शौद्रं शूद्रोचितं श्राद्धायोग्यमिति यावत्। यदप्योदनाद्यन्नं किं तत्तदर्थमानीय-तामिति पृष्ट्वा आनीतं तदपि शौद्रम्।

भविष्यत्पुराणे।

सुरालशुनसंस्पृष्टं पीयूषादिसमन्वितम्।
संसर्गात् दुष्यते तद्धि शूद्रोच्छिष्टवदाचरेत्॥

इति वर्ज्यान्नानि।

अथैतेषु वर्ज्यत्वेनोक्तेष्वन्नेषु केषाञ्चित् प्रतिप्रसवः क्रियते।

तत्राह मनुः।

दधि भक्ष्यञ्च शुक्तेषु सर्वञ्च दधिसम्भवम्।
यानि चैवाभिषूयन्ते पुष्पमूलफलैः शुभैः॥

तथा।

यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम्।
तत्पर्युषितमप्याद्यं हविःशेषञ्च सर्वशः॥

चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः।
यवगोधूमजं सर्वं पयसश्चैव विक्रियाः॥

'दधिसम्भवम्' उदश्विन्मधुकिलाटकूर्चकादि शुक्तान्युच्यन्ते। यानि मधुर-रसान्यपि कालात्ययेन द्रव्यान्तरसंसर्गेण वात्यम्लीभावमापद्यन्ते, यथाम्रद्राक्षादीनि, यानि तु स्वभावतोऽम्लानि दाडिमामलकजम्बीरादीनि, तानि नैव शुक्तानि। यानि चाप्राप्तपाकान्याम्रादीनि। नह्ययमम्लपर्यायः शुक्तशब्दः। तेषु च केवलानि कालतः शुक्तानि प्रतिषिध्य द्रव्यान्तरैर्मूलादिभिः मिश्रितान्यनुज्ञायन्ते। तथा च गौतमेनोक्तम्, केवलमदधीति।

उदकेन संसृज्य परिवासनं "अभिषवः" पुष्पादिभिः सह यान्यभिषूयन्ते। 'भक्ष्यं' धानाशष्कुलानि। खरविशदभोज्यमोदनादि। अगर्हितमनपेतगन्धवर्णरसं तच्चेत् स्नेहसंयुक्तं सत्पर्युषितं तदा भक्षणीयम्। अभिघारणस्नेहसंयुक्तस्यापि हविः शेषस्य पृथक् ग्रहणमादरार्थम्। 'चिरस्थितं' 'द्वित्रिराज्यन्तरितम्'। 'यवगोधूमजं' अपूपसक्त्वादि, अस्नेहाक्तमपि भोज्यम्। 'पयसः' 'विक्रियाः' विकाराः दधि-मथितादयः।

याज्ञवल्क्यः।

अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम्।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः॥

बृहस्पतिः।

दधि भक्ष्यं शुक्तमपि यच्चैव दधिसम्भवम्।
ऋजीषपक्वं भक्ष्यं स्यात् ससर्पिष्कमिति श्रुतिः॥

तथा।

यवगोधूमजं सर्वं विकाराः पयसश्च ये।
राग-खाडवचुक्राद्यं भक्ष्यं पर्युषितं भवेत्॥
अपूपाश्च करम्भाश्च धानावटक-सक्तवः।
शाकमांसानि पूपश्च सूपं कृशरमेव च॥
यवागूं पायसञ्चैव यच्चान्यत् स्नेहसंयुतम्।
सर्वं पर्युषितं भोज्यं शुक्तञ्च परिवर्जयेत्॥

वशिष्ठः।

अपूप-धाना-करम्भ-सक्तु-वटक-तैल-पायस-शाकानि विना शुक्तानि वर्जयेत्। अन्यांश्च क्षीरयवपिष्टविकारान्।

पैठीनसिः।

कामं दध्ना घृतेनाभिघारितं पर्युषितान्नं भुञ्जीत ये ह्यत्र शुक्तपर्युषितादीनां प्रति-प्रसवास्तेषां पुरुषार्थैकरूपत्वान्न श्राद्धान्नविषयत्वम्। न उष्णं न स्विन्नं दद्यात् न द्विः-पक्वं दद्यात्। प्रातः पाकं समारभेदिति श्राद्धदिन एव पाकारम्भविधानाच्छुद्धपर्यु-षितादिप्रसक्त्यभावाच्च।

यश्च नापणीयमन्नमश्नीयादित्यस्य यमेनापवाद उक्तः ।

अपूपाः सक्तवो धानास्तक्रं दधि धृतं मधु ।
एतत्पुण्येषु भोक्तव्यं भाण्डलेपो न चेद्भवेदिति ॥

सोऽयमपूप-सक्तु-धानाव्यतिरिक्तेषु सम्भवत् प्रसङ्गेषु तक्रादिष्ववतिष्ठते ।

इति वर्ज्यान्नप्रतिप्रसवाः ।

अथ ग्राह्याण्युदकानि ।

आह मनुः ।

आपः शुद्धा भूमिगता वितृष्णा यत्र गौर्भवेत् ।
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः ॥

विष्णुः ।

भूमिस्थमुदकं शुद्धं वितृष्णा यत्र गौर्भवेत् ।
अव्याप्तं चेदमेध्येन तद्वदेव शिलागतम् ॥
भूमिष्ठमुदकं शुद्धं शुचितोयं शिलागतम् ।
गन्धवर्णरसैर्दुष्टैर्वर्जितं यदि तद्भवेत् ॥

उशनाः ।

आपः शुद्धा भूमिगता वितृष्णा यत्र गौर्भवेत् ।
अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः ॥

देवलः ।

अविगन्धा रसोपेता निर्मलाः पृथिवीगताः ।
अक्षीणाश्चैव गोपानादापः शुद्धिकराः स्मृताः ॥
उद्धृता वा प्रशस्यन्ते शुद्धैः पात्रैर्यथाविधि ।
एकरात्रोषितास्तास्तु त्यजेदापः समुद्धृताः ॥
अक्षुद्राणामपां नास्ति प्रभूतानाञ्च दूषणम् ।
स्तोकानामुद्धृतानाञ्च कश्मलैर्दूषणं भवेत् ॥
तत्र क्षुद्रतड़ागानि नद्यो वाथ सरांसि च ।
कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेत् ॥

याज्ञवल्क्यः ।

शुचिगोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् ।

अदुष्टानभिधाय वशिष्ठः ।

क्षितिस्थाश्चैव या आपो गवां तृप्तिकराश्च याः ।
परिसङ्ख्याय ताः सर्वा शुचीनाह प्रजापतिः ॥

शुचिरद्भिरिति चानुवृत्तौ वशिष्ठः ।

प्रदरादपि[१] या गोस्तर्पणाय स्युर्न वर्णरसदुष्टास्ताभिर्याश्च न स्युरशुभागमाः ।

---

[१] प्रदरोगतं इति पारिजाते ।

शङ्खलिखितौ ।

आपो रूप-रस-गन्धवत्यः परिशुद्धा जीवचर्मकरण्डैरनभ्युद्धृताः[1] भूमिगता मेध्या यत्र गौर्वितृषा भवेत् ।

पैठीनसिः ।

गन्ध-वर्णशुद्धा आपो भूमिगताः वितृष्णा यत्र गौर्भवेत् । विपर्यस्तं महोदकमपि वर्ज्यम् ।

यमः ।

प्रपामरण्ये च घटञ्च कूपे द्रोण्यां जलं कोशगतास्तथापः ।
कृतेऽपि शूद्रात्तदपेयमाहुरापद्गतो भूमिगतं पिबेत्तु ॥

हारीतः ।

भूमिष्ठाः पुण्याः आपोऽशुभवर्जमथापि ब्राह्मणं देवानां वागेषा मत्स्यापः प्राविशंस्ते देवा अद्भ्यो वाचमैच्छंस्तानापोऽब्रुवन् यदस्माकं प्रजाभ्यो यदन्येभ्योऽशुभं तत् पावयध्वं ततो वाचं दास्याम इति, तथेति देवाः प्रत्याहुस्ता अग्निं प्राविशंस्ताः—अग्निपूता अभवंस्तस्मादेता यत्र तिष्ठन्ति तद्दहन्ति ताः वायुं प्राविशंस्ता वायुपूता अभवंस्तस्मादेता यतो यन्ति ततो दारयन्ति ताः सोमं प्राविशंस्ताः सोमपूता अभवंस्तस्मादेता स्निग्धाः शैत्यरसवत्यः कल्प्यन्ते । असावादित्यो ब्रह्मा यज्ञः सर्वा देवतास्ता अन्वहं देव-गवादिभीरश्मिभिरपाययंस्तस्मादेता अहनि शुद्धाः पूताः शुद्धौ कल्प्यन्ते । तस्माद्यन्मीमांस्यं स्यात् तत्तदद्भिः संस्पृशेच्छुद्धिर्भवति । रात्रावेताश्चापो वरुणं प्राविशंस्तस्मान्न रात्रौ गृह्णीयाद्धाम्नो धाम्न इत्यग्निमुपरिष्टाद्धारयन् गृह्णीयात् ।

कात्यायनः ।

अपो निशि न गृह्णीयाद् गृह्णन्नपि कदाचन ।
विधृत्याग्निमुपर्यासां धाम्नो धाम्न इतीरयन् ॥

अस्तमित आदित्यमुदकं गृह्णीयादापदि रात्रौ यदि गृह्णीयादग्निमुपरि धारयन् धाम्नोधाम्नोराजन्निति यजुर्जपन् गृह्णीयात् ।

बौधायनः ।

अस्तमितआदित्य उदकं गृह्णीयान्न गृह्णीयादिति मीमांसन्ते न गृह्णीयादित्येके आहुर्ब्रह्मवादिनो गृह्णीयादित्येतदपरे यावदुदकं गृह्णीयात् तावत् प्राणमायच्छेदग्निर्हवा उदकं गृह्णाति ।

उशनाः ।

नद्यः कूप-तड़ागानि सरांसि सरितस्तथा ।
असंवृतान्यदोषाणि मनुः स्वायम्भुवोऽब्रवीत् ॥

---

[1] कुरण्डैरहिता इति ।

पराशरः ।

अन्यैरपि कृतान् दोषान् कूपसेतुपथेषु च ।
तेषु वेगेषु यत्तोयं सम्यक् चेत्रपथेषु च ॥
प्रतिग्राह्याश्च पेयाश्च न दुष्टान् मनुरब्रवीत् ॥

इति ग्राह्याण्युदकानि ।

अथ वर्ज्याण्युदकानि ।

ब्रह्माण्डपुराणे ।

दुर्गन्धि फेनिलं वर्ज्यं तथा वै पल्वलोदकम् ।
न लभेत् यत्र गौस्तृप्तिं नक्तं यच्चैव गृह्यते ॥
यन्न सर्वाय चोत्सृष्टं यच्चाभोज्यं निपानजम् ।
तद्वर्ज्यं सलिलं तात सदैव पितृकर्म्मणि ॥

'यत्' कूपादिकं, तत्कर्तृभिः सर्वप्राण्युपजीवनार्थम् 'नोत्सृष्टं' न परित्यक्तं, तत्सलिलं पितृकर्मणि वर्ज्यम् । कूपसमुद्धृतं पश्वादिपेयोदकधारणार्थो जलाशयः 'निपानं' 'तज्जं' तत्र स्थितमपि, सलिलं वर्जनीयम् ।

योगियाज्ञवल्क्यः ।

अग्राह्यास्त्वग्रिमा आपो नद्याः प्रथमवेगगाः ।
प्रक्षोभिताश्च केनापि याश्च तीर्थात्तथोद्धृताः[१] ॥

'अग्रिमाः' प्रथमवृष्टिसम्भूताः, ता नद्याः कलुषतरैकद्वित्र्यादिदिनस्थायिवेगगता एव न ग्राह्याः । निवर्त्तमाने तु प्रथमवेगे प्रसादवत्यो ग्राह्याः । द्वितीयादिवेगे च वेगानिवृत्तावपि ग्राह्याः । नदीव्यतिरिक्तजलाशयसंभृतास्त्वग्रिमाः दशरात्रमग्राह्याः ।

तथा च वचनम् ।

अजा गावो महिष्यश्च ब्राह्मण्यश्च प्रसूतिकाः ।
दशरात्रेण शुद्ध्यन्ति भूमीषु च नवोदकम् ॥

याश्च केनचित् सङ्क्षोभ्य कलुषीकृताः याश्च तीर्थाज्जलावतरणमार्गादुद्धृतास्ता अपि न ग्राह्याः ।

व्यासः ।

नद्या यच्च परिभ्रष्टं नद्या यच्च विवर्जितम् ।
गतप्रत्यागतं यच्च तत्तोयं परिवर्जयेत् ॥

ग्रीष्मायूष्मसंशुष्यज्जलान्नदीप्रवाहात् पृथग्भूय पल्वले स्थिरीभूतं 'नद्याः परिभ्रष्टम्' । यच्च स्वल्पनिर्झररूपेण पृथग्भूय पुनर्महाप्रवाहेण सह संसर्गं न लभते तत् 'नद्या विवर्जितं' । सकृदसकृद्वा स्वतो वा कारणान्तरेण वा यत्प्रतिलोमं स्यन्दते तत् 'गतप्रत्यागतं' तत्परिवर्जयेत्' ।

---

[१] तीर्थेषु विस्रुता इति ।

मरीचिः ।

नभोनभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणम् ॥

तर्पणशब्दः श्राद्धाद्युपलक्षणार्थम् । नभाश्च नभस्यश्च नभोनभस्यौ श्रावण-भाद्रपदौ तयोर्मध्ये तयोरन्तरं तावत्कालमिति यावत् । रजस्वलाशब्दो गौण्या वृत्या पवित्रत्वविपर्ययं वदन् तज्जलस्य कर्मार्हतां वारयति ।

मार्कण्डेयः ।

आदित्यदुहिता गङ्गा प्लक्षजाता सरस्वती ।
रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञकाः ॥

'आदित्यदुहिता' यमुना । 'गङ्गा' भागीरथी । 'प्लक्षजाता सरस्वती' कुरुक्षेत्रे स्थिता सती ।

स्मृत्यन्तरे ।

कालिन्दी नर्मदा गङ्गा प्लक्षजाता सरस्वती ।
एतास्तु पुण्याः सरितः सङ्क्षोभपरिवर्जनात् ॥
वैमल्यगुणसंयोगाद्रजोनाभिभवत्युत ।
गङ्गा धर्मद्रवः पुण्या यमुना च सरस्वती ।
अन्तर्गतरजोयोगात् सर्वाह्स्वपि चामलाः ॥

निगमः ।

प्रतिस्रोतो रजोयोगो रथ्याजलनिवेशनम् ।
गङ्गायां न प्रदुष्यन्ति स हि धर्मद्रवः स्वयम् ॥

इति वर्ज्याण्युदकानि ।

अथाभ्युक्षणाहरणम् ।

तत्र शाट्यायनिः ।

ततः सूर्यमुपस्थाय सम्यगाचम्य च स्वयम् ।
अभ्युक्षणं समादाय सञ्चितात्मा गृहं व्रजेत् ॥

आचम्येत्यत्र द्विरितिशेषः ।

तथा च वृद्धशातातपः ।

तपः सिद्धे द्विराचम्याभ्युक्षणार्थमथाहरेत् ।
न विनाभ्युक्षणं जातु विधिज्ञः किञ्चिदाचरेत् ॥

आहरणेतिकर्त्तव्यतामाह शाट्यायनिः ।

सोपानत्कः सदर्भः सदशोत्तरीयः समाहर्त्ता ।

'सोपानत्कः' उपानद्युगलारूढः । 'सदर्भः' दर्भपवित्रयुक्तपाणिः । 'सदशोत्तरीयः' दशायुक्तोत्तरीयवस्त्रावृतः, 'समाहर्ता' पात्रस्थमभ्युक्षणार्थं जलमाहरेदित्यर्थः ।

प्रचेताः ।

अनुगुप्ता अपो गृह्य प्रचारार्थं गृहं व्रजेत् ।
सवने प्रोक्षणं कुर्यात् गृहीतेन सदा शुचिः ॥

'अनुगुप्ताः' अन्येनादृष्टाः । अपः जलम् । 'गृह्य' गृहीत्वा । 'प्रचारार्थं' गृहनिर्वर्त्त्यकर्मानुष्ठानार्थम् । 'सवने' प्रातरादिकाले गृहं गच्छेत् । गत्वा च तेन जलेन कर्मार्थद्रव्यदेशानां शुचिर्भूत्वा प्रोक्षणं कुर्यात् ।

उशनाः ।

स्रवन्त्यादिश्वथाचम्य सोपानत्को ह्यसंस्पृशन् ।
आगतः सोदपात्रस्तु यत्नेन शुचिरेव सः ॥
तेनोदकेन द्रव्याणि प्रोक्ष्याचम्य पुनर्गृहे ।
ततः कर्माणि कुर्वीत नित्यं वै यानि कानिचित् ॥

शातातपः ।

बहिर्नद्यादिष्वाचान्तः सोदकः कश्चिदस्पृशत् ।
रथ्यागतोऽपि यत्नेन शुचिरेव हि मानवः ॥

गर्गस्तु जलाहरणे नियमान्तरमाह ।

त्रिसन्ध्यं वाग्यतोवारि गुप्तमाहृत्य शोधयेत् ।
आहृत्य वारि द्रव्याणि देशश्च प्रोक्ष्य शोधयेदिति ॥

'वाग्यतः' मौनी ।

गोभिलः ।

पुरा प्रादुष्करणवेलायाः सायंप्रातरनुगुप्ता अपो हरेत् परिचरणीया वा इति । अग्निविहरणं 'प्रादुष्करणम्' तस्य 'वेला' कालः तस्मात्, 'पुरा' पूर्वकालं ।

अत्र मुख्यामुख्यानि जलाहरणपात्राणि ।

आह योगियाज्ञवल्क्यः ।

सौवर्णं राजतं ताम्रं मुख्यं पात्रं प्रकीर्त्तितम् ।
तदलाभे स्मृतं पात्रं स्रवते यन्न धारितम् ॥

शाट्यायनिः ।

अग्र्यं हिरण्मयं रौप्यं दारवं मृन्मयं दृढम् ।
ताम्रं पत्रपुटं पुण्यं पात्रमभ्युक्षणाय वै ॥

'पत्रपुटं' प्रशस्तपत्रनिर्मितं जलाहरणयोग्यं पात्रमित्यर्थः । एतच्च पात्रान्तरालाभे वेदितव्यम् ।

तदाह आपस्तम्बः ।

सर्वालाभे तु पात्राणां पर्णपात्रं विधीयते ।
पात्रं तदपि विज्ञेयं स्रवते यन्न धारितम् ॥

वर्ज्यपात्राण्याह आपस्तम्बः ।

सैवाल—वालुका—दूर्वा—तृण—पर्णायसैरपि ।
अभ्युक्षणं न गृह्णीयादापस्तम्बोऽब्रवीन्मुनिः ॥

पर्णनिषेधोऽत्र पात्रान्तरसद्भावविषयः । अनापादितपुटाकृतिविषयोवानुसन्धेयः ।

नलिकाभिन्नपात्रेण कांस्यपात्रेण चैव हि ।
प्राण्यङ्ग-फलजेनापि कुर्य्यान्नाभ्युक्षणं द्विजः ॥

'नलिकया' वेण्वादिमय्या 'भिन्नेन' स्फुटितेन 'कांस्यपात्रेण' घोषपात्रेण घोषमिति निघण्टौ कांस्यनाम । 'प्राण्यङ्गेन' शङ्खशुक्त्यादिरूपेण 'फलजेन' नालिकेर-विल्वादिमयेन ।

बृद्धशातातपः ।

सैवाल—तृण—पर्णाद्यैरसंस्काराम्बुभाजनैः ।
सिकतावस्त्रलेपैश्च न कुर्यात्प्रोक्षणं बुधः ॥

आदिशब्देन नलिकाप्राण्यङ्गादि गृह्यते ।

द्रव्यशुद्धिप्रकरणोक्तसम्मार्जनादिसंस्काररहितैः 'अम्बुभाजनैः' जलपात्रैः, सिकताभिर्वस्त्रेण वा संगृहीतानि 'सिकतावस्त्रलेपानि ।'

यमोऽपि ।

पात्राद्विरहितं तोयं उद्धृतं सव्यपाणिना ।
न तेन प्रोक्षणं कुर्यात् वस्त्रनिष्पीडनेन च ॥

'पात्राद्विरहितं' शैवलाद्याहृतं । 'सव्यपाणिना' वामेन पाणिना । अनेन दक्षिणपाणिना समाहृतं तोयं प्रोक्षाणार्हमित्यभ्यनुज्ञातम् । पात्रस्थितं सव्यपाणिनाप्याहृतमभ्यनुज्ञातम् ।

शातातपः ।

यत्पात्ररहितं तोयं धृतं सव्येन पाणिना ।
न तेन प्रोक्षयेद्द्रव्यं वस्त्रनिष्पीडनेन च ॥
नाधोवस्त्रैकदेशेन शुद्ध्यर्थमप आहरेत् ।
अथानीते तु सव्येन प्रोक्षयेद्दक्षिणेन तु ॥

शाट्यायनिः ।

नाहरेदेकजातिस्तु नावृतो न च जल्पकः ।
न पाणिना न वस्त्रेण जलमभ्युक्षणाय वै ॥

'एकजातिः शूद्रः ।' "ब्राह्मणः क्षत्रियोवैश्यस्त्रयोवर्णा द्विजातयः' । चतुर्थ एकजातिस्तु शूद्रो नान्यस्तु पञ्चमः" ॥ इति मनुस्मरणात् ।

'जल्पकः' अमौनी ।

अभ्युक्षणाहरणानन्तरकृत्यमाह प्रचेताः ।

संगृह्याभ्युक्षणं पायात्सोपानत्को गृहं प्रति।
तदनुत्को गृहं प्राप्य सर्व्वानुष्ठानमाचरेत् ॥
अभ्युक्षणोदपात्रन्तु न तावत् स्थाप्यते क्वचित्।
यावन्नाचमनं दत्तं प्रोक्षिता न गलन्तिका ॥

अनेनाहृत्याभ्युक्षणं क्वचिदनिधायैव केनचिद्दत्तेन जलान्तरेणाचम्य संप्रोक्ष्याभ्युक्षणपात्रं निदध्यादित्युक्तं भवति।

शाट्यायनिरपि।

आदाय प्रोक्षणं पात्रं न निदध्याद् गृहं गतः।
अकृत्वाचमनं भूमावाचान्तः प्रयतो भवेत् ॥

आचमनमकृत्वा प्रोक्षणं भूमावस्थापयन्नाचान्तः प्रयतो भवतीत्यर्थः।

आचमनानन्तरं पुलस्त्यः।

तेन द्रव्याण्यशेषाणि प्रोक्ष्याचम्य पुनर्गृहे।
ततः कर्माणि कुर्वीत सत्क्रियाश्च द्विजोत्तमाः ॥

अत्र गृहे पुनराचम्य तेन द्रव्याणि प्रोक्षयेत्यन्वयः।

प्रोक्षणीयानि द्रव्यण्याह गर्गः।

त्रिसन्ध्यं वाग्यतो वारि गुप्तमाहृत्य शोधयेत्।
होमोपहारभोगेह द्रव्यात्मपरिचारकान् ॥

यमोऽपि।

अभ्युक्षेत्तु प्रयत्नेन प्रचाराध्युषितं गृहम्।
मध्याह्ने चैवसंध्यायां न चानभ्युक्षिते यजेत् ॥

गर्गः।

गोचर्ममात्रमब्बिन्दु गां शोधयति पातितः।
समूढामशुचीनान्तु यत्र लेपो न विद्यते ॥

अपां बिन्दुः 'अब्बिन्दुः' 'गां' 'भूमिं 'समूढां' कृतपरिसमूहनां अपसारितावकरामिति यावत्।

उक्ताभ्युक्षणासमर्थं प्रत्याह। शाट्यायनिः।

नद्यादौ सम्यगाचान्तः संयतो गृहमागतः।
उद्धृत्य मणिकात्तोयं तथाभ्युक्षणमाचरेत् ॥
गृहे वा समुपस्पृश्य कृत्वा स्वर्णकुशोदकम्।
कृत्वाचमनमाचान्तः पुनः प्रोक्षणमाचरेत् ॥

सम्यग् द्विराचम्य संयतो नद्यादेः स्वयं शिष्यादिभिर्वा प्रोक्षणमाहरेदित्येकः पक्षः। तथैव समुपस्पृश्य गृहे स्थितात् मणिकादभ्युक्षणतोयमाहरेदित्यपरः पक्षः। पूर्ववदाचमनंकृत्वा गृह एव यत्र कुत्रचित् स्थितमुदकमादाय निक्षिप्तसुवर्णकुशंकृत्वा पुनराचान्तस्तदभ्युक्षणार्थमुपकल्पयेदित्यन्यः।

तथा—

आग्नेयं प्रथमं प्रोक्तं विप्रहस्तात् द्वितीयकम् ।
तृतीयमुदकस्थानाच्चतुर्थं मणिकात् स्मृतम् ॥

नद्यादेः स्वयमाहृतं प्रथमं, अन्येन शुचिना ब्राह्मणेन तत एवानीतं द्वितीयं, गृह-स्थितादेव कूपादेर्जलस्थानात् गृहीतं तृतीयं, मणिकादुपात्तं चतुर्थं। बृहज्जलसंश्रयं भाण्डं मणिकः ।

प्रचेताः ।

वैश्वानरेण यत्किंचित् कुरुते प्रोक्षणं द्विजः ।
गंगातोयसमं सर्वं वदन्ति ब्रह्मवादिनः ॥

'वैश्वानरं' आग्नेयम् ।

इत्यभ्युक्षणाहरणम् ।

इति श्री महाराजाधिराज-श्री महादेवीय सकलश्रीकरणाधिपति पण्डित श्री हेमाद्रिविरचिते चतुर्वर्गचिन्तामणौ परिशेषखण्डे श्राद्धकल्पे प्रक्षेप्यद्रव्यनिरूपणं नाम अष्टमोध्यायः ॥ ० ॥

———

अथ नवमोऽध्यायः ।

श्राद्धोपकरणानि ।

शैलान् कैलासयन्ती भुवि बलिसदने शेषयन्ती भुजङ्गा-
नाकाशे भानुमन्तं शिशिरकरतुलां प्रापयन्ती सितिम्ना ।
यत्कीर्त्तिः कौतुकेन त्रिभुवनमटनि स्पष्टपुण्यः स एषः
श्री हेमाद्रिः पुरस्तादुपकरणगणं श्राद्धयुक्तं ब्रवीति ॥१॥

अथान्यान्यपि श्राद्धोपप्रकरणान्युच्यन्ते ।

तत्र कुशास्तावत् । तत्राप्युत्पत्तिपूर्व्वं यस्तेषां महिमा तत्र शतपथश्रुतिः ।

या वै वृत्राद्बीभत्समाना आपो धन्व दृभन्त्य उदायंस्ते दर्भा अभवन् यद्दृभन्त्य उदायंस्तस्माद्दर्भास्ता हैताः शुद्धा मेध्या आपो वृत्राभिप्रक्षरिता यद्दर्भा इति[1] ।

'वृत्रात्' त्वष्टृपुत्रात्, 'बीभत्समानाः' बिभ्यत्यः, 'आपः' उदकानि 'धन्व' मरुस्थलं, 'दृभन्त्यः' संदृभ्यमानाः, 'उदायन्' उदपतन्, 'शुद्धाः' निर्दोषाः, मेध्याः यज्ञियाः, 'अवृत्राभिप्रक्षरिताः' वृत्रेण कालुष्यमप्रापिताः ।

आह गोभिलः ।

कुशमूले स्थितो ब्रह्मा कुशमध्ये तु केशवः ।
कुशाग्रे शङ्करं विद्यात् सर्वे देवाः समन्ततः ॥

दर्भान् प्रकृत्य शतपथश्रुतिः ।

अग्रमिव वै देवानां मध्यमिव मनुष्याणां मूलमिव पितॄणामिति ।

हारीतोऽपि ।

कुशहस्तेन यज्जप्तं दानञ्चैव कुशैः सह ।
कुशहस्तस्तु यद्भुङ्क्ते तस्य सङ्ख्या न विद्यते ॥
कुशपूतं भवेत्स्नानं कुशेनोपस्पृशेद्द्विजः ।
कुशेन चोद्धृतं तोयं सोमपानेन सम्मितम् ॥
कुशमालान्तु यः कण्ठे समावहति सर्वदा ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥
करे कण्ठे शिखायाञ्च कर्णयोरुभयोरपि ।
पवित्रधारको यश्च न स पापेन लिप्यते ॥

कौशिकः ।

कुशासनं सदा पूतं यतीनान्तु विशेषतः ।
कुशासनोपविष्टस्य सिद्ध्यते योग उत्तमः ॥

---

[1] का० ७ अध्या० २, प्र. २ सू. २,

यथा पुष्करपर्णेषु अपां लेपो न दृश्यते ।
एवं पवित्रहस्तस्य न लोपो विद्यते क्वचित् ॥

हारीतः ।

जपहोमहरा ह्येते असुरा व्यक्तरूपिणः ।
पवित्रकृतहस्तस्य विद्रवन्ति दिशो दश ॥

गोभिलः ।

वज्रो यथा सुरेन्द्रस्य शूलं हस्ते हरस्य च ।
चक्रायुधं यथा विष्णोरेवं विप्रकरे कुश इति ॥

अथ कुशविधिः ।

आह कौशिकः ।

शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः ।
ॐकारेणैव मन्त्रेण कुशाः स्पृश्या द्विजोत्तमैः ॥

उत्पाटनमन्त्रस्तत्रैव ।

विरञ्चिना सहोत्पन्नः परमेष्ठीति सर्गजः ।
नुद पापानि सर्वाणि मम स्वस्तिकरो भव ॥

स्मृत्यन्तरेऽपि तमेवमन्त्रमभिधाय—

एवं मन्त्रं समुच्चार्य ततः पूर्वोत्तरामुखः ।
हुँ फट्कारेण मन्त्रेण सकृच्छित्वा समुद्धरेत् ॥

कार्ष्णाजिनिः ।

भुवन्तु शिथिलीकृत्य खनित्रेण विचक्षणः ।
आदद्यात् पितृतीर्थेन हुंफट् हुंफट् सकृत् सकृत् ॥

अत्र कालनियममाह हारीतः ।

मासे नभस्यमावास्या तस्यां दर्भोच्चियो मतः ।
अयातयामास्ते दर्भा नियोक्तव्याः पुनः पुनः ॥
नार्द्रान् लुनीयाद्रात्रौ तु लुनीयाद्वापि सन्ध्ययोः ॥

'नभः' श्रावणः । 'यातयामम्' अनेकत्र प्रयोगानर्हम् । 'अयातयामाः' उपयुक्ताः अथानेकशः क्रियान्तरोपयोगयोग्या इति भावः । अतश्चैते उपयुक्ताः । अथापवादस्थानं विहाय क्रियान्तरेऽपि पुनः पुनरुपयोज्याः । कालान्तरे गृहीतास्तु सकृदप्युपयुक्तयामतया क्रियान्तरानर्हाः ।

शालङ्कायनः ।

नभोमासस्य दर्शे तु शुचिर्दर्भान् समाहरेत् ।
अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः ॥

यदपि साङ्ख्यवचनम् ।

दर्भाः कृष्णाजिनं मन्त्राः ब्राह्मणाश्च विशेषतः ।
अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥

यच्च गृह्यपरिशिष्टे ।

दर्भाः कृष्णाजिनं मन्त्राः ब्राह्मणा हविरग्नयः ।
आयातयमान्येतानि नियोज्यानि पुनः पुनः इति ॥

तदपि पूर्ववचनानुसारेण नभोऽमावास्यागृहीतदर्भविषयमेव मन्तव्यम् ।

मार्कण्डेयोऽप्यमीषां सापवादामयातयामतामाह ।

सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् ।
नोच्छिष्टं तत् पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत् ॥

येन पवित्रेण सहाचमनं कृतं तदुच्छिष्टं न भवति, येन तु सह भोजनं कृतं तदुच्छिष्टतया त्याज्यम् । एतच्च ग्रन्थिरहितपवित्रविषयम् ।

ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनञ्चरेदिति हारीतस्मरणात् ।

एतदपि ब्रह्मग्रन्थिमत्पवित्रविषयम् ।

न ब्रह्मग्रन्थिनाचामेन्न च काशादिभिः क्वचिदित्यादित्यस्मरणात् ।

हारीतः ।

आचामेत्प्रयतो नित्यं पवित्रेण द्विजोत्तमः ।
नोच्छिष्टञ्च भवेत्तत्तु भुक्तशेषन्तु वर्जयेत् ॥

'पवित्रेण' सह पवित्रयुक्तपाणिरित्यर्थः । 'तत्' पवित्रं, उच्छिष्टं न भवति, कर्म्मानर्हं न भवतीत्यर्थः । 'भुक्तशेषं' भोजनाङ्गतां नीतं, 'वर्जयेत्' त्यजेत् । एतच्च शुचेराचामतो वेदितव्यम् । 'प्रयतः' इति वचनात् । अन्ये तु कर्माङ्गाचमनविषयमेतदित्याहुः ।

तथा च कात्यायनः ।

सपवित्रः सदर्भो वा कर्माङ्गे पितृकर्मणि ।
अशून्यं तु करं कृत्वा सर्वत्राचमनञ्चरेत् ॥
नोच्छिष्टात्तत्सदर्भश्च भुक्तोच्छिष्टन्तु वर्जयेत् ॥

अत्र पवित्रशब्देन ग्रन्थिमत्पवित्रमित्येके ।

आह शातातपः ।

जपे होमे तथा दाने स्वाध्याये पितृकर्मणि ।
अशून्यन्तु करं कुर्यात् सुवर्णरजतैः कुशैः ॥
जपे होमे तथा दाने स्वाध्याये पितृतर्पणे ।
सव्यापसव्यौ कुर्वीत सपवित्रौ करौ बुधः ॥

कश्यपः ।

स्नाने होमे जपे दाने स्वाध्याये पितृतर्पणे ।
सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा ॥

मार्कण्डेयपुराणे ।

कुशपाणिः सदा तिष्ठेद्ब्राह्मणो दम्भवर्जितः ।
स नित्यं हन्ति पापानि तूलराशिमिवानलः[१] ॥

पुराणेऽपि ।

कौशेयं बिभृयान्नित्यं पवित्रं दक्षिणे करे ।
भुञ्जानस्तु विशेषेण गृहीतान्न च शोधनम् ॥

'कौशेयं पवित्रं' कुशपवित्रम् ।

अत्रिरपि ।

उभाभ्यामेव पाणिभ्यां विप्रैर्दर्भपवित्रके ।
धारणीये प्रयत्नेन ब्रह्मग्रन्थिसमन्विते ॥
ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिर्विधीयते ।
भोजने वर्तुलः प्रोक्तः एवं धर्मो न हीयते ॥

द्विगुणीकृतानां दर्भशिखानां पाशः प्रदक्षिणमर्द्धवेष्टनं विधाय पश्चाद्भागेन यदा प्रवेश्यते तदा वर्तुलग्रन्थिः ।

यदा स एव प्रादक्षिण्येन समग्रवेष्टनं विधाय पुरोभागेन प्रवेश्यते तदा ब्रह्मग्रन्थिः ।

दर्भधारणायाङ्गुलिनियमः स्कन्दपुराणे दर्शितः ।

अनामिकाधृतो दर्भो ज्येष्ठानामिकयापि वा ।
उभाभ्यामनामिकाभ्यां धार्ये दर्भपवित्रके ॥

स्मृत्यन्तरे ।

अनामिकाभ्यामेवैते पवित्रे ग्रन्थिसंयुते ।
धारयेद्दक्षिणेनैव पाणिना वा कुशग्रहः ॥

'अनामिका' उपकनिष्ठिका ।

पवित्रलक्षणमाह कात्यायनः ।

अनन्तर्गर्भितं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥

पवित्रकरणप्रकारमाह योगियाज्ञवल्क्यः ।

पवित्रेस्थेति मन्त्रेण द्वे पवित्रे च कारयेत् ।
नान्तर्गर्भे कुशच्छिन्ने कौशे प्रादेशसम्मिते ॥

---

[१] तृणराशिमिवानल इति ।

'नान्तर्गर्भे' गर्भे शिखारहिते। 'कुशच्छिन्ने' कुशेनावेष्ट्य च्छिन्ने। 'कौशे' कुशमये। "पवित्रेस्थो वैष्णव्यौ" इति छेदनमन्त्रः।

अत्र विशेष उक्तो देवीपुराणे।

पवित्रेस्थ इति छिन्नं मूलदेशे कुशद्वयम्।
कुशात्त्रयेण प्रादेशमात्रे ते स्तः पवित्रके॥

आपस्तम्बोऽपि।

समौ साग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुते। पवित्रेस्थो वैष्णवी वा पुनर्मनसा पुनात्विति तृणं काष्ठं वान्तर्द्धाय च्छिनत्ति न नखेनेति।

यज्ञपार्श्वोऽपि।

या ओषधी मन्त्रेण कृत्वाङ्गुष्ठाङ्गुलिपर्वणि।
छिन्द्यात्प्रादेशमात्रन्तु पवित्रं विष्णुदैवतम्॥
न नखेन न काष्ठेन न लोहेन न मृण्मयैः।
नखेन तु भवेद् व्याधिः काष्ठेनार्थो न सिद्ध्यति॥
आयसेन भवेन्मृत्युः मृण्मयैः कलहो ध्रुवम्।

वृत्तग्रन्थिमत्पवित्रलक्षणमुक्तं गारुडपुराणे।

अर्द्धं प्रदक्षिणीकृत्य शिखां पाशं प्रवेशयेत्।
वैष्णवेनैव मार्गेण वृत्तग्रन्थौ पवित्रके॥

'वैष्णवोमार्गः' पश्चाद्भागः।

ब्रह्मग्रन्थिमत्पवित्रलक्षणमपि तत्रैवोक्तम्।

सन्त्यज्य वैष्णवं मार्गं ब्रह्ममार्गविनिःसृतम्।
सकृत्प्रदक्षिणीकृत्य पवित्रमभिधीयते॥
तद्ब्रह्मग्रन्थिमत्प्रोक्तं पवित्रं वेदवादिभिः॥

पवित्रकर्तुरभिमुखः प्रदेशः 'ब्रह्ममार्गः'।

पवित्रदर्भशिखासङ्ख्यापि तत्रैवोक्ता।

सप्तभिर्दर्भपिञ्जूलैः कुर्याद्ब्राह्मं पवित्रकम्।
पञ्चभिः क्षत्रियस्यैव चतुर्भिस्तु तथा विशः॥
द्वाभ्यां शूद्रस्य विहितमन्तराणां तथैव च॥

मार्कण्डेयस्तु।

चतुर्भिर्दर्भपिञ्जूलैर्ब्राह्मणस्य पवित्रकम्।
एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम्॥
सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रन्थितं न वा।
त्रिभिस्तु शान्तिके कार्यं पौष्टिके पञ्चभिस्तथा।
चतुर्भिश्चाभिचाराख्यं कुर्वन् कुर्य्यात्पवित्रकम्॥

दर्भलक्षणमाह कौशिकः ।

सप्तपत्राः शुभा दर्भास्तिलक्षेत्रसमुद्भवाः ।
ते प्रशस्ता द्विजातीनां दैवे पित्र्ये च कर्म्मणि ॥
अप्रसूताः स्मृता दर्भाः प्रसूतास्तु कुशा स्मृताः ।
समूलाः कुतपाः प्रोक्ताश्छिन्नाग्रास्तृणसंज्ञिताः ॥

'अप्रसूताः' असञ्जातप्रसवाः अपुष्पिता इत्यर्थः ।

हारीतोऽपि ।

दर्भाग्रं दैवमित्युक्तं समूलाग्रं तु पैतृकम् ।
तत्र मूलं विना ये तु ते कुशाः कुतपाः स्मृताः ॥
अच्छिन्नाग्रान् सपत्रांश्च समूलान् कोमलान् शुभान् ।
पितृदेवजपार्थञ्च समादद्यात् कुशान् द्विजः ॥

एतत्प्रस्तरादिव्यतिरिक्तविषयम् ।

तथा च ब्रह्माण्डपुराणे ।

हरिता वै सपिञ्जूलाः स्निग्धाः पुष्टाः समन्विताः ।
रत्निमात्रप्रमाणेन पितृतीर्थेन संस्कृताः ॥
छिन्नमूला ग्रहीतव्याः प्रस्तरार्थं कुशोत्तमाः ।
अग्निकार्ये च यागे च समूलान् परिवर्जयेत् ॥

'सपिञ्जूलाः' अपृथक्कृतदलाः । बद्धमुष्टिकापरिमाणं रत्निः, तया संस्कृताः पितृतीर्थग्रहेणेनोत्पादितातिशयाः ।

सुमन्तुः ।

अच्छिन्नाग्राः शुभा दर्भाः पित्र्ये तु हरिताः शुभाः ।
अमूला देवकार्येषु प्रयोज्याश्च जपादिषु ॥
सप्तपत्राः कुशाः शस्ता दैवे पित्र्ये च कर्मणि ।

आह कात्यायनः ।

हरिता यज्ञिया दर्भाः पीतकाः पञ्चयज्ञिकाः ।
समूलाः पितृदेवत्याः कल्माषा वैश्वदेविकाः ॥
ह्रस्वाः प्रचरणीयाः स्युः कुशा दीर्घाश्च बर्हिकाः ॥

'पञ्चयज्ञियाः' पञ्चयज्ञार्हाः । 'प्रचरणं' अनुष्ठानं, तदर्हाः 'प्रचरणीयाः' 'पितृदेवत्याः' पित्रर्थाः ।

तथा च यमः ।

समूलस्तु भवेदर्भः पितॄणां श्राद्धकर्म्मणि ।
वहिर्लूनाः सकृल्लूनाः सर्वत्र पितृकर्म्मणि ॥

'वहिर्लूनाः' उपमूललूनाः।

एवञ्च यदुक्तं ब्रह्माण्डपुराणे।

उपमूले तथा लूनाः श्राद्धार्थे तु कुशाः स्मृताः।
तथा श्यामाकनीवारौ दूर्वा च समुदाहृतेति॥

यदपि गोभिलेनोपमूललूनाः पितृकार्येष्विति तदेकोद्दिष्टेतरश्राद्धविषयमित्यवगन्तव्यम्।

अत्र पुराणे।

सपिण्डीकरणं यावदृजुभिश्च कुशैः क्रियाः।
समूलैश्चापि कर्त्तव्याः साग्रैः शुचिसमाहितैः॥
सपिण्डीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत्।
तिलक्षेत्रोद्भवैर्दर्भैः प्रयत्नाद्द्विगुणीकृतैः॥
पितृणां तर्पणं कार्य्यं देवतानां यदृच्छया।
पैत्र्यं मूलेन मध्येन नारं दानं प्रयत्नतः॥
दैवं कर्म कुशाग्रेण कर्त्तव्यं भूतिमिच्छता॥

'यदृच्छया' अनियमेनेत्यर्थः।

नारदीयपुराणे।

तर्पणादीनि कार्य्याणि पितृणां यानि कानिचित्।
तानि स्युः द्विगुणैर्दर्भैः सप्तपत्रैर्विशेषतः॥

अत्र वर्ज्यानाह हारीतः।

चितौ दर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु।
प्रस्तरासनपिण्डेषु षट् कुशान् परिवर्जयेत्॥
ब्रह्मयज्ञे च ये दर्भाः ये दर्भाः पितृतर्पणे।
धृता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते॥
अपूता गर्भिता दर्भा ये च दर्भा नखैस्तथा।
क्वथितानग्निदग्धांश्च कुशान् यत्नेन वर्जयेत्॥
'गर्भिताः' गर्भदलयुक्ताः। 'क्वथिताः' शटिताः।

पुराणेऽपि।

पिण्डार्थं ये कृता दर्भा यैः कृतं पितृतर्पणम्।
मूत्रोच्छिष्टधृता ये च तेषां त्यागो विधीयते॥

शाट्यायनिः।

यैः कृतः पिण्डनिर्वापः श्राद्धं वा पितृतर्पणम्।
भोजने च मलोत्सर्गे ये धृतास्तान् परित्यजेत्॥

कात्यायनः ।

पिण्डार्थं ये स्तृता दर्भास्तर्पणार्थे तथैव च ।
धृतैः कृते तु विण्मूत्रे त्यागस्तेषां विधीयते ॥

त्यागापवादमाह हारीतः ।

नीवीमध्ये तु ये दर्भा ब्रह्मसूत्रे च ये कृताः ।
पवित्रांस्तान् विजानीयाद्यथाकायस्तथैव ते ॥

गौतमोऽप्याह ।

नीवीमध्ये स्थिता ये च यज्ञसूत्रे स्थितास्तथा ।
उच्छिष्टमूत्राद्युत्सर्गे न तेषूपहतिर्भवेत् ॥
वामहस्ते स्थिते दर्भे न पिबेद्दक्षिणेन तु ।
वस्त्रादिनोपग्रहणे न दोषः पिबतो भवेत् ॥

हारीतः ।

समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् ।
शूद्राहृतैः कुशैर्विप्रः कर्म्म कुर्वन् व्रजत्यधः ॥
कुशपुष्पाणि समिध औषधं तु विशेषतः ।
निषेधेऽपि च गृह्णीयादमावास्याहनि द्विजः ॥

कुशालाभे प्रतिनिधिमाह शङ्खः ।

कुशाभावे द्विजश्रेष्ठः काशैः कुर्वीत यत्नतः ।
तर्पणादीनि कर्माणि काशाः कुशसमाः स्मृताः ॥

अथ शतपथश्रुतिः ।

यज्ञो ह देवेभ्योऽपचक्राम सोऽश्वो भूत्वापराडाववर्त्त तस्य देवा अनुहाय बालानभिपेदुस्तानालुलुपुस्तानालुप्य सार्द्धं सन्यासुस्तत एता ओषधयः समभवत् पदश्च बाला इति ।

प्रभासखण्डे ब्रह्मवैवर्त्तपुराणेषु ।

पूर्वं कीर्त्तिमतां श्रेष्ठो वभूवासौ प्रजापतिः ।
तस्य बाला निपतिता भूमौ काशत्वमागताः ॥
तस्मान्मेध्याः सदा काशाः श्राद्धकर्मणि पूजिताः ।
पिण्डनिर्वपणं तेषु कर्त्तव्यं भूतिमिच्छता ॥
प्रजापुष्टिद्युतिप्रज्ञाकीर्तिकान्तिसमन्विताः ।
भवन्ति रुचिरा नित्यं विपाप्मानो विवर्जिताः ॥
पिण्डप्रदानं काशेषु ये कुर्वन्ति यथाविधि ।

विष्णुः ।

कुशाभावे कुशस्थाने काशं दूर्वां वा दद्यात् ।

यज्ञपार्श्वः ।

कुशाभावे तु काशाः स्युः काशाः कुशसमाः स्मृताः ।
काशाभावे ग्रहीतव्या अन्ये दर्भा यथाक्रमम् ॥

'अन्ये दर्भाः' दर्भकार्यकराः ।

ते चात्रिणा प्रोक्ता दशदर्भेषु ।

कुशाः काशा यवा दूर्वा उशीराश्च सकुन्दुराः ।
गोधूमा व्रीहयो मुञ्जा दशदर्भाः सवल्वजाः ॥

'उशीरः' बालकः । 'कुन्दुरुः' कुन्द इति नाम्ना प्रसिद्धः तृणविशेषः । 'वल्वजः' काशसदृशस्तृणविशेषः, यस्य रज्जुभिः पामरैः खट्वा वितन्यते ।

बर्हिः प्रत्याह यमः ।

कुशाः काशास्तथा दूर्वा यवा व्रीहय एव च ।
वल्वजाः पुण्डरीकाणि सप्तधा बर्हिरुच्यते ॥

उशनाः ।

पिण्डबर्हिः कुशाः काशा दूर्वा मुञ्जाश्च वल्वजाः ।
मुञ्जेक्षुव्रीहिगोधूम यवकुन्दुरुबालकाः ॥
एकादश्यां त्रयोदश्यां मघाकृत्तिकयोरपि ।
पिण्डदानं न कर्तव्यं दूर्वासु श्रियमिच्छता ॥

पिण्डबर्हिषि तु वल्वजनिषेधमाह गोभिलः ।

बर्हिरुपमूललूनं पितृभ्यस्तेषामलाभे शूकतृणशरबल्वजवर्जं सर्वतृणानि ।

'शूकतृणं' शुकवत्तृणम् ।

अत्रापस्तम्बसूत्रम् ।

समूलं सकृदाच्छिन्नं बर्हिराहरन्ति । सकृदाछिन्नानि वा तृणान्युपमूलं दितानीति । 'उपमूलं' मूलसमीपे' 'दितानि' छिन्नानि ।

निषिद्धानि तृणान्युक्तानि वायुपुराणे ।

सदा श्राद्धे क्षुपाश्चैव वल्वजास्तरवस्तथा ।
वीरणाश्च लवाश्चैव वर्ज्या वर्षाश्च नित्यशः ।
एवमादीन्यथान्यानि तृणानि परिवर्जयेत् ॥

इति कुशनिरूपणम् ॥

अथ तिलाः ।

तत्र तेषामुत्पत्तिस्तावन्निरूप्यते वाराहपुराणे ।

धरण्युवाच ।

कथं तिलाः समुत्पन्नाः केन चोत्पादिताः प्रभो ।
पितृणां बल्लभाः कस्मादिति मे वक्तुमर्हसि ॥

श्रीवराह उवाच ।

ब्रह्मक्षेत्रे कुरुक्षेत्रे देवा ब्रह्मपुरोगमाः ।
आदित्या वसवः साध्याः भास्करा मरुतोऽश्विनौ ॥
विश्वेदेवाश्च उषिता रुद्राश्चेन्द्रो वृहस्पतिः ।
आरेभिरे महायज्ञं गोसवं संशितव्रताः ॥
आहूतास्तत्र वै देवाः सर्वशो वरवर्णिनि ।
ऋषयश्च जितात्मानो नानादेशनिवासिनः ॥
अध्वर्यूद्गातृहोतारस्तत्र ब्राह्मणपुङ्गवाः ।
स्वाहाकारवषट्कारैरध्वरं तं वितेनिरे ॥
आज्याहुतिभिरग्र्याभिर्मन्त्रपूताभिरेव च ।
सामिधेनीसमिद्धेषु दीयमानेषु[1] वन्हिषु ॥
विचित्राणां तथान्नानां प्रदानैरनिवारितैः ।
यथाकामाभिसम्पन्नैस्तर्प्यमाणेषु भोक्तृषु ॥
गो-भू——हिरण्य——वासोभिर्दीयमानैर्यदृच्छया ।
अनार्त्तिभूमिदेवेषु नीयमानेषु कृत्स्नशः ॥
दक्षिणाभिरनन्ताभिः प्रीतेष्वृत्विक्षु चैव हि ।
समागतेषु देवेषु तत्र सर्वेषु केवलम् ॥
राज्ञा सोमेन सहिता आजग्मुः पितरस्तदा ।
यज्ञसम्भारसम्भ्रान्तैर्नाहूतास्ते पुरामरैः ॥
अथ ते पितरः श्रुत्वा तायमानं[2] तु गोसवम् ।
सोमेन राज्ञा सहिताः समाजग्मुस्त्वरान्विताः ॥
तान् दृष्ट्वा सवनस्थाने विलक्षा भीतमानसाः ।
प्रोचुः प्राञ्जलयः सर्वे गम्यतां गम्यतामिति ॥
ततः ससोमाः पितरः क्रोधसंरक्तलोचनाः ।
प्रत्यूचुर्वेपमानाङ्गाः किमस्माभिरिहागतैः ॥
पूर्वमस्मानवज्ञाय युष्माभिर्विततः क्रतुः ।
वाङ्मात्रेणापि वै देवाः किं न सम्भाविता वयम् ॥
शप्स्यामहे ततः सर्वान् यजमानान् सऋत्विजः ।
अथ ते विबुधा भीता रक्षेत्यूचुः पितामहम् ॥
उवाचाथ विरिञ्चोऽपि कश्यपं तैर्ध्रुवं तदा ।
ससोमकान् पितृगणान् सान्त्वय त्वं महामुने ॥
कश्यपोऽपि महाभागो निदेशात्परमेष्ठिनः ।
प्रणम्य सोमं राजानं भक्त्या पितृगणानपि ॥
तुष्टाव विविधैः स्तोत्रैर्ऋग्यजुःसामसम्भवैः ।
तमूचुः पितरः सर्वे तुष्टास्तव महामुने ॥

---

[1] दीप्यमानेष्विति ।   [2] नीयमानमिति ।

न च शापप्रदानस्य विघ्नः कार्यस्त्वयाधुना ।
अकृत्वा दण्डतेषामवलेपवतां मुने ॥
नास्माकं मनसः शान्तिरतोऽस्मान्मा निवारय ।
अब्रवीत्कश्यपोऽथैतान् क्षमध्वं योगवित्तमाः ॥
यज्ञभागादपि श्रेष्ठं भवद्भ्योऽन्नं ददाम्यहम् ।
इत्यूचिवान् मुनिः स्वेभ्यो गात्रेभ्योप्यसृजत्तदा ॥
तिलान् कृष्णानतिश्लक्ष्णान् सुमृष्टानमृतादपि ।
सृष्टवानथ रोमभ्यस्तिलान् श्वेतान् मुनीश्वरः ॥
तेषामधिपतिं सोमं राजानं समकल्पयत् ।
प्रकल्प्य तिलराशीन् वै पितृन् प्रोवाच कश्यपः ॥
इदमन्नं मया दत्तं पितरः प्रतिगृह्यताम् ।
आकल्पं तृप्तये वोऽस्तु त्यज्यतां शापसम्भ्रमः ॥
अथातः पितरः सर्वे प्रीताः सोमपुरोगमाः ।
तिलानां दर्शनेनैव परमां तृप्तिमागताः ॥
ऊचुः प्रसन्नमनसञ्जाताः स्मो मुनिपुङ्गव ।
किं कार्य्यं यज्ञभागेन तिला एव भवन्तु नः ॥
वयं शापान्निवृत्ताः स्मस्त्रिदशाः सन्तु निर्भयाः ।
अतः परं तिला एव देया नः श्रद्धयान्वितैः ॥
नामृतेनापि नः कृत्यं तिलान् यदि लभामहे ।
यस्तर्पणञ्च श्राद्धं च तिलपूतं करिष्यति ॥
भक्ष्यांस्तिलमयांश्चापि भक्त्या नः सम्प्रदास्यति ।
देयद्रव्याणि चान्यानि प्रदास्यन्ति तिलोदकैः ॥
तस्य प्रजां धनं स्वर्गं प्रीता दास्यामहे वयम् ।
इत्युक्त्वान्तर्दधुस्ते वै पितरो दिव्ययोगिनः ॥
हिरण्यगर्भप्रमुखा ययुर्देवा यथागतम् ।
इत्येवं सोमदेवत्या गोसवे देवनिर्मिताः ॥
तिलाः कृष्णाश्च शुक्लाश्च किमन्यच्छ्रोतुमर्हसि ।

मत्स्यपुराणे ।

विष्णोर्देहसमुद्भूताः कुशाः कृष्णतिलास्तथा ।
धर्मस्यरक्षणायालमेतत्प्राहुर्दिवौकसः ॥

प्रभासखण्डे ।

विष्णोः स्वेदात्तिला जाताः कुशा रोमभ्य एव च ।
श्राद्धस्य रक्षणार्थाय इति प्राहुर्महर्षयः ॥

ब्रह्मवैवर्त्ते ।

तिला विष्णोः समुद्भूतास्ततस्ते परमं हविः ।
तिलैः श्राद्धच्च होमाच्च स्यात् जगत्प्रीतिभार्गव ॥

अथ तिलानां महिमविधिरुच्यते। आदित्यपुराणे।

दुर्व्वासा उवाच।

कथं तिलाः समुत्पन्नाः कथञ्चैवावतारिताः।
एवं मे संशयं देव छेत्तुमर्हस्यशेषतः॥

भानुरुवाच।

शृणुष्वावहितो विप्र सर्व्वं वक्ष्याम्यशेषतः।
पुरा कृतयुगे शश्वदनावृष्ट्यान्तिलक्षये॥
क्षुत्क्षामकण्ठास्तृषिताः पितरः सर्व्व आगताः।
तपश्चेरुश्च विपुलं तिलार्थे नात्र संशयः॥
दिव्यवर्षसहस्रन्तु निराहारास्तपस्विनः।
परिवृत्तः सर्व्वगणैः सर्व्वैर्देवैर्विशेषतः॥
गन्धर्वैश्चारणैर्यक्षैः सिद्धैः किन्नरपन्नगैः।
प्रजापतिः पितृपतिः साक्षाद्देवपितामहः॥
परितुष्टोऽस्मि वो दद्मि ब्रूत यच्चेप्सितं हि वः।

पितर ऊचुः।

तिलान् देहि महाभाग काङ्क्षितान् वै न संशयः।
तिलैर्विना न जीवामो नातिलस्तिष्ठते हृदि॥

ब्रह्मा उवाच।

गच्छध्वं वै तिला दत्ताः सर्वेषां वो द्विजोत्तमाः।
परितुष्टाश्च पितरः तिलानादाय निर्ययुः॥
ततः पितृणामाहारः सर्वस्तिलमयोऽभवत्।
तिलामृतेन सन्तुष्टाः पितरो निर्वृतिं ययुः॥
तिलान् यस्तु प्रयच्छेत पितृणां तृप्तिकाम्यया।
अग्निष्टोमसहस्रस्य फलं प्राप्नोति मानवः॥
वैशाख्यां पौर्णमास्याश्च तिलान् क्षौद्रेण संयुतान्।
यः प्रयच्छेद्द्विजाग्र्येभ्यः सर्वपापैः प्रमुच्यते॥
कृषिभागी च धनवान् जायते नात्र संशयः।
यः श्रद्धधानः श्राद्धेषु गुड़ेन तिलमोदकान्॥
सितया वापि मत्स्यण्ड्या कृत्वा भक्त्या प्रयच्छति।
तस्य तृप्ताः पितृगणाः प्रयान्ति परमां गतिम्॥
तस्यैवायुः प्रयच्छन्ति स्वर्गमारोग्यमेव च।
तिलैस्तु कृशरान् कृत्वा दद्याच्च तिलशष्कुलीः॥
ददाति यः पितृणां वै तस्य लोकोऽक्षयो मतः।
यश्चाक्षयतृतीयायां तिलपात्राणि यच्छति॥

अयने चोत्तरे चैव तस्य पुण्यमनन्तकम् ।
यो धर्मराजाय तिलान् ददाति श्रद्धया नरः ॥
महर्षेः कश्यपस्यैव गात्रेभ्यः प्रसृतास्तिलाः ।
ततो दिव्यं गता भावं प्रदानेषु तिलाः प्रभो ॥

महाभारते ।

तिलान् श्राद्धे प्रशंसन्ति दानमेतदनुत्तमम् ।
तिला नित्यं प्रदातव्या यथाशक्त्या द्विजर्षभ ॥

अत्राह सत्यव्रतः ।

जर्त्तिलास्तु तिलाः प्रोक्ताः कृष्णवर्णा वनोद्भवाः ।
जर्त्तिलाश्चैव ते ज्ञेया अकृष्टोत्पादिताश्च ये ॥

आपस्तम्बोऽपि ।

अटव्यां ये समुत्पन्ना अकृष्टफलितास्तथा ।
ते वै श्राद्धे पवित्रास्तु तिलास्ते न तिलास्तिलाः ॥

येऽटव्यामुत्पन्ना अकृष्टायां च भूमौ फलितास्ते जर्त्तिलाख्यास्तिलाः, श्राद्धकर्मणि प्रशस्ततमाः । ये तु ग्राम्याः कृष्टक्षेत्रे फलिताः प्रसिद्धास्तिलास्ते न तिलाः । नायं तेषां तिलरूपस्य निषेधः । अशक्यत्वात् । नापि तिलकार्य्यकारित्वनिषेधः । लौकिकतत्कार्यकारित्वनिषेधस्य प्रत्यक्षादिबाधितत्वात् । नापिवैदिककार्यकारित्वस्य निषेधः । वचनविरोधात् ।

तथा च ब्रह्माण्डपुराणे ।

यतिस्त्रिदण्डी करणं राजतं पात्रमेव च ।
दौहित्रः कुतपः कालः छागः कृष्णाजिनं तथा ॥
गौराः कृष्णास्तथारण्यास्तथैव विविधास्तिलाः ।
पितॄणां तृप्तये सृष्टा दशैते ब्रह्मणा स्वयमिति ॥

अत्र त्रिदण्डीति यतेर्विशेषणाम् । राजतमिति पात्रस्य । कुतप इति कालस्य । गौरास्तिलाः कृष्णास्तिलाः आरण्यस्तिला इति विशेषण भेदात् त्रयः पदार्थाः । एवं च दशसङ्ख्या घटते । अस्मिंश्च वचने सर्वप्रकाराणां तिलानां वैदिककार्य्यकारित्वाभिधानान्न न प्रसिद्धानां तिलानां तत्कारित्वनिषेधो घटते । अतः "न तिलास्तिलाः" इति, "अपशवो वा अन्ये गोऽश्वेभ्यः" इतिवद्विधीयमानजर्त्तिलप्रशंसार्थं निन्दामात्रमिति ।

इति तिलनिरूपणम् ।

अथ यवाः ।

तत्र तेषामुत्पत्तिः शतपथश्रुतौ ।

पुरुषं ह वै देवाः । अग्रे पशुमालेभिरे तस्यालब्धस्य मेधोऽपचक्राम सोऽश्वंप्रविवेश तेऽश्वमालभन्त तस्यालब्धस्य मेधोऽपचक्राम स गां प्रविवेश ते गामलभन्त

तस्यालब्धस्य मेधोऽपचक्राम सोऽविं प्रविवेश तेऽविमालभन्त तस्यालब्धस्य मेधोऽपचक्राम सोऽजं प्रविवेश तेऽजमालभन्त तस्यालब्धस्य मेधोऽपचक्राम। स इमां पृथिवीं प्रविवेश। तं खनन्त इवान्वीषुस्तमन्वविन्दंस्ताविमौ व्रीहि-यवौ तस्मादप्ये-तावेतर्हि खनन्त इवैवानुविन्दन्ति स यावद्वीर्यवद्ध वाऽअस्यैते सर्व्वे पशवः आलब्धाः स्युस्तावद्वीर्य्यवद्धास्य हविरेव भवति य एवमेतद्वेदेति[१]।

एतान् सर्वान् पशूनालभ्य यजमानस्य यावत् फलं तावद् व्रीहिभिर्यवैर्वा यजमानस्य फलं स्यादिति वचनार्थः।

चमत्कारखण्डे।

प्रजाकामः पुरा त्वष्टा तुष्टाव परमेष्ठिनम्।
ततो गोत्रभिदः शत्रुं वृत्रं पुत्रमजीजनत्॥
जातमात्रः स लोकानां महाकायो महाबलः।
भयं सञ्जनयामास भुवनग्रासलालसः॥
अधस्तादूर्द्ध्वतस्तिर्यगिषुमात्रं हि सर्वशः।
प्रत्यहं वर्द्धते तस्य शरीरममितौजसः॥
स विश्वं व्यानशे वीरः स्वल्पकेनाप्यनेहसा।
जिघत्सुर्युगपद्विश्वं स हि पित्रा निवारितः॥
पूर्वाह्णे वुभुजे देवैर्दीप्यमानं बलिं बली।
मध्यन्दिने च मनुजैरपराह्णे पितृव्रजैः॥
एवं स सर्व्वमन्नाद्यमेकाकी ग्रसते तदा।
एक एव पपौ सोममेक एवाहरद्धविः॥
ततो बृहस्पतिर्देवैः संभृतो यज्ञसक्तिभिः।
चिक्षेप क्षेपणायास्य ज्वलन्तमशनिं शनैः॥
स दम्भोऽलिप्रहारेण दुद्धरेण धरातले।
वृत्रः पपात पातालकुहराणि प्रदारयन्॥
ततः प्रस्कन्नमन्नाद्यरसं सर्वं वसुन्धरा।
दधार जगदाधारा धाराभिरभिपातितम्॥
अथ तस्मान्महौषध्यो जज्ञिरे यज्ञसाधनम्।
मिश्रान्नरसजातत्वाद्धीयमाना यवाख्यया॥
ततो वृत्रासुरबधात् परितुष्टा दिवौकसः।
यवानालोक्य परमं परितोषमुपाययुः॥
ऊचुः सर्वे प्रमुदिताः सुधाहाराः परस्परम्।
आरण्यानामोषधीनां ग्राम्याणामप्ययं रसः॥
राज्ञः सोमस्य सारोऽयमाविर्भूतो यवात्मना।
वृत्रासुरस्य वीर्येण परमेणोपबृंहिताः॥

---

[१] का. १, प्र. २, अ. २, सू. ६, ७।

एते पवित्रमस्माकमेत एव परं हविः ।
एते पीयूषमधुराः सर्वदा प्रीणयन्तु नः ॥
हविर्यज्ञाः प्रवर्त्तन्तामेतैरमृतभोजिनाम् ।
कर्म्माण्येते नियुज्यन्तां शान्तिके पौष्टिकेऽपि च ॥
यत्किञ्चिद्दैवदैवत्यं श्रद्धावद्भिः प्रदीयते ।
तदेतन्मिश्रितैरेव सलिलैः संप्रदीयताम् ॥
श्राद्धेषु वैश्वादेवानि यानि कर्माणि कानिचित् ।
एतैरेव विधीयन्तां तानि श्रोत्रियपुङ्गवैः ॥
यवैरर्थो यवैर्दानं यवैरक्षा यवा हविः ।
वैश्वदेवे तु यत्र स्यात्तृप्तिस्तत्रास्तु शाश्वती ॥
इत्युक्त्वा विबुधाः प्रीताः स्वानि धामानि भेजिरे ।
पूर्व्ववद् भुवनान्यासन् पाकशासनशासने ॥

अथ यवानां महिमा ।

तत्र शतपथश्रुतिः ।

देवाश्च वा असुराश्च, उभये प्राजापत्याः पस्पृधिरे ततो देवेभ्यः सर्वा एवौषधय ईयुर्यवा हैवेभ्यो नेयुः । तद्वै देवा अस्पृण्वत । त एतैः सर्वाः सपत्नानामोषधीरयुवत यदयुवत तस्माद्यवा नाम । ते होचुः । हन्त यः सर्वासामोषधीनां रसस्तं यवेषु दधामेति स यः सर्वासामोषधीनां रस आसीत्तं यवेष्वदधुस्तस्माद्यत्रान्या ओषधयो म्लायन्ति तदेते मोदमाना वर्द्धन्त एवं ह्येषु रसमदधुस्तथोऽएवैष एतैः सर्वाः सपत्नानामोषधीर्युते[१] इति ।

पुरा देवासुरविग्रहे प्रवृत्तिबलिभिरसुरैर्देवेभ्यः सर्वा एवौषधयोऽपहृत्य नीताः । केवलं रक्षोघ्नशक्तिविशेषवद्भ्यो यवेभ्यो विभ्यद्भिरसुरैस्त एव नेतुं नाशक्यन्त । ततो देवा देवानामेव महिम्ना सर्वानप्यसुरान् विद्राव्य सर्वा अप्योषधीरात्मना सह दध्रिरेतः सर्वतश्च यवा इति वाक्यार्थः ।

अथ कृष्णाजिनम् ।

तत्र शतपथश्रुतिः ।

सद्यः स यज्ञस्तत्कृष्णाजिनमिति ।

तथा ।

श्रेयांसं वा एष उपाधिरोहति यो यज्ञं यज्ञो हि कृष्णाजिनमिति ।

त्रैलोक्यात्मकत्वेनापि कृष्णाजिनस्य स्तुतिस्तत्रैव ।

यद्यु एकं भवति तदेषां लोकानां रूपं तदेनमेषु लोकेष्वधिदीक्षयति यानि शुक्लानि तानि दिवो रूपं यानि कृष्णानि तान्यस्यै यदिवेतरथा यान्येव कृष्णानि तानि दिवो रूपं यानि शुक्लानि तान्यस्यै यान्येव बभ्रूणीव हरीणि तान्यन्तरिक्षस्य रूपं तदेनमेषु लोकेष्वधिदीक्षयतीति ।

---

[१] का. ३ प्र. ४ अ. ६ सू. ८, ९ ।

शुक्लानीत्यादिषु रोमाणीतिशेषः। 'अस्यै' पृथिव्याः। 'बभ्रूणि' कडारानि, 'हरीणि' हरिणवर्णानि।

नागरखण्डे।

भर्तृयज्ञ उवाच।

ततः शक्त्या पुरा सृष्टः सृष्टिकामेन वेधसा।
आसीत्क्रतुक्रियादक्षो दक्षो नाम प्रजापतिः॥
शतमेकोत्तरं कन्याः स प्रासूत महातपाः।
ताश्च धर्म्येण विधिना सुरेभ्यः प्रत्यपादयत्॥
ददौ स दश धर्माय कश्यपाय त्रयोदश।
पीयूषभानवे चैव प्रीतात्मा सप्तविंशतिम्॥
अन्येभ्यो मतिमानन्यास्ताः कन्याः स च दत्तवान्।
सुता दाक्षायणी नाम सर्वाभ्योऽपि यवीयसी॥
तेन त्रिभुवनेशाय प्रदत्ता कृत्तिवाससे।
स कदाचित् क्रतुं कर्तुमारेभे धर्मकर्मठः॥
संभृताशेषसम्भारः पुरुहूतपुरोगमान्।
सुरानाकारयामास तेन तत्र महोत्सवे॥
जामातरस्तु सत्कृत्य कृत्तिवाससमन्तरा।
आहूतास्तेन सर्वेऽपि गीर्वाणगणवन्दिना॥
अभवन् ऋत्विजस्तत्र मरीच्याद्या महर्षयः।
ततः प्रवितते तस्मिन्नध्वरे बहुदक्षिणे॥
यक्षान् सुपर्वणः सर्वान् गन्धर्वानुरगानृषीन्।
पश्यन्ती दीव्यतोऽशेषान् वसन्ती भवने पितुः॥
दयितं स्वमनालोक्य परिम्लानमुखाम्बुजा।
दाक्षायणी क्षणात् क्षोणीं विलिखन्ती यदा तदा॥
उपेत्य पितरं साध्वी साध्वसाकुललोचना।
आलम्बमाना मन्दाक्षं मन्दाक्षरमुवाच सा॥
तात नातः परः कश्चिदुत्सवो भविता ततः।
कस्मादस्माकमीशोऽसावेतस्मिन्नपि विस्मृतः॥
अद्यापि जगतां कर्त्ता मद्भर्त्ताहूयतामिह।
तं विना यज्ञपुरुषं यज्ञोऽपि तव कीदृशः॥
इत्युक्तो बालया दक्षः कोपविस्फुरिताधरः।
उवाच वत्से बीभत्सदर्शनोऽसौ निराकृतिः॥
कापालिकः कथंकारं प्रवेश्यो यज्ञभूमिषु।
इह तेन वयं पुत्रि जामात्राऽपत्रपामहे॥
पतिव्रतानामेतासां पश्यन्तीनां पुरः कथम्।
असावमङ्गलाचारः समानेयो दिगम्बरः॥

इति रोषेण परुषं दक्षेऽनल्पं प्रजल्पति ।
पिधाय कर्णौ तन्वङ्गी स्मरन्ती स्मरवैरिणम् ॥
विससर्ज तदा प्राणान् न वाचं शोकसंयुता[१] ।
ततो जगत्यशेषेऽपि हाहाकारो महानभूत् ॥
आकर्ण्य तमपर्णाया वृत्तान्तं त्रिपुरान्तकः ।
शुचाः संपीड्यमानोऽपि क्रोधस्यैवाभवद्वशः ॥
अथ क्षणेन संनद्धां क्रुद्धां गणपताकिनीम् ।
पुरस्कृत्य पुरां भेत्ता प्रतस्थे दुःस्थयं जगत् ॥
ततः प्रववृते युद्धं सार्द्धं विबुधसैनिकैः ।
दक्षस्य पक्षपातेन प्राप्तैर्नारायणादिभिः ॥
अथ रुद्रगणैः रुद्धां समरेऽमरवाहिनीम् ।
ववर्षाधिकसम्बद्धाः शरासारैर्निरन्तरम् ॥
घोरैः शस्त्रास्त्रसम्पातैः प्रहरन् पृतनाद्वयम् ।
सस्मार योगशक्तिं स्वामनादिनिधनः शिवः ॥
ततः क्षणात्पराभूताः प्रभूता दिविषद्भटाः ।
कां दिशं कां दिशं जग्मुराक्रान्तास्ते समन्ततः ॥
असहन्त न हन्तारं नाकिनस्ते पिनाकिनम् ।
तेनाविन्दन्त गोविन्दप्रमुखा न तु धीरताम् ॥
अथ यज्ञपतिं त्रस्तं कृष्णसारवपुर्धरम् ।
पलायमानमद्राक्षीत् भगवान् भगनेत्रहा ॥
विव्याध त्रिपुरव्याधस्तं शरेण त्रिपर्वणा ।
चिच्छेद च शिरो व्योम्नि तदेनन्मृगशीर्षकम् ॥
अद्यापि दृश्यते लोके लोकेशस्य यशोद्भवम् ।
भूमौ मखकुरङ्गस्य कबन्धं निपपातयत् ॥
तं वास्तुपुरुषं प्राहुर्वास्तुशास्त्रविशारदाः ।
अङ्गाद् गंगाधरस्तस्य कृत्तिमुत्कृत्य कृत्स्नशः ।
ससर्ज धूर्जटिः पुण्यं कृष्णाजिनमनुत्तमम् ।
अब्रवीच्च विरूपाक्षो दीक्षासाधनमुत्तमम् ॥
इदमस्तु समस्तानां दानानामपि चाधिकम् ।
सन्निधापयिता यश्च श्राद्धे कृष्णाजिनं नरः ॥
प्राप्स्यन्ति पितरस्तस्य तृप्तिमाकल्पकालिकीम् ।
इत्युक्त्वा वामदेवस्तु देवदारुवनं ययौ ॥
इत्येवमिदमुत्पन्नं मेध्यं कृष्णाजिनं पुरा ।
एतच्छ्राद्धे प्रयत्नेन सन्निधाप्यं मनीषिभिः ॥

---

[१] शोकसङ्कुलेति, ।

एतस्य सन्निधानेन पितॄणामक्षया गतिः।
आस्तीर्य्य दक्षिणग्रीवमेतदुत्तरलोमकम्॥

सर्व्वान् श्राद्धस्य सम्भारान् तस्योपरि निवेशयेत्।

ब्रह्मवैवर्त्ते।

कृष्णाजिनस्य सान्निध्यं दर्शनं दानमेव च।
रक्षोघ्नं ब्रह्मवर्चस्यं पशून् पुत्रांश्च तारयेत्॥

नागरखण्डे।

संस्पर्शनात् कृष्णमृगाजिनस्य,
सर्वे पदार्थाः शुचयो भवन्ति।
तस्मात् प्रयत्नेन निवेशनीयं,
श्राद्धप्रदेशेष्विदमागमज्ञैः॥

इति कृष्णाजिननिरूपणम्॥

अथ रजतम्।

तत्र तावदुत्पत्तिर्नन्दिपुराणे—

अथ देवो विरूपाक्षः प्रत्यालीढं समाश्रितः।
स्थानकं शरमादाय सर्वदेवमयं तदा॥
आकृष्य मन्दरं चापं वासुकिं ज्यावनामितम्।
त्रिपुरस्य बधार्थाय निर्निमेषैर्विलोचनैः॥
ततोऽश्रुकण एकस्मादपतत्तस्य लोचनात्।
तस्माद्रूप्यं समभवत् सशाखं पिटपोज्वलम्॥
द्वितीयादपतन्नेत्राश्रुविन्दुस्तु वामकात्।
तस्माद्रजतमुत्पन्नं पितृकर्मसु शंसितम्॥

अत्र पितृकर्मस्विति विशेषणाद्दैवकर्मसु रजतस्य निषेधो गम्यते। अतएव मत्स्यपुराणे रजतं प्रकृत्योक्तम्।

शिवनेत्रोद्भवं यस्मात्तस्मात् तत्पितृवल्लभम्।
अमङ्गलञ्च यज्ञेषु देवकार्ये विवर्जितम्[1]॥
रजतं दक्षिणामाहुः पितृकार्येषु सर्वदा॥ इति।

तैत्तिरीयशाखायाम्।

देवासुराः संयता आसंस्ते देवा विजयमुपयन्तोऽग्नौ वामं वसु संन्यदधन्ते दमु नो भविष्यति यदि नो जेष्यन्तीति तदग्निर्न्यकामयत तेनापाक्रामत्ते देवा विजित्यावरुरुत्समाना अन्वायंस्तदस्य सहसादित्सन्त सोऽरोदीत् यदरोदीत्तद्रुद्रस्य रुद्रत्वम्।

---

[1] देवकार्ये च वर्जितमिति।

यदश्रशीर्यत् तद्रजतं हिरण्यमभवत् तस्माद्रजतं हिरण्यमदक्षिण्यमश्रुजं यो बर्हिषि ददाति पुरास्य संवत्सराद्गृहे रुदन्ति तस्माद्बर्हिषि न देयमिति ।

अस्यार्थः ।

देवाश्चासुराश्चान्योन्याः, 'संयताः' संग्रामोद्यताः, पुरा बभूवुस्तत्र विजयकामाः सन्तो देवाः संग्रामभूमिं प्रतिष्ठमानाः 'वामं' रमणीयतमं, 'वसु' धनं, स्वकीयं, रक्षणायाग्निहस्तेन्यदधुर्यदि नामासुरैर्जिता वयं भवेम तदैतद्धनमस्माकं निर्वासाय भविष्यतीत्यनुसन्धाय, तदिदं धनमग्निरतिलुब्धतया ममैवेदमस्त्विति नितरमकामयत । स तत्रोपायं विचार्य तस्माद्देशात् 'अपाक्रामत्' अपलायत । अथासुरान् विजित्य देवास्तद्धनं 'अवरुरुत्समानाः' अवरोद्धुमवाप्तुमिच्छन्तः, अग्निं 'अन्वायन्' अगच्छन् 'तदस्य' अग्नेः, सकाशात् 'सहसा' बलेन, 'आदित्सन्त' आदातु मैच्छन्, तदासावग्निररोदीत्ततोऽसौ रुद्र नामाभवत् । तदस्य रुदतः 'यदश्रु' लोचनजलं, 'अशीर्यत' भूमावपतत्, तद्रजतमभवत् । तस्मात् 'बर्हिषि' देवदेवत्येकर्म्मणि, रजतं न देयमिति ।

अथ रजतमहिमा ।

नन्दिपुराणे ।

रजतेन समायुक्तं यद्यच्छ्राद्धेषु किञ्चन ।
तत्तदक्षयमित्युक्तं रहस्यं पितृभिः स्वयम् ॥
अथात्र रजताभावे वरं रजतसंश्रयम् ।
कृत्वा श्राद्धेषु प्रीणाति पितॄनब्दानि षोडश ॥

स्कन्दपुराणे ।

यः प्रयच्छति विप्राय रजतं चातिनिर्मलम् ।
स विधूयाशु पापानि स्वर्गलोके महीयते ॥
रूपकः सुभगः श्रीमानिह लोके च जायते ॥

ब्रह्मवैवर्त्ते ।

रजतस्य कथा वापि दर्शनं दानमेव च ।
अनन्तमक्षयं स्वर्ग्यं राजतं दानमेव च ॥
पितॄनेतेन दानेन सत्पुत्रास्तारयन्त्युत ।

नागरखण्डे ।

धातूंस्तु सृजता पूर्वं रौप्यं सृष्टं स्वयम्भुवा ।
तेन तद्विहिता श्राद्धे दक्षिणा पितृतृप्तये ॥
अलाभे सति रूप्यस्य नामानि परिकीर्त्तयेत् ।
तुष्यन्ति पितरो राजन् कीर्त्तनाद्रजतस्य च ॥
न हि रूप्यात् परं किञ्चिन् पितॄणां विद्यते प्रियम् ।
रूप्यं दृष्ट्वैव पितरो यान्ति प्रीतिमनुत्तमाम् ॥

नारदीयपुराणे ।

य इच्छेत् परमां प्रीतिं पितॄणां चाक्षयां गतिम् ।
तेन श्राद्धेषु यत्नेन रूप्यं देयं द्विजोत्तम ॥

रूप्यं हस्तेन दातव्यं यत् किञ्चित् पितृदैवतम् ।
तेन स्युः पितरस्तृप्ता यावदाभूतसंप्लवम् ॥
रजतं दक्षिणां दद्यात् श्राद्धकर्म्मणि यो नरः ।
पितॄनेतेन तेन स्युरिष्टाः पितृपितामहाः ॥

वाराहपुराणे ।

तर्जन्यां रजतं धृत्वा पितृभ्यो यत्प्रदीयते ।
अन्तोऽस्ति परमाणूनां तस्यान्तो नैव विद्यते ॥
राजतान्यर्घ्यपात्राणि कारयेत् पितृकर्मणि ।
तथा भोजनपात्राणि कुर्याद्रूप्यमयानि तु ॥
परिवेषणपात्राणि पिण्डपात्राणि चैव हि ।
रूप्येणैव प्रकुर्वीत पितृभक्तिपरो नरः ॥
एवं कृतं तु यच्छ्राद्धं यत्र कुत्र स्थितेन हि ।
तद् गयाश्राद्धमेव स्यान्नात्र कार्या विचारणा ॥
रजतं दक्षिणां दत्वा श्राद्धेषु प्रयतो नरः ।
आत्मानञ्च पितॄंश्चैव नयति ब्रह्म शाश्वतम् ॥

प्रभासखण्डे ।

रूप्यं पितॄणामतिवल्लभं तत्
दत्वा नरो वल्लभतामुपैति ।
सोमस्य लोके लभते स तावद्
ध्रुवे निबद्धा ऋषयो हि यावत् ॥

'ध्रुवे निबद्धा ऋषयः' सप्तर्षिसंज्ञका ऋषयः ।

रजतदानमत्र दक्षिणादिरूपेण श्राद्धब्राह्मणेभ्यो वेदितव्यम् । रजतभाजन-प्रशंसा तु भाजनप्रकरणे वक्ष्यते ।

इति रजतनिरूपणम् ।

अथ हिरण्यम् ।

तत्र शतपथश्रुतिः ।

"अश्वस्य वा आलब्धस्य रेत उदक्रामत्तत् सुवर्णं हिरण्यमभवदिति ।

तथा ।

अग्निर्हवा आपोऽभिदध्यौ मिथुन्याभिः स्यामिति ताः संबभूव तासु रेतः प्रासिञ्चत्तद्धिरण्यमभवत् तस्मादेतदग्निसंकाशमग्नेर्हि रेतस्तस्मादप्सु विन्दन्त्यप्सु हि प्रासिञ्चत्तस्मादेनेन न धावयति न किञ्चन करोत्यपयशो देवरेतसं हि तद्यशसैवेन-मेतत् समर्द्धयति ।

स्कान्दे-काशीखण्डे ।

भगवानुवाच ।

महेश्वरस्य यद्रेतः पवित्रं शुक्रमुत्तमम् ।
समाकृष्टं पुरा गौर्या दुराधर्षतमात्पतेः ॥
देवतानां हितार्थाय तदग्नौ प्राक्षिपत् पुरा ।
मुखेनैवापिबद्रेतः शुक्रं चैव पिनाकिनः ॥
ततो ज्वलति वै वह्निः काष्ठमध्यस्थितो यथा ।
तदौष्ण्येन परीतोऽसौ गङ्गायां प्राक्षिपत् पुनः ॥
क्वाथित्वा च पुनर्गङ्गा ससमुद्रसरिद्गणा ।
भूम्यां निखनिता साऽथ पर्व्वतैरभ्यपातयत् ॥
तप्तायःपिण्डवद्भूमिः सद्वीपकुलपर्वता ।
ततस्तदैश्वरं रेतः स्वरसेन सपावकम् ॥
दग्ध्वा समस्तं भुवनं यातं शरवनं प्रति ।
ततः स्कन्दः समभवत् स्कन्दसम्पर्कि यज्जलम् ॥
तत् स्वच्छं स्वर्णमभवद्विप्रुषो याः समुत्थिताः ।
स्वेदकाश्चापतन्मेरावासीदाद्यन्तसंयुतः ॥
वृक्षगुल्मलतायुक्तो मेरुः परमकाञ्चनम् ।
दधित्थः समभूत्प्रान्ते जम्बूपक्व कचिद्गिरेः ॥
तस्य मूलेन संयुक्तो व्यवर्द्धत महातरुः ।
तस्य पर्व्वतमात्राणि फलानि लघुजीवनः ॥
महास्वादूनि न्यपतन् सर्वर्तुष्वविशेषतः ।
तेषां रसौघान् महतः सरिदासीत् समुद्रगा ॥
जाम्बूनदीति विख्याता पुराणे तरलोर्म्मिका ।
जाज्वल्यमाना सततं वह्निज्वालासमौष्णतः ॥
द्रष्टुं न शक्यते कैश्चिद्दशयोजनमायता ।
तीरमृत्तद्रसं प्राप्ता हेमत्वमभिगच्छति ॥
तत्संसक्तकसंसक्ता तद्रसाद् भूषितापि वा ।
मृत्तिका गृह्यते लोके वरिष्ठं स्वर्णमिच्छति ॥
तत् संसक्तं यदप्यन्यत् काञ्चनं परिकीर्त्त्यते ।
एतत् पवित्रं हेमाभूत् पुरा धर्म्यमनुत्तमम् ॥

ब्रह्माण्डपुराणे ।

हिमवद्दुहिता पूर्वमुमानामेति विश्रुता ।
पूर्व्वजन्मनि सा चासीद्दक्षस्य तनया सती ॥
दक्षकोपाच्च तत्याज सती चात्मकलेवरम् ।
हिमवद्दुहिता जज्ञे लोके गौरीति विश्रुता ॥
दत्ता तेनापि सा तस्मै प्रणिपत्य पिनाकिने ।
विवाहं कारयामास विधिवद् दुहितुस्तदा ॥

वैवाहिकेन विधिना जुहावाग्निं पितामहः ।
होमञ्च कुर्व्वतस्तस्य विकारो मान्मथोऽभवत् ॥
रूपं दृष्ट्वा तदा देव्या रेतस्कन्नं महात्मनः ।
पद्भ्याञ्च मृदितं तेन बहुधा समपद्यत ॥
तत्रोत्पन्ना महात्मानो बालखिल्या मरीचिपाः ।
अग्नौ च शेषमपतत् तच्चाभूज्ज्वलनप्रभम् ॥
जाज्वल्यमानदीप्त्या च अग्निमध्यगतं तथा ।
शशंशिरे ततो देवा दृष्ट्वा पुत्रं विभावसोः ॥
जगृहुः शिरसा चैव पुण्यत्वात्ते मुदान्विताः ।
विभूषणञ्च देवाश्च चक्रुरुत्तमतेजसः ॥

अथ हिरण्यमहिमा ।

तत्र शतपथश्रुतिः ।

देवरूपममृतं हिरण्यमिति ।

स्कान्द्रे-काशिखण्डे ।

ईशितुर्हृदयाज्जातं भोक्तृणाञ्च प्रियं धनम् ।
समुद्रस्य तथा मेरोर्जम्बूनद्यास्तटस्य च ॥
तस्माद्देवमनुष्याणां पवित्रं प्रियमुत्तमम् ।
यत् पवित्रं पवित्राणां तद्धिरण्यमुदाहृतम् ॥
शिरसा धार्य्यते देवैरीश्वरेणापि किं परैः ।
धारणात् स्पर्शनाद्दानात् दर्शनात् कीर्त्तनादपि ॥
लिङ्गार्च्चनेन समं पुण्यं मयापि ध्रियते यतः ।
हरणान्नाशनाद्द्वेषादवमानादयं ततः ॥
महत् प्रजायते हेम शिरो नष्टं हि पुष्कलम् ।
तस्मादेव ह्यभूदण्डं प्रथमन्त्वादिसर्गिकम् ॥
अतो हेममयंकुर्य्यादङ्गुलीयकसंज्ञकम् ।
पवित्रं परमं ह्येतदनामाङ्गुलिसंज्ञकम् ॥
अन्यानि च पवित्राणि कुशदूर्वात्मकानि वै ।
हेमात्मकपवित्रस्य ह्येकां नार्हन्ति वै कलाम् ॥

विष्णुधर्म्मोत्तरे ।

जाम्बूनदं तद्देवानामिन्द्रगोपकसन्निभम् ।
पितॄणां चन्द्ररश्म्याभं दैत्यानां शबलोपमम् ॥
नागानां तत् शुकाभं स्यान्नारीणां पीतमुच्यते ।

वह्निपुराणे सुवर्णं प्रकृत्य रामा उवाच ।

एतत्पवित्रमतुलं सम्भूतमिह विश्रुतम् ।
शम्भोर्बीजं परं ह्येतदपत्यं जातवेदसः ॥

सहजं कार्त्तिकेयस्य रुद्रशुक्रसमुद्भवम् ।
पवित्रत्वात् सुरैः सर्व्वैर्धार्यते मुकुटादिषु ॥
अग्निस्तु देवताः सर्वाः सुवर्णञ्च तदात्मकम् ।
तस्मात् सुवर्णं ददतां प्रीताः स्युः सर्वदेवताः ॥
दशपूर्वान् परांश्चैव नरकात्तारयन्ति ते ।
सुवर्णं ये प्रयच्छन्ति प्रोवाचेदं वृहस्पतिः ॥
सर्वान् कामान् प्रयच्छन्ति ये प्रयच्छन्ति काञ्चनम् ।
मरीचिर्भगवान् पूर्वं पितामहसुतोऽब्रवीत् ॥
यः सुवर्णं नरो नित्यं ब्राह्मणेभ्यः प्रयच्छति ।
स चिरं विरजा विद्वान् देववद्दिवि मोदते ॥
सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकक्षिति गौरीणां सप्तजन्मानुगं फलम् ॥
कृत्वापि सुमहत्पापं जातरूपं ददाति यः ।
स सद्यस्तेन पापेन मुच्यते नात्र संशयः ॥

ब्रह्माण्डपुराणे ।

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
पवित्राणां पवित्रं च दानानां नात्र संशयः ॥
पवित्रं परमं लोके सुवर्णेन समं क्वचित् ।
न विद्यते द्रव्यजातं दानं वा भूषणं तथा ॥

वृहस्पतिः ।

गृहादिके पुण्यफलं भवेन्मूल्यानुसारतः ।
तस्मात् सर्वप्रदानानां हिरण्यमधिकं स्मृतम् ॥
तथा सन्तानिकादीनां हेम्नां सम्पद्यते क्रिया ।
तथा न गृहदानेन हिरण्यमधिकं ततः ॥

वेदव्यासः ।

सर्वान् कामान् प्रयच्छन्ति ये यच्छन्ति काञ्चनम् ।
एवं हि भगवानत्रिः पितामहसुतोऽब्रवीत् ॥
पवित्रमथवा पुण्यं पितॄणामक्षयञ्च तत् ।
सुवर्णं मनुजेन्द्रेण मनुना संप्रकीर्त्तितम् ॥

मनुः ।

भूमिदः सर्वमाप्नोति दीर्घमायुर्हिरण्यदः ।

संवर्त्तः ।

हिरण्यदो महावृद्धिं दीर्घमायुश्च विन्दति ।

विष्णुः ।

सुवर्णदानेनाग्निसालोक्यमाप्नोति ।

विश्वामित्रः ।

यत्रास्ते लिखिता गेहे स्वर्णदानस्य संश्रुतिः ।
रक्षोभूतपिशाचास्तं न पश्यन्ति तु पार्थिव ॥

देवीपुराणे ।

ज्ञात्वा मानं सुवर्णादेः पात्रेषु प्रतिपादयेत् ।
कामानिष्टानवाप्नोति विधिश्रद्धासमन्वितः ॥

वशिष्ठः ।

तस्मादग्निमुखाः सर्वदेवता इति शुश्रुम ।
ब्रह्मणो हि प्रसूतोऽग्निरग्नेरपि च काञ्चनम् ॥
तस्मादेव प्रयच्छन्ति हिरण्यं सर्वदैवतम् ।
तस्य वै वैधसा लोका गच्छतः परमां गतिम् ।
स्वर्गलोके च राज्येन सोऽभिषिच्येत भार्गव ॥

सुवर्णमित्यनुवृत्तौ कालिकापुराणे ।

पूतमेतत्परं पुण्यं सुरकार्येषु नित्यशः ।
धारयन्ति यतःसर्वे त्वमलार्थं मलोज्झितम् ॥
अतः सर्वाणि पापानि पात्रेभ्यो विधिपूर्वकम् ।
दत्तं पुनाति काले च देशे च हरसन्निधौ ॥

महाभारते भीष्मं प्रति पितृवाक्यम् ।

वेदोपनिषदे चैव सर्वकर्म्मसु दक्षिणाम् ।
सर्वक्रतुषु चोद्दिष्टा भूमिर्गावोऽथ काञ्चनम् ॥
ततः श्रुतिस्तु परमा सुवर्णं दक्षिणेति वै ।
तदिदं सम्यगारब्धं त्वयाद्य भरतर्षभ ॥
किन्तु भूमेर्गवां चार्थे सुवर्णं दीयतामिति ।
एवं वयञ्च धर्म्मज्ञाः सर्वे चास्मत्पितामहाः ॥
तारिता वै तरिष्यन्ति पावनं परमं हि तत् ।
दश पूर्वान् दशैवान्यांस्तथा सन्तारयन्ति ते ।
सुवर्णं ये प्रयच्छन्ति एवं ते पितरोऽब्रुवन् ॥

रामं प्रति वशिष्ठवाक्यानि ।

सर्वरत्नानि निर्मथ्य तेजोराशिसमन्वितम् ।
सुवर्णमेभ्यो विप्रेन्द्र रत्नं परममुत्तमम् ॥
एतस्मात् कारणाद्देवा गन्धर्वोरगराक्षसाः ।
मनुष्याश्च पिशाचाश्च प्रयत्नाद् धारयन्ति तत् ॥

मुकुटैरङ्गदयुतैरलङ्कारैः पृथग्विधैः ।
सुवर्णरचितैरत्र विराजन्ते रघूत्तम ॥
तस्मात् सर्वपवित्रेभ्यः पवित्रं परमं स्मृतम् ।
पृथिवीं गां च दत्वेह तथान्यदपि किञ्चन ॥
विशिष्यते सुवर्णस्य दानं परमकं विभो ।
अक्षयं पावनञ्चैव सुवर्णमिह कथ्यते ।
प्रयच्छेद्द्विजमुख्येभ्यः पावनं ह्येतदुत्तमम् ॥
सुवर्णमेव सर्वत्र दक्षिणासु विधीयते ॥
सुवर्णं ये प्रयच्छन्ति सर्वदास्ते भवन्त्युतः ॥

नन्दिपुराणे ।

कृष्णलाः पञ्चमाषस्तु माषैः षोडशभिः स्मृतम् ।
सुवर्णमेकं यद्दानात् स्वर्गलोकमवाप्नुयात् ॥

तथा—

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
एतत् पवित्रं परममेतत् स्वस्त्ययनं महत् ॥
दशपूर्वान् परान् वंश्यानात्मानञ्च विशाम्पते ।
अपि पापशतं कृत्वा दत्वा विप्रेषु तारयेत् ॥
सुवर्णं ये प्रयच्छन्ति नराः शुद्धेन चेतसा ।
देवतास्ते न सन्देहः समस्ता इति नः श्रुतम् ॥
अग्निर्हि देवताः सर्वाः सुवर्णञ्च हुताशनः ।
तस्मात् सुवर्णं ददता दत्ताः सर्वाश्च देवताः ॥
अग्न्यभावे च कुर्वन्ति वह्निस्थानेषु काञ्चनम् ।
सर्ववेदप्रमाणज्ञाः श्रुतिशास्त्रनिदर्शनात् ॥
ये त्वेनं क्षालयित्वाग्निमादित्योदयनं प्रति ।
दद्युर्वै व्रतमुद्दिश्य सर्वकामानवाप्नुयुः ॥
व्रतमुद्दिश्य व्रतमनुसन्धायेत्यर्थः ।
सुवर्णदः स्वर्गलोके कामानिष्टान् समश्नुते ॥
विरजोऽम्बरसंवीतः परियाति यतस्ततः ।
विमानेनार्कवर्णेन भास्वरेण विराजितः ॥
अप्सरोगणकीर्णेन भास्वता स्वेन तेजसा ॥
हंसबर्हिणयुक्तेन कामगेन नरोत्तमः ।
दिव्यगन्धवहः स्वर्गे परिगच्छन्नितस्ततः ।

बृहस्पतिः ।

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकास्त्रयस्तेन भवन्ति दत्ताः यः काञ्चनं गाञ्च महीञ्च दद्यात् ॥

स्कान्दे-प्रभासखण्डे ।

द्रव्यं पृथिव्यां परमं सुवर्णं
हृष्यन्ति देवा यदि दीयते तत् ।
सूर्योऽपि तस्मै सुचिरं विमानं
ददाति तावद् भ्रमतेऽत्र यावत् ॥

इति हिरण्यनिरूपणम् ॥

अथ पात्राणि ।

तत्रार्घ्याद्यर्थपात्राणि हारीतः ।

कांस्य-पार्ण-राजत ताम्रपात्राण्यर्घ्योदकधारणानि खर्वाण्युपकल्प्यानि । 'खर्वाणि' ह्रस्वानि ।

बैजवापः ।

खादिरौदुम्बराण्यर्घ्यं पात्राणि श्राद्धकर्मणि ।
अप्यश्ममृण्मयानि स्युरपि पर्णपुटास्तथेति ॥

'खादिरं' बालपत्रतरुदारुमयम् । 'औदुम्बरं' जन्तुफलवृक्षनिर्मितम् । ताम्रमयं वा । 'पर्णपुटाः' यज्ञीयवृक्षपर्णनिर्मिताश्चमसाकृतयः पात्रविशेषाः ।

कात्यायनः ।

सौवर्ण-राजतौदुम्बर-खड्ग-मणिमयानां पात्राणामन्यतमेषु मृण्मयवर्जं यानि वा विद्यन्ते पलाशपत्रपुटेषु वा ।

'खड्गमयं' गण्डकश्रृङ्गनिर्मितम् । अत्र मृण्मयवर्जनं सतिसम्भवे । असम्भवे तु तदप्युपादेयं तैजसाश्ममयमृण्मयेष्वित्याश्वलायनवचनात् ।

अथाश्ममृण्मयानिस्युरितिबैजवापवचनात् । शाखाभेदेन व्यवस्थिते वा मृण्मयवर्जनोपादानेऽवगन्तव्ये ।

वृद्धशातातपः ।

दौहित्रं खड्गश्रृङ्गन्तु ललाटे यत्तु दृश्यते ।
तस्य श्रृङ्गस्य यत्पात्रं दौहित्रमिति कीर्तितम् ॥

मत्स्यपुराणे ।

पात्रं वनस्पतिमयं तथा पर्णमयं पुनः ।
जलजं वापि कुर्वीत तथा सागरसम्भवम् ॥
सौवर्णं राजतं ताम्रं पितॄणां पात्रमुत्तमम् ॥

पुष्पं विना ये फलन्ति ते वनस्पतयः, तद्दारुमयं 'वनस्पतिमयम्' । पर्णमयमित्यत्र पर्णान्यपि वनस्पतीनामेव । 'जलजं' कमलिनीपत्रम् 'सागरमयं' शङ्खशुक्त्यादि ।

रजतस्य कथा वापि दर्शनं दानमेव वा।
राजतैर्भाजनैर्देयमपि वा रजतान्वितैः॥
वार्य्यपि श्रद्धया दत्तमक्षय्यायैव कल्प्यते।
यच्चार्घ्यपिण्डभोज्येऽपि पितॄणां रजतं मतम्॥
शिवनेत्रोद्भवं यस्मात्तस्मात्तत् पितृवल्लभम्।
अमङ्गलञ्च यज्ञेषु देवकार्येषु वर्जितम्।
एवं पात्राणि सङ्कल्प्य यथालाभं विमत्सरः॥

ब्रह्मवैवर्त्ते।

पालाशे ब्रह्मवर्चस्यमश्वत्थे राज्यभागिता।
सर्वभूताधिपत्यञ्च प्लक्षे नित्यमुदाहृतम्॥

'प्लक्षः'जटी।

पुष्टिः प्रजाश्च न्यग्रोधे बुद्धिः प्रज्ञा धृतिः स्मृतिः।

"न्यग्रोधः" वटः।

रक्षोघ्नञ्च यशस्यञ्च काष्मर्य्याः पात्रमुच्यते।

'काश्मरी' श्रीपर्णी।

सौभाग्यमुत्तमं लोके मधूके समुदाहृतम्।

'मधूकः' गुडपुष्पः।

फल्गुपात्रेण कुर्वाणः सर्वान् कामानवाप्नुयात्।

'फल्गुः' काकोदुम्बरिका।

परां द्युतिमथार्के च प्राकाम्यञ्च विशेषतः॥

'अर्कः' रूपिका।

बिल्वे लक्ष्मीस्तपो मेधा नित्यमायुष्यमेव च।
क्षेत्राराम-तडागेषु सर्वसस्येषु चैव हि॥
वर्षत्यजस्रं तत्रैव पर्जन्यो वेणुपात्रतः।
एतेषां लभते पुण्यं सौवर्णे राजते तथा॥
पलाश-फल्गु-न्यग्रोध प्लक्षाश्वत्थ-विकङ्कताः।
उदुम्बरस्तथा बिल्वश्चन्दनो यज्ञियाश्च ये॥
सरलो देवदारुश्च शालोऽथ खदिरस्तथा।
एते ह्यर्घ्यादिपात्राणां योनयः स्युरशेषतः॥
यस्तैर्दद्यात् स यज्ञानां सर्वेषां फलमाप्नुयात्॥

'विकङ्कतः' स्रुववृक्षः, 'सरलः' पीतद्रुः, 'शालः' सर्जकः। अर्घ्यादीत्यादि-शब्देनावनेजनादिपात्राणि तिलकुशादिश्राद्धोपकरणधारणार्थानि पात्राणि च गृह्यन्ते।

तस्मिन्नेव पुराणे ।

राजतं रजताक्तं वा पितॄणां पात्रमुच्यते ।
रजतस्य कथा वापि दर्शनं दानमेव च ॥
अनन्तमक्षयं स्वर्ग्यं राजतं दान मेवच ।
पितॄनेतेन दानेन सत्पुत्रास्तारयन्त्युत ॥
राजते हि सुधां दुग्ध्वा पात्रेऽस्मिन् पृथिवी पुरा ।
सुधाक्षयार्थिधिस्तात तस्मिन् दत्तं ततोऽक्षयम् ॥

अथ भोजनपात्राणि ।

वायुपुराणे ।

पात्रं वै तैजसं दद्यात् मनोज्ञं श्राद्धभोजने ।
पात्रं भवति कामानां विद्यानाञ्च धनस्य च ॥

'तैजसं' सुवर्ण-रजत-कांस्य-ताम्रमयम् ।

राजतं काञ्चनञ्चैव दद्याच्छ्राद्धेषु यः पुमान् ॥
दत्वा स लभते दाता प्राकाम्यं धनमेव च ।
राजतैर्भाजनैरेषामपि वा रजतान्वितैः ।
वार्य्यपि श्रद्धया दत्तमक्षय्यायोपकल्प्यते ॥

तत्र यद्यप्यविशेषेण राजतानि सौवर्णानि च पात्राणि श्राद्धे विहितानि तथापि वैश्वदेविके सौवर्णानि पित्र्ये राजतानीति गुणप्रकर्षार्थं व्यवस्थामाह—

अत्रिः ।

भोजने हैमरूप्याणि दैवे पित्र्ये यथाक्रमम् ।

विष्णुः ।

तैजसानि च पात्राणि दद्यात् विशेषतो राजतानि ।

अत्र हैमपात्राभावे हारीतः ।

राजत-कांस्य-पार्ण-ताम्रपात्राणि ब्राह्मणभोजनार्थानि महान्ति कार्याणि । भोजनार्थोपकल्पित सर्वान्नधारणपर्याप्तं महत्पात्रमत्रानुसन्धेयम् ।

कांस्यपात्रं तु द्विपञ्चाशत्पलपरिमितकांस्यनिर्मितमेव ग्राह्यम् । तदसंभवे-यथोपपन्नम् ।

अत्रिः ।

पञ्चाशत् पलिकं कांस्यं ह्यधिकं भोजनाय वै ।
गृहस्थैस्तु सदा कार्यमभावे हेमरूप्ययोः ॥

'गृहस्थैरिति' गृहस्थाश्रमिभिरित्यर्थः । पर्णमयं चात्र भोजनपात्रं पालाशपत्र-मेव ग्राह्यम् । तद्व्यतिरिक्तस्य पत्रपात्रस्यात्रिणा प्रतिषिद्धत्वात् ।

तद्यथा ।

पालाशेभ्यो विना न स्युरन्यपात्राणि भोजने ।

इति विशेषितत्त्वाद्दार्वादिषु तु न प्रतिषेधः। पर्णपात्रपक्षेऽपि घृतादिद्रव्यधारणार्थं, सति सम्भवे तैजसानि सम्पाद्यानि। घृतादिदाने तैजसानि पात्राणीतिविष्णुस्मरणात्। तेषामलाभे पलाशपत्रनिर्मिताः पुटकाः घृतादिद्रव्यधारणार्थं विनियोज्याः।

वाराहपुराणे ।

सौवर्णानीह पात्राणि सम्पाद्यानि प्रयत्नतः ।
तदभावे तु रूप्याणि कांस्यानि तदसंभवे ॥
पलाशपर्णजानि स्युः श्राद्धेषु द्विजभोजने ।
अन्यान्यपि हि पात्राणि दारुजान्यपि जानता ॥
यथोपपन्नं कार्याणि मृण्मयानि न तु क्वचित् ।
नायसान्यपि कुर्वीत पैत्तलानि न चैव हि ॥
न च सीसमयानीह शस्यन्ते त्रपुजान्यपि ॥

वृद्धशातातपः ।

पात्रे तु मृण्मये यस्तु श्राद्धे भोजयते पितॄन् ।
तत्र दाता पुरोधाश्च भोक्ता च नरकं व्रजेत् ॥

कूर्म्मपुराणे ।

पात्रे तु मृण्मये यो वै श्राद्धे भोजयते पितॄन् ।
स याति नरकं घोरं भोक्ता च सपुरोहितः ॥ इति ।

अङ्गिराः ।

न जातीकुसुमानि दद्यान्न कदलीपत्रमिति ।

अथ परिवेषणपात्राणि ।

हारीतः ।

काञ्चनेन तु पात्रेण राजतौदुम्बरेण वा ।
दत्तमक्षयतां याति खड्गपात्रेण चैव हि ॥

विष्णुः ।

घृतादिदाने तैजसानि पात्राणि खड्गपात्राणि फल्गुपात्राणि वा प्रशस्तानि ।

अत्र च गाथा भवति ।

सौवर्णराजताभ्याञ्च खड्गेनौदुम्बरेण वा ।
दत्तमक्षयतां याति फल्गुपात्रेण वाप्यथ ॥

अत्र विशेषमाह पैठीनसिः ।

दैवे सौवर्णानि श्रेष्ठानि पित्र्ये तु राजतानि परिवेषणपात्राणीति ।

मनुः ।

राजतैर्भाजनैरेषामपि वा रजतान्वितैः ।
वार्य्यपि श्रद्धया दत्तमक्षय्यायोपकल्पते ॥

अवश्यं चेदं परिवेषणं दर्व्यादिना पात्रेणैव विधेयं साक्षाद्धस्तेन परिवेषणस्य निषेधश्रवणात् ।

कूर्म्मपुराणे ।

न दद्याद्रिक्तहस्तेन प्रत्यक्षं लवणं तथा ।
न चायसेन पात्रेण न चैवाश्रद्धयान्वितः[१] ॥
काञ्चनेन तु पात्रेण राजतौदुम्बरेण च ।
दत्तमक्षयतां याति खड्गेन च विशेषतः ॥

विष्णुः ।

प्रत्यक्षलवणं न दद्यात् हस्तेन न घृतव्यञ्जनादि दद्यात् । पात्राद्यभावे तृणेन-पर्णेन वा हस्तमन्तर्द्धाय प्रदेयमित्याह वृद्धशातातपः ।

हस्तदत्ताश्च ये स्नेहा लवणं व्यञ्जनानि च ।
दातारन्नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्बिषम् ॥
तस्मादन्तरितं देयं पर्णेनैव तृणेन वा ।
प्रदद्यान्नतु हस्तेन नायसेन कदाचन ॥

वृद्धशातातप-लघुहारीत-वशिष्ठाः ।

आयसेन तु पात्रेण यदन्नं संप्रदीयते ॥
भोक्ता विष्ठाशनं भुंक्ते दाता च नरकं व्रजेत ।

पैठीनसिः ।

सीसकायसपात्राणि रीतिशेषाणि पात्राणि चेत्यङ्घियानि ।

मार्कण्डेयपुराणे ।

नापवित्रेण हस्तेन न नैकेन विना कुशम् ।
नायसे नायसेनैव श्राद्धे तु परिवेषयेत् ॥

'अपवित्रेण' दुर्लेपसंसर्गादिना अपूतेन । 'आयसेन' अयोमयदर्व्यादिना । 'आयसे' अयोमयपात्रेऽपि न परिवेषयेत् ।

अथ पचनभाण्डानि ।

चमत्कारखण्डे ।

स्वर्णभाण्डेषु कुर्वीत पितॄणां पाकमुत्तमम् ।
तेनासौ भाग्यमायुष्यं लभते चाक्षयां श्रियम् ॥
राजतेषु तु भाण्डेषु कुर्व्वन् पाकं तु पैतृकम् ।
पितॄणां कुरुते तृप्तिं यावदाभूतसंप्लवम् ॥

---

१. पुनरिति ।

पचमानस्तु भाण्डेषु भक्त्या ताम्रमयेषु तु।
समुद्धरति वै घोरात् पितॄन् दुःखमहार्णवात्॥
तैजसानामभावे तु पिठरे मृण्मये तु यः।
नवे शुचौ प्रकुर्वीत पाकं पित्रर्थमादरात्॥
तस्य तुष्यन्ति पितरः प्रीता यच्छन्ति वाञ्छितम्।

नागरखण्डे।

शुचीनि पितृपाकार्थं पिठराणि प्रकल्पयेत्।
सौवर्णान्यथ रौप्याणि ताम्रकांस्योद्भवानि च॥
मार्त्तिकान्यपि भव्यानि नूतनानि दृढ़ानि च।
न कदाचित् पचेदन्नमयः स्थालीषु पैतृकम्॥
अयसो दर्शनादेव पितरो विद्रवन्ति हि।
अयज्ञियममङ्गल्यं लोहमाहुर्मनीषिणः॥
दैवेषु चैव पित्र्येषु गर्हितं सर्वकर्म्मसु।
कालायसं विशेषेण निन्दितं पितृकर्म्मणि॥
फलानाञ्चैव शाकानां छेदनार्थानि यानि तु।
महानसेऽपि शस्त्राणां तेषामेव हि सन्निधिः॥
इष्यते नेतरस्यात्र शस्त्रमात्रस्य दर्शनम्।
श्राद्धदेशे तु विदुषां पितॄणां प्रीतिमिच्छता॥
महानसोपयुक्तानां अपि कार्यं निदर्शनम्।
अयः शङ्कुमयं पीठं प्रदेयं नोपवेशनम्॥

आदित्यपुराणे।

पचेदन्नानि सुस्नातः पात्रेषु शुचिषु स्वयम्।
स्वर्णादिधातुजातेषु मृण्मयेष्वपि वा बुधः॥
अच्छिद्रेषु विलेपेषु तथानुपहतेषु च।
नायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित्॥
पूर्वं कृतोपयोगेषु मृण्मयेषु तु न क्वचित्।
पक्वान्नस्थापनार्थन्तु शस्यन्ते दारुजान्यपि॥
दर्व्यादीन्यपि कार्याणि यज्ञियैरेव दारुभिः।

इति पात्रनिरूपणम्

अथ गन्धाः।

गरुड़पुराणे।

यस्तु गन्धान् पितॄणां वै दद्यादामोदितो नृप।
गन्धर्वाप्सरसां लोकान् स प्राप्य दिवि मोदते॥

गन्धा यथोपचारेषु पितॄणामतिवल्लभाः ।
न तथा विद्यते ह्यन्यदतो देयाः प्रयत्नतः ॥
विश्वेषामपि देवानामत्यन्तं प्रीतिहेतवः ।
गन्धास्तस्मात् प्रयत्नेन गन्धैस्तानपि पूजयेत् ॥

वाराहपुराणे ।

यः श्राद्धेषु प्रदद्याद्वै गन्धानतिमनोहरान् ।
स्वर्गे वराङ्गरागास्तमालिङ्गन्ति सुराङ्गनाः ॥
योऽनुलिम्पति गात्राणि श्राद्धं कुर्वन् द्विजन्मनाम् ।
देवाश्च पितरश्चैव तस्य तुष्यन्ति सर्वदा ।

भगवतीपुराणे ।

यश्चन्दनेन शुद्धेन सुश्लक्ष्णेन सुगन्धिना ।
अनुलिम्पति वै विप्रान् स कदाचिन्न तप्यते ॥
तेनैवागुरुमिश्रेण परं सौभाग्यमश्नुते ।
अगुरोस्तु विलेपेन[1] भुङ्क्ते भोगानमानुषान् ॥
यः श्रीखण्डं सकर्पूरं पितृभ्यः प्रतिपादयेत् ।
यशः प्राप्नोति विपुलं स पृथिव्यां महामतिः ॥
यः कुङ्कुमसमोपेतं ददाति मलयोद्भवम् ।
केवलं कुङ्कुमं वापि रूपवान् स प्रजायते ॥
दद्यान्मलयजं दिव्यं यस्तु कस्तूरिकान्वितम् ।
कस्तूरीं केवलां वापि स प्राप्नोति महाश्रियम् ॥
यो यक्षकर्दमं दत्ते श्राद्धेषु श्रद्धयान्वितः ।
स भूपतित्वमासाद्य महेन्द्र इव मोदते ॥
यस्तु श्राद्धे ददेद्गन्धान्नानाकुसुमवासितान् ।
स सर्वकामसम्पन्नः स्वर्गे वैमानिको भवेत् ॥

यक्षकर्दमलक्षणं "कर्पूरागुरुकक्कोलदर्पकुङ्कुमचन्दनैः । यक्षकर्दम इत्युक्तो गन्धः स्वर्गेऽपि दुर्लभः" इति विष्णुधर्मोत्तरोक्तमनुसन्धेयम् ।

विष्णुः ।

चन्दन-कुङ्कुम-कर्पूरागुरु-पद्मकान्यनुलेपनाय ।

मार्कण्डेयः ।

चन्दनागुरु-कर्पूर-कुङ्कुमानि प्रदापयेत् ।
अश्वमेधमवाप्नोति पितॄणामनुलेपनात् ॥

मरीचिः ।

कर्पूर-कुङ्कुमोपेतं सुगन्धि सितचन्दनम् ।
दैविकेत्वथ वा पित्र्ये गन्धदानं प्रशस्यते ॥

---

१. युक्तेनेति ।

ब्रह्मपुराणे ।

श्वेतचन्दन-कर्पूर कुङ्कुमानि शुभानि च ।
विलेपनार्थं दद्यात्तु यच्चान्यत् पितृवल्लभम् ॥
कुष्ठं मांसी बालकञ्च त्वक्कुष्ठी जातपत्रकम् ।
नालिकोशीरमुस्तञ्च ग्रन्थिपर्णञ्चदुम्बरम् ॥
मुराचेत्येवमादीनि गन्धयोग्यानि पैतृके ॥

अथ वर्ज्या गन्धाः ।

विष्णुपुराणे ।

श्राद्धे न देया पालङ्क्या तथा निष्पावकोद्रवाः । 'पालङ्क्या' मुकुन्दाख्यं गन्धद्रव्यम् । बालकञ्चाथ पालङ्क्या मुकुन्दः कुन्दकुदुरू इति त्रिकाण्डीस्मरणात् ।

नृसिंहपुराणे ।

श्राद्धेषु विनियोक्तव्या न गन्धा जीर्णदारुजाः ।
शुक्लीभावं समासाद्य न च पर्युषिताः क्वचित् ॥
न विगन्धाश्च दातव्या भुक्तशेषा विशेषतः ॥

नारदीयपुराणे ।

जीर्णं विकृतगन्धञ्च गन्धं श्राद्धे न योजयेत् ।
पितृकर्मणि तज्ज्ञेन प्रदेयं न च वर्वरम् ॥

ब्रह्मपुराणे ।

पूतीकं मृगनाभिञ्च रोचनां रक्तचन्दनम् ।
कालीयकं जोङ्गकञ्च तुरुष्कञ्चापि वर्जयेत् ॥

'पूतीकं' सुगन्धितृणविशेषः । पूतिकं करञ्जकाष्ठं वा प्रकीर्यः पूतिकरजः पूतिकः कलिकारक इत्यमरसिंहेनाभिधानात् । 'मृगनाभिः' कस्तूरी, तस्याश्च विहित-प्रतिषिद्धत्वाद्विकल्पः । 'रोचना' गोरोचना । 'रक्तचन्दनं' प्रसिद्धम् । 'कालीयक-जोङ्गके' गन्धद्रव्यविशेषौ । कालीयकञ्च कालानुसार्यञ्चाथ समानार्थकम्, 'वंशका-गुरुराजार्हलोहं कृमिजजोङ्गकमिति सुगन्धद्रव्यप्रकरणे अमरसिंहेनाभिधानात्' । 'तुरुष्कः' सिह्लकः ।

इति गन्धनिरूपणम् ॥

अथ पुष्पाणि ।

ब्रह्माण्डपुराणे ।

पितृभ्यो यः सुमनसः सुगन्धस्तत्परायणः ।
सदा दद्याद् द्विजातिभ्यः सोऽपि याति दिवाकरम् ॥

वायुपुराणे ।

पितृभ्यो यस्तु माल्यानि सुगन्धीनि च दापयेत् ।
सदा दद्यात् श्रिया युक्तः सोऽपि याति दिवाकरम् ॥

भविष्यत्पुराणे ।

यस्तु श्राद्धे द्विजाग्र्याणां पुष्पाणि प्रतिपादयेत् ।
सुगन्धीनि मनोज्ञानि तस्य स्यात् पुण्यमक्षयम् ॥
सुगन्धि पुष्पगन्धेन प्रीतिं यान्ति पितामहाः ।
प्रीयमाणाश्च यच्छन्ति दातुः कामान् यथेप्सितान् ॥
अतः पुष्पैश्च पत्रैश्च मञ्जरीभिरथापि वा ।
सुकुमारैः किसलयैर्यवदूर्वाङ्कुरैरपि ।
संपूजनीयाः पितरः श्रेयस्कामेन सर्वदा ॥

स्कन्दपुराणे ।

गन्धमाल्यप्रिया नित्यं पितरः श्राद्धदेवताः ।
अतो गन्धैश्च पुष्पैश्च पूजयेत्तान् सुगन्धिभिः ॥
श्रेष्ठानि सर्वभोगेषु पुष्पाणीह परत्र च ।
अतो भक्त्या प्रदेयानि पितॄणां कुसुमानि वै ॥
विपरीतफलं लोके यदसत्कृत्य दीयते ।
अतः सत्कृत्य सम्पूज्य दानमिच्छन्ति सूरयः ॥
न प्रसूनैर्विनापूजा कृता पुण्यतमा भवेत् ।
अतः श्राद्धपरो विद्वान् श्राद्धेन प्रीणयेत् पितॄन् ॥
संपूजयीत प्रथमं पुष्पैः सर्वोत्तमैः सदा ।
अपर्युषितरूपैश्च तथानुपहतैरपि ।
कृमिकीटाद्यविद्धैश्च शुचिभिः प्रोक्षितैरपि ॥

पद्मपुराणे ।

यव-नीवार-मुद्गाश्च शुक्लाः सुमनसस्तथा ।
वल्लभानि प्रशस्तानि पितॄणामिह सर्वदा ॥

नन्दिपुराणे ।

पुष्पजातिर्यदा सृष्टा तदा प्राक् शतपत्रिका ।
सृष्टा तेन च मुख्या सा श्राद्धकर्मणि सर्वदा ॥

वायुब्रह्माण्डपुराणयोः ।

शुक्लाः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च ।
गन्धवर्णोपपन्नानि यानि चान्यानि कृत्स्नशः ॥

अत्र पद्मोत्पलानि शुक्लेतराण्यपि देयानि ।

अत्र विष्णुः ।

जलजानि रक्तान्यपि दद्यात् ।

प्रभासखण्डमार्कण्डेयपुराणयोः ।

जात्यश्च सर्वा दातव्या मल्लिका श्वेतयूथिका ।
जलोद्भवानि सर्वाणि कुसुमानि च चम्पकम् ॥

'जात्यः' मालत्यः। 'मल्लिकाः' मुद्गराख्यानि पुष्पाणि। 'श्वेतयूथिका' हेमकुसुमानि।

धान्यफलशाकान्यभिधाय ब्रह्मपुराणे।

शाकमारण्यकञ्चैव दद्यात् पुष्पाण्यमूनि च।
जाती-चम्पक-रोध्रांश्च मल्लिका-बाण-बर्बरीः॥
चूताशोकाटरूषञ्च तुलसीं तिलकं तथा।
पारन्तीं शतपत्रञ्च गन्धनेपालिकामपि॥
कुजकं तगरञ्चैव मृगमारञ्च केतकीम्।
यूथिकामतिमुक्ताञ्च श्राद्धयोग्यानि भो द्विजाः॥
कमलं कुमुदं पद्मं पुण्डरीकञ्च यत्नतः।
इन्दीवरं कोकनदं कल्हारञ्च नियोजयेत्॥

'चम्पकः' चाम्पेयः। 'रोध्रः' गालवः। 'बाणः' आर्त्तगलः। 'बर्बरी' कर्वरी। 'चूतः' आम्रः। 'अशोकः' वञ्जुलः। 'आटरूषः' सिंहास्यः। 'तुलसी' सुरसा। अस्याश्च श्राद्धेवर्जनीयत्वमुक्तं स्मृत्यर्थसारकोरण, तत्तु बहुस्मृतीतिहासपुराणेष्व-दृष्टत्वान्निर्मूलमिति जानीमः। 'तिलकः' क्षुरकः। 'पारन्ती' शेफालिकासदृशपुष्पम्। 'शतपत्रं' प्रसिद्धम्। 'नेपालिका' नवमालिका। 'कुजकं' कुब्जकम्। 'तगरं' गन्धतगरम्। 'मृगमारं' श्रावणिकापुष्पम्। 'अतिमुक्तकम्' माधवीलतापुष्पम्। कमलादयः पङ्कजभेदाः प्रसिद्धाः।

अथ वर्ज्यानि पुष्पाणि।

तत्र वायुब्रह्माण्डपुराणयोः।

जपादि सुमना भण्डी रूपिका च कुरण्टकः।
पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः॥
यानि गन्धादपेतानि उग्रगन्धानि यानि च।
वर्जनीयानि पुष्पाणि श्राद्धकर्मणि नित्यशः॥
यानि गन्धादपेतानि उग्रगन्धानि यानि च।
वर्जनीयानि पुष्पाणि भूमिमन्विच्छता सदा॥

"जपा" रुद्रपुष्पम्। आदिशब्दः प्रकारवचनः, तेन जपाकुसुमसदृशानां करवीरादिकुसुमानां वर्ज्यत्वम्। 'सुमना' जातिः। सुमना मालतीजातिरिति-स्मरणात्। 'भण्डी' मञ्जिष्ठा। 'रूपिका' अर्कः। 'कुरण्टकः' पीतपुष्पमहासहा। जातीकुसुमनिषेधोऽत्र न नित्यः, नित्यनिषेधे "जात्यश्च सर्वा दातव्याः" इतिपूर्वोक्त-वचनस्य निर्विषयत्वमापद्यते।

नागरखण्डे—

जातीपुष्पसमायुक्तं तच्छ्राद्धं व्यर्थतां व्रजेत्।

आह अङ्गिराः

न जातीकुसुमानि दद्यान्न कदलीपत्रमिति।
कदलीपत्रमत्र भोजनपात्रतया प्राप्तं निषिध्यते॥

क्रतुराह—

असुराणां कुले जाता जाती पूर्वपरिग्रहे।
तस्या दर्शनमात्रेण निराशाः पितरो गताः॥

'पूर्वपरिग्रहे' पूर्वजन्मनि देहपरिग्रहावसरे, यद्यपि त्रीणि ह वै यज्ञस्योदराणि अत्र ह्येवावयन्ति अतएवोद्वयतीति वर्त्तमानापदेशतयार्थवादसरूपे वाक्ये अर्थवाद निर्वाहार्थं गायत्र्यादिष्वावापोद्वापविधिकल्पनवदत्र निन्दार्थवादरूपे वाक्ये निषेध-विधिः कल्प्यते तथापि पाक्षिक एवायमपि प्रतिषेध इति न मार्कण्डेयवचनं निर्विषयं, किन्त्वनिषिद्ध पुष्पान्तरालाभविषयम्। प्रतिषेधद्वयं तु तल्लाभविषयमिति मन्तव्यम्।

आह शङ्खः।

उग्रगन्धान्यगन्धानि चैत्यवृक्षोद्भवानि च।
पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च।
वनोद्भवानि देयानि रक्तान्यपि विशेषतः॥

'उग्रगन्धानि' अहृद्यगन्धानि। 'चैत्यवृक्षः' श्मशानवृक्षः।

सौरपुराणे।

अब्जादन्यद्रक्तपुष्पं शिशुमारं तथैव च।
नीरसान्यपि सर्वाणि भक्ष्यभोज्यानि यानि च।
एतानि नैव देयानि सर्वस्मिन् श्राद्धकर्मणि॥

वर्जयेदित्यनुवृत्तौ विष्णुः।

उग्रगन्धानि कण्टकिजातानि रक्तानि च पुष्पाणि।

तथा।

सितानि सुगन्धानि कण्टकिजातानि अपि।

पद्ममत्स्यपुराणयोः।

पद्म-बिल्वार्क-धुस्तूर-पारिभद्राटरूपकाः।
न देयाः पितृकार्येषु पयश्चाजाविकं तथा॥

पद्मपत्रं स्थलजं प्रतिषिध्यते। जलजस्य विहितत्वात्। 'बिल्वः' श्रीफलः। 'धुस्तूरः' उन्मत्तः। 'पारिभद्रः' रक्तस्तवकयुक्तो मन्दारः। 'आढ़रूपः' सिंहास्यः।

। इति पुष्पनिरूपणम्।

अथ धूपाः।

वायुपुराणे।

धूपं गन्धगुणोपेतं ददत्पितृपरायणः।
लभते स्त्रीष्वपत्यानि इह चामुत्र जन्मनि॥

गुग्गुलादींस्तथा धूपान् पितृभ्यो यः प्रयच्छति ।
संयुज्य मधुसर्पिभ्यां सोऽग्निष्टोभफलं लभेत् ॥

अग्निपुराणे ।

गंधपुष्पैरलंकृत्य ब्राह्मणान् श्राद्धकर्मणि ।
तदामोदेन सन्तुष्टाः पितरो भुञ्जते हविः ॥

आदित्यपुराणे ।

धूपैर्मनोरमैर्दिव्यैस्ततः सम्प्रीणयेत् पितॄन् ।
प्रीतास्ते ह्यखिलैः कामैर्दातारं प्रीणयन्त्युत ॥
गन्धमाघ्राय धूपस्य मनः प्रह्लादनं परम् ।
पितॄणामक्षया प्रीतिर्जायते नात्र संशयः ॥
नास्ति धूपसमं किञ्चित् पितॄणां प्रीतिकारकम् ।
अतः श्राद्धे प्रदातव्यो धूपः पुण्यमभीप्सुभिः ॥

कूर्म्मपुराणे ।

आमोदिना तु धूपेन ततः संधूपयेद्द्विजान् ।
प्रयान्ति तृप्तिमक्षय्यां तेन सर्वे पितामहाः ॥

ब्रह्मवैवर्त्ते ।

चन्दनागुरुणी चोभे तमालोशीरपत्रकम् ।
धूपञ्च गुग्गुलश्रेष्ठं तुरुष्कं धूपमेव च ॥

धूपाश्चात्र घृतमधुसंयुक्ता देयाः । "मधु-घृतसंयुक्तं गुग्गुलं दद्यादिति" विष्णुस्मरणात् ।

शङ्खोऽप्याह ।

धूपार्थे गुग्गुलं दद्यात् घृतयुक्तं मधूत्कटम् ।
चन्दनञ्च तथा दद्यात् कर्पूरं कुङ्कुमं शुभम् ॥

ब्रह्माण्डपुराणे ।

गुग्गुलादींस्तथा धूपान् पितृभ्यो यः प्रयच्छति ।
संयुक्तान्मधुसर्पिभ्यां सोऽग्निष्टोमफलं लभेत् ॥

ब्रह्मपुराणे—

चन्दनागुरुणी चोभे तथैवोशीरपद्मकम् ।
तुरुष्कं गुग्गुलञ्चैव घृताक्तं युगपद्दहेत् ॥

तथा—

गुग्गुलं चन्दनञ्चैव श्रीवासमगुरुं तथा ।
धूपानि पितृयोग्यानि ऋषे गुग्गुलमेव च ॥

विष्णुधर्मोत्तरे—

धूपोगुग्गुलजोदेयस्तथा चन्दनसारजः ।
अगुरुश्च सकर्पूरस्तुरुष्कश्च तथैव च ॥

धूपभेदास्तु भविष्यत्पुराणोक्ता ग्राह्याः ।

तद्यथा ।

अगुरु चन्दनं मुस्ता सिल्हकं वृषणं तथा ।
समभागन्तु कर्त्तव्यं धूपोऽयममृताह्वयः ॥
श्रीखण्डं ग्रन्थिसहितमगुरुं सिल्हकं तथा ।
मुस्तामिन्दुञ्च भूतेशं शर्कराञ्च दहेदिह ॥
इत्येषोऽनन्तधूपश्च कथितो देवसत्तम ।
कृष्णागुरुं सिल्हकञ्च बालकं वृषणं तथा ॥
चन्दनं तगरं मुस्ता प्रबोधः शर्करान्वितः ।
कर्पूरं चन्दनं कुष्ठमुशीरं सिल्हकं तथा ॥
ग्रन्थिकं वृषणं भीमं कुङ्कुमं गृञ्जनं तथा ।
हरीतकी तथोशीरं यक्षधूप उदाहृतः ॥
वृषणं सिल्हकं विप्र श्रीखण्डमगुरुं तथा ।
कर्पूरञ्च तथा मुस्तां शर्करां सत्वचं द्विज ॥
इत्येष विषयो धूपः स्वयं देवेन निर्मितः ।
कर्पूरं चन्दनं मांसी त्वक्पत्रैला लवङ्गकम् ॥
अगुरु सिल्हकं धूपं प्राजापत्यं प्रचक्षते ।
श्रीखण्डन्तगरं कुष्ठं कर्पूरं सिल्हकं तथा ॥
व्यञ्जनं शर्करा कृष्णं महाङ्गं सिल्हकं तथा ।
महाङ्गोऽयं स्मृतो धूपः प्रियो देवस्य सर्वदा ॥

देवीपुराणे—

बालारालसमयुक्तः तथा कुन्दुरुसंयुतः ।
श्रीवेष्टगुग्गुलकृतो धूपः पञ्चरसो मतः ॥

कालोत्तरे—

कर्पूरदार्वगुरुभी रक्तचन्दनसंयुतैः ।
धूपः समुद्गको नाम सर्वदैवतवल्लभः ॥

एते चामृतादयो धूपाः प्राण्यङ्गद्रव्यपरिहारेणोपकल्प्य श्राद्धे नियोज्याः । "श्रीवर्जं सर्वं न धूपार्थे तैले घृते च दद्यात्" इति विष्णुस्मरणात् ।

देवलोऽप्याह—

ये हि प्राण्यङ्गजा धूपा हस्तवाताहताश्च ये ।
न ते श्राद्धे नियोक्तव्या ये च के चोग्रगन्धयः ॥
घृतं न केवलं दद्यात् दुष्टं वा तृणगुग्गुलम् ।

इति धूपनिरूपणम् ।

अथ दीपाः ।

वायुपुराणे—

दीपं पितृभ्यः प्रयतः सदा यस्तु प्रयच्छति ।
गतिमप्रतिमञ्चक्षुस्तस्मात् स लभते शुभम् ॥
तेजसा यशसा चैव आयुषा च बलेन च ।
भुवि प्रकाशो भवति भ्राजते च त्रिविष्टपे ॥
अप्सरोभिः परिवृतो विमानाग्रे स मोदते ।

ब्रह्मपुराणे—

श्राद्धदीपप्रदानेन तेजस्वी जायते नरः ।
रूपवान् धनवान् भोगी सुखमैश्वर्यमश्नुते ॥
तस्माद्दीपः सदा देयो यजमानेन वै पितॄन् ।
दीपहीनं ददच्छ्राद्धमन्धे तमसि मज्जति ॥
प्रतिभोक्तृद्विजं दीपाः स्थापनीयाः प्रयत्नतः ।
पितृयाणेषु मार्गेषु स ह्यालोकः प्रकाशते ॥

विष्णुधर्मोत्तरे—

श्रद्धया श्राद्धदेशेषु दीपदश्चक्षुरुत्तमम् ।
लभते नात्र सन्देहः कान्तिमांश्च प्रजायते ॥
दीपः प्रकाशः परमः प्रकाशो ज्ञानमुत्तमम् ।
अतः श्राद्धे ददद्दीपं ज्ञानवानभिजायते ।
य इच्छेद्विमलं ज्ञानं तमोनिर्मूलनं परम् ॥
स भक्त्या पितृदेवेभ्यो दीपमेव प्रयच्छतु ।
यः स्वेन तेजसा विश्वं प्रदाता येन कृत्स्नशः ॥
वाञ्छति व्याप्यमानं वै श्राद्धे दीपप्रदोऽस्तु सः ।
यथा निहन्ति ध्वान्तानि दीपः प्रज्ज्वलितोऽभितः ॥
तथैव सर्वपापानि श्राद्धे दत्तो निहन्ति सः ।

स्कन्दपुराणे—

स्थाप्याः प्रतिद्विजं दीपाः श्वेतसूत्रजवर्त्तयः ।
गव्येन माहिषेणापि घृतेन भृतभाजनाः ॥
अथवा तिलतैलेन पूरिता विमलार्चिषः ।
पितॄनुद्दिश्य दातव्याः प्रत्येकं ते यथाविधि ॥
तेनालोकेन पितरो दीव्यन्ते दिवि सर्वतः ।
दातुरिष्टान् प्रयच्छन्ति कामान् कामावसायिनः ॥

पद्मपुराणे—

घृतप्रज्ज्वलितं दीपं पितृभ्यो यः प्रयच्छति ।
स विराजेषु लोकेषु चरन् न प्रतिहन्यते ॥

गवां घृतेन तत्रापि यो दीपयति दीपकम् ।
गवामेव स लोकेषु लोकेशैः सह मोदते ॥
घृताभावे तु यो दीपं तिलतैलप्रवर्त्तितम् ।
प्रयच्छति पितृणां वै सालोक्यं तस्य भानुना ॥
अलाभे तिलतैलस्य स्नेहैः प्राण्यङ्गवर्जितैः ।
यः श्राद्धे दीपदः सोऽपि तमस्तरति दुस्तरम् ॥

कालिकापुराणे—

श्वेतवर्त्तिकृतान् दीपान् गव्यसर्पिः प्रपूरितान् ।
दीपिकां धातुसम्भूतां सारदारुमयीमपि ॥
अलाभे मृण्मयीं वापि मनोज्ञामधिसंस्थिताम् ।
यो ददाति पितृभ्यस्तु तस्य पुण्यफलं शृणु ॥
तेजसा यशसा कान्त्या प्रज्ञया परया श्रिया ।
भ्राजमानः स हि स्वर्गे विमानवरमास्थितः ॥
रमते भुवने दिव्ये रत्नालोकसमाकुले ।
अभ्यर्च्य यः पितृणां वै कुर्यादारात्रिकं नरः ॥
स हि नीराज्यते नाके दिव्यैरप्सरसाङ्गणैः ।
धात्वादिनिर्मितां रम्यां दीपिकां श्राद्धकर्मणि ॥
पितॄनुद्दिश्य यो दद्यात् स भवेद्भाजनं श्रियः ।
यो धूपदहनं पात्रं पात्रमारात्रिकस्य च ॥
दद्यात् पितृभ्यः प्रयतस्तस्य स्वर्गेऽक्षया गतिः ।

दीपार्थस्नेहद्रव्येषूपकल्पनीयम् ।

मरीचिः ।

घृताद्वा तिलतैलाद्वा नान्यद्रव्यात्तु दीपकमिति । 'अन्यद्रव्यं' वसामेदोरूपं-विवक्षितम् । न पुनरतसीकुसुम्भादिवीजसम्भवं स्नेहद्रव्यम् ।

यत आह शंखः ।

घृतेन दीपो दातव्यस्त्वथवाप्योषधीरसैः ।
वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत् ॥

'वसा' पाकात्समुद्धृतो मांसस्नेहः । मेदस्तु हृदयकमलाच्छादको मांसविशेषः । पाकात्समुद्धृतस्तदीयस्नेहो मेदशब्देन लक्ष्यते । मेदः शब्दोऽकारान्तोऽप्यस्ति, मेदिनीत्यादिषु दर्शनात् ।

अथाच्छादनम्

पद्मपुराणे—

संपूज्य गन्धपुष्पाद्यैर्दद्यादाच्छादनं ततः ।
अधौतं सदशं नूनं निरिछद्रममलीमसम् ॥

तस्याभावे तु देयं स्यात् सवर्णैः क्षालितन्तु यत् ।
प्रदेयं पितृकार्येषु कारुधौतं न जातुचित् ॥

भगवतीपुराणे—

अधरीयोत्तरीयार्थमुद्दिश्यैकैकमादरात् ।
वासोयुगं प्रदातव्यं पितृकृत्ये विपश्चिता ॥
निष्क्रयो वा यथाशक्ति वस्त्रालाभे प्रदीयते ।

स्कन्दपुराणे—

महाधनानि वासांसि पितृभ्यो यः प्रयच्छति ।
धनधान्यसमृद्धोऽसौ सुवेषश्च प्रजायते ॥
रूपवान् सुभगः श्रीमान् वनितानाञ्च वल्लभः ।
आयुरारोग्यसम्पन्नः कीर्त्तिं विन्दति चामलाम् ॥
चन्द्रिकाजालशुभ्राणि यः क्षौमाणि प्रयच्छति ।
स चान्द्रमसमासाद्य लोकं दीव्यति देववत् ॥
दत्त्वा क्षौमाणि रक्तानि सूर्यलोकं समश्नुते ।
पीतानि तानि दत्त्वा वै याति लोकं मधुद्विषः ॥
चित्राणि दत्त्वा माहेन्द्रे लोके नित्यं महीयते ।
पट्टसूत्रमये दत्त्वा वाससी पितृतत्परः ॥
रूपसौभाग्यसम्पन्नो राजराजो भवेदिह ।
कौसुम्भान्यपि वासांसि पितृभ्यो यः प्रयच्छति ॥
स नाकपृष्ठे रमते दिव्यैर्भोगैः समा शतम् ।
कार्पाससूत्रजं वासः सुसूक्ष्मञ्चातिशोभनम् ॥
यो ददाति पितृणां वै सोऽनन्तं सुखमाप्नुयात् ।
मञ्जिष्ठाद्यैः शुभैरागैरञ्जितं वा मनोरमम् ॥
प्रदाय पितृदेवेभ्यः परमामृद्धिमृच्छति ।

विष्णुधर्मोत्तरे—

बहुमूल्यानि वासांसि क्षौमादीनि महामतिः ।
श्राद्धे विश्राणयेद् यस्तु तस्य विष्णुः प्रसीदति ॥
यः कञ्चुकं तथोष्णीषं पितृभ्यः प्रतिपादयेत् ।
द्वन्द्वोद्भवानि दुःखानि स कदाचिन्न पश्यति ॥
ददाति यः प्रसन्नात्मा पटान् कञ्चुकबन्धनान् ।
विमुक्तः पापबन्धेभ्यः सोऽग्र्यां विन्दति सम्पदम् ॥
स्त्रीणां श्राद्धेषु सिन्दूरं दद्युश्चण्डातकानि च ।
निमन्त्रिताभ्यस्त्रीभ्यो ये ते स्युः सौभाग्यसंयुताः ॥
'चण्डातकानि' स्त्रीपरिधानोचितान्यंशुकानि ।
वस्त्रस्थापनभाण्डानि सवस्त्राणि प्रयच्छति ॥

य: पितृभ्यः स सम्पद्भिः सर्वाभिरभिपूर्यते ।
शीतवातसमुद्भूतां पीडां वारयितुं क्षमान् ॥
यः प्रावारानतिघनान् विशालान् सुदृढ़ान्नवान् ।
दद्यात् पितृभ्यस्तस्येह द्वन्द्वदुःखं न विद्यते ॥
ऊर्णायुलोमरचितान् सुविशालान् महापटान् ।
विचित्रान् विविधैरागैर्वातप्रावरणोचितान् ॥
प्रयच्छति पितॄणां यः स सदारोग्यवान् भवेत् ।

वायुपुराणे—

कौशेयं क्षौमकार्पासं दुकूलमहतं तथा ।
श्राद्धे ह्येतानि यो दद्यात् कामानाप्नोति पुष्कलान् ॥

तथा

वासो हि सर्वदैवत्यं सर्वदेवैरभिष्टुतम् ।
वस्त्राभावे क्रिया न स्याद् यज्ञदानादिका क्वचित् ॥
तस्माद्वस्त्राणि देयानि श्राद्धकाले विशेषतः ।
ददत्त्वेतान्यवाप्नोति यज्ञदानतपांसि च ॥

प्रभासखण्डे ।

आच्छादनञ्च यो दद्यादहतं श्राद्धकर्मणि ।
आयुः प्रकाममैश्वर्य्यं रूपञ्च लभते तु सः ॥

अहतलक्षणमाह प्रचेताः ।

ईषद्धौतं नवं चैव सदशं यन्न धारितम् ।
अहतं तद्विजानीयात् सर्वकर्मसु पावनम् ॥

'ईषद्धौतम्' अकारुधौतम् ।

अतएव वृद्धमनुः ।

स्वयं धौतेन कर्त्तव्या क्रिया धर्म्या विपश्चिता ।
न तु नेजकधौतेन नोपभुक्तेन वा क्वचित् ॥

'नेजकः' रजकः । स्वयंग्रहणादेव नेजकनिवृत्तौ पुनर्नेजकप्रतिषेधोऽन्येनापि सवर्णेन धौतस्य क्रियार्हत्वज्ञापनार्थः ।

श्राद्धमधिकृत्य ब्रह्मवैवर्त्ते ।

क्षौमकौशेयपत्त्रोर्णास्तथा प्रावरकं बलात् ।
अजिनं रौरवं यत् स्यादौर्णिकं मृगलोमकम् ॥
दत्त्वा ह्येतानि विप्रेभ्यो भोजयित्वा यथाविधि ।
प्राप्नोति श्रद्दधानस्तु वाजपेयस्य यत्फलम् ॥
बह्वयो नार्य्यः सुरूपाश्च पुत्रा भृत्याश्च किङ्कराः ।
वशे तिष्ठन्ति भूतानि वपुर्विन्दत्यनामयम् ॥

अलक्ष्मीं नाशयत्याशु तमः सूर्योदये यथा।
भ्राजते च विमानाग्रे नक्षत्रेष्विव चन्द्रमाः॥
नित्यश्राद्धेषु यो दद्याद् वस्त्रं पितृपरायणः।
सर्वान् कामानवाप्नोति राज्यं स्वर्गं तथैव च॥

आदित्यपुराणे।

न कृष्णवर्णं दातव्यं वासः कार्पाससम्भवम्।
पितृभ्यो नापि मलिनं नोपभुक्तं कदाचन॥
न छिद्रितं नापदशं न धौतं कारुणापि च।

ब्रह्माण्डपुराणे।

कार्पासं नैव दातव्यं पितृभ्यः कृष्णमंशुकम्।
कृष्णं वापि प्रदातव्यमन्यत्कार्पाससम्भवात्॥
नामापि न ग्रहीतव्यं नीलीरक्तस्य वाससः।
दर्शनात् कीर्त्तनान्नील्या निराशाः पितरो गताः॥

ब्रह्मवैवर्त्ते—

यज्ञोपवीतं दातव्यं वस्त्राभावे विजानता।
पितॄणां वस्त्रदानस्य फलं तेनाश्नुतेऽखिलम्[१]॥

शातातपः।

युवा सुवासा इति वस्त्रं दद्यात्। अभावे यज्ञोपवीतमिति।

अथेदं यज्ञोपवीतं शूद्रेण स्वपितृभ्यो देयं न वेति विचार्यते। तत्र तावद्देयमित्युच्यते। सामान्येन श्राद्धे देयत्वाभिधानात्। न च शूद्रस्य यज्ञोपवीताभावादशक्तेरदानमिति वाच्यम्। क्रयसम्पादितस्य दानसम्भवात्। न च क्रीतस्याहवनीयत्वाभाववत् क्रयोत्पादितस्य ब्रह्मसूत्रस्य क्रेतारं प्रति यज्ञोपवीतत्वाभाव इति वाच्यम्। आदधीतेति कर्तृगामिक्रियाफलप्रतिपादकात्मनेपदसामर्थ्यावगताधातृपुरुषैकसम्बन्धादाहवनीयत्वोत्पत्त्यनुरोधात् क्रीतस्याहवनीयत्वाभावो वर्ण्यते।

ननु यज्ञोपवीतविधावात्मनेपदमस्ति। विद्यमानमप्यविवक्षितं भविष्यति, यज्ञोपवीतदानविधिदर्शनात्। न च शूद्रश्राद्धे न दातव्यं यज्ञोपवीतमित्यपवादो दृश्यते। ननु येन पितरः प्रीयन्ते तत्पितृभ्यो देयम्। श्राद्धीयस्य दानस्य पितृप्रीत्यर्थत्वात्। न च यज्ञोपवीतं शूद्रपितॄन् प्रीणयति। न तावद्भूषणत्वेन हारकेयूरादिवत् वर्जनिकभूषणप्रत्ययवेद्यत्वाभावेनाभूषणत्वात्। यस्तु परिचयविशेषप्रसूतवासनोपनीतोऽस्य भूषणभावः सोऽपि त्रैवर्णिकान् प्रत्येवेति न शूद्रपितृतृप्तये प्रभवति।

मैवं। यद्विहितमप्रतिषिद्धं वा श्राद्धे दीयमानं ब्राह्मणान् प्रीणयति तदेतदधिष्ठानतयोद्देश्यान् पितॄन्। न तु यज्जीवन्तं प्रीणयति तदेव पितृत्वं गतमपीति नियमोऽस्ति। को जानीते जन्मान्तरे कां योनिं गतोऽसाविति। अतएव स्त्रीश्राद्धे

१. तेनाप्नुतेऽखिलमिति।

स्त्रीभूषणानि न दीयन्ते, यज्ञोपवीतानि दीयन्ते। न च परिव्राजकश्राद्धे यज्ञोपवीतं न दीयते। अलाबुपात्रादि वा दीयते। न च यतिब्रह्मचारिश्राद्धे मधुमांसं न दीयते, येन जीवता यत्पायसादिकं वर्जितमासीत् तत्तदीयश्राद्धे न दीयते। नन्वनौचित्याद-नुपयोगात्तदपि न देयमेवेति चेत्। शिष्टाचारे तथानुपलम्भात्। किञ्चेदमाच्छा-दनस्थाने यज्ञोपवीतं विधीयते। आच्छादनेन च शूद्राणामप्युपयोगोऽस्त्येव। अतः शूद्रश्राद्धे कामं यज्ञोपवीतं देयम्। आच्छादनप्रतिनिधित्वव्यतिरेकेण गन्धादि-वत् वक्ष्यमाणप्रकारेण यद्विहितं तदपि देयमेव? अपवादाभावात्।

इत्याच्छादननिरूपणम्।

अथ यज्ञोपवीतम्।

आदित्यपुराणे—

पितॄन् सत्कृत्य वासोभिर्दद्याद् यज्ञोपवीतकम।
यज्ञोपवीतदानेन विना श्राद्धं तु निष्फलम्।
तस्माद् यज्ञोपवीतस्य दानमावश्यकं स्मृतम्।

भविष्यत्पुराणे—

दद्याद् यज्ञोपवीतानि पितॄणां प्रीतये सदा।
श्रद्धावान् धार्मिकस्तेन जायते ब्रह्मवर्चसि॥

कूर्म्मपुराणे—

यो ब्राह्मणेन शुचिना ब्रह्मसूत्रं विनिर्मितम्।
पितृभ्यो यच्छति प्राज्ञः स भवेद्वेदपारगः॥

वायुपुराणे—

उपवीतं तु यो दद्याच्छ्राद्धकर्मणि धर्मवित्।
पावनं सर्वविप्राणां ब्रह्मदानस्य तत्फलम्॥

चमत्कारखण्डे—

सितसूक्ष्मेण सूत्रेण रचितं मन्त्रपूर्वकम्।
उपवीतं ददच्छ्राद्धे मेधावानपि जायते॥
चामीकरमयं दिव्यं पितॄणामुपवीतकम्।
दत्वा चामीकरमयैर्विमानैर्दिवि दीव्यति॥
राजतान्युपवीतानि पितॄणां ददतः सदा।
आयुः प्रजा च तेजश्च यशश्चैवाभिवर्द्धते॥

पूर्वं वस्त्रालाभे तत्प्रतिनिधित्वेन यज्ञोपवीतदानमुक्तम्। अत्र तु सत्यपि वस्त्र गन्धपुष्पादिवन्मुख्यतयैव यज्ञोपवीतं देयत्वेन विधीयत इति गम्यते। पितॄन् सत्कृत्य वासोभिरित्यादिषु समुच्चयदर्शनात्। तथा च न्युब्जपात्रं कृत्वाह वैजवापः।

तस्योपरि कुशान् दत्त्वा प्रदद्याद्देवपूर्वकम् ।
गन्धपुष्पाणि धूपञ्च दीपं वस्त्रोपवीतकम् ॥

इत्यत्रोपवीतस्य देयत्वेन विधानात् गन्धपुष्पादिवन्मुख्यतयैव यज्ञोपवीतं देयत्वेन विधीयत इति गम्यते ।

इति यज्ञोपवीतनिरूपणम्

अथ दण्ड-योगपट्टौ

विष्णुधर्मोत्तरे—

दण्डान् श्राद्धेषु यो दद्यात् पितृप्रीत्यै महात्मवान् ।
कदाचित्तं न बाधन्ते व्यापदः श्वापदोद्भवाः ॥
दण्डांश्च योगपट्टांश्च योगिभ्यो यः प्रयच्छति ।
कामैस्तमभिवर्द्धन्ते पितरो योगवित्तमाः ॥
पालाशान् वैणवान्वापि यस्तु दण्डान् यथोचितम् ।
व्रतिभ्योऽथ गृहस्थेभ्यो यतिभ्यः पितृतुष्टये ॥
ददाति योगपट्टांश्च पट्टसूत्रादिनिर्मितान् ।
स योगिनां कुले भूत्वा योगिराजः प्रजायते ॥

आदित्यपुराणे—

वैणवान् सुदृढान् दण्डान् दद्यान् सन्नतपर्वणः ।
पितृप्रीतिकृते दत्त्वा न भयं जातु विन्दति ॥
आयसेन खनित्रेण मूलदेशे परिष्कृतान् ।
मृत्कुशानां यथाकालं[1] खननेषु क्षमान् भृशम् ॥
केवलान्वाथ दण्डान् वा यः श्राद्धे प्रतिपादयेत् ।
तस्य श्रद्धाञ्च मेधाञ्च शौचमास्तिक्यमेव च ॥
इह जन्मनि चान्यत्र प्रयच्छन्ति पितामहाः ॥

स्कन्दपुराणे—

योगपट्टान् मृदून् भव्यान्[2] यो वै पितृपरायणः ।
विश्राणयति विप्रेभ्यः स योगं विदन्ते ध्रुवम् ॥
योगिनामुपयुक्तानि वस्तून्यन्यानि यानि च ।
तानि दत्वा पितॄन् प्रीणन् सद्यस्तरति दुष्कृतम् ॥
पदार्थान् यस्तु दण्डादीन् योगिनामुपयोगिनः ।
ददाति श्रद्धया युक्तः स सुखीह परत्र च ॥

---

१. यथाकाममिति ।
२. रम्यानिति ।

आह जातूकर्ण्यः ।

दण्डं दत्वा द्विजाग्र्याणां पित्र्ये कर्मणि भक्तिमान् ।
अदण्डनीयो भवति यमस्यापि न संशयः ॥

आह शालङ्कायनः ।

प्रदाय वैणवीं यष्टिं नूतनां सुदृढ़ां मृदुम् ।
श्लक्ष्णामनुल्वणग्रन्थिं द्विजाय श्राद्धभोजिने ॥
विजयी जायते नित्यं न पश्यति पराजयम् ।
सा चेद्भवति कल्माषी सर्वं तरति कल्मषम् ॥

इति दण्डयोगपट्टौ ।

अथ कमण्डल्वादि जलपात्राणि ।

भविष्यत्पुराणे ।

श्राद्धेषु भक्तिसंयुक्तो जलपूर्णं कमण्डलुम् ।
दद्यादभिनवं रम्यं द्विजेभ्यः पितृतृप्तये ॥
पितरो द्वादशाब्दानि तेन स्युरभितर्पिताः ।
दाता च सुखकृत्सर्वं सर्वतोऽप्यभिविन्दति ॥

अग्निपुराणे—

सर्वेषु पितृदेवेषु प्रधानं द्वयमेव हि ।
अन्नञ्च सलिलञ्चेति परं तृप्तिकरे ह्युभे ॥
अन्नादपि वरं न्यूनं जलमेव न संशयः ।
न बाधते क्षुधा तादृक् यथा पीडयते तृषा ॥
विनाप्यन्नं कदाचित्तु प्राणिनः प्राणितुं क्षमाः ।
क्षणार्द्धमपि जीवन्ति तृषार्त्ता नैव देहिनः ॥
मूर्च्छामुपगताश्चैव संसिक्ताः शिशिरैर्जलैः ।
लभन्ते चेतनां सद्यस्तस्मात् सञ्जीवनं हि तत् ॥
अतोऽर्थं सलिलं देयं प्रमीतानां विशेषतः ।
परां निर्वृतिमायान्ति सलिलाप्यायनेन ते ॥
परतन्त्राः परे लोके प्राणिनः पीडितास्तृषा ।
सलिलान्यभिवाञ्छन्ति दीयमानानि वंशजैः ॥
अतोऽर्थं तर्पणं कार्यं पितॄणां सलिलैः शुभैः ।
जलपूर्णानि पात्राणि प्रदेयानि च पर्वसु ॥
ग्रीष्मे धर्मघटा देया ब्राह्मणेभ्योऽनुवासरम् ।
तथाक्षयतृतीयायां पूर्णान् कुम्भान् प्रदापयेत् ॥
अश्वत्थसेचनं कार्यं पितॄणां तृप्तयेऽन्वहम् ।
श्राद्धे कमण्डलून् दद्यात् पूरितान् हिमवारिणा ॥

एवं नानाप्रकारं यः पितॄणां यच्छते जलम् ।
सर्व्वकामैः समं तृप्तश्चिरं स्वर्गेऽभिमोदते ॥

नागरखण्डे—

कमण्डलुं जलापूर्णं दत्त्वा श्राद्धे समाहितः ।
पूर्णकामैरशेषैश्च सोऽक्षयां लभते गतिम् ॥

प्रभासखण्डे—

कमण्डलुञ्च यो दद्याद् ब्राह्मणे वेदपारगे ।
मधुक्षीरस्रवा धेनुर्दातारमनुगच्छति ॥
चक्रबद्धन्तु यो दद्याच्छ्राद्धकाले कमण्डलुम् ।
काञ्चनेन विमानेन किङ्किणीजालमालिना ॥
रमते चिररात्राय सुतृप्तो मेरुमूर्द्धनि ।

वायुपुराणे—

यः काञ्चनमयं दिव्यं प्रयच्छति कमण्डलुम् ।
धेनुं स लभते दिव्यां घटप्रस्रुतिदोहनाम् ॥

नरसिंहपुराणे—

दद्यात् पितॄणामापूर्णं यः कमण्डलुमम्भसा ।
घृतकुल्यामध्यगतं मधुकुल्यानुयाति तम् ॥
स्वर्णादिधातुघटितं यः प्रदद्यात् कमण्डलुम् ।
पितृभ्यः स चिरं भोगैर्मोदते काञ्चनाचले ॥
यो ददाति पितॄणां हि राजतं वै कमण्डलुम् ।
सम्पन्नः सकलैरङ्गैः स राजा धार्मिको भवेत् ॥
कमण्डलुं ताम्रमयं श्राद्धेषु प्रददाति यः ।
स महत्या श्रिया युक्तः कुले महति जायते ॥
काष्ठेन निर्मितं यस्तु नालिकेरमथापि वा ।
दद्यात् कमण्डलुं श्राद्धे स श्रीमानभिजायते ॥
चर्मणा निर्मितां वारिपात्रं नानाविधन्तु यः ।
प्रतिपादयति श्राद्धे स सुखी जायते चिरम् ॥
यो मृत्तिकाविरचितान् श्राद्धेषु करकान्नवान् ।
प्रयच्छति महामेधाः स दुःखं नैव विदन्ति ॥

स्कन्दपुराणे—

यस्तडागांस्तथा वापीरपि कूपान् प्रपास्तथा ।
उत्सृजेत् पितृतृप्त्यर्थं ब्रह्मलोकं स गच्छति ॥
मणिकानम्भसा पूर्णान् प्रदद्याद्वा गलन्तिकाम् ।
प्रदद्यात्करकान्वापि यदि वा करपत्रिकाः ॥
श्राद्धकाले यथाशक्ति सोऽक्षयं विन्दते सुखम् ।

वायुपुराणे—

दत्वा पवित्रं योगिभ्यो जन्तुवारणमम्भसः।
श्राद्धे निष्कसहस्रस्य फलं प्राप्नोति मानवः॥

इति कमण्डल्वादिजलपात्राणि।

अथ छत्रम्।

वायुपुराणे—

श्रेष्ठं छत्रञ्च यो दद्यात् पुष्पमालादिशोभितम्।
प्रासादो ह्युत्तमो भूत्वा गच्छन्तमनुगच्छति॥

बृहद्विष्णुपुराणे।

छत्रं विचित्रं यो दद्यात् पितॄणां श्रेयसान्वितः।
स विन्दति न सन्देहः सन्तापं कुत्रचिन्न हि॥

पद्मपुराणे।

यो वै प्रयच्छति छत्रममुकस्येदमस्त्विति।
तेन सन्तारितस्तापात् स भवेदायुगक्षयात्॥

भगवतीपुराणे।

वर्षातपत्राणयोग्यमातपत्रं प्रयच्छता।
समुद्धृताः स्युः पितरो दुस्तरात् दुःखवारिधेः॥

नारदीयपुराणे।

दद्यात् पितॄणां यः छत्रं वृष्ट्यातपनिवारणम्।
महाभूतसमुद्भूतां नैव पीडां स पश्यति॥

ब्रह्मवैवर्त्ते।

छत्रं नरपतेर्योग्यं नानाशोभासमन्वितम्।
छत्रवाहाय वृत्तिञ्च परिकल्प्य थोचितम्॥
प्रदद्याद् विप्रमुख्याय पितनुद्दिश्य यः स्वकान्।
सः प्रशास्ति नरः कृत्स्नमेकच्छत्रं महीतलम्॥
छत्रं शतशलाकं यः सितवस्त्रोपशोभितम्।
पितॄणां प्रयतो दद्यात् सोऽपि राजा भवेदिह॥
मयूरपिच्छैर्बहुभिर्निर्मितं रुचिराकृति।
छत्रं ददाति यस्तस्य विहारो नन्दने वने॥
यः प्रदद्याल्लघुच्छत्रं रम्यमातपवारणम्।
श्राद्धकाले स मनुजो न क्वचित् परितप्यते॥

यो वृष्टिवारणं छत्रं वर्षाकाले प्रयच्छति ।
स्वपितॄणां हितार्थाय स दुःखैर्नाभिभूयते ॥

इति छत्रनिरूपणम् ।

अथोपानत्पादुके ।

वायुपुराणे ।

श्राद्धेपूपानहौ दद्याद् ब्राह्मणेभ्यो विशेषतः ।
दिव्यं स लभते चक्षुर्वाजियुक्तान् रथांस्तथा ॥

ब्रह्मपुराणे ।

उपानद् युगलं यस्तु श्राद्धकर्मणि धर्मवित् ।
एकैकस्मै द्विजाग्र्याय पित्रर्थं संप्रयच्छति ॥
पितॄणां तत्परे लोके विमानमुपतिष्ठते ।
दातापि स्वर्गमाप्नोति सयुक्तैर्वडवारथैः ॥

देवीपुराणे ।

उपानहौ प्रयच्छन्ति ये पितृभ्यः समाहिताः ।
अश्वदानं कृतं तैस्तु नात्र कार्या विचारणा ॥

आदित्यपुराणे ।

प्रतप्तबालुकाः केचित् केचिदङ्गारसङ्कुलाः ।
लोहकण्टकसङ्कीर्णाः केचिद् व्यालसमाकुलाः ॥
यमलोकस्य पन्थानः प्रमीतानां सुदुस्तराः ।
उपानद्दानमेवैकं तेषु तारयितुं क्षमम् ॥
उपानहौ स्वयं दत्वा द्विजेभ्यो वै यथाविधि ।
येभ्यो वा वंशजैर्दत्ते पन्थानं ते तरन्ति तम् ॥
एतस्मात् कारणान्नित्यं श्राद्धे दानमुपानहाम् ।
पुराणज्ञाः प्रशंसन्ति दानमन्यसमं न तत् ॥

सौरपुराणे ।

निर्माय सुदृढे दद्याददुर्गन्धेन चर्मणा ।
न न्यूने नातिरिक्ते च पादयोः सुखदे मृदू ॥
उपानहौ ब्राह्मणेभ्यः पितॄणां सुखहेतवे ।
प्रीयन्ते पितरस्तस्य प्रीता यच्छन्ति वाञ्छितम् ॥

वायुपुराणे ।

ऋजू पूर्णे तु यो दद्यात् पादुके श्राद्धकर्मणि ।
शोभनं लभते यानं पादयोः सुखमेव च ॥

नन्दिपुराणे ।

यः पादुके प्रदद्यात्तु पितृतृप्त्यर्थमादरात् ।
तस्य पुण्येषु लोकेषु भवेदप्रतिघा गतिः ॥

चमत्कारखण्डे ।

धात्वादि निर्मितं दद्यात् पितृभ्यः पादुकायुगम् ।
यस्तस्य देवलोकेषु गतिर्वैमानिकी भवेत् ॥
गजदन्तकृते यस्तु पादुके संप्रयच्छति ।
स वै चित्राणि यानानि लभते प्रेत्य चेह च ॥
यः पादुके प्रयच्छेत्तु सारदारुमये शुभे ।
पितृभ्यः सोऽपि मेधावी सुखमत्यन्तमश्नुते ॥

इत्युपानत्पादुकानिरूपणम् ।

अथासनानि ।

ब्रह्मपुराणे ।

आसनानि च रम्याणि पितृभ्यो यः प्रयच्छति ।
स आस्ते सुचिरं कालं त्रिदशैरभिपूजितः ॥

देवीपुराणे ।

पीठान्यतिमनोज्ञानि पितॄणां प्रददाति यः ।
तस्य पीठेश्वरी नित्यं वरान् यच्छति वाञ्छितान् ॥

आदित्यपुराणे ।

सुश्लक्ष्णानि विशालानि प्रददात्यासनानि यः ।
श्राद्धेषु तस्य भवने सदास्ते पद्मसम्भवा ॥

गारुड़पुराणे—

प्रयच्छत्यासनं यस्तु पितृभ्यः सुमहामतिः ।
स्वैरं वैरविनिर्मुक्तश्चिरमास्ते त्रिविष्टपे ॥

चमत्कारखण्डे ।

चामीकरमयं श्राद्धेष्वासनं यस्तु दापयेत् ।
तस्यासनं मेरुपृष्ठे समीपे परमेष्ठिनः ॥
यः पितॄणां सुघटितं दद्याद्राजतमासनम् ।
स स्वर्गे सुखमासीनः क्रीडते कालमक्षयम् ॥
येन ताम्रमयं दत्तमासनं पितृकर्म्मणि ।
स वै दिव्यासनारूढ़ो न हि प्रच्यवते चिरम् ॥
प्रदद्यादासनं यस्तु निर्म्मितं सारदारुभिः ।
तस्य नाकगतस्योच्चैः कल्प्यते भव्यमासनम् ॥

विष्णुधर्मोत्तरे—

यस्तु भद्रासनं चारु पितॄणां प्रतिपादयेत् ।
स वै सिंहासनासीनश्च्यवते न चिरादपि ॥
यस्त्वासनं वस्त्रमयं हंसपिच्छैः सुसम्भृतम् ।
प्रयच्छति महीपालास्तमासीनमुपासते ॥
तूलैः पूर्णोदरं वास्त्रमासनं यो निवेदयेत् ।
पितॄणामादरादेनं प्रत्यासीदन्ति सम्पदः ॥
यः पट्टगद्दिकाः श्राद्धे गद्दिकाश्च मनोहराः ।
ददाति तस्य हि स्वर्गे कल्प्यते दिव्यमासनम् ॥
पितॄनुद्दिश्य योगिभ्यो दत्त्वा कुशमयीर्वृशीः ।
सर्वसङ्गविनिर्मुक्तो विशुद्धात्मा स जायते ॥
चैत्रासनानि चित्राणि पितृभ्यः प्रतिपादयेत् ।
नीरोगः सुभमः श्रीमान् पुरुषः सम्प्रजायते ॥
यस्त्वासनोपयोगार्थं प्रदद्यात् कम्बलान् नवान् ।
अष्टाङ्गयोगसंसिद्धिस्तस्य पुंसोऽभिजायते ॥
यस्तृणैर्मृदुभिः श्लक्ष्णं निर्माय शुभमासनम् ।
दद्याच्छ्राद्धेषु तस्याशु स्थिराः स्युः सर्वतः श्रियः ॥

इत्यासननिरूपणम् ।

अथ शय्यास्तरणप्रच्छादनपटोपधानानि ।

ब्रह्माण्डपुराणे—

शय्यामास्तरणोपेतामुत्तरच्छदसंयुताम् ।
उपधानेन संयुक्तां पित्रुद्देशेन यो ददेत् ॥
मोदन्ते पितरस्तस्य सुखिनः शाश्वतीः समाः ।
दातापि स्वर्गमासाद्य विमानं दिव्यमास्थितः ॥
सेव्यते सुरनारीभिर्गीयमानश्च किन्नरैः ।

ब्रह्मवैवर्त्ते—

यो मञ्चकञ्च दद्याद्वै चारु तूलिकयान्वितम् ।
विशुद्धाच्छादनपटं रमणीयोपधानकम् ॥
पितृभ्यः श्रद्धया युक्तः श्राद्धकाल उपस्थिते ।
स त्रिविष्टपमासाद्य दिव्यभोगसमन्वितम् ॥
सहस्रैः सुरनारीणां रमते परिवारितः ।
कालक्षयादिहागत्य नारीणां वल्लभो भवेत् ॥

कूर्मपुराणे—

शय्यां सतूलिकां दद्यात् पितृकर्म्मणि यो नरः ।
रमयन्त्यनुरक्तास्तं स्वर्गे सारङ्गलोचनाः ॥

विष्णुधर्मोत्तरे—

मञ्चकं तूलिकायुक्तं निर्मितं दारुभिः शुभैः।
भक्त्या विप्राय प्रयतो द्विजेभ्यः पितृकर्मणि॥
अग्र्यैरप्सरसां वृन्दैरश्रान्तं परिचर्य्यते।
आन्दोलकं सास्तरणं सोपधानं प्रसुन्दरम्।
धातुजाभिः सुरम्याभिः शृङ्खलाभिश्च संयुतम्॥
मत्तवारणशोभाढ्यं ग्रथितं मृदुभिः पटैः।
ददाति पितृकार्य्येषु यो हि श्रद्धापरायणः॥
गन्धर्वाप्सरसां लोके गीयमानो निरन्तरम्।
स भुंक्ते विविधान् भोगांस्त्रिदशैरपि दुर्लभान्॥
पट्टान् काष्ठमयान् यश्च शयनेषूपयोगिनः।
दत्वा स्वास्तरणोपेतान् मत्तवारणलाञ्छितान्॥
वर्षायुतञ्च रमते लोके वै विश्वकर्म्मणः॥

चमत्कारखण्डे।

दारुभिर्घटितान्तस्थैः स्वर्णपत्रैरलङ्कृताम्।
शय्यां ददाति यस्तस्य वासः शक्रस्य वेश्मनि॥
भूषितां पित्तलमयैः पत्रच्छेदैर्यथोचिताम्।
श्राद्धे शय्यां प्रयच्छेद् यः सूर्यलोके स राजते॥
गजदन्तमयं दिव्यं श्राद्धे दत्वा तु मञ्चकम्।
गत्वा चान्द्रमसं लोकं शरदामयुतं वसेत्॥
पट्टसूत्रमयैः पट्टैर्ग्रथिताञ्च ददाति यः।
शय्यां पितृभ्यो मेधावी देवीलोकं स गच्छति॥
कार्पाससूत्रजैः पट्टैः सुदृढां यः प्रयच्छति।
चन्द्रस्य भवने सोऽपि कामान् भुंक्ते यथेप्सितान्॥
कृतां शणमयैः पट्टैः सूत्रैर्वा वल्वजैरपि।
दत्त्वा जन्मान्तरे जातः स्त्रियो विन्दति सुन्दरीः॥
हंसपिच्छमयीं तूलीं पितृभ्यः प्रददाति यः।
गन्धर्वाप्सरसां लोके मोदतेऽसौ यथासुखम्॥
कार्पासनिर्मितां तूलीं दत्त्वा मृद्वीं सुशोभनाम्।
उपधानेन संयुक्तां लक्ष्मीवान् जायते नरः॥
हंसपिच्छमयं रम्यं उपधानं ददाति यः।
कीर्त्तिमान् जायते नित्यं सुखानामपि भाजनम्॥
क्षौमं वा पट्टसूत्रं वा यो दद्यादुत्तरच्छदम्।
लावण्येन समायुक्तो जायतेऽसौ जनप्रियः॥
यः प्रयच्छेदुत्तरपटं सूक्ष्मकार्पाससूत्रजम्।
तस्यायुर्विपुलं लोके प्रयच्छन्ति पितामहाः॥

मृदुचर्ममयीं दद्यात् यो नरः पट्टगद्दिकाम् ।
सोऽपि श्रिया समयुक्तो नीरोगो जायते भुवि ॥
विचित्रैश्चर्मभिर्युक्तं रचितं मृदभिस्तृणैः ।
प्रदायास्तरणं श्राद्धे न दुःखं पश्यति कचित् ॥
दद्यादास्तरणं यस्तु निर्मितं मृदुभिस्तृणैः ।
श्राद्धकाले तु योगिभ्यः स दुःखैर्नाभिभूयते ॥

इति शय्यास्तरणप्रच्छादनपटोपधानानि ।

अथ चामरव्यजन-दर्पण-केशप्रसाधनानि ।

बृहद्विष्णुपुराणे ।

चामरव्यजनञ्चैव भक्त्या यः प्रतिपादयेत् ।
स वै दिवस्पतेर्लोके बहुकालं महीयते ॥
राजोपकरणं ह्येतत् पितृणामपिवल्लभम् ।
अतो विद्वान् प्रयत्नेन तेभ्यो दद्यादतन्द्रितः ॥
प्रदाय दर्पणं तेभ्यश्चक्षुष्मानभिजायते ।
केशप्रसाधनं दत्त्वा तथा कूर्चप्रसाधनम् ॥
सपुष्टां रूपसामग्रीं लभते सोऽन्यजन्मनि ।

सौरपुराणे ।

चामरं तालवृन्तञ्च श्वेतच्छत्रञ्च दर्पणम् ।
दत्त्वा पितॄणामेतानि भूमिपालो भवेदिह ॥

प्रभासखण्डे ।

केशप्रसाधनीं रम्यां दद्यात् कङ्कतिकान्तु यः ।
आदर्शं निर्मलञ्चैव पूर्णचन्द्रसमाकृतिम् ॥
श्राद्धकाले प्रसन्नात्मा तस्य स्वर्गेऽक्षया गतिः ।
गजदन्तनिर्मितं केशसंस्कारसाधनं 'कङ्कतिका' ॥

वाराहपुराणे ।

चामरीधेनुलाङ्गूल श्वेतवालसमुद्भवम् ।
चामीकरविचित्रेण तथा दण्डेन निर्मितम् ॥
पितृभ्यश्चामरं दत्त्वा स्वर्गे स्त्रीभिस्तु वीज्यते ।
तदेव कृष्णवर्णन्तु दत्त्वा भूमिपतिर्भवेत् ॥
मयूरपिच्छनिर्माणं हेमदण्डन्तुचामरम् ।
प्रतिपाद्य पितृभ्यस्तु राजराजोऽभिजायते ॥
बालैर्दीर्घैरतिश्वेतैरश्ववालधिसम्भवैः ।
निर्मितं चामरं श्राद्धे दत्त्वा माण्डलिको भवेत् ॥

कृष्णाश्वबालरचितं चामरं यस्तु यच्छति ।
सोऽपि पुण्येन तेनेह धनी भवति धर्मभाक् ॥

कूर्म्मपुराणे ।

द्विजेभ्यश्चामरं दद्यात् स्थापयेद्वामरालये ।
पितॄनुद्दिश्य यस्तस्य पितरः सर्वकामदाः ॥

वायुपुराणे ।

व्यञ्जनं तालवृन्तञ्च दत्त्वा विप्राय संस्कृतम् ।
प्राप्नुयात् स्पर्शयुक्तानि सुगन्धीनि मृदूनि च ॥
'तालवृन्तं' वस्त्रव्यजनम् ।

चमत्कारखण्डे ।

नानाकषायधौतेन निर्मितं मृदुचर्मणा ।
चित्ररागैरनेकैश्च स्वर्णदण्डेन शोभितम् ॥
दन्तिदन्तमयेनापि दण्डेन सुविराजितम् ।
व्यजनं ये प्रयच्छन्ति ते वै गत्वामरावतीम् ॥
नारीभिरभिवीज्यन्ते नित्यं सत्कङ्कणैः करैः ।
मयूरपिच्छघटितं व्यजनं यः प्रयच्छति ॥
पितृभ्यः सोऽपि देहान्ते स्कन्दलोके महीयते ।
रचितं बालकेनाथ यद्वोशीरेण निर्मितम् ॥
प्रदाय व्यजनं श्राद्धे मनस्तापं न विन्दति ।
वेत्रपट्टेन रचितं वस्त्रैरन्यैरथापि वा ।
प्रयच्छेत्तालवृन्तं यः स भूपालो न संशयः ॥
तालीदलैर्विरचितं कृतं भूर्जत्वचाथ वा ।
प्रदाय व्यजनं श्राद्धे महादारोग्यमश्नुते ॥
कृतञ्च विदलच्छेदैः सुसूक्ष्मैश्चैव गुम्फितम् ।
दत्त्वा पितृभ्यो व्यजनमनन्तं सुखमश्नुते ॥

गारुडपुराणे ।

समर्प्य दर्पणं भक्त्या पितृभ्यः पितृकर्मणि ।
भुवि प्रकाशो भवति यशोभिरभिपूजितः ॥

भविष्यत्पुराणे ।

दर्पणं कलधौतेन निर्मलेन सुनिर्मितम् ।
प्रतिपाद्य पितृभ्यो वै लोकं चान्द्रमसं व्रजेत् ॥
विमलेनापि कांस्येन पञ्चाशत् पलिकेन तु ।
कल्पितं दर्पणं दत्त्वा तेजस्वी जायते ध्रुवम् ॥
त्रिंशत्पलेन कांस्येन कृतमादर्शमण्डलम् ।
पञ्चविंशतिजं वाऽपि दत्त्वा वै कान्तिमान् भवेत् ॥

यो दर्पणं विरचितं कांस्यस्य दशभिः पलैः।
प्रतिपादयते सोऽपि लभते चक्षुरुत्तमम्॥

स्कन्दपुराणे।

केशप्रसाधनं दत्त्वा करिदन्तविनिर्मितम्।
पितृकर्मणि धर्मात्मा सोऽश्विनोर्लोकमश्नुते॥
तालस्य नालिकेरस्य वेणोर्वेत्रस्य वा पुनः।
शलाकाभिर्विरचितं दत्त्वा केशप्रसाधनम्॥
सुभगश्च सुवेशश्च निश्चितं जायते नरः।
दारुणा निर्मितं दत्त्वा केशसंस्कारसाधनम्॥
प्राप्नोति सुन्दरान् केशान् दीर्घमायुश्च विन्दति।
वराहरोमरचितां श्मश्रुवैशद्यकारिणीम्॥
पितृभ्यः कूर्चिकां दत्त्वा सुरूपः सुभगो भवेत्।

इति चामर-व्यजन-दर्पण-केशप्रसाधननिरूपणम्।

अथान्न-मधु-फल-पात्र-पात्राधार-पतद्ग्रह-ताम्बूल-तत्पात्राणि।

श्राद्धमधिकृत्य ब्रह्मवैवर्त्ते—

तरुणादित्यसङ्काशं विमानं साव्वकामिकम्।
अन्नदो लभते तिस्रः कन्याकोट्यस्तथैव च॥
अन्नदानात्परं दानं विद्यते नेह किञ्चन।
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः॥
जीवदानात्परं दानं न किञ्चिदिह विद्यते।
अन्नाज्जीवति त्रैलोक्यं तेन तत्परमं भवेत्॥
अन्नाल्लोकाः प्रतिष्ठन्ते लोकदानस्य तत् फलम्।
अन्नं प्रजापतिः साक्षात्तेन सर्वमिदं ततम्॥
तस्मादन्नसमं दानं न भूतं न भविष्यति।

मार्कण्डेयपुराणे—

बहुप्रकाराण्यन्नानि मृष्टानि च मृदूनि च।
फलानि चैव स्वादूनि यथाकालोद्भवानि च॥
निवेदयेत्पितृभ्यो यः सम्भृत्य स्वयमादरात्।
स पितॄणां प्रसादेन ब्रह्मसायुज्यमश्नुते॥

नारदीयपुराणे—

भक्ष्यं भोज्यञ्च लेह्यञ्च पेयञ्चोष्यं तथैव च।
पञ्चप्रकारं ह्यशनं द्रव्यगन्धरसान्वितम्॥

द्राक्षाकदलनारङ्ग सहकारादिकानि च ।
वर्ण-गन्ध-रस-स्पर्शसम्पन्नानि फलान्यपि ॥
समर्पयेच्छ्राद्धकाले मन्त्रजिह्वेषु यत्नतः ।
तेन तृप्तिं परां यान्ति पितरः सपितामहाः ॥
कामानस्मै प्रयच्छन्ति दुर्लभानन्यकर्मणा ।
यस्तु भोजनपात्राणि पितृभ्यः प्रतिपादयेत् ॥
सौवर्णं राजतादीनि तथा कांस्यमयान्यपि ।
स पुमान् पात्रतामेति सर्वासामपि सम्पदाम् ॥
धात्वादिनिर्मिता भुक्तिपात्राधारास्त्रिपादिकाः ।
उत्सृज्य स्वपितृप्रीत्यै प्रापयेद् ब्राह्मणालयम् ॥
स ज्ञातीनामशेषाणामाधारत्वं प्रपद्यते ।
पतद्ग्रहं धातुमयं ष्ठीवनाचमनादिषु ॥
उपयुक्तं श्राद्धकाले पितृभ्यः परिकल्प्य तु ।
द्विजस्य भवने स्थाप्य श्रियमाप्नोति पुष्कलाम् ॥

वह्निपुराणे—

अन्नं ब्रह्म समुद्दिष्टमखिलैः श्रुतिपारगैः ।
तच्च भूरिगुणोपेतं देवलोकेऽपि दुर्लभम् ॥
तत्पितॄणामतिप्रीत्या यः प्रयच्छति भूरिशः ।
अशेषक्लेशनिर्मुक्तः स याति ब्रह्म शाश्वतम् ॥
ताम्बूलं यो ददातीह शुचिकर्पूरसंयुतम् ।
ऐश्वर्यं सोऽतिविपुलं परत्रेह च विन्दति ॥
यश्चूर्णपर्णपूगादिस्थापनार्थानि कृत्स्नशः ।
दद्यात्ताम्बूलपात्राणि पूगाद्यैः पूरितानि च ॥
तथा कर्पूरभाण्डञ्च कर्पूरेणाभिपूरितम् ।
दिव्यं वर्षसहस्रं हि भुङ्क्ते भोगान् भुवि स्थितः ॥

पद्मपुराणे—

अन्नं हि प्राणिनां प्राणाः अन्नमेवामृतं दिवि ।
अन्नदः प्राणदः प्रोक्तो ह्यन्नदोऽमृतदस्तथा ॥
तस्मात्पुत्रेण कर्त्तव्यं पित्रर्थं भूरिभोजनम् ।
भूर्यन्नदाता पुरुषो न मन्तव्यो हि मानुषः ॥
तस्य निर्दग्धपापस्य निवासो वैष्णवे पुरे ।
फलानि च सुगन्धीनि पक्कानि मधुराणि च ॥
मृद्वीकादीनि यो दद्यात् पितृभ्यः प्रणयान्वितः ।
स स्वर्गे नन्दनोद्यानफलपीयूषभाग्भवेत् ॥
उत्कृष्टैः क्रमुकैश्चैव नागवल्लीदलैरपि ।
कल्पितं घनसारादि सुगन्धिद्रव्यसंयुतम् ॥

दत्वा पितृभ्यस्ताम्बूलमनन्तां लभते श्रियम् ।
नान्नात् परतरं किञ्चित् प्राणिनां विद्यते प्रियम् ।
ताम्बूलाच्च परं नास्ति भोगेषु प्रवरं यतः ॥
तेनैतदुभयं देयं पितृणां तृप्तिमिच्छता ।
आरोग्यमन्नदो याति भोगी ताम्बूलदो भवेत् ॥

प्रभासखण्डे—

जाम्बूनदमयं दिव्यं विमानं सूर्यसन्निभम् ।
दिव्याप्सरोभिः सङ्कीर्णमन्नदो लभतेऽक्षयम् ॥

भगवतीपुराणे—

अन्नं हि प्राणिनां प्राणाः सुप्रसिद्धमिदं वचः ।
तस्मादन्नप्रदो यस्तु प्राणानेव ददाति सः ॥
तस्मादन्नं प्रदातव्यं पितृणामपि भूरिशः ।
आरोग्यमन्नदो याति दीर्घमायुश्च विन्दति ॥

सह्याद्रिखण्डे—

ओषधीनां हि सर्वासां परमो वै रसो मधु ।
सर्वान्नानामयं सारो विश्रुतो मधुसंज्ञया ॥
देवानाञ्च पितृणाञ्च तदेतदतिवल्लभम् ।
अतः श्राद्धं न कर्त्तव्यं यत्किञ्चिन्मधुना विना ॥
मधुना रहिते श्राद्धे निराशाः पितरो गताः ।
देवाश्च पितरश्चैव मधुना तर्पिता ध्रुवम् ॥
सुधारसेन तृप्यन्ति यावदाभूतसंप्लवम् ।
कथञ्चिद्यदि विप्रेभ्यः प्रदत्तं भोजने मधु ॥
पिण्डास्तु नैव दातव्याः कदाचिन्मधुना विना ।
प्लुतेन मधुसर्पिर्भ्यां यैर्दत्ताः पायसेन वै ॥
पिण्डाः पितृभ्यस्ते पैत्रात् समुत्तीर्णा ऋणार्णवात् ।
यैर्वा मघात्रयोदश्यां मधुना पायसेन च ॥
विहितः पिण्डनिर्वापः कृतकृत्यास्तु ते नराः ।
अन्नाद्यैर्मधुसंपृक्तैः सक्तुभिर्वा मधुप्लुतैः ॥
यैर्निरुप्ता नरैः पिण्डा गयाशीर्षे महात्मभिः ।
कल्पकोटिशतं साग्रं नानाभोगसमन्विताः ॥
ते स्वीयैः पूर्व्वजैः सार्द्धं ब्रह्मलोके निवासिनः ।
मधु मध्विति वै श्राद्धे त्रिःसमुच्चरितं वचः ॥
श्रावणान्मधुनाम्नस्तैः पितरः स्युः सुतर्पिताः ।
अतोऽर्थं मधु शंसन्ति धर्मज्ञाः श्राद्धकर्मणि ॥
सौवर्णं राजतं वापि कांस्येनाप्यथ निर्मितम् ।
शक्त्या भोजनपात्रन्तु विशालञ्चातिनिर्मलम् ॥

घृतादिपात्रैर्लघुभिर्युतं स्वर्णादिसम्भवैः।
हेमादिधातुसंभूते स्थितमाधारयन्त्रके ॥
पतद्ग्रहाभिधानेन मलपात्रेण चान्वितम्।
यो ददाति द्विजाग्रेभ्यः पितॄणामिदमस्त्विति ॥
सुचिरं स दिवि स्थित्वा सम्राड् भवति भूतले।

वायुपुराणे—

पात्रं वै तैजसं दद्यान्मनोज्ञं श्राद्धभोजिनाम्।
पात्रं भवति कामानां विद्यानाञ्च धनस्य च ॥
राजतं काञ्चनञ्चैव दद्यच्छ्राद्धेषु यः पुमान्।
दत्वा स लभते दानात् प्राकाम्यं धनमेव च ॥
रौप्यं [रजतयुक्तं वा पितॄणां पात्रमुच्यते।
पितॄनेतेन दानेन सत्पुत्रास्तारयन्त्युत ॥
लवणेन तु पूर्णानि श्राद्धे पात्राणि दापयेत्।
रसाः समुपतिष्ठन्ति भक्ष्यं सौभाग्यमेव च ॥
तिलपूर्णानि यो दद्यात्पात्राणीह द्विजन्मनाम्।
तिले तिले निष्कशतं स ददाति न संशयः ॥

ब्रह्मवैवर्त्ते—

सुरभिद्रव्यतैलैस्तु गन्धवद्भिस्तथैव च।
पूरयित्वा तु पात्राणि श्राद्धे सत्कृत्य दापयेत् ॥
गन्धवहा महानद्यः सुखानि विविधानि च।
दातारमुपतिष्ठन्ति युवत्यश्च पतिव्रताः ॥

नरसिंहपुराणे—

फलानि कदलादीनि पितॄणां यः प्रयच्छति।
पितृभक्तस्य लोकेऽस्मिन् सफलं तस्य जीवितम् ॥

ब्रह्माण्डपुराणे—

वृक्षैर्मनोहरफलैर्लताभिश्च समाकुलान्।
आरामान् ये प्रयच्छन्ति पितृभ्यो जलपूर्वकम् ॥
ते चक्रवर्त्तिनो भूत्वा प्रशासन्ति वसुन्धराम्।
ये पुष्पवाटिकां वापि वृक्षैः कतिपयैर्युताम् ॥
प्रयच्छन्ति पितृभ्यस्ते भूमिपाला न संशयः।
येऽप्येकं फलितं वृक्षं लतामण्डपमेव वा ॥
प्रयच्छन्ति पितृप्रीत्यै ब्राह्मणानां महात्मनाम्।
बहुपुत्रा बहुधनास्ते दृश्यन्ते महीतले ॥
ये तु क्रीत्वाथ लब्ध्वा वा फलान्यादाय भक्तितः।
पितॄणां सम्प्रयच्छन्ति धनिनस्तेऽहि निश्चितम् ॥

स्कन्दपुराणे—

ये तु पूगद्रुमान् भव्यान् ताम्बूलीमण्डपानपि ।
पितृभ्यो ददते तेषामप्सरोभिः सह स्थितिः ॥
पूर्णं क्रमुकपालीभिः क्रमुकावापभाजनम् ।
पूगविच्छेदनिर्यन्त्रैर्युतं कालायसोद्भवैः ॥
पर्णस्थापनपात्रञ्च पूर्णं पर्णैः समुज्ज्वलैः ।
तथा कर्पूरपात्रं चेत्येवमादीनि कृत्स्नशः ॥
समाहृत्य द्विजाग्रेभ्यः श्राद्धेषु प्रतिपादयेत् ।
ताम्बूलग्रहणार्थञ्च द्रव्यं संवत्सरोचितम् ॥
पूर्णे संवत्सरे भूयः सर्वमेव प्रदापयेत् ।
एवं यः कुरुते तस्य पितरः प्रीतमानसाः ॥
आयुः प्रजां धनं तस्मै प्रयच्छन्ते सुखानि च ।

इत्यन्न-मधु-फल-पात्र-पात्राधार-पतद्ग्रह-ताम्बूल-तत्पात्रनिरूपणम् ।

अथ हिरण्यालङ्कार-यानानि ।

नन्दिपुराणे ।

सर्वेषामपि दानानां हिरण्यमधिकं स्मृतम् ।
प्रभवन्ति हि सर्वेऽपि पदार्थास्तु हिरण्यतः ॥
अतो हिरण्यं दातव्यं पितॄणान्तु विशेषतः ।
अतः सम्पूज्य गन्धाद्यैर्वस्त्राद्यैरभिपूज्य च ॥
हिरण्यं सम्प्रदातव्यमिदमस्मै स्वधेति हि ।
दक्षिणादौ तु रजतं पित्रे कर्मणि शस्यते ॥
अलङ्काराः प्रदातव्या यथाशक्ति हिरण्मयाः ।
केयूर—हार—कटक—मुद्रिका—कुण्डलादयः ॥
स्त्रीश्राद्धेषु प्रदेयाः स्युरलङ्कारास्तु योषिताम् ।
मञ्जीरमेखलादाम कर्णिका कङ्कणादयः ॥
हारमाणिक्यवैदूर्यमुक्ता गारुत्मतादिभिः ।
रत्नैर्विरचिताः स्वच्छैरलङ्कारा मनोहराः ॥
पितृभ्यः सम्प्रदातव्या निजवित्तानुरूपतः ।
यानानि—शिविका—गन्त्री तुरङ्गादीनि यत्नतः ॥
श्राद्धे देयानि विदुषा स्वसामर्थ्यानुसारतः ।
अन्नानि च विचित्राणि स्वादूनि सलिलानि च ॥
दातव्यानि यथाकामं पितॄन् मोदयता सदा ।
एवं यः कुरुते श्राद्धे श्रद्धया धार्मिकोत्तमः ॥
प्रक्षीणाशेषपापस्य तस्य संशुद्धचेतसः ।
विच्छिन्नक्लेशजालस्य[१] मुक्तिरेवामलं फलम् ॥

---

[१] विच्छिन्नक्लेशजातस्येति ।

आदित्यपुराणे ।

हिरण्यममृतं साक्षाद्देवरूपमिति श्रुतिः ।
हिरण्यदाता श्राद्धे स्यात् पितॄणाममृतप्रदः ॥
अतो हिरण्यं दातव्यं पितॄणां प्रीतये सदा ।
रजतं वा यथाशक्ति तेषां तदतिवल्लभम् ॥
पितॄन् संपूज्य चाच्छाद्य हिरण्यं प्रददाति यः ।
तुलादानसमं पुण्यं लभते नात्र संशयः ॥
रजतस्य प्रदानेन गोसहस्रफलं लभेत् ।
दक्षिणार्थं पृथग् देयं स्वर्णं रुप्यमथापि वा ॥
तेनास्य वर्द्धते लक्ष्मीरायुर्दीर्घञ्च विन्दति ।

वायुपुराणे ।

रजतस्य कथा वाऽपि दर्शनं दानमेव च ।
विशेषादक्षयं स्वर्गं राजतं दानमुच्यते ॥

भविष्यत्पुराणे ।

यो ददाति सुवर्णं वै रूप्यं वा पितृपूजकः ।
तस्य दिव्यायुतं पूर्णं निवासः काञ्चनाचले[१] ॥
ददाति रजतं वाऽपि यः पितॄणां महामतिः ।
तस्यापि वर्द्धते वंशः पितॄणां हि प्रसादतः ॥
अलङ्कारांस्तथानर्घान् पितॄणां भक्तिपूर्वकम् ।
यो ददाति महाभागः सुरस्त्रीणां सुवल्लभः ॥
जाम्बूनदेन शुद्धेन यः कृत्वा भूषणानि वै ।
प्रयच्छति द्विजाग्र्येभ्यः श्राद्धकाले विशुद्धधीः ॥
यशोभागी बहुधनः स नरो जायते भृशम् ।
अलङ्कारान् कृतान् दद्याद्यस्तु रत्नैर्महाधनैः ॥
स भूमिपालो भवति सर्वसामन्तवन्दितः ।
ततः काले बहुतरे विष्णोः सालोक्यमाप्नुयात् ॥

गारुड़पुराणे ।

अलङ्कारं महामूल्यं पितृभ्यो यः प्रयच्छति ।
तस्य पुण्यवतः पुण्यं गण्यते केन सत्तम ॥
यस्तु यानानि रम्याणि सुखहेतूनि वाहने ।
दद्यात् पितृभ्यस्तस्य स्याद्विमानैश्वर्यमद्भुतम् ॥

स्कन्दपुराणे ।

मूर्द्धालङ्करणं दत्त्वा श्राद्धे बहुधनोचितम् ।
मूर्द्धाभिषिक्तो भवति पृथिव्यां नात्र संशयः ॥

---

[१] कान्चनालय इति ।

कर्णभूषणदानेन निश्चितं स्याद्बहुश्रुतः ।
कण्ठालङ्कृतिदाता तु वाग्मी स्यान्मधुरस्वरः ॥
मेधावी जायते विद्वान् दत्तैर्हृदयभूषणैः ।
जायते बाहुभूषाभिः प्रदत्ताभिर्महाबलः ॥
हस्तालङ्करणं दत्त्वा दाता भवति विश्रुतः ।
स विश्ववन्द्यो भवति यो दद्यात् पादभूषणम् ॥
स्वर्गच्युतानामेतानि फलान्युक्तानि सूरिभिः ॥
पितृभूषणदानस्य स्वर्गो मुख्यतमं फलम् ।
रत्नजैर्भूषणैर्दत्तैर्न मुक्तिरपि दुर्लभा ॥

ब्रह्मपुराणे ।

यद्यदिष्टं विशिष्टञ्च तत्तद्देयं पितॄन् प्रति ।
तत्राप्यन्नं जलं वस्त्रं भूषणानि विशेषतः ।
यानान्यपि प्रदेयानि पितॄणां परितुष्टये ॥

मत्स्यपुराणे ।

श्राद्धे वासांसि देयानि शयनान्यासनानि च ।
दातव्यानीह विदुषा यानानि तु विशेषतः ॥

पद्मपुराणे ।

सुदुर्गमाः प्रमीतानां पन्थानः पारलौकिकाः ।
यानदानादृते ते वै न शक्यन्ते विलङ्घितुम् ॥
अतो यानानि देयानि पितृभ्यो वंशजन्मभिः ॥

विष्णुधर्म्मोत्तरे ।

शिविकां यः प्रयच्छेत्तु सर्वोपकरणैर्युताम् ।
दोलावाहनकर्म्मभ्यो वृत्तिं संवत्सरोचिताम् ॥
वर्षपर्याप्तमशनं कुटुम्बार्थं द्विजस्य तु ।
छत्रप्रदानमप्येवं कर्त्तव्यं पितृकर्मणि ॥
भूयोऽपि सर्वं दातव्यं वर्षान्ते पितृतुष्टये ।
प्रतिवर्षं सकृद्वापि य एवं कुरुते नरः ।
वैमानिकत्त्वं प्राप्तस्य तस्यावृत्तिर्न विद्यते ॥
यस्तु चित्रगतिं दद्यात् तुरगं लक्षणान्वितम् ।
श्राद्धेषु तस्य देहान्ते सूर्यलोकेऽक्षया स्थितिः ॥

चमत्कारखण्डे ।

दद्यान्मतङ्गजं यस्तु युवानं चारुलक्षणम् ।
स लोके लोकपालानामेकैकमयुतं वसेत् ॥
तेजस्विनं चारुगतिं लक्षण्यं यस्तुरङ्गमम् ।
दद्यात् पितृभ्यो विजयः तस्याप्रतिहतो भुवि ॥

रथं ददाति यो रम्यं युग्मैर्युक्तं तुरङ्गमैः ।
उक्षभिर्वा महाकायैस्तरुणैः सर्वलक्षणैः ॥
महाहवेषु कुत्रापि न तस्य स्यात्पराजयः ।
गन्त्रीं वा शकटं वाऽपि लौहचक्राक्षकूबराम् ॥
दत्त्वा पितॄणां प्राप्नोति धनर्द्धिमतिभूयसीम् ।

ब्रह्मवैवर्त्ते ।

श्राद्धे सम्मोदते दत्तैः स्यन्दनैस्तु सुखावहैः ।
राजभिः पूज्यते वाऽपि धनधान्यैश्च वर्द्धते ॥

इति हिरण्यालङ्कार-यानिरूपणम् ।

अथ गो-महिषी-बलीवर्दोष्ट्रादयः ।

मत्स्यपुराणे ।

श्राद्धे गावो महिष्यश्च बलीवर्दास्तथैव च ।
प्रदातव्या महोष्ट्राश्च यच्चान्यद्वस्तु शोभनम् ॥

पद्मपुराणे ।

गो-महिष्यादयो देयाः पदार्थाः श्राद्धकर्मणि ।
प्रीतिः श्राद्धेषु कर्तव्या पितॄणां सार्वकामिकी ॥
नानापदार्थैर्यः श्राद्धे पितॄंस्तु परितोषयेत् ।
पदार्थास्तस्य सर्वेऽपि नित्यं गृहमुपासते ॥

बृहद्विष्णुपुराणे ।

तरुणीं सुखसन्दोह्यां जीववत्सां पयस्विनीम् ।
ददाति धेनुं विप्रेभ्यः तुष्टिमुद्दिश्य पैतृकीम् ॥
यस्तस्य सा दिविष्ठस्य सर्वकामदुघा भवेत् ।
सुशीलां लक्षणवतीं सवत्सां बहुदोहनाम् ॥
दत्त्वा पितृभ्यः कपिलां घण्टाचामरभूषिताम् ।
मुञ्जवल्काद् यथेषीका पृथग्भवति निर्मला ।
एवं स सर्वपापेभ्यः पृथग्भवति निर्मलः ॥
अयुतानां शतं साग्रं ब्रह्मलोके महीयते ।
ददाति यः सुमहिषीमव्यङ्गाङ्गीमकोपनाम् ॥
भूरिक्षीरां गुणवतीं सापत्यां बहुसर्पिषाम् ।
क्षीरस्य सर्पिषो दध्नः परिपूर्णा दिवि ह्रदाः ॥
पितॄणामुपतिष्ठन्ते यावदाभूतसंप्लवम् ।
दातापि स्वर्गमाप्नोति वर्षाणामयुतानि षट् ॥
यस्तु धुर्य्यान् बलीवर्दान् पृष्ठी भारवहानपि ।
अविद्धनासिकान् दद्यादक्षुण्णवृषणांस्तथा ॥

वृषरूपः स्वयं धर्मस्तस्य साक्षात् प्रसीदति।
प्रसन्ने भगवत्यस्मिन् किं किं नाम न लभ्यते॥
क्रमेलकान् भारवहान् बहुयोजनगामिनः।
येऽलङ्कृत्य प्रयच्छन्ति राजानस्ते न संशयः॥
अजाश्चैवावयश्चैव महिषा भारवाहिनः।
पितृभ्यः सम्प्रदातव्याः सर्वपापक्षयार्थिना॥

नारदीयपुराणे—

दत्त्वा पितृभ्यः श्वेतां गां श्वेतद्वीपे महीयते।
प्रदाय धेनुं कृष्णाङ्गीं यमलोकं न पश्यति॥
पीतवर्णान्तु गां दत्त्वा न शोचति कृताकृते।
प्रदाय रोहिणीं धेनुं सर्वं तरति दुष्कृतम्॥
नीलां तु सुरभीं दत्त्वा वंशच्छेदं न विन्दति।
अन्येन येन केनापि धेनुं वर्णेन लक्षिताम्॥
दत्त्वा पितृभ्यो जयति नाके सुखमनुत्तमम्।
बलीवर्दान् बलवतो यो ददाति धुरन्धरान्॥
समग्रं भूमिदानस्य फलमाप्नोति मानवः।
पृष्ठे वहन्ति ये भारमुक्षाणो वहनक्षमाः॥
तान् प्रयच्छन् पितॄणां तु धनाढ्यो जायते भृशम्।

देवीपुराणे—

महिषीं पुष्कलक्षीरां पितृभ्यः शस्तलक्षणाम्।
यः प्रयच्छति नाकेऽस्य सुधाधारा प्रवर्त्तते॥
महिषं भारवोढारं यः पितॄणां निवेदयेत्।
तस्य पुंसो भगवती महिषघ्नी प्रसीदति॥

स्कन्दपुराणे—

उष्ट्रीर्वेगवहा यस्तु दद्यादुष्ट्रानथापि वा।
तस्य स्वर्गं प्रयातस्य गतिर्नैव विहन्यते॥
पशूनजाविकादींश्च यस्तु श्राद्धे प्रयच्छति।
प्रजया पशुभिश्चैव गृहं सुपरिपूर्यते॥

इति गो-महिषी-बलीवर्दोष्ट्रादि निरूपणम्।

अथ भू-गृह-पुस्तकाभयानि।

ब्रह्मपुराणे—

यथाशक्त्या प्रदातव्या भूमिः श्राद्धे विपश्चिता।
पितॄणां सम्पदे सा हि सर्वकामं प्रसूयते[१]॥

---

१. पितॄणां सम्प्रदेयानि भूमिदानानि यत्नत इति।

भूमिप्रदं हि पुरुषं प्राहुः सर्वप्रदं जनाः।
सर्वप्रदः परे लोके सर्वान् कामान् समश्नुते॥

कूर्मपुराणे—

भूमिप्रदानेन समं दानमन्यत्[1] न विद्यते।
अतः पितॄणां दातव्या भूमिर्भूतिमभीप्सता॥
भूमिदानेन पितरः सर्वान् कामानवाप्य वै।
मोदन्ते ब्रह्मणा सार्द्धं यावदाभूतसंप्लवम्॥

भगवतीपुराणे—

भूमेर्भवन्ति धान्यानि भूमेर्वस्त्राणि चैव हि।
भूमेर्गावो महिष्यश्च वराश्वा वरवारणाः॥
उद्यानानि च रम्याणि नद्यः कूपाः सरांसि च।
आतपत्राणि यानानि शयनान्यासनानि च॥
अन्नपानानि हृद्यानि गन्धमाल्यानि चैव हि।
रूप्यञ्च कनकञ्चैव रत्नानि विविधानि च॥
अलङ्कारा मनोज्ञाश्च यच्चान्यत्सुखसाधनम्।
प्रभवस्तस्य सर्वस्य भूमिरेव न संशयः॥
अतोऽर्थं पितृभक्तेन भूमिर्देया प्रयत्नतः।
पितॄणामक्षयां तृप्तिमिच्छता सार्वकामिकीम्।
भूमिप्रदस्य पितरो वैरिञ्चं लोकमास्थिताः॥
विचरन्ति विमानाग्र्यैर्यथाकामप्रचारिभिः।
भूमेर्दाता च पुरुषः प्रध्वस्ताशेषकल्मषः॥
प्रयाति ब्रह्मसालोक्यं यद्गत्वा न निवर्तते।

गारुडपुराणे—

य इच्छेदखिलैर्भोगैः पितॄंस्तर्पयितुं नरः।
भूमिस्तेन प्रदातव्या पितॄनुदिश्य धीमता॥
भूमिदानान्नरः स्वर्गे क्रीडते शाश्वतीः समाः।
कालक्षयादिहागत्य भूपतिः स्यात् प्रतापवान्॥
गृहाणि च विचित्राणि पितृभ्यो यः प्रयच्छति।
जाम्बूनदमयं दिव्यं यथाकामगमं शुभम्॥
सर्वसम्पत्समोपेतं विमानं सोऽधिरोहति।
पुस्तकान्यपि यः श्राद्धे पितृभ्यः प्रतिपादयेत्॥
अर्हणां लभते सोऽपि सभायां परमेष्ठिनः।

---

१. दानं मर्त्ये न विद्यत इति।

ब्रह्माण्डपुराणे—

पितॄन् भक्त्या समभ्यर्च्य भूमिं दद्यात् समाहितः।
भूमिदानेन संतृप्ता विदन्त्यार्त्तिं न ते क्वचित्॥
ग्रामं वा खर्वटं वापि पितृभ्यः प्रददाति यः।
शक्रस्य भवनं गत्वा यावदिन्द्रं स मोदते॥
श्राद्धे ददाति यः क्षेत्रं दशलाङ्गलसम्मितम्।
पञ्चलाङ्गलिकं वापि यद्वा गोचर्म्ममात्रकम्॥
अलाभे द्विहलं वापि हलमात्रमथापि वा।
लाङ्गलैः सबलीवर्द्दैर्योक्त्-तोत्रादि संयुतैः॥
अन्यैश्चैवोपकरणैरज्जुफालादिभिर्युतम्।
वाजपेयस्य यज्ञस्य स फलं प्राप्नुते नरः[1]॥
काले स्वर्गात् परिभ्रष्टो भूपतिर्द्धार्म्मिको भवेत्।
जालीनामथवेक्षूणां यव-गोधूमयोरपि॥
माष-मुद्ग-तिलानाञ्च क्षेत्रमुत्पत्तिहेतु यत्।
पितॄणां तन्नरो दत्वा विष्णोः सायुज्यमाप्नुयात्॥
पुनर्मानुष्यमायातो धनधान्यसमन्वितः।
तेजसा यशसा युक्तो विद्वान् वाग्मी च जायते॥
गृहं पक्वेष्टकचितं सुधाभिर्धवलीकृतम्।
मत्तवारणशोभाढ्यं गवाक्षद्वारभित्तिमत्॥
अनेक—भूमिसंयुक्तमेकभूमिकमेव वा।
पितृभ्यो यो ददातीह स याति ब्रह्मविष्टपम्॥
प्रासादा यत्र सौवर्णा नानामणिविभूषिताः।
तत्रासौ रमते नित्यं नृत्यवादित्रगायनैः॥
दिव्यं वर्षायुतशतं तत्रैव परिवर्त्तते।
दत्वा गृहं पितृभ्यस्तु तृणच्छन्नमथापि वा॥
लभतेऽग्र्याणि वेश्मानि श्रीमन्ति धनवन्ति च।
प्रासादान् केशवादीनां निर्म्माय सुमनोहरान्॥
पित्रोः पितामहादिभ्यो यस्तु श्रेयः समर्पयेत्।
वैकुण्ठादिषु लोकेषु स्वकीयैः पितृभिः सह॥
मोदतेऽसौ महाभागो यावदिन्द्राश्चतुर्दश।
पुस्तकानि सुवाच्यानि सच्छास्त्राणां ददाति यः॥
ब्राह्मणानां कुले यज्वा जायतेऽसौ बहुश्रुतः।

ब्रह्मवैवर्त्ते—

श्राद्धकाले गुणवतां विप्राणां समुपस्थिते।
दद्याच्छास्त्राणि धर्म्याणि स्मृतिं मेधाञ्च विन्दति॥

---

१. फलं संप्राप्यते नर इति।

चमत्कारखण्डे—

यः पुस्तकानि विप्राणां पित्रर्थं विनिवेदयेत् ।
स विद्वान् जायते वाग्मी मेधावी च बहुश्रुतः ॥
पुस्तकानि पितृभ्यस्तु वेदान्तानां ददाति यः ।
स श्रोत्रियान्वये[१] भूत्वा जायते वेदवित्तमः ॥
दत्त्वा व्याकरणं तु स्याच्छश्वत् ब्रह्मविदां वरः ।
मीमांसायाः प्रदानेन सोमयाजी भवेन्नरः ॥
प्रदाय न्यायशास्त्राणि भवेद्विद्वत्तमः पुमान् ।
पुराणदाता भक्तः स्यात् पुराणपुरुषे हरौ ॥
मन्वादि धर्मशास्त्राणां दानाद्भवति[२] धार्मिकः ।
कलाशास्त्रप्रदानेन कलासु कुशलो भवेत् ॥
यः श्राद्धदिवसे विद्वान् प्राणिनामभयं ददेत् ।
भयं न तस्य किञ्चित्स्यादिह लोके परत्र च ॥

सौरपुराणे—

यद्यस्य भयमुत्पन्नं स्वतो वा परतोऽपि वा ।
श्राद्धकर्मणि सम्प्राप्ते तत्तस्यापनयेत् सुधीः ॥
राजतश्चौरतो वापि व्यालाच्च श्वापदादपि ।
सञ्जातान्तु हरेद्भीतिं पितृकर्मणि शक्तितः ॥
एकतः क्रतवः सर्वे सर्वस्ववरदक्षिणाः ।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥
अतोऽर्थं सर्वकालेषु दद्यादभयदक्षिणाम् ।
श्राद्धकाले विशेषेण स हि धर्मः परो मतः ॥
यथा ह्यभयदानेन तुष्यन्ति प्रपितामहाः ।
न तथा वस्त्र-पानान्न-रत्नालङ्कारकाञ्चनैः ॥
एतस्मादभयं देयं श्राद्धकाले विजानता ।
अभयस्य प्रदातारो भयं विन्दति न क्वचित् ॥
जन्ममृत्युभयाभावादभयं मोक्ष उच्यते ।
मोक्षमेव नरो याति प्राणिनामभयप्रदः ॥

श्राद्धमधिकृत्य ब्रह्मवैवर्त्ते—

जीवितस्य प्रदानाद्धि नान्यद्दानं विशिष्यते ।
तस्मात् सर्वप्रयत्नेन देयं प्राणाभिरक्षणम् ॥
अहिंसा सर्वदेवत्यं पवित्रं सर्वपावनम् ।
दानं हि प्राणिनामाहुर्दानानां परमं बुधाः ॥

---

१. स श्रोत्रियाणां कुले इति ।
२. दाता भवतीति ।

प्रभासखण्डे—

यः श्राद्धे ह्यभयं दद्यात् प्राणिनां जीवितैषिणाम् ।
अश्वदानसहस्रेण रथदानशतेन च ॥
दन्तिनाञ्च सहस्रेण अभयं वै विशिष्यते ।
यानि रत्नानि मेदिन्यां वाहनानि स्त्रियस्तथा ॥
क्षिप्रं प्राप्नोति तत् सर्वं श्राद्धकालेऽभयं ददत् ।
बन्धमोक्षन्तु[१] यः कुर्यात् श्राद्धकाले तु मानवः ॥
न तस्य गदितुं शक्यं सुकृतं साधुकर्मणः ।

वामनपुराणे—

बन्दीकृतांस्तु ये केचित् स्वयं वा यदि वा परैः ।
येन केनाप्युपायेन यस्तान्मोचयते नरः ॥
पितरस्तस्य गच्छन्ति शाश्वतं पदमव्ययम् ।
बन्दिनो मोचयेत्तस्मात् पितृकार्येषु यो नरः ॥
स याति विष्णुसायुज्यं निर्मुक्तः कर्मबन्धनात् ।

इति भूमि–गृह पुस्तकाभयनिरूपणम् ।

अथाञ्जनाभ्यञ्जन-सूत्राणि ।

ब्रह्मवैवर्त्ते—

अञ्जनाभ्यञ्जने चैव पितृभ्यः प्रतिपादयेत् ।
सूत्रञ्चाभिनवं सूक्ष्मं पिण्डानामुपरि न्यसेत् ॥
तत्र त्रैककुदं शस्तमञ्जनं पितृकर्मणि ।
तिलतैलोद्भवादीपात् कज्जलं वापि यद्भृतम् ॥

'त्रिककुत्' नीलपर्वतः, तत्र भवं 'त्रैककुदं' स्रोतोऽञ्जनाख्य नीलपर्वतशिला-चूर्णजमित्यर्थः ।

तिलतैलेन दातव्यं तथैवाभ्यञ्जनं बुधैः ।
क्षौमं कार्पासजं वापि पितृणां सूत्रमिष्यते ॥
असावङ्क्ष्व तथाभ्यङ्क्ष्वेत्यञ्जनादीनि दापयेत् ।
असावेतत्त इत्येवं सूत्रञ्चापि निवेदयेत्[२] ॥
इत्येवमञ्जनं दत्त्वा चक्षुष्मान् जायते नरः ।
अभ्यञ्जनप्रदानेन लभते रूपमुत्तमम् ॥
लभेद्वस्त्राण्यनन्तानि पिण्डसूत्रप्रदानतः ।

वायुपुराणे—

अञ्जनाभ्यञ्जने चैव पिण्डनिर्वपणे तथा ।
अश्वमेधफलेनैव सम्मितं मन्त्रपूर्वकम् ॥
क्रियाः सर्वा यथोदिष्टाः प्रयत्नेन समाचरेत् ।

---

१. बन्दिमोक्षन्त्विति । २. नियोजयेदिति ।

प्रभासखण्ड—वायुपुराणयोः—

श्रेष्ठमाहुस्त्रिककुदमञ्जनं नित्यमेव च।
दीपात् कृष्णतिलोद्भूततैलजाद् यच्च धारितम्॥

ब्रह्माण्डपुराणे।

अपसव्यं पितृभ्यस्तु दद्यादञ्जनमुत्तमम्।
नामान्युच्चार्य सर्वेषां वस्त्रार्थं सूत्रमेव च॥
पेषयित्वाञ्जनं सम्यक् वेद्या उत्तरतो बुधः।
गृह्य तद्दर्भपिञ्जूलैस्त्रिभिः कुर्याद्यथाविधि॥

तथा—

एकं पवित्रं हस्ते स्यात् पितॄणां तु सकृत् सकृत्।
तैलं पात्रेण दातव्यं पिण्डेभ्योऽभ्यञ्जनं हि तत्॥

तथा—

क्षौमं सूत्रं नवं दद्याच्छणकार्पासजं तथा।
पत्रोर्णं पट्टसूत्रञ्च कौशयेञ्च विवर्जयेत्॥

'पत्रोर्णं' धौतकौशेयम्।

वर्जयेत्तु दशाः प्राज्ञो यद्येता हतवस्त्रजाः।
न प्रीणन्ति तथैतान् हि दातुश्चाप्यफलं भवेत्॥

आपस्तम्बसूत्रे तु वस्त्रदशा अपि दातव्या इत्युक्तम्।

एतानि वः पितरो वासांस्यतो नान्यत् पितरो मयोष्टेति वाससो दशां छित्वा निदधात्यूर्णासुकां वा पूर्वे वयस्युत्तरायुषि स्वं लोमेति। 'ऊर्णासुकाः' मेषलोमदशाः। 'उत्तरे वयसि' पञ्चाशद्वर्षेभ्य ऊर्द्ध्वम् स्वं लोम उरःसम्भवमिति शेषः। "पञ्चाशतऊर्द्ध्वमुरोलोम यजमानस्य" इति शाट्यायनिवचनात्।

कात्यायनसूत्रे—

एतद्व इत्यपास्यति सूत्राणि प्रतिपिण्डमूर्णादशा वा वयस्युत्तरे यजमानलोमानि वेति।

ब्रह्मपुराणे—

दद्यात्क्रमेण वासांसि दशा वा श्वेतवस्त्रजाः।
ततो वयसि वृद्धे च स्वानि लोमान्यथापि वा॥
क्षौमं सूत्रं नवं दद्याच्छाणं कार्पासमेव वा।
पत्रोर्णनीलरक्ताक्तकौशेयानि विवर्जयेत्॥

नागरखण्डे—

सूत्रञ्च प्रतिपिण्डन्तु दद्यात्तेषु पृथक् पृथक्।
अन्यत्तु सर्वपिण्डेषु सततं विनियोजयेत्॥
न त्रुट्यति यथा तन्तुस्तथा तन्निक्षिपेच्छनैः।
विरोधमाचरेत्तेषां त्रोटनाच्च परस्परम्॥

तत्र रक्तं प्रदातव्यं रागैर्वा कुङ्कुमेन वा।
रक्तसूत्रविहीनं यत्तत्ते श्राद्धं भवेदिति ॥
ब्रह्मणैवं वरो दत्तः कव्यभक्षाय रक्षसे।
एवं ददाति यः सूत्रं सोऽक्षयां लभते श्रियम् ॥

ब्रह्माण्डपुराणे—

अञ्जनाभ्यञ्जने गन्धं सूत्रप्रणयनं तथा।
कुशैः पुनर्भवैः कुर्वन् अश्वमेधफलं लभेत् ॥

इत्यञ्जनाभ्यञ्जन-सूत्रनिरूपणम्।

अथ प्रकीर्णकम्।

प्रभासखण्डे—

लोके श्रेष्ठतमं सर्वमात्मनश्च प्रियं सदा।
तत्तत् पितॄणां दातव्यं तदेवाक्षयमिच्छता ॥

वायुपुराणब्रह्माण्डपुराणयोः।

गन्धैः पुष्पैस्तथा धूपैस्तथाहुतिभिरेव च।
फलमूलनमस्कारैः पितॄणां प्रयतः शुचिः ॥
पूजां कृत्वा द्विजान् पश्चात् तर्पयेदन्नसम्पदा।
श्राद्धकालेषु नियतं वायुभूताः पितामहाः ॥
आविशन्ति द्विजान् श्रेष्ठान् तस्मादेतद् ब्रवीमि ते।

कूर्मपुराणे—

प्रदद्याद्गन्धमाल्यादि धूपादीनि च शक्तितः।

तत्रैव पुराणे विश्वान्देवान् प्रति पितृवाक्यम् ॥

पुष्पैर्गन्धैस्तथान्नेन युष्मानग्रेऽर्चयिष्यति।
अग्रे दत्त्वा तु युष्माकमस्माकं दास्यते पुनः ॥
एवं कृते कृतं सम्यक् सर्वमेव भविष्यति।

वायुपुराणे—

वस्त्रैरन्नप्रदानैश्च भक्ष्यपेयैस्तथैव च।
गोभिरश्वैस्तथा ग्रामैः पूजयेद्द्विजसत्तमान्[१] ॥
भवन्ति पितरः प्रीताः पूजितेषु द्विजातिषु।
तस्मादनेन विधिना पूजयेत द्विजान् सदा ॥

वाराहपुराणे—

गन्धाः पुष्पाणि ताम्बूलधूपदीपाक्षतानि च।
पितृकृत्ये प्रशस्तानि स्वाद्वन्नं सलिलं हिमम् ॥

---

१. सम्पूजयेद् द्विजोत्तमानिति।

एतानि श्रद्धयोपेतः पितृभ्यो यो निवेदयेत् ।
स एव धर्मशीलो मे प्रियकारी वसुन्धरे ॥

तथा—

उपवेश्यासने शुभ्रं छत्रं तत्र प्रकल्पयेत् ।
आवरणार्थञ्च तत् छत्रं ब्राह्मणाय प्रदापयेत् ॥
ततो वस्त्राणि रम्याणि सर्वाण्याभरणानि च ।

विष्णुपुराणे पितृवाक्यम्—

रत्नवस्त्रमहायानं सर्वभोगादिकं वसु ।
विभवे सति विप्रेभ्यो योऽस्मानुद्दिश्य दास्यति ॥
स भुक्त्वा निखिलान् भोगानन्ते स्वर्गं गमिष्यति ।

नरसिंहपुराणे—

उपानच्छत्रवस्त्राणि भुक्तिपात्रं कमण्डलुम् ।
शयनासनयानानि दर्पणव्यजनानि च ॥
अन्नं सुसंस्कृतं गन्धं ताम्बूलं दीपचामरम् ।
पितृभ्यो यः प्रयच्छेत्तु श्रद्धानो विमत्सरः ॥
स शोकमोहौ तरति प्राप्य ज्ञानमनुत्तमम् ।

नन्दिपुराणे—

अन्नोदके धूपदीपवस्त्रमाल्यानुलेपनम् ।
गोमहिष्यश्च करभबलीवर्दादिकं तथा ॥
आदर्श व्यजनछत्रशयनासनपादुकाः ।
शिविका रथगन्त्रीका मुखवासाश्च शोभनाः ॥
मनोज्ञाः पटवासाश्च सुगन्धाश्चूर्णमुष्टयः ।
अङ्गारधानिकाः शीते योगपट्टाश्च यष्टयः ॥
कटिसूत्राणि शिक्यानि मेखलाश्चैव कम्बलाः ॥
यज्ञोपवीतं पीठानि कौपीनं कुण्डिकास्तथा ।
वस्तून्येतान्यथान्यानि पितॄणां प्रीतये बुधैः ॥
यथोपयोगं देयानि ब्राह्मणेभ्यो यथाविधि ।
एवं ददाति यो भक्त्या यथालाभं यथाधनम् ॥
सोऽश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ।

स्कन्दपुराणे—

अलङ्कारान् बहुविधान् काञ्चनेन विनिर्मितान् ।
रत्नैर्विरचितांश्चापि क्षौमादीन्यंशुकान्यपि ॥
कर्पूरागुरुकस्तूरी कुङ्कुमादीनि यान्यपि ।
गन्धद्रव्याणि रम्याणि श्रीखण्डशकलान्यपि ॥

कर्पूरादेश्च भाण्डानि ताम्बूलावपनं तथा ।
दीपपात्रं धूपपात्रं तथा भोजनभाजनम् ॥
भाजनाधारयन्त्राणि पतद्ग्राहस्तथैव च ।
आन्दोलकान्मञ्चकांश्च मृदुला हंसतूलिका ॥
कटाहास्ताम्रधातूत्थास्ताम्रजाः कलशास्तथा ।
चरुका दर्विका लौही भाण्डानि विविधानि च ॥
ताम्रादिधातुसम्भूताः गडूकाः करकास्तथा ।
भद्रपीठानि पीठानि गद्दिकाश्चासनानि च ॥
वस्त्रपूर्णाश्च मञ्जूषा मनोज्ञाश्च विहङ्गिकाः ।
मीमांसादेश्च शास्त्रस्य पुस्तकानि नवानि च ॥
सौधानि कमनीयानि वापीकूपादिकं तथा ।
ग्रामान् क्षेत्राणि केदारान् उद्यानान्यथ वाटिकाः ॥
वृक्षान् लतावितानानि पूगादिद्रुमवाटिकाः ।
शकटान् सोपकरणान् लाङ्गलानि च भूरिशः ॥
मुसलोलूखलं दात्रं शिला मन्थानमण्डकम् ।
तथाञ्जनशलाकाश्च केशानाञ्च प्रसाधनम् ॥
एतान् पदार्थानन्यांश्च चतुराश्रमकाङ्क्षितान् ।
आत्मनश्च प्रियान् दद्यात् पितॄणां युक्तमानसः ॥
विभवस्यानुसारेण देशकालानुरूपतः ।
एतान् दद्यात्तु यः सम्यक् पदार्थान् भोगसाधनान् ॥
न तस्य दुर्लभं किञ्चिदिह लोके परत्र च ।

रामायणे—

समतीते दशाहे तु कृतशौचो विधानतः ।
चक्रे द्वादशकं श्राद्धं त्रयोदशकमेव च ॥
ततश्चोद्दिश्य पितरं ब्राह्मणेभ्यो ददौ धनम् ।
महार्हाणि च रत्नानि गाश्च वाहनमेव च ॥

अत्र भरत इति शेषः ।

ब्रह्मवैवर्त्ते—

अतः परं प्रवक्ष्यामि दानानि सफलानि च ।
तारणानि पितॄणां वै स्वर्ग्याण्यात्मसुखानि च ॥
लोके श्रेष्ठतमं यच्च आत्मनश्चापि यत्प्रियम् ।
सर्वं पितॄणां दातव्यं तेषामेवाशिषोर्थिना ॥
वापीसंक्रीडनं दत्वा महासत्रफलं लभेत् ।
वनं पुष्पफलोपेतं दत्वा गोमेधमश्नुते ॥

तथा

दद्याद् यः शिशिरे वह्निं बहुकाष्ठं प्रयत्नतः।
कायाग्निदीप्तिप्राकाश्यं रूपं सौभाग्यमेति सः॥
इन्धनानि तु यो दद्याद्द्विजेभ्यः शिशिरागमे।
नित्यं जयति संग्रामे श्रिया युक्तश्च दीप्यते॥

तथा—

शरणं सर्वसम्पूर्णं सशय्यासनभोजनम्।
श्राद्धे दत्त्वा यतिभ्यस्तु नाकपृष्ठे महीयते॥

'शरणम्' आवासः।

मुक्तावैदूर्यवासांसि रत्नानि विविधानि च।
वाहनानि च दिव्यानि जायन्ते तस्य कोटिशः॥
गन्धर्वाप्सरसस्तत्र गायन्ते वादयन्ति च।
सुमहज्ज्वलनप्रख्यं सर्वकामसमन्वितम्॥
सूर्य्यचन्द्रप्रभन्दिव्यं विमानं लभतेऽक्षयम्।
अप्सरोभिः परिवृतं कामगन्तु मनोजवम्॥
वसते स विमानाग्रे स्तूयमानः समन्ततः।
दिव्यैः पुष्पैः प्रसिञ्चन्ति चूर्णमुष्टिभिरेव च॥
कन्यायुवत्यस्तासाञ्च हासाभरणनिस्वनैः।
सुखिनस्ते विबुध्यन्ति सततं हि मनोरमैः॥
अश्वदानसहस्रेण रथदानशतेन च।
दन्तिदानसहस्राच्च योगिष्वावसथो वरः॥
अश्वमेधसहस्रेण राजसूयशतेन च।
पुण्डरीकसहस्रेण योगिष्वावसथो वरः॥

तथा—

भोजनाग्रासनं दत्त्वा अतिथिभ्यः कृताञ्जलिः।
सर्वयज्ञक्रतूनाञ्च फलं प्राप्नोत्यनुत्तमम्॥
क्षिप्रमत्युष्णमक्लिष्टं स्वादु दत्तम्बुभुक्षिते।
सव्यञ्जनं सदा स्निग्धं सत्कृत्य च प्रयत्नतः॥
प्रतिश्रयं सदा दद्यादतिथिभ्यः कृताञ्जलिः।
देवावासं प्रतिष्ठन्ति दिव्यातिथ्यैः सहस्रशः।
सर्वाण्येतानि यो दद्यात् पृथिव्यामेकराड् भवेत्॥
त्रिभिर्द्वाभ्यामथैकेन दानेन तु सुखी भवेत्।
दानानि परमो धर्मः सद्भिः सत्कृत्य पूजितः॥
त्रैलोक्यस्याधिपत्यं हि दानादेव ध्रुवं स्थितिः।
राज्यभ्रष्टस्तु राजा स्यादधनः स्वोत्तमं धनम्॥

क्षीणायुर्लभते चायुः पितृभक्तः सदा नरः ।
यान् कामान्मनसा चेच्छेत्तांस्तस्य पितरो ददुः ॥
यानि रत्नानि मेदिन्यां वाहनानि स्त्रियस्तथा ।
क्षिप्रमाप्नोति तत्सर्वं पितृभक्तस्तु मानवः ॥

महाभारते—

अन्नपानाश्वगोवस्त्रछत्रशय्यासनानि च ।
प्रेतलोके प्रशस्तानि दानान्यष्टौ विशेषतः ॥
दासीदासानलङ्कारान् भोगोपकरणानि च ।
दत्त्वा पितृभ्यः प्राप्नोति साम्राज्यं नेह संशयः ॥

तथा—

इत्युक्त्वा धर्मराजस्तु वासुदेवस्य धीमतः ।
मातुलस्य च वृद्धस्य रामादीनां तथैव च ॥
श्राद्धान्युद्दिश्य सर्वेषां चकार विधिवत्तदा ।
ददौ रत्नानि वासांसि ग्रामानश्वान्रथानपि ॥
स्त्रीश्चैव द्विजमुख्येभ्यस्तथा शतसहस्रशः ।
अलङ्कारांस्तथाश्वांश्च गाश्च काम्या वरस्त्रियः ॥
आदिश्यादिश्य विप्रेभ्यो ददौ स नृपसत्तम ।
द्रोणं सात्यञ्च भीष्मञ्च सोमदत्तञ्च वाल्हिकम् ॥
दुर्योधनञ्च राजानं पुत्रांश्चैव पृथक् पृथक् ।
जयद्रथपुरोगांश्च सुहृदश्चैव सर्वशः ॥
आदिश्यादिश्य विप्रेभ्यो ददौ च नृपसत्तम ।
तथा स पुत्रपौत्राणां पितृणामात्मनस्तथा ॥
गान्धारस्य महातेजाः प्रददौ चौर्द्ध्वदेहिके ।

श्राद्धमेवोपक्रम्य विष्णुधर्मोत्तरे पितृगाथाः ॥

अपि स्यात् स कुलेऽस्माकं कश्चित्पुरुषसत्तमः ।
दद्यात्कृष्णाजिनं यो नः स्वर्णश्रृङ्गं विधानतः ॥
अपि स्यात्स कुलेऽस्माकं कश्चित्पुरुषसत्तमः ।
प्रसूयमानां यो धेनुं दद्याद् ब्राह्मणपुङ्गवे ॥
अपि स्यात्स कुलेऽस्माकं कश्चित्पुरुषसत्तमः ।
कूपारामतडागानां वापीनां यश्च कारकः ॥

आह बौधायनः—

वापीकूपतडागानि वृक्षानारामभेव च ।
शालीक्षुक्षेत्रकेदाराः समृद्धाः पुष्पवाटिकाः ॥
श्राद्धेषु दत्त्वा प्रयतः पितृनात्मानमेव च ।
उद्धरत्येनसो दुःखाद्यावदाभूतसंप्लवम् ॥

तदेवमेतेष्वभिहितेषु प्रदेयेषु यानि प्रदेयानि श्राद्धप्रयोगान्तर्गतार्चनाङ्गभूतानि तानि तत्तत्पितृनामगोत्रसङ्कीर्त्तनपूर्वकं पितृभ्य एव देयानि । यानि पुनरन्यानि गोभूहिरण्यकृष्णाजिनप्रभृतीनि श्राद्धकाले स्वपितृणां श्रेयः सिद्ध्यर्थं दानखण्डोक्त-प्रकारेण ब्राह्मणेभ्यः प्रदेयानि । तत्रनिमित्तान्तरापेक्षा न कर्त्तव्या श्राद्धमेवाधिकृत्य तेषां विधानात् । तानि चैवं प्रदत्तानि पितृणामात्मनश्च विशिष्टस्वर्गादिफलप्राप्त्यर्थं-भवन्तीति ।

इति प्रकीर्णकम् ।

अथ दक्षिणाद्रव्याणि ।

ब्रह्मपुराणे—

यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे ।
दक्षिणार्थन्तु तद्देयं तस्य तस्याक्षयार्थिना ॥

मत्स्यपुराणे—

सतिलं नामगोत्रेण दद्याच्छक्त्याथ दक्षिणाम् ।
गो-भू-हिरण्य-वासांसि यानानि शयनानि च ॥
दद्याद्यदिष्टं विप्राणामात्मनः पितुरेव वा ।
वित्तशाठ्येन रहितः पितृभ्यः प्रीतिमाचरन् ॥

'नामगोत्रेण' सम्प्रदानस्यात्मनश्च नामगोत्रोच्चारणेन ।

नामगोत्रे समुच्चार्य सम्प्रदानस्य चात्मनः ॥
सम्प्रदेयं प्रयच्छन्ति कन्यादाने तु पुंस्त्रयम् ।

इति व्यासस्मरणात् ।

'शक्त्या' स्वशक्त्यनुसारेण 'पितृभ्यः प्रीतिमाचरन्' पैत्रेण कर्मणा पितॄन् प्रीणयन् ।

आह जमदग्निः ।

सतिलं नामगोत्रेण दद्याच्छक्त्याथ दक्षिणाम् ।
हिरण्यधनवासांसि धर्म्याणि शयनानि च ॥

वह्निपुराणे—

भक्त्याथ दक्षिणा देया श्राद्धकर्मणि शक्तितः ।
ग्रामान् क्षेत्राण्यथारामान् विचित्राः पुष्पवाटिकाः ॥
बहुभौमानि रम्याणि शयनानि गृहाणि च ।
सुवर्ण-रत्न-वासांसि रजतं भूषणानि च ।
अनडुहो महिष्यश्च विधिधान्यासनानि च ॥
पादुका दासदासीश्च छत्र-व्यजनचामरम् ।
लाङ्गलान् शकटान् गन्त्रीर्गृहोपकरणानि च ॥
येन येनोपयोगोऽस्ति विप्राणामात्मनस्तथा ।
तत्तत्प्रदेयं श्राद्धेषु दक्षिणार्थं हितैषिणा ॥

यथा यथा हिं गुणवद्द्रव्यं भूरि यथा यथा।
जायते फलभूयस्त्वं श्राद्धकर्त्तुस्तथा तथा॥

वायुपुराणे —

धेनुं श्राद्धेषु यो दद्यात् गृष्टिं कुम्भोपदोहनाम्।
गावस्तमुपतिष्ठन्ति गवां पुष्टिश्च जायते॥
शयनासनानि तथा भूमयो वाहनानि च।
श्राद्धेष्वेतानि यो दद्यादश्वमेधफलं लभेत्॥
सर्पिः पूर्णानिपात्राणि श्राद्धे सत्कृत्य दापयेत्।
कुम्भादिदोहधेनूनां बह्वीनां फलमश्नुते॥
यथेष्टां दक्षिणां दद्यात् पुण्डरीकफलं लभेत्।

'पुण्डरीकः' क्रतुविशेषः।

रम्यमावसथं दत्त्वा राजसूयफलं लभेत्।
कूपाराम-तडागानि क्षेत्रघोषगृहाणि च॥
गां दत्त्वा मोदते स्वर्गे नित्यमाचन्द्रतारकम्।
स्वास्तीर्णं शयनं दत्त्वा श्राद्धे रत्नविभूषितम्॥
पितरस्तस्य तुष्यन्ति स्वर्गे चानन्त्यमश्नुते।

ब्रह्माण्डपुराणे—

सौवर्णरौप्यपात्राणि मनोज्ञानि शुभानि च।
हस्त्यश्व-रथ-यानानि समृद्धानि गृहाणि च॥
उपानत्पादुकाच्छत्रचामराण्यजिनानि च।
यज्ञेषु दक्षिणा पुण्या सेति सञ्चिन्तयेत्तदा॥
दरिद्रोऽपि यथाशक्ति दद्याद्विप्रेषु दक्षिणाम्।

सैवेयमिति बुद्धिः कार्येत्यर्थः।

सौरपुराणे—

बह्वीभिर्दक्षिणाभिर्यः श्राद्धे प्रीणयति द्विजान्।
स पितॄणां प्रसादेन याति स्वर्गमनन्तकम्॥
अशक्तस्तु यथाशक्त्या श्राद्धे दद्यात्तु दक्षिणाम्।
अदक्षिणन्तु यच्छ्राद्धं ह्रियते तद्धि राक्षसैः॥
यज्ञोपवीतमथवा ह्यतिदारिद्रपीडितः।
प्रदद्याद्दक्षिणार्थं वै तेन स्यात् कर्म सद्गुणम्॥

इति दक्षिणाद्रव्यनिरूपणम्।

इति श्रीमहाराजाधिराज-श्रीमहादेवीय-समस्तकरणाधिपति
पण्डित-श्री हेमाद्रिविरचिते चतुर्वर्गचिन्तामणौ
परिशेषखण्डे श्राद्धकल्पे श्राद्धोपकरणं नाम
नवमोऽध्यायः॥